नमो नमो निम्मल दंसणस्स



# आगमसुत्ताणि
## (सटीकं)

भागः - २७

: संशोधक सम्पादकश्च :

**मुनि दीपरत्नसागर**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित सुशील सुधर्मसागर गुरूभ्यो नमः

# आगम सुत्ताणि (सटीकं)

| भाग : २७ | |
|---|---|
| ४२ | दशवैकालिक-मूलसूत्रं |

-: संशोधक : सम्पादकश्च :-

## मुनि दीपरत्नसागर

ता. १४-४-२००० रविवार २०५६ चैत्र सुद ११

४५-आगम सुत्ताणि-सटीकं
मूल्य रू. ११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं. - १३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दशवैकालिक-मूलसूत्रस्य विषयानुक्रमः


| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| - | उपोद्घात-निर्युक्तिः | ३ | -३५० | अध्ययनं-७ वाक्यशुद्धिः | १८८ |
| १-५ | अध्ययनं-१ द्रुमपुष्पिका | १६ | -४१४ | अध्ययनं-८ आचारप्रणिधी | २०४ |
| -१६ | अध्ययनं-२ श्रामण्यपूर्वं | ७४ | -४८४ | अध्ययनं-९ विनयसमाधिः | २१९ |
| -३१ | अध्ययनं-३ क्षुल्लिकाचारकथा | ८८ | -५०५ | अध्ययनं-१० सभिक्षुः | २३७ |
| -७५ | अध्ययनं-४ षड्जीवनिकाया | १०५ | -५२४ | चूलिका-१ रतिवाक्यं | २४७ |
| -२२५ | अध्ययनं-५ पिण्डैषणा | १४३ | -५४० | चूलिका-२ विविक्त चर्या | २५६ |
| -२९३ | अध्ययनं-६ महाचारकथा | १७१ | - | उपसंहार-निर्युक्तिः | २६१ |


| | | |
|---|---|---|
| सूत्र मूलाङ्कः | - | ५४० |
| निर्युक्ति-गाथा | - | ३७२ |
| भाष्य-गाथा | - | ६३ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્‌ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અટ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

**શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स
पंचम गणधर श्री सुधर्मा स्वामिने नमः

# ४२ दशवैकालिक-मूलसूत्रं

## सटीकं

[तृतीय मूलसूत्रम्]

शय्यंभवसूरि विरचित मूलं + भद्रबाहुस्वामिरचितं निर्युक्तिः
( भाष्यगाथा )+हरिभद्रसूरिरचिता वृत्तिः

### उपोद्घातः निर्युक्तिः

**जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान् ।**
**विमलस्त्रासविरहितस्त्रिलोकचिन्तामणिर्वीरः ॥**

**वृ.** इहार्थतोऽर्हत्प्रणीतस्य सूत्रतो गणधरोपनिबद्धपूर्वगतोद्धृतस्य शारीरमानसादिकटुकदुःखसंतानविनाशहेतोर्दशकालिकाभिधानस्य शास्त्रस्यातिसूक्ष्ममहार्थगोचररस्य व्याख्या प्रस्तूयते-तत्र प्रस्तुतार्थप्रचिकटयिषयैवेष्टदेवतानमस्कारद्वारेणाशेषविघ्नविनायकापोहसमर्थां परममङ्गलालयामिमां प्रतिज्ञागाथामाह निर्युक्तिकारः -

**नि.[१]** सिद्धिगइमुवगयाणं कम्मविसुद्धाण सव्वसिद्धाणं।
नमिऊण दसकालियनिज्जुत्तिं कित्तइस्सामि।

**वृ.** सिद्धिगतिमुपगतेभ्यो नत्वा दशकालिकनिर्युक्तिं कीर्तयिष्यामीति क्रिया। तत्र सिद्धयन्ति-निष्ठितार्था भवन्त्यस्यामिति सिद्धिः-लोकाग्रक्षेत्रलक्षणा, तथा चोक्तम् - ''इह बोंदिं चइत्ता णं, तत्थ गंतूण सिज्झइ'' । गम्यत इति गतिः, कर्मसाधनः सिद्धिरेव गम्यमानत्वाद्गतिः सिद्धिगतिस्तामुपसामीप्येन गताः - प्राप्तास्तेभ्यः, सकललोकान्तक्षेत्रप्राप्तेभ्य इत्यर्थः, प्राकृतशैल्या चतुर्थ्यर्थे षष्ठी, यथोक्तम् - ''छट्ठीविभत्तीए भण्णइ चउत्थी'' । तत्र एकेन्द्रियाः पृथिव्यादयः सकर्मका अपि तदुपगमनमात्रमधिकृत्य यथोक्तस्वरूपा भवन्त्यत आह - 'कर्मविशुद्धेभ्यः' क्रियते इति कर्म-ज्ञानावरणीयादिलक्षणं तेन विशुद्धा-वियुक्ताः कर्मविशुद्धाः- कर्मकलङ्करहिता इत्यर्थः, तेभ्यः कर्मविशुद्धेभ्यः । आह-एवं तर्हि वक्तव्य, न सिद्धिगतिमुपगतेभ्यः, अव्यभिचारात्, तथाहि-कर्म-विशुद्धाः सिद्धिगतिमुपगता एव भवन्ति, न, अनियतक्षेत्रविभागोपगतसिद्धप्रतिपादनपरदुर्नयनिरासार्थत्वादस्य, तथा चाहुरेके -

''रागादिवासनामुक्तं, चित्तमेव निरामयम्।
सदाऽनियतदेशस्थं, सिद्ध इत्यभिधीयते॥

इत्यलं प्रसङ्गेन। ते च तीर्थादिवसिद्धभेदादनेकप्रकार भवन्ति, तथा चोक्तम् - ''तित्थसिद्धा अतित्थसिद्धा तित्थगरसिद्धा अतित्थगरसिद्धा सयंबुद्धसिद्धा पत्तेयबुद्धसिद्धा बुद्धबोहियसिद्धा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थीलिंगसिद्धा पुरिसलिंगसिद्धा नपुंसगलिंगसिद्धा सलिंगसिद्धा अन्नलिंगसिद्धा गिहिलंग-सिद्धा एगसिद्धा अनेगसिद्धा" इत्यत आह – 'सर्वसिद्धेभ्यः' सर्वे च त सिद्धाश्चेति समासस्तेभ्यः, अथवा – 'सिद्धिगतिमुपगतेभ्यः' इत्यनेन सर्वथा सर्वगतात्मसिद्धपक्षप्रतिपादनपरदुर्नयस्य व्यवच्छेदमाह, तथा चोक्तमधिकृतनयमतानुसारिभिः –

"गुणसत्त्वान्तरज्ञानान्निवृत्तप्रकृतिक्रियाः।
मुक्ताः सर्वत्र तिष्ठन्ति, व्योमवत्तापवर्जिताः॥"

व्यवच्छेदश्चैतेषां सामीप्येन सर्वात्मना सिद्धिगतिगमनाभावात्, 'कर्मविशुद्धेभ्यः' इत्यनेन तु सकर्मकाणिमादिविचित्रैश्वर्यवत्सिद्धप्रतिपादनपरस्येति, उक्तं च प्रक्रान्तनयदर्शनाभिनिविष्टैः –

"अणिमाद्यष्टविधं प्राप्यैश्वर्यं कृतिनः सदा।
मोदन्ते सर्वभावज्ञास्तीर्णाः परमदुस्तरम्॥१॥"

इत्यादि, व्यवच्छेदश्चैतेषांकर्मसंयोगेन अनिष्ठितार्थत्वाद्वस्तुतः सिद्धस्तानुपपत्तेरिति, 'सर्वसिद्धेभ्यः' इत्यनेन तु भङ्ग्यैव सर्वथा अद्वैतपक्षसिद्धप्रतिपादनपरस्येति, तथा चोक्तं –

"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः।
एकधा बहुधा चैव, दृश्यते जलचन्द्रवत्॥"

व्यवच्छेदश्चास्य सर्वथा अद्वैते बहुवचनगर्भसर्वज्ञशब्दाभावात् (सिद्धिगतिगमनाभावात्)। 'नत्वा' प्रणम्येति, अनेन तु समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययविधानान्नित्यानित्यैकान्त-वादासाधुत्वमाह, तत्र क्त्वाप्रत्यार्थानुपपत्तेः, तत्र नित्यैकान्तवादे तावदात्मन एकान्तनित्यत्वाद-प्रच्युतानुत्पन्नस्थिरैकस्वभावत्मादिभन्नाकालक्रियाद्वयकर्तृत्वानुपपत्तेः, क्षणिकैकान्तवादे चात्मन उत्पत्तिव्यतिरेकेण व्यापाराभावादिभन्नकालक्रियाद्वयकर्तृत्वानुपपत्तिरेवेत्यलं विस्तरेण, गमनि-कामात्रमेवैतदिति। भवति च चतुर्थ्यप्येवं नमनक्रियायोगे, अधिकृतगाथासूत्रान्यथानुपपत्तेः, आप्तश्चनिर्युक्तिकारः, 'पित्रे सवित्रे च सदा नमामी' त्येवमादिविचित्रप्रयोगदर्शनाच्च, कर्मणि वा षष्ठी। सर्वसिद्धेभ्यो नत्वा किमित्याह – 'दशकालिकनिर्युक्तं कीर्तयिष्यामि' तत्र कालेन निर्वृत्तं कालिकं, प्रमाणकालनेति भावः, दशाध्ययनभेदात्मकत्वाद्दशप्रकारं कालिकं प्रकारशब्द-लोपाद्दशकालिकं, विशब्दार्थं तूत्तरत्र व्याख्यास्यामः, तत्र निर्युक्तिरिति–निर्युक्तानामेव सूत्रार्थानां युक्तिः–परिपाट्य योजनं निर्युक्तयुक्तिरिति वाच्ये युक्तशब्दलोपान्निर्युक्तिस्तां–विप्रकीर्णार्थ-योजनां व्याख्यास्यामि कीर्त्तयिष्यामीति गाथार्थः॥ शास्त्राणि चादिमध्यावसानङ्गलभाञ्जि भवन्तीत्यत आह –

**नि.[२/१]** आइमज्झवसाणे काउं मंगलपरिग्गहं विहिणा।

**वृ.** शास्त्रस्यादौ–प्रारम्भे मध्ये–मध्यविभागे अवसाने–पर्यन्ते, किं? कृत्वा मङ्गलपरिग्रहम्, कथम्? –'विधिना' प्रवचनोक्तेन प्रकारेण, आह–किमर्थं मङ्गलत्रयपरिकल्पनम्? इति, उच्यते, इहादिमङ्गलपरिग्रहः सकलविघ्नापोहेनाभिलषितशास्त्रार्थपारगनार्थं, तत्स्थिरीकरणार्थं च मध्यमङ्गलपरिग्रहः, तस्यैव शिष्यप्रशिष्यसन्तानाव्यवच्छेदायावसानमङ्गलपरिग्रह इति। अत्र चाक्षेपपरिहारावश्यकविशेषविवरणादवसेयौइति। सामान्यतस्तु सकलमपीदं शास्त्र मङ्गलं, निर्जरार्थत्वात्तपोवत्, न चासिद्धो हेतुः, यतो वचनविज्ञानरूप शास्त्रं, ज्ञानस्य च निर्जरार्थता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादितैव, यत उक्तम्-

"जं नेरईओ कम्मं खवेइ बहुयाहिं वासकोडीहिं।
तं नाणी तिहि गुत्तो खवेइ ऊसासमेत्तेणं ॥"

इत्यादि। इह चादिमङ्गलं द्रुमपुष्पिकाध्ययनादि, धर्मप्रशंसाप्रतिपादकत्वात्तत्स्वरूपत्वादिति, मध्यमङ्गलं तु धर्मार्थकामाध्ययनादि, प्रपञ्चाचारकथाद्यभिधायकत्वात्, चरममङ्गलं तु भिक्षवध्ययनादि, भिक्षुगुणाद्यवलम्बनत्वादित्येवमध्ययनविभागतो मङ्गलत्रयविभागो निदर्शितिः, अधुना सूत्रविभागेन निदर्श्यते-तत्र चादिमङ्गलम् 'धम्मो मंगलं' इत्यादिसूत्रं, धर्मोपलक्षितत्वात्, तस्य च मङ्गलत्वादिति, मध्यमङ्गलं पुनः 'नाणदंसणे' त्यादि सूत्रं, ज्ञानोपलक्षितत्वात्, तस्य च मङ्गलत्वादिति, अवसानमङ्गलं तु 'निक्खममममाणा इय' इत्यादि, भिक्षुगुणस्थिरीकरणार्थं विविक्तचर्याभिधायकत्वात्, भिक्षुगुणानां च मङ्गलत्वादिति। आह-मङ्गलमिति कः शब्दार्थः ?, उच्यते, 'अगिरगिलवगिमगीति' दण्डकधातुः, अस्य "इदितो नुम् धातो" रिति नुमि विहिते औणादिकालचप्रत्ययान्तस्य अनुबन्धलोपे कृते प्रथमैकवचनान्तस्य मङ्गलमितिरूपं भवति। मङ्ग्यते हितमनेनेति मङ्गलं, मङ्ग्यतेऽधिगम्यते साध्यत इतियावत्, अथवा मङ्ग इति धर्माभिधानं, 'ला आदाने' अस्य धातोर्मङ्गे उपपदे "आतोऽनुपसर्गे कः" इति कप्रत्ययान्तस्यानुबन्धलोपेकृते "आतो लोप इटि च" क्ङिति इत्यनेन सूत्रेणाकारलोपे च कृते प्रथमैकवचनान्तस्यैव मङ्गलमिति भवति, मङ्गं लातीति मङ्गलं, धर्मोपादानहेतुरित्यर्थः, अथवा मां गालयति भवादिति मङ्गलं, संसारादपनयतीत्यर्थः तच्च नामादि चतुर्विधं, तद्यथानाम मङ्गलं स्थापनामङ्गलं द्रव्यमङ्गलं भावमङ्गलं चेति, एतेषां च स्वरूपमावश्यकविशेषविवरणादवसेयमिति॥

अमुमेव गाथार्थमुपसंहरन्नाह निर्युक्तिकारः-

**नि.[२/२]** नामाइमंगलंपिय चउव्विहं पन्नवेऊणं॥

**वृ.** नामादिमङ्गलं चतुर्विधमपि 'प्रज्ञाप्य' प्ररूप्येति गाथार्थः॥ तत्र समानकर्तृक्योः पूर्वकाले क्त्वाप्रत्ययविधानात् प्रज्ञाप्य किमत आह -

**नि.[३]** सुयनाणे अनुओगेणाहिगयं सो चउव्विहो होइ।
चरणकरणानुओगे धम्मे गणिए (काले) य दविए य॥

**वृ.** श्रुतं च तद् ज्ञानं च श्रुतज्ञानं तस्मिन् श्रुतज्ञाने अनुयोगेनाधिकृतम्, अनुयोगेनाधिकार इत्यर्थः, इयमत्र भावना-भावमङ्गलाधिकारे श्रुतज्ञानेनाधिकारः, तथा चोक्तम् -

"एत्थं पुन अहिगारो सुयनाणेणं जओ सुएणं तु।
सेसाणमप्पणाऽविय अनुओगु पईवदिट्ठंतो॥"

तस्य चोद्देशादयः प्रवर्तन्ते इति, उक्तं च - "सुअनाणस्स उद्देसो समुद्देसो अणुन्ना अनुओगो पवत्तइ"तत्रादावेवोद्दिष्टस्य समुद्दिष्टस्य समनुज्ञा-तस्य च सतः अनुयोगो भवतीत्यतो निर्युक्तिकारेणाभ्य-धायि 'श्रुतज्ञानेऽनुयोगेनाधिकृत' मिति। 'सः' अनुयोगश्चतुर्विधो भवति, कथम् ? - 'चरणकरणा-नुयोगः' चर्यत इति चरणं-व्रतादि, यथोक्तम्, -

"वय समणधम्मसंजमवेयावच्चं च बंभगुत्तीओ।
नाणादितियं तव कोहनिग्गहाई चरणमेयं॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियते इति करणं-पिण्डविशुद्धयादि, उक्तं च -

"पिंडविसोही समिई भावन पडिमा य इंदियानिरोहो।
पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु॥"

चरणकरणयोरनुयोगश्चरणकरणानुयोगः, अनुरूपो योगोऽनुयोगः-सूत्रस्यार्थेन सार्द्धमनुरूपाः सम्बन्धो, व्याख्यानमित्यर्थः, एकारान्तः शब्दः प्राकृतशैल्या प्रथमा[ द्वितीया ]न्तोऽपि द्रष्टव्यः, यथा "कयरे आगच्छइ दित्तरूवे" इयतादि, 'धर्म' इती धर्मकथानुयोगः 'काले' चेति कालानुयोगश्च गणितानुयोगश्चैत्यर्थः 'द्रव्य चे'ति द्रव्यानुयोगश्च। तत्र कालिकश्रुतं चरणकरणानुयोगः ऋषि-भाषितान्युत्तराध्ययनादीनि धर्मकथानुयोगः, सूर्यप्रज्ञप्यादीनि गणितानुयोगः, दृष्टिवा दस्तु द्रव्यानु-योग इति उक्तं च- कालिय सुअं च इसिमासियाइ तइया य सूरपन्नत्ती सव्वोय दिट्ठिवाओ चउत्थओ होइ अनुओगो॥"

इति गाथार्थः॥ इह चार्थतोऽनुयोग द्विधा-अपृथक्त्वानुयोगः पृथक्त्वानुयोगश्च, तत्रापृथक्त्वा-नुयोगो यत्रैकस्मिन्नेव सूत्रे सर्व एव चरणादयः प्ररूप्यन्ते, अनन्तगमपर्यात्वात्सूत्रस्य, पृथक्त्वानु-योगश्च क्वचित्सूत्रे चरणकरणमेव क्वचित्पुनर्धर्मकथैवेत्यादि, अनयोश्च वक्तव्यता-

"जावंत अज्जवइरा अपुहुत्तं कालियानुओगस्स।
तेनारेण पुहुत्तं कालियसुेय दिट्ठिवाए य॥"

इत्यादेर्ग्रन्थादावश्यकविशेषविवरणाच्चावसेयेति॥ इह पुनः पृथक्त्वानुयोगेनाधिकारः,

**नि.[४]** अपुहुत्तपुहुत्ताइं निद्दिसिउं एत्थ होइ अहिगारो।
चरणकरणानुओगेन तस्स दारा इमे हुंति॥

वृ. 'अपृथक्त्वपृथक्त्वे' लेशतो निर्दिष्टस्वरुपे निर्दिश्य 'अत्र' प्रक्रमे भवत्यधिकारः, केन? - 'चरणकरणानुयोगेन' 'तस्य' चरणकरणानुयोगस्य 'द्वाराणि' प्रवेशमुखानि 'अमूनि' वक्ष्यमाण-लक्षणानि भवन्तीति गाथार्थः॥

**नि.[५]** निक्खेवेगट्ठनिरुत्ताविही पवित्ती य केन वा कस्स?
तद्दारभेयलक्खण तयरिहपरिसा य सुत्तत्थो॥

वृ. अस्याः प्रपञ्चार्थः आवश्यकविशेषविवरणादवसेयः, स्थानशून्यार्थं तु संक्षेपार्थः प्रतिपाद्यत इति, 'निक्खेव' त्ति अनुयोगस्य निक्षेपः कार्यः, तद्यथा-नामानुयोग इत्यादि, 'एगट्ठत्ति' तस्यैव एकार्थिकानि वक्तव्यानि, तद्यथा-अनुयोगो नियोग इत्यादि, 'निरुत्ति' त्ति तस्यैव निरुक्तं वक्तव्यम्, अनुयोजनमनुयोगः अनुरूपो वा योग इत्यादि, 'विहि'त्ति तस्यैव विधिर्वक्तव्यो, वक्तुः श्रोतुश्च तत्र वक्तुः

"सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसिओ भणिओ।
तइओ य निरवसेसो एस विही होइ अनुओगे॥"

श्रोतुश्चायम्-"भूयं हुंकारं वा बाढकार पडिपुच्छ वीमंसा।
तत्तो पसंगपारायणं च परिनिट्ठ सत्तमए॥"

पवित्ती य'त्ति अनुयोगस्य प्रवृत्तिश्च वक्तव्या, सा चतुर्भङ्गानुसारेण विज्ञेया, उक्तं च -

"निच्चं गुरू पमाई सीसा य गुरू न सीसगा तह य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपमाइ गुरू सीसा पमाइणो दोवि अपमाई ॥१॥
पढमे नत्थि पवित्ती बीए तइए य णत्थि थोवं वा।
अत्थि चउत्थि पवित्ती एत्थं गोणीए दिट्ठंतो ॥२॥
अप्पण्हुया उ गोणी नेव य दोद्धा समुज्जओ दोढुं।
खीरस्स करो पसवो ? जइवि य बहुखीरदा सा उ ॥३॥
गोणिसरिच्छो उ गुरू दोहा इव साहुणो समक्खाया।
खीरं अत्थपवित्ती नत्थि तहिं पढमबितिएसु ॥५॥
अहवा अनिच्छमाणं अवि किं चि उ जोगिणो पवत्तंति।
तइए सारंतमो होज्ज पवित्ती गुणित्ते वा ॥६॥
अपमाई जत्थ गुरू सीसाविय विनयगहणसंजुत्ता।
धणियं तत्थ पवित्ती खीरस्सव चरिमभंगंमि ॥७॥

'केन'त्ति केनानुयोगः कर्त्तव्य इति वक्तव्यं, तत्र य इत्थंभूत आचार्यस्तेन कर्त्तव्यः, तद्यथा–

"देसकुलजाइरूवी संघयणाधिइजुओ अनासंसी।
अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ॥१॥
जियपरिसो जियनिद्दो मज्झत्थो देसकालभावन्नू।
आसन्नलद्धपइभो नाणाविहदेसभासन्नू ॥२॥
पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू।
आहरणहेउकारणनयनिउणो गाहणाकुसलो ॥३॥
ससमयपरसमयविऊ गंभीरो दित्तियं सिवो सोमो।
गुणसयकालिओ जुग्गो पवयणसारं परिकहेउं ॥४॥

आसामर्थः कल्पादवसेयः, प्राथमिकदशकालिकव्याख्याने तु लेशत उच्यते–आर्यदेशोत्पन्नः, सुखावबोधवाक्यो भवतीति देशग्रहणं, पैतृकं कुलं विशिष्टकुलोद्भवो यथोत्क्षिप्तभारवहने न श्राम्यति, मातृकी जातिः तत्सम्पन्नो विनयान्वितो भवति, रूपवानादेयवचनो भवति, आकृतौ च गुणा वसन्ति, संहननधृतियुक्तो व्याख्यानतपोऽनुष्ठानदिषु न खेदं याति, अनाशंसी न श्रोतृभ्यो वस्त्राद्याकांक्षति, अविकत्थनो बहुभाषी न भवति, अमायी न शाठ्येन शिष्यान् वाहयति, स्थिरपरिपाटी स्थिरपरिचित्तग्रन्थस्य सूत्रं न गलति, गृहीतवाक्योऽप्रतिघातवचनो भवति, जितपरिषत् परप्रवादिक्षोभ्यो न भवति, जितनिद्रोऽप्रमत्तत्वाद् व्याख्यानरतिर्भवति प्रकामनिकामशायिनश्च शिष्यांश्चोदयति, मध्यस्थः संवादको भवति, देशकालभावज्ञो देशादिगुणानबुद्ध्याप्रतिबद्धो विहरति देशनां च करोति, आसन्नलब्धप्रतिभोजात्युत्तरादिना निगृहीतः प्रत्युत्तरदानसमर्थो भवति, नानाविधदेशभाषाविधिज्ञो नानादेशजविनेयप्रत्यायनसमर्थो भवति, ज्ञानादिपञ्चविधाचारयुक्तः श्रद्धेयवचनो भवति, सूत्रार्थोभयज्ञः सम्यगुत्सर्गापवादप्ररूपको भवति, उदाहरणहेतुकारणनयनिपुणस्तद्गम्यान् भावान् सम्यक् प्ररूपयति नागममात्रमेव, ग्राहणाकुशलः शिष्याननेकधा ग्राहयति, स्वसमयपरसमयवित् सुखं परमातक्षेपमुखेन स्वसमयं प्ररूपयति, गम्भीरो महत्यप्यकार्ये न रुष्यति, दीप्तिमान् परप्रवादिक्षोभमुत्यादगति, शिवो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मारिरोगाद्युपद्रवविघाताकृद् भवति, सौम्यः प्रशान्तदृष्टितया सकलजनप्रीत्युत्पादको भवति, इत्थंभूत एव गुणशतकालितो योग्यः प्रवचनम्- आगमस्तस्य सारस्तं कथयितुमिति, यतोऽसावनेक-भव्यसत्त्वप्रबोधहेतुर्भवति, उक्तं च-

"गुणसुट्ठिअस्स वयणं घयमहुसित्तोव्व पावओ भाइ।
गुणहीनस्स न सोहइ नेहविहोणो जह पईवो॥"

तथा चान्येनाप्युक्तम्-

"क्षीरं भाजनसंस्थं न तथा वत्सस्य पुष्टिमावहति।
आवल्गमानशिरसो यथा हि मातृस्तनात्पिबतः॥१॥
तद्वत्सुभाषितमयं क्षीरं दुःशीलभाजनगतं तु।
न तथा पुष्टिं जनयति यथा हि गुणवन्मुखात्पीतम्॥२॥
शीतेऽपि यत्नलब्धो न सेव्यतेऽग्निर्यथा श्मशानस्थः।
शीलविपन्नस्य वचः पथ्यमपि न गृह्यते तद्वत्॥३॥
चारित्रेण विहीनः श्रुतवानपि नोपजीव्यते सद्भिः।
शीतलजलपरिपूर्णः कुलजैश्चाण्डालकूप इव॥४॥"

'कस्स'त्ति कस्यानुयोग? इति वक्तव्यं, तत्र सकलश्रुतज्ञानस्याप्यनुयोगो भवति, अमुं पुनः प्रारम्भमाश्रित्य दशकालिकस्येति। अत्राह-ननु 'दसकालियनिज्जुत्तिं कीत्तइस्सामित्ति" अस्मा-देव वचनतः प्रकृतद्वारार्थस्वागतत्वात् तदुपन्यासोऽनर्थक इति, न अधिकृतनिक्षेपाद्वार-कलापस्याशेषश्रुतस्कन्धविषयत्वात्, तद्बलेनैव च निर्युक्तिकारेणापि तथोपन्यस्तत्वात्, अस्मादेव स्थानादनयत्राप्यादो शास्त्राभिधानपूर्वक उपन्यासः क्रियत इति भावना। व्याख्यातं लेशतो निर्युक्तिगाथादलं, पश्चार्द्धं त्वध्ययनाधिकारे यथाऽवसरं व्याख्यास्यामः, यतस्तत्रैवोपक्र-माद्यनुयोगद्वारानुपूर्व्यादितद्भेदसूत्रादिलक्षणतदर्हपर्षदादयश्च वक्तुं शक्यन्ते, नान्यत्र, निर्विषयत्वा-दित्यलं प्रसङ्गेन॥ साम्प्रतं प्रकृतयोजनामेवोपदर्शयन्नाह निर्युक्तिकारः-

**नि.[६]** एयाइँ परूवेउं कप्पे वण्णियगुणेण गुरुणा उ।
अनुओगो दसवेयालियस्स विहिणा कहेयव्वो॥

**वृ.** 'एतानि' निक्षेपादिद्वाराणि 'प्ररूप्य' व्याख्याय कल्पे वर्णितगुणेन गुरुणा, षट्त्रिंशद्-गुणसमन्वितेनेत्यर्थः। अनुयोगो दशवैकालिकस्य 'विधिना' प्रवचनोक्तेन 'कथयितव्य' आख्यातव्य इति गाथार्थः॥ सम्प्रत्यजानानः शिष्यः पृच्छति-यदि दशकालिकस्यानुयोग-स्ततस्तद्दशकालिकं भदन्त! किमङ्गमङ्गानी? श्रुतस्कन्धः श्रुतस्कन्धाः? अध्ययनमध्ययनानि? उद्देशक उद्देशका? इत्यष्टौ प्रश्नाः, एतेषां मध्ये त्रयो विकल्पाः खलु प्रयुज्यनते, तद्यथा-दश-कालिकं श्रुतस्कन्धः अध्ययनानि उद्देशकाश्चेति, यतश्चैवमतो दशादीनां निक्षेतः कर्त्तव्यः, तद्यथा-दशानां कालस्य श्रुतस्कन्धस्याध्ययनस्य उद्देशकस्य चेति, तथा चाह निर्युक्तिकारः-

**नि.[७]** दसकालियंति नामं संखाए कालओ य निद्देसो।
दसकालियसुअखंधं अज्झयणुद्देस निक्खिविउं॥

**वृ.** 'दशकालिकं' प्राग्निरूपितशब्दार्थम् 'इति' एवंभूतं यत् 'नाम' अभिधानं, इदं किम्? -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्यानं संख्या तया, तथा 'कालतश्च' कालेन चायं-'निर्देशः' निर्देशनं निर्देशः, विशेष-भिधानमित्यर्थः, अस्य च निबन्धनं विशेषेण वक्ष्यामः 'मनगं पडुच्च' इत्यादिना ग्रन्थेन, यतश्चैवमतः 'दसकालियं'ति कालेन निर्वृत्तं कालिकं दशशब्दस्य कालशब्दस्य च निक्षेपः, निर्वृत्तार्थस्तु निक्षेपः, तथा श्रुतस्कन्धं तथाऽध्ययनं 'उद्देशं' तदेकदेशभूतं, किम्? -निक्षेप्तु-मनुयोगोऽस्य कर्त्तव्य इति गाथार्थः ॥ तत्र 'यथोद्देशं निर्देश' इति न्यायादधिकृतशास्त्राभिधानो-पयोगित्वाञ्च दशशब्दस्यैवादौ निक्षेपः प्रदर्शयते-तत्र दशैकाद्यायत्ता वर्त्तन्ते, एकाद्यभावे दशा-नामप्यभावाद्, अत एकस्यैव तावन्निक्षेपप्रतिपिपादयिषयाऽऽह-

नि.[८] नामं ठवणा दविए माउयपयसंगहेक्कए चेव।
पज्जावभावे य तहा सत्तेए एक्कगा होंति॥

वृ. इहैक एव एककः, तत्र 'नामैककः' एक इति नाम 'स्थापनैककः' एक इति स्थापना, 'द्रव्यैककं' त्रिधा-सचित्तादि, तत्र सचित्तमेकं पुरुषद्रव्यं, अचित्तमेकं रूपकद्रव्यं, मिश्रं तदेव कटकादिभूषिनं पुरुषद्रव्यमिति, 'मातृकापदैककम्' एकं मातृकापदं, तद्यथा-'उप्पन्ने इ वे' त्यादि, इह प्रवचने दृष्टिवादे समस्तनयवादबीजभूतानि मातृकापदानि भवन्ति, तद्यथा-"उत्पन्ने इ वा विगमे इ वा धुवे इ वा" अमूनि च मातृकापदानि "अ आ इ ई" इत्येवमादीनि, सकलशब्द-व्यवहारव्यापकत्वान्मातृकापदानि, इह चाभिधेयवल्लिङ्गवचनानि भवन्तीति कृत्वेत्थमुपन्यासः, 'सङ्ग्रहैककः' शालिरिति, अयमत्र भावार्थः-संग्रहः- समुदायः तमप्याश्रित्यैकवचनगर्भ-शब्दप्रवृत्तेः, तथा चैकोऽपि शालिः शालिरित्युच्यते बहवोऽपि शालयः शालिरिति, लोके तथादर्शनात्, अयं चादिष्टानादिष्टभेदेन द्विधा-तत्रानादिष्टो यथा शालिः, आदिष्टो यथा कलम-शालिरिति, एवमादिष्टानादिष्टभेदावुत्तरद्वारेष्वपि यथारूपमायोज्यौ, 'पर्यायैककः' एकः पर्यायः, पर्यायो विशेषो धर्म इत्यनर्थान्तरं, स चानादिष्टो वर्णादिः आदिष्टः कृष्णादिरिति

अन्ये तु समस्तश्रुतस्कन्धवस्त्वपेक्षयेत्थं व्याचक्षते-अनादिष्टः श्रुतस्कन्धः आदिष्टो दशकालिकाख्य इति, अन्यस्त्वनादिष्टो दशकालिकाख्यः आदिष्टस्तु तदध्ययनविशेषो द्रुमपुष्पिकादिरिति व्याचष्टे, न चैदतिचारु, दशकालिकाभिधानत एवादेशसिद्धेः। 'भावैककः' एको भावः, स चानादिष्टो भाव इति, आदिष्टस्त्वौदयिकादिरिति। सप्त एते अनन्तरोक्ता एकका भवन्ति, इह च किल यस्माद्दश पर्याया-अध्ययनविशेषाः संग्रहैककेन संगृहीतास्तस्मात्तेना-धिकारः, अन्ये तु व्याचक्षते-यतः किल श्रुतज्ञानं क्षायोपशमिके भावे वर्त्तते तस्माद् भवैक-केनाधिकार इति गाथार्थः॥ इदानीं द्व्यादीन् विहाय दशशब्दस्यैव निक्षेपं प्रतिपादयन्नाह-

नि.[९] नामं ठवणा दविए खित्ते काले तहेव भावे अ।
एसो खलु निक्खेवो दसगस्स उ छव्विहो होइ॥

वृ. आह-किमिति द्व्यादीन् विहाय दशशब्दः उपन्यस्तः?, उच्यते, एतत्प्रतिपादनादेव द्व्यादीनां गम्यमानत्वात्, तत्र नामस्थापने सुगमे, द्रव्यदशकं दश द्रव्याणि सचित्ताचित्तमिश्राणि मनुष्यरूपककटकादिविभूषितानीति, क्षेत्रदशकं दश क्षेत्रप्रदेशाः, कालदशकं दश कालाः, वर्त्तनादिरूपत्वात्कालस्य दशावस्थाविशेषा इत्यर्थः वक्ष्यति च-'बाला किड्डा मंदे' त्यादिना, भावदशकं दश भावाः, ते च सान्निपातिकभावे स्वरूपतो भावनीयाः, अथ चैत (वैत) एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षया दशाध्ययनविशेषा इति, 'एष' एवंभूतः खलु 'निक्षेपो' न्यासो दशशब्दस्य बहुवचनान्तत्वाद्दशानां षड्विधो भवति, तत्र खलुशब्दोऽवधारणार्थः, एष एव प्रकान्तोपयोगीति, तुशब्दो विशेषणार्थः, किं विशिनष्टि ? नायं दशशब्दमात्रस्य, किन्तु तद्वाच्यस्यार्थस्यापीति गाथार्थः साम्प्रतं प्रस्तुतोपयोगित्वात्कालस्य कालदशकद्वारे विशेषार्थप्रतिपिपादयिषयेदमाह-

**नि.[१०]** बाला किड्डा मंदा बला य पन्ना य हायनि पवंचा।
पब्भार मम्मुही सायनी य दसमा उ कालदसा॥

**वृ.** बाला क्रीडा च मन्दा च बला प्रज्ञा च हायिनि ईषत्प्रपञ्चा प्राग्भारा मृन्मुखी शायिनी तथा। एता हि दश दशाः-जन्त्ववस्थाविशेषलक्षणा भवन्ति।

आसां च स्वरूप-मिदमुक्तं पूर्वमुनिभिः-

''जायमित्तस्स जंतुस्स, जा सा पढमिया दसा।
न तत्थ सुहदुक्खाइं, बहुं जाणंति बालया॥१॥
बिइयं च दसं पत्तो, नानाकिड्डाहिं किड्डइ।
न तत्थ कामभोगेहिं, तिव्वा उप्पज्जई मई ॥२॥
तइयं च दसं पत्तो, पंच कामगुणे नरो।
समत्थो भुंजिउं भोए, जइ से अत्थि घरे धुवा॥३॥
चउत्थी उ बला नाम, जं नरो दसमस्सिओ।
समत्थो बलं दरिसिउं, जइ कोइ निरुवद्दवो॥४॥
पंचमिं तु दसं पत्तो, आनुपुव्वीइ जो नरो।
इच्छियत्थं विचिंतेइ, कुडुबं वाऽभिकंखई॥५॥
छट्ठी उ हायणी नाम, जं नरो दसमस्सिओ।
विरज्जइ य कामेसु, इंदिएसु य हायई॥६॥
सत्तमिं च दसं पत्तो, आनुपुव्वीइ जो नरो।
निट्ठुहइ चिक्कणं खेलं, खासइ य अभिक्खणं॥७॥
संकुचियवलीचम्मो, संपत्तो अट्ठमिं दसं।
नारीनमनभिप्पेओ, जराए परिणामिओ॥८॥
नवमी मम्मुही नाम, जं नरो दसमस्सिओ।
जराघरे विनस्संतो, जीवो वसइ अकामओ॥९॥
हीनभिन्नसरो दीनो, विवरीओ विचित्तओ।
दुब्बलो दुक्खिओ सुवइ, संपत्तो दसमिं दसं॥१०॥

इत्यलं विस्तरेणेति गाथार्थः॥ इदानीं कालनिक्षेपप्रतिपादानायमह-

**नि.[११]** दव्वे अद्ध अहाउअ उवक्कमे देसकालो य।
तह य पमाणे वण्णे भावे पगयं तु भावेणं॥

**वृ.** 'द्रव्य' इति वर्त्तनादिलक्षणो द्रव्यकालो वाच्यः, 'अद्धे'ति चन्द्रसूर्यादिक्रिया-विशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्यद्धाकालः समयादिलक्षणो वाच्यः, तथा 'यथायुष्ककालो' देवाद्यायुष्क-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षणो वाच्यः, तथा 'उपक्रमकालः' अभिप्रेतार्थसामीप्यानयनलक्षणः सामाचार्या-युष्कभेदभिन्नो वाच्यः, तथा देशकालो वाच्यः, देशः प्रस्तावोऽवसरो विभागः पर्याय इत्यनर्थान्तरम्, ततश्चाभीष्ट-वस्त्ववाप्त्यवसरः काल इत्यर्थः, तथा कालकालो वाच्यः, तत्रैकः कालशब्दः प्राग्निरूपितशब्दार्थ एव, द्वितीयस्तु सामयिकः, कालो मरणमुच्यते, मरणक्रियायाः कलनं काल इत्यर्थः, चः समुच्चये, तथा 'प्रमाणकालः' अद्धाकालविशेषो दिवसादिलक्षणो वाच्यः, तथा वर्णकालो वाच्यः, वर्णश्चासौ कालश्चेति, 'भावे'त्ति औदयिकादिभावकालः सादिस-पर्यवसानादिभेदभिन्नो वाच्य इति। प्रकृतं तु 'भावेने'त्ति भावकालेन, इह पुनर्दिवसप्रमाण-कालेनाधिकारः, तत्रापि तृतीयपौरुष्याः तत्रापि बह्वतिक्रान्तयेति। आह-यदुक्तं - 'पगयं तु भावेणंति' तत्कथं न विरुध्यते इति ?, उच्यते, क्षायोपशमिकभावकाले शय्यम्भवेन निर्व्यूढं प्रमाणकाले चोक्तलक्षण इत्यविरोधः, अथवा प्रमाण कालोऽपि भावकाल एव, तस्याद्धा-कालस्वरूपत्वात्, तस्य च भावत्वादिति गाथा-समुदायार्थः॥ अवयवार्थस्तु सामायिकविशेष-विवरणादवसेयः। तथा चाह निर्युक्तिकारः-

**नि.[१२]** सामाइयअनुकमओ वण्णेउं विगयपोरिसीए ऊ।
निज्जूढं किर सेज्जंभवेण दसकालियं तेनं॥

**वृ.** सामायिकम्-आवश्यकप्रथमाध्ययनं तस्यानुक्रमः-परिपाटीविशेषः सामायिके वाऽनुक्रमः सामायिकानुक्रमः ततः सामायिकानुक्रमतः-सामायिकानुक्रमेण वर्णयितुम्, अनन्त-रोपन्यस्तगाथाद्वाराणीतिप्रक्रमाद् गभ्यते, विगतपौरुष्यामेव, तुशब्दस्यावधार्थत्वात्, 'निर्यूढं' पूर्वगतादुद्धृत्य विरचितं, किलशब्दः परोक्षासागमवादसंसूचकः शय्यम्भवेन चतुर्दशपूर्वविदा 'दशकालिकं' प्राग्निरूपिताक्षरार्थं 'तेन' कारणेनोच्यत इति गाथार्थः

श्रुतस्कन्धयोस्तु निक्षेपश्चतुर्विधो द्रष्टव्यो यथाऽनुयोगद्वारेषु, स्थानाशून्यार्थं किञ्चिदुच्यते-इह नोआगमतः ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतं पुस्तकपत्रन्यस्तं, अथवा सूत्रमण्डजादि, भावश्रुतं त्वागमतो ज्ञाता उपयुक्तः, नोआगमतस्त्विदमेव दशकालिकं, नोशब्दस्य देशवचनत्वात्, एवं नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धः सचेतनादिः, तत्र सचित्तो द्विप-दादिः, अचित्तो द्विप्रदेशिकादिः, मिश्रः सेनादि(दे)र्देशादिरिति, तथा भावस्कन्धस्त्वागमतस्त-दर्थोपयोगपरिणाम एवं, नोआगमतस्तु दशकालिकश्रुतस्कन्ध एवेति, नोशब्दस्य देशवचनत्वा-दिति, इदानीमध्ययनोद्देशकन्यासप्रस्तावः, तं चानुयोगद्वारप्रक्रमायातं प्रत्यध्ययनं यथासम्भवो-मोघनिष्पन्ने निक्षेपे लाघवार्थं वक्ष्याम इति॥ ततश्च यदुक्तं-"दसकालिय सुअक्खंधं अज्झयणुद्देस निक्खिविउं" अनुयोगोऽस्य कर्त्तव्य इति, तदंशतः सम्पादितमिति।

साम्प्रतं प्रस्तुतशास्त्र-समुत्थवक्तव्यताभिधित्सयाह-

**नि.[१३]** जेण व जं व पडुच्चा जत्तो जावंति जह य ते ठविया।
सो तं च तओ तानिय तहा य कमसो कहेयव्वं॥

**वृ.** 'येन वा' आचार्येण 'यदा' वस्तु 'प्रतीस्य' अङ्गीकृत्य "यतो वा" आत्मप्रवादादिपूर्वतो 'यावन्ति वा' अध्ययनानि 'यथा च' येन प्रकारेण 'तानि' अध्ययनानि 'स्थापितानि' न्यस्तानि, स च-आचार्यः तच्च वस्तु ततः-तस्मात्पूर्वात् तानि च-अध्ययनानि तथा च-तेनैव प्रकारेण 'क्रमशः' क्रमेणानुपूर्व्या 'कथयितव्यं' प्रतिपादयितव्यमिति गाथासमासार्थः॥ अवय-वार्थं

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

तु प्रतिद्वारं निर्युक्तिकार एव यथाऽवसरं वक्ष्यति।

तत्राधिकृतशास्त्रकर्तुः स्तवद्वारेणाद्यद्वारावयवार्थप्रतिपादनायाह-

नि.[१४] सेज्जभवं गणधरं जिनपडिमादंसणेन पडिबुद्धं।
मनगपिअरं दसकालियस्स निज्जूहगं वंदे॥

वृ. 'सेज्जंभव' मिति नाम 'गणधर' मिति अनुत्तरज्ञानदर्शनादिधर्मगणं धारयतीति गणधरस्तं, 'जिनप्रतिमादर्शनेन प्रतिबद्धं' तत्र रागद्वेषकषायेन्द्रियपरीषहोपसर्गादिजेतृत्वा-ज्जिनस्तस्य प्रतिमा-सद्भावस्थापनारूपा तस्या दर्शनमिति समासः, तेन-हेतुभुतेन, किम्? - 'प्रतिबुद्धं' मिथ्यात्वाज्ञाननिद्रापगमेन सम्यक्तवविकाशं प्राप्तं 'मनकपितर' मिति मनकाख्याप-त्यजनकं 'दशकालिकसय' प्राग्निरूपिताक्षरार्थस्य 'निर्यूहकं' पूर्वगतोद्धृतार्थविरचनाकर्त्तारं 'वन्दे' स्तौमि इति गाथाक्षरार्थः ॥

भावार्थः कथानकादवसेयः, तच्चेदम्-एत्थ वद्धमानसामिस्स चरमतित्थगरस्स सीसो तित्थसामी सुहम्मो नाम गणधरो आसी, तस्सवि जंबूनामो, तस्सवि य पभवोत्ति, तस्सऽन्नया कयाइ पुव्वरत्तावरत्तम्मि चिंता समुप्पन्ना-को मे गणहरो होज्जत्ति?, अप्पणो गणे य संघे य सव्वओ उवओगो कओ, न दीसइ कोई अव्वोच्छित्तिकरो, ताहे गारत्थेसु उवउत्तो, उवओगे कए रायगिहे सेज्जंभवं माहणं जन्नं जयमाणं पासइ, ताहे राअगिहं नगरं आगंतूणं संघाडयं वावारेइ-जन्नवाडगं गंतुं भिक्खट्ठा धम्मलाहेह, तत्थ तुब्भे अदिच्छाविज्जिहिह, ताहे तुब्भे भणिज्जइ-''अहो कष्टं तत्त्वं न ज्ञायते' इति, तओ गया साहू अदिच्छाविया अ, तेहिं भणिअं-''अहो कष्टं तत्त्वं न ज्ञायते', तेन य सेज्जंभवेण दारमूलेठिएण तं वयणं सुअं, ताहे सो विचिंतेइ-एए उवसंता तवस्सिणो असच्चं न वयंतित्तिकाउं अज्झावगसगासं गंतुं भणइ-किं तत्तं?, सो भणइ-वेदाः, ताहे सो असिं कड्डिऊण भणइ-सीसं ते छिंदामि जइ मे तुमं तत्तं न कहेसि, तओ अज्झावओ भणइ-पुण्णो मम समओ, भणियमेयं वेयत्थे-परं सीसेच्छेए कहियव्वंति, संपयं कहयामि जं एत्थ तत्तं, ताहे सो तस्स पाएसु पडिओ, सो य जन्नवाडओवक्खेवो तस्स चेव दिन्नो, ताहे सो गंतूणं ते साहू गवेसमाणो गओ आयरियसगासं, आयरियं वंदित्ता साहुणो(य) भणइ-मम धम्मं कहेह, ताहे आयरिया उवउत्ता-जहा इमो सोत्ति, ताहे आयरिएहिं साहुधम्मो कहिओ, संबुद्धो पव्वइओ सो, चउद्दपुव्वी जाओ।

जया य सो पव्वइओ तया य तस्स गुव्विणी महिला होत्था, तम्मि य पव्वइए लोगो निब्बंधओ तंतमस्सति-जहा तरुणाए भत्ता पव्वइओ अपुत्ताए, अवि अत्थि तव किंचि पोट्टेत्ति पुच्छइ, सा भणइ-उवलक्खेमि मनगं, तओ समएण दारगो जाओ। ताहे निव्वत्तबारसाहस्स नियल्लगेहिं जम्हा पुच्छिज्जंतीए मायाए से भणिअं 'मनगं' ति तम्हा मनओ से नामं कयंति। जया सो अट्ठवारिसो जाओ ताहे सो मातरं पुच्छइ-को मम पिआ?, सा भणइ-तव पिआ पव्वइओ, ताहे सो दारओ न रासिऊणं पिउसगासं पट्ठिओ। आयरिया य तं कालं चंपाए विहरंति, सोऽवि अ दारओ चंपयमेवागओ, आयरिएण य सण्णाभूमिं गएण सो दारओ दिट्ठो, दारएण वंदिओ आयरिओ, आयरियस्स य तं दारगं पिच्छंतस्स नेहो जाओ, तस्सवि दारगस्स तहेव, तओ आयरिएहिं पुच्छियं-भो दारगा! कुतो ते आगमनंति?, सो दारगो भणइ-रायगिहाओ, आयरिएण भणियंरायगिहे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुमं कस्स पुत्तो नत्तुओ वा ?, सो भणइ-सेज्जंभवो नाम बंभणो तस्साहं पुत्तो, सो य किर पव्वइओ, तेहिं भणियं-तुमं केन कज्जेण आगओऽसि ?, सो भणइ-अहंपि पव्वइस्सं, पच्छा सो दारओ भणइ-तं तुम्हे जाणह ?, आयरिया भणंति-जाणेमो, तेन भणियं ! -सो कहिंति ?, ते भणंति-सो मम मित्तो एगसरीरभूतो, पव्वयाहि तुमं मम सगासे, तेन भणियं-एवं करोमि। तओ आयरिया आगंतुं पडिस्सए आलोअंति-सच्चित्तो पडुप्पन्नो, सो पव्वइओ, पच्छा आयरिया उवउत्ता-केवतिकालं एस जीवइत्ति ?, नायं जावं छम्मासा, ताहे आयरियाणं बुद्धी समुप्पन्ना-इमस्स थोवगं आउं, किं कायव्वंति ? तं चउद्दसपुव्वी कम्हिवि कारणे समुप्पन्ने णिज्जूहति, दसपुव्वी पुन अपिच्छमो अवस्समेव निज्जूहइ, ममंपि इमं कारणं समुप्पन्नं, तो अहमवि निज्जूहामि, ताहे आढत्तो निज्जूहिउं, ते उ निज्जूहिज्जंता वियाले निज्जूढा थोवावसेसे दिवसे, तेन तं दसवेयालियं भनिज्जति" । अनेन च कथाननेन न केवलं 'येन वे' त्यत्सैव द्वारस्य भावार्थोऽभिहितः, किन्तु यद्वा प्रतीत्यैतस्यापीति, तथा चाह निर्युक्तिकारः-

नि.[१५] मनगं पडुच्च सेज्जंभवेन निज्जूहिया दसऽज्झयणा।
वेयालियाइ ठविया तम्हा दसकालियं नामं॥

वृ. 'मनकं प्रतीत्यं' मनकाख्यमपत्यमाश्रित्य 'शय्यम्भवेन' आचार्येण 'निर्यूढानि' पूर्वगतादुद्धृत्य विरचितानि 'दशाध्ययनानि' द्रुमपुष्पिकादीनि 'वेयालियाइ ठविय' त्ति विगतः कालो त्रिकालः विकलनं वा विकाल इति, विकालोऽसकलः खण्डश्चेत्यनर्थान्तरम्, तस्मिन् विकाले-अपराण्हे 'स्थापितानि' न्यस्तानि द्रुमपुष्पिकादीन्यध्ययनानि यतः तस्माद्दशकालिकं नाम, व्युत्पत्तिः पूर्ववत्, दशवैकालिकं वा, विकालेन निर्वृत्तम्, संशादिपाठाञ्चातुरर्थिकष्ठक तद्धितेष्वचामादे रित्यादिवृद्धेर्वैकालिकं, दशाध्ययननिर्माणं च तद्वैकालिकं च दशवैकालिकमिति गाथार्थः ॥ एवं येन वा यद्वा प्रीतीत्येति व्याख्यातम्, इदानीं यतो निर्व्यूढानीत्येतद् व्याचिख्यासुराह-

नि.[१६] आयप्पवायुपुव्वा निज्जूढा होइ धम्मपन्नत्ती।
कम्मप्पवायपुव्वा पिंडस्स उ एसणा तिविहा॥

नि.[१७] सच्चप्पवायपुव्वा निज्जूढा होइ वक्कसुद्धी उ।
अवसेसा निज्जूढा नवमस्स उ तइयवत्थूओ॥

नि.[१८] बीओऽवि अ आएसो गणिपिडगाओ दुवालसंगाओ।
एअं किर निज्जूढं मनगस्स अनुग्गहट्ठाए॥

वृ. इहात्मप्रवादपूर्वं-यत्रात्मनः संसारिमुक्ताद्यनेकभेदभिन्नस्य प्रवदनमिति, तस्मान्निर्व्यूढा भवति धर्मप्रज्ञप्तिः, षड्जीवनिका इत्यर्थः, तथा कर्मप्रवादपूर्वात्, किम् ? पिण्डस्य तु एषणा त्रिविधा, निर्व्यूढेतिर्त्तते, कर्मप्रवादपूर्व नाम-यत्र ज्ञानावरणीयादिकर्मणो निदानादि-प्रवदनमिति तस्मात्, किम् ?-पिण्डस्यैषणा त्रिविधा-गवेषणाग्रहणैषणाग्रासैषणाभेदभिन्ना निर्व्यूढा, सा पुनस्तत्रामुना सम्बन्धेन पतति-आधाकर्मोपभोक्ता ज्ञानावरणीयादिकर्म-प्रकृतीर्बध्नाति, उक्तं च-"आहाकम्मं णं भुंजमाणे समणे अट्ठकम्पपगडीओ बंधइ" इत्यादि, शुद्धपिण्डोपभोक्ता वा शुभों बध्नातीत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः सत्यप्रवादपूर्वान्निर्व्यूढा भवति वाक्यशुद्धिस्तु, तत्र सत्यप्रवादं नाम-यत्र जनपदसत्यादेः प्रवदनमिति, वाक्यशुद्धिर्नाम सप्तममध्ययनम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अवशेषाणि' प्रथमद्वितीयादीनि निर्व्यूढानि नवमस्यैव प्रत्याख्यानपूर्वस्य तृतीयवस्तुन इति। द्वितीयोऽपि चादेशः 'आदेशो' विध्यन्तरं 'गणिपिटकाद्' आचार्यसर्वस्वाद् 'द्वादशाङ्गाद्' आचारदिलक्षणात् 'इदं' दशकालिकं, किलेति पूर्ववत्, निर्व्यूढमिति च, किमर्थम्? - 'मनकस्य' उक्तस्वरूपस्य अनुग्रहार्थमिति गाथात्रयार्थः ॥

एवं यत इति व्याख्यातम्, अधुना यावन्ती-त्येतत्प्रतिपाद्यते -

**नि.[१९]** दुमपुप्फियाइया खलु दस अज्झयणा समिक्खुयं जाव।
अहिगारेवि य एत्तो वोच्छं पत्तेयमेक्केक्के ॥

**वृ.** तत्र द्रुमपुष्पिकेति प्रथमाध्ययननाम, तदादीनि दशाध्ययनानि 'सभिक्खुयं जाय'त्ति सभिक्ष्वध्ययनं यावत्, खलुशब्दो विशेषार्थः, किं विशिनष्टि? तदन्ये द्वे चूडे, यावन्तीति व्याख्यातं। यथा चेत्येतत् पुनरधिकाराभिधानद्वारेणैव च व्याचिख्यासुः सम्बन्धकत्वेनेदं गाथादलमाह- अधिकारानपि चातो वक्ष्ये प्रत्येकमेकैकस्मिन् अध्ययने, तत्रा अध्ययनपरिसमाप्तेर्योऽनुवर्तते सोऽधिकार इति गाथार्थः ॥

**नि.[२०]** पढमे धम्मपसंसा सो य इहेव जिनसासनम्मित्ति।
बिइए धिइए सक्का काउं जे एस धम्मोत्ति ॥

**नि.[२१]** तइए आयारकहा उ खुड्डिया आयसंजमोवाओ।
तह जीवसंजमोऽवि य होइ चउत्थंमि अज्झयणे ॥

**नि.[२२]** भिक्खविसोही तवसंजमस्स गुणकारिया उ पंचमए।
छट्ठे आयारकहा महई जोग्गा महयणस्स ॥

**नि.[२३]** वयणविभत्ति पुन सत्तमम्मि पणिहाणमट्ठमे भणियं।
नवमे विनओ दसमे समानियं एस भिक्खुत्ति ॥

**वृ.** प्रथमाध्ययने कोऽर्थाधिकार इत्यत आह- 'धर्मप्रशंसा' दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः तस्य प्रशंसा-स्तवः सकलपुरुषार्थानामेव धर्मः प्रधानमित्येवंरूपा, तथाऽन्यैरप्युक्तम्-

"धनदो धनार्थिनां प्रोक्तः, कामिनां सर्वकामदः।
धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥"

इत्यादि। स चात्रैव-जिनशासने धर्मो नान्यत्र, इहैव निरवद्यवृत्तिसद्भावाद्, एतच्चोत्तरत्र न्यक्षेण वक्ष्यामः। धर्माभ्युपगमे च सत्यपिमा भूदभिनवप्रव्रजितस्याधृतेः सम्मोह इत्यतस्तन्निराकरणार्थधिकारवदेव द्वितीयाध्ययनम्, आह च-द्वितीयेऽध्ययनेऽयमर्थाधिकारः-धृत्या हेतुभूतया शक्यते कर्त्तुम्, 'जे' इति पूरणार्थो निपातः 'एष' जैनो धर्म इति, उक्तं च -

"जस्स धिई तस्स तवो जस्स तवो तस्स सोग्गई सुलहा।
जे अधितिमंत पुरिसा तवोवि खलु दुल्लहो तेसिं ॥"

सा पुनर्धृतिराचारे कार्या न त्वनाचारे इत्यस्तदर्थाधिारवदेव तृतीयाध्ययनम्, आह च- तृतीयेऽध्ययने कोऽर्थाधिकार इत्यत आह-आचारगोचरा कथा आचारकथा, सा चेहैवानुविस्तरभेदात्, य(अ)त आह- 'क्षुल्लिका' लघ्वी, सा च 'आत्मसंयमोपायः' संयमनं संयमः आत्मनः संयम आत्मसंयमस्तदुपायः, उक्तं च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"तस्यात्मा संयमो यो हि, सदाचारे रतः सदा।
स एव धृतिमान् धर्मस्तस्यैव च जिनोदितः ॥"

इति, स चाचारः षड्जीवनिकायगोचरः प्राय इत्यतश्चतुर्थमध्ययनम्, अथवाऽऽत्मसंयमः-तदन्यजीवपरिज्ञानपरिपालनमेव तत्त्वत इत्यतस्तदर्थाधिकारवदेव चतुर्थमध्ययनम्, आह च-'तथा जीवसंयमोऽपि च' भवति चतुर्थेऽध्ययनेऽर्थाधिकार इति, अपिशब्दादात्मसंयमोऽपि तद्भावभाव्येय वर्त्तते, उक्तं च-

"छसु जीवनिकाएसुं, जे बुहे संजए सया।
से चेव होइ विन्नेए, परमत्थेण संजए॥"

इत्यादि। एवमेव च धर्म्मः, स च देहे स्वस्थे सति सम्यक् पाल्यते, स चाहारमन्तरेण प्रायः स्वस्थो न भवति, स च सावद्येतरभेद इत्यनवद्यो ग्राह्य इत्यतस्तदर्थाधिकारवदेव पञ्चममध्ययनमिति, आह च-'भिक्षाविशोधिस्तपः संयमस्य गुणकारिकैव पञ्चमेऽध्ययनेऽर्थाधिकार' इति, तत्र भिक्षणं तस्याः विशोधिः-सायद्यपरिहारेणेतरस्वरूपकथनमित्यर्थः, तपःप्रधानः संयमस्तपः-संयमस्तस्य गुणकारिकै वेयं वर्त्तत इति, उक्तं च-

से संजए समक्खाए, निरवज्जाहार जे विऊ।
धम्मकायट्ठिए सम्मं, सुहजोगाण साहए॥"

इत्यादि। गोचरप्रविष्टेन च सता स्वाचारं पृष्टेन तद्विदापि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्यः, अपि तु आलये, गुरवो वा कथयन्तीति वक्तव्यमतस्तदर्थाधिकारवदेव षष्ठमध्ययनमिति, आह च-षष्ठेऽध्ययनेऽर्थाधिकारः आचारकथा साऽपि महती, न क्षुल्लिका, 'योग्या' उचिता 'महाजनस्य' विशिष्टपरिषद इत्यर्थः, वक्ष्यति च-

"गोअरग्गपविट्ठे उ न निसिएज्ज कत्थई।
कहं च न पबंधिज्जा चिट्ठित्ताण व संजए॥" इत्यादि

आलयगतेनापि तेन गुरुणा (वा) वचनदोषगुणाभिज्ञेन निरवद्यवचसा कथयितव्य इत्यतस्तदर्थाधिकारवदेव सप्तममध्ययनमिति, आह च-"वयणविभत्ती" त्यादि, वचनस्य विभक्तिर्वचन-विभक्तिः, विभजनं विभक्तिः-एवंभूतमनवद्यमित्थंभूतं च सावद्यमित्यर्थः, पुनःशब्दः शेषाध्ययनार्थाधिकारेभ्यः अस्याधिकृतार्थाधिकारस्य विशेषणार्थ इति सप्तमेऽध्ययनेऽर्थाधिकार इति,

"सावज्जणवज्जाणं वयणाणं जो न याणइ विसेसं।
वोत्तुं पि तस्स न खमं किमंग पुन देसणं काउं?॥" इत्यादि

तच्च निरवद्यं वचः आचारे प्रणिहितस्य भवति इत्यतस्तदर्थाधिकारवदेवाष्टममध्ययनमिति, आह च-प्रणिधानमष्टमेऽध्ययनेऽर्थाधिकारत्वेन 'भणितम्' उक्तम्, प्रणिधानं नामविशिष्ट-श्चेतो धर्म इति, उक्तं च-

"पणिहाणरहियस्सेह, निरवज्जंपि भासियं।
सावज्जतुल्लं विन्नेयं, अज्झत्थेणेह संवुडं॥" इत्यादि

आचारप्रणिहितश्च यथोचितविनयसम्पन्न एव भवतीत्यतस्तदर्थाधिकारवदेव नवममध्ययनमिति, आह च-'नवमेऽध्ययनेन विनयोऽर्थाधिकारः' इति, उक्तं च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आयारपणिहाणंमि, से सम्मं वट्टई बुहे।
नाणादीनं विनीए जे, मोक्खट्ठा निव्विगिच्छए॥" इत्यादि

एतेषु एव नवस्वध्ययनार्थेषु यो व्यवस्थितः स सम्यग् भिक्षुरित्यनेन सम्बन्धेन सभिक्ष्वध्ययनमिति, आह च - 'दशमेऽध्ययने समाप्तिं नीतमिदं साधुक्रियाभिधायकं शास्त्रम्' एतत्क्रियासमन्वित एव भिक्षुर्भवत्यत आह-एष भिक्षुरिति गाथाचतुष्टयार्थः॥ स एवंगुणयुक्तोऽपि भिक्षुः कदाचित् कर्मपरतन्त्रत्वात्कर्मणश्च बलत्वा(वत्त्वा)त्सीदेत् ततस्तस्य स्थिरीकरणं कर्त्तव्यमतस्तदर्थाधिकारवदेव चूडाद्वयमित्याह-

नि.[२४] दो अज्झयणा चूलिय विसीययंते थिरीकरणमेगं।
बिइए विवित्तचरिया असीयणगुणाइरेगफला॥

वृ. द्वे अध्ययने, किम् ?- 'चूडा' चूडेव चूडा, तत्र प्रमादवशाद्विषीदति सति साधौ संयमे स्थिरीकरणाम् 'एकं' प्रथमं स्थिरीकरणफलमित्यर्थः, तथा च तत्रावधावनप्रेक्षिणः साधोः दुष्प्रजीवित्वनरकपातादयो दाषा वर्ण्यन्त इति। तथा च द्वितीयेऽध्ययने विविक्तचर्या वर्ण्यते, किंभूता ?- 'असीदनगुणातिरेकफला' तत्र 'विविक्तचर्या' एकान्तचर्या-द्रव्यक्षेत्रकालभावेष्व-सम्बद्धता, उपलक्षणं चैषाऽनियतचर्यादीनामिति, असीदनगुणातिरेकः फलं यस्याः सा तथाविधेति गाथार्थः॥

नि.[२५] दसकालिअस्स एसो पिंडत्थो वण्णिओ समासेनं।
एत्तो एक्केक्कं पुन अज्झयणं कित्तइस्सामि॥

वृ. 'दशकालिकस्य' प्राग्निरूपतिशब्दार्थस्य 'एषः' अनन्तरोदितः 'पिण्डार्थः' सामान्यार्थो 'वर्णितः' प्रतिपादितः 'समासेन' संक्षेपेण, अतः ऊर्ध्वं पुनरेकैकमध्ययनं 'कीर्ति-यिष्यामि' प्रतिपादयिष्यामीति, पुनः-शब्दस्य व्यवहित उपन्यास इति गाथार्थः॥ तत्र प्रथमाध्ययनं द्रुमपुष्पिका, अस्य च चत्वार्यनुयोगद्वाराणि भवन्ति, तद्यथा-उपक्रमो निक्षेपोऽनुगमो नयः, एषां चतुर्णामप्यनुयोगद्वाराणामध्ययनादावुपन्यासः तथेत्थं च क्रमोपन्यासे प्रयोजनमावश्यक-विशेषविवरणादवसेयं स्वरूपं च प्रायश इति। प्रकृताध्ययनस्य च शास्त्रीयोपक्रमे आनुपूर्व्यादि-भेदेषु स्ववृद्धयाऽवतारः कार्यः, अर्थाधिकारश्च वक्तव्यः, तथा चाह निर्युक्तिकारः-

## अध्ययनं-१ द्रुमपुष्पिका

नि.[२६] पढमज्झयणं द्रुमपुप्फियंति चत्तारि तस्स दाराइं।
वण्णेउवक्काई धम्मपसंसाइ अहिगारे॥

वृ. प्रथमाध्ययनं द्रुमपुष्पिकेति, अस्य नामनिष्पन्ननिक्षेपावसर एव शब्दार्थं वक्ष्यामः, चत्वारि तस्य 'द्वाराणि' अनुयोगद्वाराणि, किम् ?-वर्णयित्वोपक्रमादीनीति, किम् ? - धर्मप्रशंस-याऽधिकारो वाच्य इति गाथार्थः॥ तथा निक्षेपः, स च त्रिविधः, तद्यथा-ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्चेति, तत्रौघः- सामान्यं श्रुताभिधानम्, तथा चाह निर्युक्तिकारः-

नि.[२७] ओहो जं सामान्नं सुआभिहाणं चउव्विहं तं च।
अज्झयणं अज्झीणं आय ज्झवणा य पत्तेअं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. ओघो यत्सामान्यं 'श्रुताभिधानं' श्रुतनाम चतुर्विधं तच्च, कथम्? अध्ययन-मक्षीणमायः क्षपणा च इदं च 'प्रत्येकं' पृथक् पृथक्॥ किम्?

नि.[२८] नामाइ चउब्भेयं वण्णेऊणं सुआनुसारेणं।
दुमपुप्फिअ आओज्जा चउसुंपि कमेण भावेसुं॥

वृ. नामादिचतुर्भेदं वर्णयित्वा, तद्यथा-नामाध्ययनं स्थापनाध्ययनं द्रव्याध्ययनं भावा-ध्ययनं चेति, एवमक्षीणादीनामपि न्यासः कर्त्तव्यः, 'श्रुतानुसारेण' अनुयोगद्वाराख्यसूत्रानुसारेण, किम्? - 'द्रुमपुष्पिका आयोज्या' प्रकृताध्ययनं सम्बन्धनीयम्, चतुर्ष्वप्यध्ययनादिषु क्रमेण भावेष्विति गाथार्थः॥ साम्प्रतं भावाध्ययनादिशब्दार्थं प्रतिपादयन्नाह-

नि.[२९] अज्झप्पस्साणयणं कम्माणं अवचओ उवचिआणं।
अनुवचओ अ नवाणं तम्हा अज्झयणमिच्छंति॥

नि.[३०] अहिगम्मंति व अत्था इमेण अहिगं च नयनमिच्छंति।
अहिगं च साहु गच्छइ तम्हा अज्झयणमिच्छंति॥

नि.[३१] जह दीवा दीवसयं पइप्पई सो अ दिप्पई दीवो।
दीवसमा आयरिया दिप्पंति परं च दीवंति॥

नि.[३२] नाणस्स दंसणस्सऽवि चरणस्स य जेन आगमो होई।
सो होइ भावआओ आओ लाहो त्ति निद्दिट्ठो॥

नि.[३३] अट्ठविहं कम्मरयं पोराणं जं खवेइ जोगेहिं।
एयं भावज्झयणं नेअव्वं आनुपुव्वीए॥

वृ. आसां गमनिका-इह प्राकृतशैल्या छान्दसत्वाच्च अज्झप्पससाणयणं पकारस(स्स)कार आकारणकारलोपे अज्झयणं ति भण्णइ, तच्च संस्कृतेऽध्ययनम्, भावार्थस्त्वयं-अधि आत्मनि वर्तत इति निरुक्तादध्यात्मं चेतः तस्यानयनम् आनीयतेऽनेनेत्यानयनम्, इह कर्म-मलरहितः खल्वात्मैव चेतःशब्देन गृह्यते, यथाऽवस्थितस्य शुद्धस्य चेतस आनयनमित्यर्थः, तथा चैतदभ्यासाद्भवत्येव, किम्? - 'कर्मणां' ज्ञानावरणीयादीनाम् 'अपचयो' ह्रासः, किंवि-शिष्टानाम्?-'उपचितानां' मिथ्यात्वादिभिरुपदिग्घानां बद्धानामितिभावः, तथा 'अनुपचयश्च' अवृद्धिलक्षणः 'नवानां' प्रत्यग्राणांकर्मणाम्, यतश्चैवं तस्मात् प्राकृतशैल्याऽध्यात्मानयनमेता-ध्ययनमिच्छन्त्याचार्या इति गाथार्थः॥

'अधिगम्यन्ते' परिच्छिद्यन्ते वा अर्था अनेनेत्यधिगममेव प्राकृतशैल्या तथाविधार्थप्रदर्श-कत्वाच्चास्य वचसोऽध्ययनमिति, तथा अधिकं च नयनमिच्छन्त्यस्याप्य(पि तथाविधा)-र्थप्रदर्शकत्वादेव वचसोऽयमर्थः, 'अय वय' इत्यादिदण्डकधातुपाठान्नीतिर्नयनम्, भावे ल्युट्प्रत्ययः परिच्छेद इत्यर्थः, अधिकं नयनमधिकनयनं चार्थतोऽध्ययनमिच्छन्ति, चशब्दस्य च व्यवहित उपन्यासः, अधिकं च साधुर्गच्छति, किमुक्तं भवति?-अनेन करणभूतेन साधुर्बोध-संयममोक्षान् प्रत्यधिकं गच्छति, यस्मादेवं तस्मादध्ययनमिच्छन्ति, इह च सर्वत्र अधिकं नयन-मध्ययनमित्येवं योजना कार्येति गाथार्थः॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीमक्षीणम-तच्च भावाक्षीणमिदमेव, शिष्यप्रदानेऽप्यक्षयत्वात्, तथा चाह-यथा दीपाद्दीपशतं प्रदीप्यते, स च दीप्यते दीपः, एवं 'दीपसमा' दीपतुल्या आचार्या दीप्यन्ते स्वतो विमलमत्याद्युपयोगयुक्तत्वात् 'परं च' विनेयं 'दीपयन्ति' प्रकाशयन्त्युज्जवलं वा कुर्वन्तीति गाथार्थः ॥इदानीमायः-स च भावत इदमेव, यत आह-'ज्ञानस्य' मत्यादेः 'दर्शनस्य' चौपशमिकादेः 'चरणस्य च' सामायिकादेः 'येन' हेतुभूतेन 'आगमो भवति' प्राप्तिर्भवति स भवति भावायः, आयो लाभ इति निर्दिष्टः, अध्ययनेन च हेतुभूतेन ज्ञानाद्यागमो भवतीति गाथार्थः ॥

अधुना क्षपणा, साऽपि भावत इदमेवेति, आह च-'अष्टविधम्' अष्टप्रकारं कर्मरजः तत्र जीवगुण्डनपरत्वात्कर्मैव रजः कर्मरजः 'पुराणं' प्रागुपात्तं 'यत्' यस्मात्क्षपयति 'योगैः' अन्तःकरणादिभिरध्ययनं कुर्वन्, तस्मादिदमेव कारणे कार्योपचारात् क्षपणेति। तथा चाह-इदं भावाध्ययनं 'नेतव्यं' योजनीयम् 'आनुपूर्व्या' परिपाट्य अध्ययनाक्षीणादिष्विति गाथार्थः ॥

उक्त ओघनिष्पन्नो निक्षेपः, साम्प्रतं नामनिष्पन्न उच्यते-तत्रौघनिष्पन्नेऽध्ययनं नामनिष्पन्ने द्रुमपुष्पिकेति, आह-द्रुम इति कः शब्दार्थः?, उच्यते, "दु द्रु गतौ" इत्यस्य द्रुस्मिन् देशे विद्यत इति तदस्यास्त्यस्मिन्निति मतुपि प्राप्ते "दुद्रुभ्यां मः" इति मप्रत्ययान्तस्य द्रुम इति भवति। साम्प्रतं द्रुमपुष्पनिक्षेपप्ररूपणायाह-

**नि.[३४]** नामदुमो ठवणदुमो दव्वदुमो चेव होइ भावदुमो।
एमेव य पुप्फस्स वि चउव्विहो होइ निक्खेवो ॥

**वृ.** 'नामद्रुमो' यस्य द्रुम इति नाम द्रुमाभिधानं वा, स्थापनाद्रुमो द्रुम इति स्थापना, 'द्रव्यद्रुमश्चैव भवति भावद्रुमः' तत्र द्रव्यद्रुमो द्विधा-आगमतो नोआगमतश्च, आगमतो ज्ञाताऽनुप-युक्तः, नोआगमतस्तु ज्ञशरीर भव्यशरीरोभयव्यतिरिक्तस्त्रिविधः, तद्यथा-एकभविको बद्धायुष्कोऽकस्तु येन द्रुमनामगोत्रे कर्मणी बद्धे इति, अभिमुखनामगोत्रस्तु येन ते नामगोत्रे कर्मणी उदीरणावलिकायां प्रक्षिप्ते इति, अयं च त्रिविधोऽपि भाविभावद्रुमकारणत्वाद्रव्यद्रुम इति, भावद्रुमोऽपि द्विविधः-आगमतो नोआगमतश्च, तत्रागमतो ज्ञातोपयुक्तः, नोआगमतस्तु द्रुम एव द्रुमनामगोत्रे कर्मणी वेदयन्निति। 'एवमेव च' यथा द्रुमस्य तथा किम्?-'पुष्पस्यापि' वस्तुतस्तद्विकारभूतस्य चतुर्विधो भवति निक्षेप इति गाथार्थः ॥ साम्प्रतं नानादेशजविनेयगणासम्मोहार्थमागमे द्रुमपर्यायशब्दान् प्रतिपादयन्नाह-

**नि.[३५]** दुमा पायवा रुक्खा, अगमा विडिमा तरू।
कुहा महीरुहा वच्छा, रोवगा रुंजगावि अ ॥

**वृ.** द्रुमाश्च पादपा वृक्षा अगमा विटपिनः तरवः कुहा महीरुहा वच्छा रोपका रुञ्जकादयश्च। तत्र द्रुमान्वर्थसंज्ञा पूर्ववत्, पद्भ्यां पिबन्तीति पादपा इत्येवमन्येषामपि यथासम्भवमन्वर्थसंज्ञा वक्तव्या, रूढिदेशीशब्दा वा एत इति गाथार्थः ॥ इदानीं पुष्पैकार्थिकप्रतिपादनायाह-

**नि.[३६]** पुप्फाणी अ कुसुमाणि अ फुल्लाणि तहेव होंति पसवाणी।
सुमणाणि अ सुहुमाणि अ पुप्फाणं होंति एगट्ठा ॥

**वृ.** पुष्पाणि कुसुमानि चैव फुल्लानि प्रसवानि च सुमनांसि चैव 'सूक्ष्माणि' सूक्ष्मकायिकानि चेति॥ साम्प्रतमेकवाक्यतया द्रुमपुष्पिकाध्ययनशब्दार्थ उच्यते-द्रुमस्य पुष्पं द्रुमपुष्पम्, अवयव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षण: षष्ठीसमास:, द्रुमपुष्पशब्दस्य "प्रागिवात्क:" इति वर्त्तमाने अज्ञाते कुत्सिते (के) संज्ञायां कनि ति कनि प्रत्यये नकारलोपे च कृते द्रुमपुष्पक इति, प्रातिपदिकस्य स्त्रीत्वविवक्षायाम् "अजाद्यतष्टाप्" इति टाप्प्रत्ययेऽनुबन्धलोपे च कृते "प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुप: इतीत्वे कृते "अक: सवर्णे दीर्घ:" इति दीर्घत्वे परगमने च द्रुमपुष्पिकेति भवति, द्रुमपुष्पोदाहरणयुक्ता द्रुमपुष्पिकेति, द्रुमपुष्पिका चासौ अध्ययनं चेति समानाधिकरणस्तत्पुरुष:, द्रुमपुष्पिकाध्ययनमिति ॥ अस्य चैकार्थिकानि प्रतिपादयन्नाह-

नि.[३७] दुमपुप्फिआ य आहारएसणा गोअरे तया उंछो।
मेस जलूणा सप्पे वणऽक्खइसुगोलपत्तुदए।

वृ. तत्र द्रुमपुष्पोदाहरणयुक्ता द्रुमपुष्पिकेति, वक्ष्यति च- "जहा दुमस्स पुप्फेसु" इत्यादि, तथा आहारस्यैषणा आहारैषणा, एषणाग्रहणाद् गवेषणादिग्रह:, ततश्च तदर्थसूचकत्वादाहारैषणैति, तथा गोचर: सामयिकत्वाद् गोरिव चरणं गोचरोऽन्यथा गोचार:, तदर्थसूचकत्वाच्चाधिकृताध्ययनविशेषो गोचर इति, एवं सर्वत्र भावना कार्येति, भावार्थस्तु यथा गौश्चरत्येवमविशेषेण साधुनाऽप्यटितव्यं, न विभवमङ्गीकृत्योत्तमाधममध्यमेषु कुलेष्विति, वणिग्वत्सकदृष्टान्तेन वेति, तथा 'त्वगिति' त्वगिवासारं भोक्तव्यमित्यर्थसूचकत्वात् त्वगुच्यत इति, उक्तं च परममुनिभि:- "जहा चत्तारि घुणा पन्नत्ता, तंजहा-तयक्खाए छल्लिक्खाए कट्ठक्खाए सारक्खाए, एवामेव चत्तारि भिक्खुगा पन्नत्ता, तंजहा-तयक्खाए छल्लिक्खाए कट्ठक्खाए सारक्खाए, तयक्खाए नामं एगे तो सारक्खाए सारक्खाए णामं एगे नो तयक्खाए एगे तयक्खाए वि सारक्खाए वि एगे नो तयक्खाए नो सारक्खाए। तयक्खायसमाणस्स णं भिक्खुस्स सारक्खायसमाणे तवे भवई, एवं जहा ठाणे तहेव दट्ठव्वं"। भावार्थस्तु भावतस्त्वक्कल्पासारभोक्तञ्छसूचकत्वादिति, तथा 'मेष' इति तथा मेषोऽल्पेऽप्यम्भसि अनुद्वालयन्नेवाम्भ: पिबति, एवं साधुनाऽपि भिक्षाप्रविष्टेन बीजाक्रमणादिष्वनाकुलेन भिक्षा ग्राह्येत्येवंविधार्थसूचकत्वादधिकृताभिधानप्रवृत्तिरिति, तथा 'जलौका' इति अनेषणाप्रवृत्तदायकस्य मृदुभावनिवारणार्थसूचकत्वादिति, तथा 'सर्प' इति यथाऽसावेकदृष्टिर्भवत्येवं गोचरगतेन संयमैकदृष्टिना भवितव्यमित्यर्थसुचकत्वादिति, अथवा-यथा द्रागस्पृशन् सर्पो बिलं प्रविशत्येवं साधुनाऽप्यनास्यादयता भोक्तव्यमिति, तथा 'व्रण' इत्यरक्तद्विष्टेन व्रणलेपदानवद्भोक्तव्यम्, तथा 'अक्ष' इत्यक्षोपाङ्गदानवच्चेति, उक्तं च -

"व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम्।
पन्नग इवाभ्यवहरेदाहारं पुत्रपलवच्च ॥"

इत्यादि, तथा 'इसु'त्ति तत्र 'इषु:' शरो भण्यते, तत्र सूचनात्सूत्रमिति कृत्वा

"जह रहिओऽनुवउत्तो इसुणा लक्खं न विंधइ तहेव।
साहू गोअरपत्तो संजमलक्खम्मि नायव्वो ॥"

गोल इति-

"जह जउगोलो अगणिस्स नाइदूरे न आवि आसन्ने।
सक्कइ काऊण तहा संजमगोलो गिहत्थाणं॥
दूरे अनेसणाऽदंसणाइ इयरिम्मि तेनसंकाइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तम्हामियभूमीए चिट्ठिज्जा गोयरग्गओ ॥"

पुत्र' इति पुत्रमांसोपमया भोक्तव्यम्, सुसमाद्दष्टान्तोऽत्र वक्तव्यः। 'उदक'मिति पूत्युदकोपमानतः खल्वन्नपानमुपभोक्तव्यमिति, अत्रोदाहरणमजहा एगेणं वाणियएणं दारिद्ददुक्खाभिभूएणं कहंवि हिंडंतेणं रयणदीवं पाविता तेलुक्कसुंदरा अनग्धेया रयणा समासादिआ, सो अ ते चोरकुलदीहद्धाणभएण ण सक्कइ नित्थारिऊणामुवओगभूमिमाणेउं, तओ सो बुद्धिकोसल्लेणतानि एगम्मि पएसे ठवेऊण अन्ने जरपाहाणे घेत्तुं पट्ठिओ गहिल्लगवेसेणं "रयणवाणिओ गच्छत्ति" - भावितेण तिन्नि वारे, जाहे कोई न उट्ठइ ताहे घेत्तूण पलाओ, अडवीए तिव्वतिसाए गहिओ जाव कुहियपाणिअं छिल्लरं विनट्ठं पासइ, तत्थवि बहवे हरिणादयो मआ, तेन तं सव्वं उदगं वसा जायं, ताहे तं तेन अनुस्सासियाएअनासायंतेन पीअं, नित्थारियाणि यऽनेन रयणाणि। एवं रयणत्थाणगाणि णाणदंसणचरित्ताणि चोरत्थाणिआ विसया कुहिओदगत्थाणि-आणि फासुगेसणिज्जाणि अंतपंताणि आहाराइयाणि आहारंतेन।

ताहे तब्बलेण जहा वाणियगो इह भवे सुही जाओ, एवं साहू वि सुही भविस्सइत्ति। अडवित्थाणीअं संसारं नित्थरइत्ति। एवमेतान्यर्थेकार्थिकानि, अर्थाधिकारा एवान्ये इति गाथार्थः। उक्तो नामनिष्पननः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसरः, स च प्राप्तलक्षणोऽपि न निक्षिप्यते, कस्मात् कारणात् ?, यस्मादस्ति इह तृतीयमनुयोगद्वारमनुगम्स्यामः। अत्र चाक्षेपपरिहारावावश्यकविशेषविवरणादवसेयौ, साम्प्रतमनुगमः, स च द्विधा-सूत्रानुगमो निर्युक्तनुगमश्च, तत्र निर्युक्त्यनुगमास्त्रिविधः, तद्यथा-निक्षेपनिर्युक्त्यनुगमः उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्चेति, तत्र निक्षेपनिर्युक्त्यनुगमो गतः, य एषोऽध्ययनादिनिक्षेप इति, उपोद्घातनिर्युक्त्यनुगमस्तु द्वारगाथाद्वायादवसेयः, तच्चेदम् -

उद्देसे निद्देसे य निग्गमे खित्तकालपुरिसे य।
कारण पच्चय लक्खण नए समोयारणाऽनुमए॥१॥
किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं।
कइसंतरमविरहियं भवागरिस फासण निरुत्ती॥२॥"

अस्य च द्वारगाथाद्वयस्य समुदायार्थोऽवयवार्थश्चावश्यकविशेषविवरणादेवावसेय इति। प्रकृत-योजना पुनस्तीर्थकरोपोद्घातमभिधायार्यसुधर्मस्य च तत्प्रवचनस्य पश्चाज्जम्बूनाम्नस्ततः प्रभवस्य ततोऽप्यार्यशय्यम्भवस्य पुनयर्था तेनेदं निर्व्यूढमिति तथा कथनेन कार्या इति। आह च-"जेन व जं च पडुच्चे" त्यादिना यत्पूर्वमुक्तं तदत्रैव क्रमप्राप्ताभिधानत्वात् तत्रायुक्तमिति, न, अपान्तरालोपोद्घातप्रतिपादकत्वेन तत्राप्युपयोगित्वादिति, आह-एवमपि महासम्बन्धपूर्वकत्वादपान्तरालोपोद्घातस्यात्रैवाभिधानं न्यायय्यमिति, न, प्रस्तुतशास्त्रान्तरङ्गत्वेन तत्राप्युपयोगित्वादिति कृतं प्रसङ्गेन, अक्षरगमनिकामात्रफलत्वात्प्रयासस्य। गत उपोद्घातनिर्युक्त्यनुगमः, साम्प्रतं सूत्रस्पर्शिकनिर्युक्त्यनुगमावसरः, स च सूत्रे सति भवति, आह-यद्येवमिहोपन्यासोऽनर्थकः, न, निर्युक्तिसामान्यादिति, सूत्रं च सूत्रानुगमे, च चावसरप्राप्त एव, इह चास्खलितादिप्रकारं शुद्धं सूत्रमुच्चारणीयम्, तद्यथा-अस्खलितममिलिमव्यत्वाम्रेडितमित्यादि यथाऽनुयोगद्वारेषु, ततस्तस्मिन्नुच्चरिते सति केषाञ्चिद् भगवतां साधूनां केचनार्थाधिकारा अधिगता भवन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचन त्वनधिगताः, तत्रानधिगताधिगमायाल्पमतिविनेयानुग्रहाय च प्रतिपदं व्याख्येयम्। व्याख्यालक्षणं चेदम् -

संहिता च पदं चैव, पदार्थः पदविग्रहः।
चालनाप्रत्यवस्थानं, व्याख्या तत्रस्य षड्विधा॥

इत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः। किं च प्रकृतम्?, सूत्रानुगमे सूत्रमुच्चारणीयमिति, तच्चेदं

मू. (१) धम्मो मंगलमुक्किट्ठं, अहिंसा संजमो तवो।
*देवावि तं नमंसंति, जस्स धम्मे सया मणो॥*

**वृ.** तत्रास्खलितपदोच्चारणं संहिता, सा पाठसिद्धैव। अधुना पदानि-धर्मः मङ्गलम् उत्कृष्टम् अहिंसा संयमः तपः देवाः अपि तं नमस्यन्ति यस्य धर्मे सदा मनः। तत्र "धृञ् धारणे" इत्यस्य धातोर्मप्रत्ययान्तस्येदं रूपं धर्म इति। मङ्गलरूपं पूर्ववत्। तथा "कृष् विलेखने" इत्यस्य धातोरुत्पूर्वस्य निष्ठान्तसयेदं रूपमृत्कृष्टमिति। तथा 'तृहि हिंसि हिंसायाम्" इत्यस्य "इदितो नुम् धातोः" इति नुमि कृते स्त्र्यधिकारे टाबन्तस्य नञ्पूर्वस्येदं रूपं यदुताहिंसेति। तथा "यमु उपरमे" इत्यसय धातोः संपूर्वस्यापृप्रत्यान्तस्य संयम इति रूपं भवति। तथा "तप सन्तापे" इत्यस्य धातोरसुन्प्रत्ययान्तस्य तप इति। तथा "दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिस्वप्न-कान्तिगतिषु" इत्यस्य धातोरच्प्रत्ययान्तस्य जसि देवा इति भवति। अपिशब्दो निपातः। तदित्येतस्य सर्वनाम्नः पुंस्त्वविवक्षायां द्वितीयैकवचनं तमिति भवति। तथा नमसित्यस्य प्रातिपदिकस्य "नमोवरिवश्चित्रङः क्यच्" इति क्यजन्तस्य लट्क्रियान्तादेशस्ततश्च नमस्यन्तीति भवति। तथा यदितिसर्वनाम्नः षष्ठ्यन्तस्य यस्येति भवति। धर्मः पूर्ववत्। सदेति सर्वस्मिन् काले दा" इति दाप्रत्ययः "सर्वस्य सोऽन्यतरस्यां दि" इति स आदेशः सदा। तथा "मन ज्ञाने" इत्यस्य धातोरसुन्प्रत्ययान्तस्यमन इति भवति। इतिपदानि।

साम्प्रतं पदार्थ उच्यते-तत्र दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तथा चोक्तम्-

"दुर्गतिप्रसृतान् जीवान्, यस्माद्धारयते ततः।
धत्ते चैतान् शुभे स्थाने, तस्माद् धर्म इति स्मृतः॥"

मङ्ग्यते हितमनेनेति मङ्गलमित्यादि पूर्ववत्, 'उत्कृष्टं' प्रधानम्, न हिंसा प्राणातिपातविरति-रित्यर्थः, 'संयमः' आश्रवद्वारोपरमः, तापयत्यनेकभवोपात्तमष्टप्रकारं कर्मेति तपः-अनशनादि, दीव्यन्तीतिदेवाः क्रीडन्तीत्यादि भावार्थः, अपि सम्भावने देवा अपि मनुष्यास्तु सुतरां, 'त' मित्येवंविशिष्टं जीवं, नमस्यन्तीति प्रकटार्थम्, यस्य जीवस्य किम्? - 'धर्मे' प्रागभिहितस्वरूपे 'सदा' सर्वकालं 'मन' इत्यन्तःकरणम्। अयं पदार्थ इति। पदविग्रहस्तु परस्परापेक्षसमासभाक्-पदपूर्वकत्वेनेह निबन्धनाभावान्न प्रदर्शित इति। चालनाप्रत्यवस्थाने तु प्रमाणचिन्तायां यथा-वसरमुपरिष्टाद् वक्ष्यामः। प्रवृत्तिः पुनस्तयोरमुनोपायेनेति प्रदर्शनायाह-

नि.[३८] कत्थइ पुच्छइ सीसो कहिंचऽपुट्ठा कहंति आयरिया।
सीसाणं तु हियट्ठा विपुलतरागं तु पुच्छाए॥

**वृ.** क्वचित्किाञ्चिदनवगच्छन् पृच्छति शिष्यः कथमेतदिति इयमेव चालना, गुरुकथनं प्रत्यवस्थानम्, इत्थमनयोः प्रवृत्तिः। तथा क्वचिदपृष्टा एव सन्तः पूर्वपक्षमाशङ्क्य किञ्चि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्कथयन्त्याचार्याः, तत्प्रत्यवस्थानमिति गम्यते, किमर्थं कथयन्त्यत आह-शिष्याणामेव हितार्थम्, तुशब्द एवकारार्थः, तथा 'विपुलतरं तु' प्रभुततरं तु कथयन्ति 'पुच्छाए'त्ति शिष्यप्रश्ने सति, पटुप्रज्ञोऽयमित्यवगमादिति गाथार्थः ॥

एवं तावत्समासेन, व्याख्यालक्षणयोजना।
कृतेयं प्रस्तुते सूत्रे, कार्यैवमपरेष्वपि॥१॥
ग्रन्थविस्तरदोषान्न, वक्ष्याम उपयोगि तु।
वक्ष्यामः प्रतिसूत्रं तु, यत् सूत्रस्पर्शिकाऽधुना॥२॥
प्रोच्यतेऽनुगमनिर्युक्तिविभागश्च विशेषतः।
सामायिकबुहद्भाष्याज्ज्ञेयस्तत्रोदितं यतः॥३॥
''होइ कयत्थो वोत्तुं सपयच्छेअं सुअं सुआनुगमो।
सुत्तालावगनासो नामादिन्नासविनिओगं॥१॥
सुत्तप्फासिअनिज्जुत्तिनिओगो सेसओ पयत्थाइ।
पायं सोच्चियनेगमनयाइमयगोअरो होइ॥२॥
एवं सुत्ताणुगमो सुत्तालावगकओ अ निक्खेवो।
सुत्तप्फासिअनिज्जुत्ति नया अ समगं तु वच्चन्ति॥३॥

इत्यलं प्रसङ्गेन, गमनिकामात्रामेतत्। तत्र धर्मपदमाधिकृत्य सूत्रस्पर्शिकनिर्युक्तिप्रदिपादन-

नि.[३९] नामंठवणाधम्मो दव्वधम्मो अ भावधम्मो अ।
एएसिं नाणत्तं वुच्छामि अहानुपुव्वीए॥

**वृ.** 'नामंठवणाधम्मो' त्ति अत्र धर्मशब्दः प्रत्येकमभिसम्बध्यते, नामधर्मः स्थापनाधर्मो द्रव्यधर्मो भावधर्मश्च। एतेषां 'नानात्वं' भेदं 'वक्ष्ये' अभिधास्ये 'यथानुपूर्व्या' यथानुपरिपाट्येति गाथार्थः॥ साम्प्रतं नामस्थापने क्षुण्णत्वादागमतो नोआगमतश्च ज्ञात्रनुपयुक्तज्ञशरीरेतरभेदांश्चानादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यधर्माद्यभिधित्सयाऽऽह -

नि.[४०] दव्वं च अत्थिकायप्पयारधम्मो अ भावधम्मो अ।
दव्वस्स पज्जवा जे ते धम्मा तस्स दव्वस्स॥

**वृ.** इह त्रिविधोऽधिकृतो धर्मः, तद्यथा-द्रव्यधर्मः अस्तिकायधर्मः प्रचारधर्मश्चेति। तत्र द्रव्यं चेत्यनेन धर्मधर्मिणोः कथञ्चिदभेदाद् द्रव्यधर्ममाह, तथास्तिकाय इत्यनेन तु सूचनात् सूत्रमितिकृत्वा उपलक्षणत्वादवयव एव समुदायशब्दोपचारादस्तिकायधर्म इति, प्रचारधर्म-श्चेत्यनेन ग्रन्थेन द्रव्यधर्मदेशमाह। भावधर्मश्चेत्यनेन तु भावधर्मस्य स्वरूपमाह॥ साम्प्रतं प्रथमोद्दिष्टद्रव्यधर्मस्वरूपाभिधित्सयाऽऽह-द्रव्यस्य पर्याया-ये उत्पादविगमादयस्ते धर्मास्तस्य द्रव्यस्य, ततश्च द्रव्यस्य धर्मा द्रव्यधर्मा इत्यन्यासंसक्तैकद्रव्यधर्माभावप्रदर्शनार्थो बहुवचननिर्देश इति गाथार्थः॥ इदानीमस्तिकायादिधर्मस्वरूपप्रतिपिपादयिषयाऽऽह-

नि.[४१] धम्मत्थिकायधम्मो पयारधम्मो य विसयधम्मो य।
लोइयकुप्पावयणिअ लोगुत्तर लोगऽनेगाविहो॥

**वृ.** धर्मग्रहणाद् धर्मास्तिकायपरिग्रहः, ततश्च धर्मास्तिकाय एव गत्युपष्टम्भकोऽसंख्येय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशात्मकः अस्तिकायधर्म इति। अन्ये तु व्याचक्षते-धर्म्मास्तिकायादि-स्वभावोऽस्तिकायाधर्म इति, एतच्चायुक्तम्, तत्र धर्म्मास्तिकायादीनां द्रव्यत्वेन तस्य द्रव्यधर्मा-व्यतिरेकादिति। तथा प्रचारधर्मश्च विषयधर्म एव, तुशब्दस्यैवकारार्थत्वात्, तत्र प्रचरणं प्रचारः, प्रकर्षगमनमित्यर्थ, स एवात्मस्वभावत्वाद्धर्मः प्रचारधर्मः, स च किम् ? - विषीदन्त्येतेषु प्राणिन इति विषया-रूपादयस्तद्धर्म एव, तथा च वस्तुतो विषयधर्म एवायं यद्रागादिमान् सत्त्वस्तेषु प्रवर्तत इति, चक्षुरादीन्द्रियवशतो रूपादिषु प्रवृत्तिः प्रचारधर्म इति हृदयम्, प्रधानसंसारनिबन्ध-नत्वेन चास्य प्राधान्यख्यापनार्थं द्रव्यधर्मात् पृथगुपन्यासः। इदानीं भावधर्मः, स च लौकिका-दिभेदभिन्न इति, आह च-लौकिकः कुप्रावचनिकः लोकोत्तरस्तु, अत्र 'लोगोऽणेगविहो' त्ति लौकि-कोऽनेकविध इति गाथार्थः ॥ तदेवानेकविधत्वमुपदर्शयन्नाह-

नि.[४२] गम्मपसुदेसरज्जे पुरवरगामगणगोट्ठिराईणं।
सावज्जो उ कुतित्थियधम्मो न जिनेहि उ पसत्थो ॥

**वृ.** तत्र गम्यधर्मो-यथा दक्षिणापथे मातुलदुहिता गम्या उत्तरापथे पुनरगम्यैव, एवं भक्ष्या-भक्ष्यपेयापेयविभाषा कर्त्तव्येती, पशुधर्मो-मात्रादिगमनलक्षणः, देशधर्मो देशाचारः स च प्रतिनियत एव नेपथ्यादिलिङ्गभेद इति, राज्यधर्मः-प्रतिराज्यं भिन्नः, स च करादिः, पुरवरधर्मः-प्रतिपुरवरं भिन्नः क्वचित्किञ्चिद्विशिष्टोऽपि पौरभाषाप्रदानादिलक्षणः सद्वितीया योषिद्देहान्तरं गच्छती-त्यादिलक्षणो वा, ग्रामधर्मः-प्रतिग्रामं भिन्नः, गणधर्मो-मल्लादिगणव्यवस्था, यथा समपादपातेन विषमग्रह इत्यादि, गोष्ठी धर्म्मो-गोष्ठीव्यवस्था, इह च समवयसां समुदायो गोष्ठी, तद्व्यवस्था पुनर्वसन्तादाविदं कर्त्तव्यमित्यादिलक्षणा, राजधर्मो-दुष्टेतरनिग्रहपरिपालनादिरिति। भावधर्मता चास्य गम्यादीनां विवक्षया भावरूपत्वात् द्रव्यपर्यायत्वाद्वा, तस्यैव च द्रव्यानपेक्षस्य विवक्षितत्वात्, लौकिकैर्वा भावधर्मत्वेनेष्टत्वात्, देशराज्यादिभेदश्चैकदेश एवानेकराज्यसम्भव इत्येवं स्वधिया भाव्यम् इत्युक्तो लौकिकः, कुप्रावचनिक उच्यते-असावपि सावद्यप्रायो लौकिककल्प एव, यत आह- "सावज्जो उ" इत्यादि, अवद्यं-पापं सहावद्येन सावद्यं, तुशब्दस्त्वेवकारार्थः, स चावधारणे, सावद्य एव, कः? - 'कुतीर्थिकधर्मः' चरकपरिव्राजकादिधर्म इत्यर्थः, कुत एत-दित्याह-न 'जिनैः' अर्हद्भिः तुशब्दादन्यैश्च प्रेक्षापूर्वकारिभिः 'प्रशंसितः' स्तुतः सारम्भपरिग्रह-त्वात्, अत्र बहुवक्तव्यम तत्तु नोच्यते, गमनिकामात्रफलत्वात् प्रस्तुतव्यापारस्येति गाथार्थः ॥

उक्तः कुप्रावचनिकः, साम्प्रतं लोकोत्तरं प्रतिपादयन्नाह-

नि.[४३] दुविहो लोगुत्तरिओ सुअधम्मो खलु चरित्तधम्मो अ।
सुअधम्मो सज्झाओ चरित्तधम्मो समणधम्मो ॥

**वृ.** द्विविधो-द्विप्रकारो 'लोकोत्तरो' लोकप्रधानो, धर्म इति वर्त्तते, तथा चाहश्रुतधर्मः खलु चारित्र-धर्मश्च, तत्र श्रुतं-द्वादशाङ्गं तस्य धर्मः, खलुशब्दो विशेषणार्थः, किं विशिनष्टि ? स हि वाचनादिभेदाच्चित्र इति, आह च-श्रुतधर्मः स्वाध्यायः-वाचनादिरूप, तत्त्वचिन्तायां धर्म-हेतुत्वाद्धर्म इति। तथा चारित्रधर्मश्च, तत्र "चारगतिभक्षणयोः" इत्यस्य "अर्त्तिलूधूसूखनसहचार इत्रन्" इतीत्रन्प्रत्ययान्तस्य चरित्रमिति भवति, चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपं तस्य भावश्चारित्रम्, अशेषकर्मक्षपाय चेष्टेत्यर्थः, ततश्चारित्रमेव धर्मः चारित्रधर्म इति। चः समुच्चये।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं च श्रमणधर्म एवेत्याह–चारित्रधर्मः श्रमणधर्म इति, तत्र श्राम्यतीति श्रमणः "कृत्यल्युटो बहुलम्" इति वचनात् कर्त्तरि ल्युट्, श्राम्यतीति–तपस्यतीति, एतदुक्तं भवति–प्रव्रज्यादिवसादाराभ्य सकलसावद्ययोगविरतौ गुरूपदेशादनशनादि यथाशक्त्याऽऽ प्राणोपरमात्तपश्चरतीति, उक्तं च–

"यः समः सर्वभूतेषु, त्रसेषु स्थावरेषु च।
तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्तितः ॥"

इति, तस्य धर्मः स्वभावः श्रमणधर्मः, स च क्षान्त्यादिलक्षणो वक्ष्यमाण इति गाथार्थः। उक्तो धर्मः, साम्प्रतं मङ्गलस्यावसरः, तच्च प्राग्निरूपितशब्दार्थमेव, तत्पुनर्नामादिभेदतश्चतुर्धा, तत्र नामस्थापने क्षुण्णत्वात्वसाक्षादनादृत्व द्रव्यभावमङ्गलाभिधित्सयाऽऽह–

**नि.[४४]** दव्वे भावेऽवि अ मंगलाइं दव्वम्मि पुण्णकलसाई।
धम्मो उ भावमंगलमेत्तो सिद्धित्ति काऊणं ॥

**वृ.** 'द्रव्यं' इति द्रव्यमधिकृत्य भाव इति भावं च मङ्गले अपिशब्दान्नामस्थापने च। तत्र 'दव्वम्मि पुण्णकलसाई' द्रव्यमधिकृत्य पूर्णकलशादि, आदिशब्दात् स्वस्तिकादिपरिग्रहः, धर्मस्तु तुशब्दोऽवधारणे धर्म एव भावमङ्गलं। कुत एतदित्यत आह–'अतः' अस्माद्धर्म्मात्क्षान्त्यादिलक्षणात् 'सिद्धिरितिकृत्वा' मोक्ष इतिकृत्वा, भवगालनादिति गाथार्थः॥ अयमेव चोत्कृष्टं–प्रधानं मङ्गलम्, एकान्तिकत्वादात्यन्तिकत्वाच्च, न पूर्णकलशादि, तस्य नैकान्तिकत्वादनात्यन्तिकत्वाच्च॥ साम्प्रतं 'यथोद्देशं निर्देश' इतिकृत्वा हिंसाविपक्षतोऽहिंसा, तां प्रतिपादयन्नाह–

**नि.[४५]** हिंसाए पडिवक्खो होइ अहिंसा चउव्विहा सा उ।
दव्वे भावे अ तहा अहिंसऽजीवाइवाओत्ति॥

**वृ.** तत्र प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा, अस्याः हिंसायाः किम्? – प्रतिकूलः पक्षः प्रतिपक्षः–अप्रमत्ततया शुभयोगपूर्वकं प्राणाव्यपरोपणमित्यर्थः, किम्? – भवत्यहिंसेति, तत्र 'चतुर्विधा' चतुष्प्रकारा अहिंसा, 'दव्वे भावे अ' त्ति द्रव्यतो भावतश्चेत्येको भङ्गः, तथा द्रव्यतो नो भावतः तथा न द्रव्यतो भावतः, तथा न द्रव्यतो न भावत इति तथाशब्दसमुच्चितो भङ्गत्रयोपन्यासः, अनुक्तसमुच्चयार्थकत्वादस्येति, उक्तं च "तथा समुच्चयनिर्देशावधार–सादृश्य–प्रकारवचनेष्वित्यादि, तत्रायं भङ्गकभावार्थः–द्रव्यतो भावतश्चेति, "जहा केइ पुरिसे मिअवह–परिणामपरिणए मियं पासित्ता आयन्नाइड्डियकोदंडजीवे सरं निसिरिज्जा, से अ मिए तेन सरेन विद्धे मए सिआ, एसा दव्वओ हिंसा भावओवि"॥ या पुनर्द्रव्यतो न भावतः सा खल्वीर्यादिसमितस्य साधोः कारणे गच्छत इति, उक्तं च–

"उच्चालिअम्मि पाए इरियासमिअस्स संकमट्ठाए।
वावज्जेज्ज कुलिंगी मरिज्ज तं जोगमासज्जा ॥१॥
न य तस्स तन्निमित्तो बंधो सुहुमो वि देसिओ समए।
जम्हा सो अपमत्तो सा य पमाओत्ति निद्दिट्ठा ॥२॥"

इत्यादि। या पुनर्भावतो न द्रव्यतः, सेयम्–जहां केवि पुरिसे मंदमंदप्पगासप्पदेसे संठियं ईसिवलिअकायं रज्जुं पासित्ता एस अहित्ति तव्वहपरिणामपरिणए निकड्डियासिपत्ते दुअं दुअं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छिंदिज्जा एसा भावओ हिंसा न दव्वओ। चरमभङ्गस्तु शून्य इति, एवंभूतायाः हिंसायाः प्रति-पक्षोऽहिंसेति। एकार्थिकाभिधित्सयाऽऽह-'अहिंसऽजीवाइवाओत्ति' न हिंसा अहिंसा, न जीवातिपातः अजीवातिपातः, तथा च तद्वतः स्वकर्मातिपातो भवत्येव, अजीवश्च कर्मेति भावनीय-मिति। उपलक्षणत्वाचेह प्राणातिपातविरत्यादिग्रह इति गाथार्थः॥ साम्प्रतं संयम-

**नि.[४६]** पुढविदगअगणिमारुयवणस्सईबितिचउपणिंदिअजज्जजीवे॥
पेहोपेहपमज्जणपरिट्ठवणमनोवई काए॥

**वृ.**-

पुढवाइयाणजाव य पंचिंदिय संजमो भवे तेसिं।
संघट्टणादि न करे तिविहेणं करणजोएणं॥१॥
अज्जीवेहिं जेहिं गहिएहिं असंजमो इहं भणिओ।
जह पोत्थदूसपणए तणपणए चम्मपणए अ॥२॥
गंडी कच्छवि मुट्ठी संपुडफलए तहा छिवाडी अ।
एयं पोत्थयपणयं पन्नात्तं वीअराएहिं॥३॥
बाहल्लपुहुत्तेहिं गंडी पोत्थो उ तुल्लगो दीहो।
कच्छवि अंते तणुओ मज्झे पिहुलो मुणेअव्वो॥४॥
चउरंगुलदीहो वा वट्टागिति मुट्ठिपोत्थगो अहवा।
चउरंगुलदीहो चिअ चउरस्सो होइ विन्नेओ॥५॥
संपुडओ दुगमाई फलगा वोच्छं छिवाडिमेत्ताहे।
तनुपत्तोसिअरूवो होइ छिवाडी बुहा बेंति॥६॥
दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो।
तं मुणिअ समयसारा छिवाडिपोत्थं भणंतीह॥७॥
दुविहं च दूसपणअं समासओ तंपी होइ नायव्वं।
अप्पडिलेहियदूसं दुप्पडिलेहं च विन्नयं॥८॥
अप्पडिलेहिअदूसे तूली उवधाणगं च नायव्वं।
गंडुवधाणालिंगिणि मसूरए चेव पोत्तमए॥९॥
पल्हवि कोयवि पावार नवतए तहय दाढिगालीओ।
दुप्पडिलेहिअ दूसे एवं बीअं भवे पणगं॥१०॥
पल्हवि हत्थुत्थरणं कोयवओ रूअपूरिओ पडओ।
दढगालि धोइ पोत्ती सेस पसिद्धा भवे भेदा॥११॥
तणपणगं पुन भणियं जिनेहि कम्मट्ठगंठिदहणेहिं।
साली वीही कोद्दव रालग रन्नेतणाइं च॥१२॥
अय एल गावि महिसी मियाणमजिनं च पंचमं होइ।
तलिया खल्लग कोसग कित्ती य बितिए य॥१३॥
तह विअडहिरण्णाइं ताइं न गेण्हइ असंजमं साहू।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठाणाइ जत्थ चेए पेह पमज्जित्तु तत्थ करे ॥१४॥
एसा पेह उवेहा पुणोवि दुविहा उ होइ नायव्वा।
वावारावावारे वावारे जह उ गामस्स ॥१५॥
एसो उविक्खगो हू अव्वावारे जहा विनस्संतं।
किं एयं नु उविक्खसि ? दुविहाएवित्थ अहियारो ॥१६॥
वावारुव्विक्ख तहिं संभोइय सीयमाण चोएइ।
चोएई इयरं पिहु पावयणीअम्मि कज्जम्मि ॥१७॥
अव्वावारउवेक्खा नवि चोएइ गिहिं तु सीअंतं।
कम्मेसु बहुविहेसुं संजम एसो उवेक्खाए॥१८॥
पडिसागरिए अपमज्जिएसु पाएसु संजमो होइ।
ते चेव पमज्जंते असागरिए संजमो होइ ॥१९॥
पाणाईसंसत्तं भत्तं पाणमहवा वि अविसुद्धं।
उवगरणभत्तमाई जंवा अइरित्त होज्जाहि ॥२०॥
तं परिट्ठुप्पविहीए अवहट्टुंसंजमो भवे एसो।
अकुसलमनवइरोहो कुसलाण उदीरणं चेव ॥२१॥
जुयलं मनवइसंजम एसो काए पुण जं अवस्सकज्जम्मि।
गमनागमनं भवइ तं उवउत्तो कुणइ सम्मं ॥२२॥
तव्वज्जं कुम्मस्स व सुसमाहियपाणिपायकायस्स।
हवइ य काइयसंजम चिट्ठंतस्सेव साहुस्स ॥२३॥

उक्तः संयमः। आह-अहिंसैव तत्त्वतः संयम इतिकृत्वा तद्भेदेनास्याभिधानमयुक्तम्, न, संयमस्याहिंसाया एव उपग्रहकारित्वात्, संयमिन एव भावतः खल्वहिंसकत्वादिति कृतं प्रसङ्गेन। साम्प्रतं तपः प्रतिपाद्यते-तच्च द्विधा-बाह्यमाभ्यन्तरं च। तत्र तावद्बाह्यप्रतिपादनायाह-

**नि.[४७]** अनसनमूनोअरिआ वित्ती संखेवणं रसाच्चाओ।
कायकिलेसो संलीयणा य बज्झो तवो होइ॥

**वृ.** न अशनमनशनम्-आहारत्याग इत्यर्थः, तत्पुनर्द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं-परिमितकालं, तत्पुनश्चरमतीर्थकृत्तीर्थे चतुर्थादिषणमासान्तम्, यावत्कथिकं त्वाजन्म-भावि, तत्पुनश्चेष्टाभेदोपाधिविशेषतस्त्रिधा, तद्यथा-पादपोपगमनमिङ्गितमरणं भक्तपरिज्ञा चेति, तत्रानशनिनः परित्यक्तचतुर्विधाहारस्याधिकृतचेष्टाव्यतिरेकेण चेष्टान्तरमधिकृत्यैकान्तनिष्प्रति-कर्मशरीरस्य पादपस्येवोपगमनं सामीप्येन वर्त्तनं पादपोपगमनमिति, तच्च द्विधा-व्याघात-वन्निर्व्याघातवच्च, तत्र व्याघातवन्नाम यत्सिंहाद्युपद्रवव्याघाते सति क्रियत इति, उक्तं च-

"सीहादिसु अभिभूओ पादवगमनं करेइ थिरचित्तो।
आउम्मि पहुप्पंते विआनिउं नवरि गीअत्थो॥"

इत्यादि, निर्व्याघातवत्पुनर्यत्सूत्रार्थतदुभयनिष्ठितः शिष्यान्निष्पाद्योत्सर्गतः द्वादश समाः कृत-परिकर्मा सन्काल एव करोति, उक्तं च -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"चत्तारि विचित्ताइं विगईनिज्जूहियाइं चत्तारि।
संवच्छरे अ दोन्नि उ एगंतरिअं च आयामं ॥१॥
नाइविगिट्ठो अ तवो छम्मासे परिमिअं च आयामं।
अन्ने वि अ छम्मासे होइ विगिट्ठं तवोकम्मं ॥२॥
वासं कोडीसहियं आयामं काउ आनुपुव्वीए।
गिरिकंदरं तु गंतुं पायवगमणं अह करेइ ॥३॥" इत्यादि।

तथा इङ्गिते प्रदेशे मरणमिङ्गितमरणम्, इदं च संहननापेक्षमनन्तरोदितमशकुवतश्चर्विधाहार-विनिवृत्तिरूपं खत एवोद्वर्त्तनादिक्रियायुक्तस्थावगन्तव्यमिति, उक्तं च -

"इंगिअदेसंमि सयं चउव्विहाहारचायनिप्फन्नं।
उव्वत्तणादिजुत्तं नाणेन उ इंगिनीमरणं ॥" इत्यादि।

भक्तपरिज्ञा पुनस्त्रिविधचतुर्विधाहारविनिवृत्तिरूपा, सा नियमात्सप्रतिकर्मशरीरस्यापि धृतिसंहननवतो यथासमाधि भावतोऽवगन्तव्येति, उक्तं च -

"भत्तपरिण्णानसनं तिविहाहारइचायनिप्फन्नं।
सपडिक्कम्मं नियमा जहासमाहिं विनिद्दिट्ठं ॥" इत्यादि।

उक्तमनशनम्, अधुना ऊनोदरता-ऊनोदरस्य भाव ऊनोदरता, सा पुनर्द्विविधा-द्रव्यतो भावतश्च, तत्र द्रव्यत उपकरणभक्तपानविषया, तत्रोपकरणे जिनकल्पिकादीनामन्येषां वा तदभ्यास-पराणामवगन्तव्या, न पुनरन्येषाम्, उपध्यभावे समग्रसंयमाभावाद् अतिरिक्ताग्रहणतो वोनोदरतेति,

"जं वट्टइ उवयारे उवगरणं तं सि होइ उवगरणं।
अइरेगं अहिगरणं अजयं अजओ परिहरंतो ॥" इत्यादि।

भक्तपाननोदरता पुनरात्मीयाहारादिमानपरित्यागवतो वेदितव्या, उक्तं च -

"बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ।
पुरिसस्स महिलिआए अट्ठावीसं हवे कवला ॥१॥
कवलाण य परिमाणं कुक्कुडिअंडयपमाणमेत्तं तु।
जो वा अविगिअवयणो वयणम्मि छुहेज्ज वीसत्थो ॥२॥" इत्यादि।

एवं व्यवस्थिते सत्यूनोदरता अल्पाहारादिभेदतः पञ्चविधा भवति, उक्तं च -

"अप्पाहार अवड्ढा दुभाग पत्ता तहेव किंचूना।
अट्ठ दुवालस सोलस चउवीस तहेक्कतीसा य ॥"

अयमत्र भावार्थः-अल्पाहारेनोदरता नामैककवलादारभ्य यावदष्टौ कवला इति, अत्र चैक-कवलमाना जघन्या, अष्टकवलमाना पुनरुत्कृष्टा, शेषभेदा मध्यमा च, एवं नवभ्य आरभ्य यावद् द्वादश कवलास्तावदपार्धोनोदरता जघन्यादिभेदा भावनीया इति, एवं त्रयोदशभ्य आरभ्य यावत्षोडश तावद् द्विभागोनोदरता, एवं सप्तदशभ्य आरभ्य यावच्चतुर्विंशतिस्तावत्प्राप्ता, इत्थं पञ्चविंशतेराभ्य यावदेकत्रिंशत्तावत्किञ्चिदूनोदरता, जघन्यादिभेदाः सुधियाऽवसेयाः, एवमनेनानुसारेण पानेऽपि वाच्याः, एवं योषितोऽपि द्रष्टव्या इति, भावोनोदरता पुनः क्रोधादि-परित्याग इति, उक्तं च -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कोहाईणमनुदिनं चाओ जिनवयणभावनाओ अ।
भावेनोनोदरिआ पन्नत्ता वीअरागेहिं॥" इत्यादि।

उक्तोनोदरता, इदानीं वृत्तिसंक्षेप उच्यते-स च गोचराभिग्रहरूपः, ते चानेकप्रकाराः, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो निर्लेपादि ग्राह्यमिति, उक्तं च -

"लेवडमलेवडं वा अमुगं दव्वं च अज्ज घिच्छामि।
अमुगेन व दव्वेणं अह दव्वाभिग्गहो नाम॥१॥
अट्ठ उ गोअरभूमी एलुगविक्खंभमित्तगहणं च।
सग्गामपरग्गामे एवइय धरा य खित्तम्मि॥२॥
उज्जुअ गंतुंपच्चागई अ गोमुत्तिआ पयंगविही।
पेडा य अद्धपेडा अब्भिंतरबाहिसंवुक्का॥३॥
काले अभिग्गहो पुन आदि मज्झे तहेव अवसाने।
अप्पत्ते सइकाले आदी बिइ मज्झ तइअंते॥४॥
दिंतगपडिच्छयाणं भवेज्ज सुहुमं पि मा हु अचियत्तं।
इति अप्पत्तअतीते पवत्तणं मा य तो मज्झे॥५॥
उक्खित्तमाइचरगा भावजुआ खलु अभिग्गहा होंति।
गायंतो अ रुअंतो जं देइ निसन्नमादी वा॥६॥
ओसक्कण अहिसक्कणपरंमुहालंकिओ नरो वावि।
भावन्नयरेण जुओ अह भावाभिग्गहो नाम॥७॥

उक्तो वृत्तिसंक्षेतः, साम्प्रतं रसपरित्याग उच्यते-तत्र रसाः क्षीरादयस्तत्परित्यागस्तप इति,

"विगइं विगईभीओ विगइगयं जो उ भुंजए साहू।
विगई विगइसहावा विगई विगइं बला नेइ॥१॥
विगई परिणइधम्मो मोहो जमुदिज्जए उदिन्ने अ।
सुट्ठुवि चित्तजयपरो कहं अकज्जे न विट्टिहिति ?॥२॥
दावानलमज्झगओ को तदुवसमट्ठयाइ जलमाई।
सन्तेवि न सेविज्जा ? मोहानलदीविएसुवमा॥३॥"

इत्यादि, उक्तो रसपरित्यागः, साम्प्रतं कायक्लेश उच्यते-स च वीरासनादिभेदाच्चित्र इति,

"वीरासन उक्कुडुगासणाइ लोआइओ य विन्नेओ।
कायकिलेसो संसारवासनिव्वेअहेउत्ति॥१॥
वीरासनाइसु गुणा कायानिरोहो दया अ जीवेसु।
परलोअमई अ तहा बहुमानो चेव अन्नेसिं॥२॥
निस्संगया य पच्छापुरकम्मविवज्जणं च लोअगुणा।
दुक्खसहत्तं नरगादिभावनाए य निव्वेओ॥३॥"

तथाऽन्यैरप्युक्तम्-

"पश्चात्कर्म पुरःकर्म (र्मई) र्यापथपरिग्रहः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषा ह्येते परित्यक्ताः, शिरोलोचं प्रकुर्वता ॥" इत्यादि।

गतः कायक्लेशः, साम्प्रतं संलीनतोच्यते इयं चेन्द्रियसंलीनतादिभेदाच्चतुर्विधेति,

"इंदिअकसायजोए पडुच्च संलीनया मुणेयव्वा।
तहव विवित्ताचरिआ पन्नत्ता वीअरागेहिं ॥"

तत्र श्रोत्रादिभिरिन्द्रियैः शब्दादिषुसुन्दरेतेषु रागद्वेषाकरणमिन्द्रियसंलीनतेति, उक्तं च-

"सद्देसु अ भद्दयपावएसु सोअविसयमुवगएसु।
तुट्ठेण व रुट्ठेण व समणेण सया न होअव्वं ॥"

एवं शेषेन्द्रियेष्वपि वक्तव्यम्, यथा- "रूवेसु अ भद्दगपावएसु" इत्यादि। उक्तेन्द्रियसँली-नता, अधुना कषायसंलीनता-सा च तदुदयनिरोधोदीर्णविफलीकरणलक्षणेति, उक्तं च -

"उदयस्सेव निरोहो उदयं पत्ताणवाऽफलीकरणं।
जं इत्थ कसायाणं कसायसंलीनता एसा ॥" इत्यादि।

उक्ता कषायासंलीनता, साम्प्रतं योगसंलीनता-सा पुनर्मनोयोगादीनानामकुशलानां निरोधः कुशलानामुदीरणमित्येवंभूतेति, उक्तं च-

"अपसत्थाण निरोहो जोगाणमुदीरणं च कुसलाणं।
कज्जम्मि य विहिगमनं जोए संलीणया भणिआ ॥" इत्यादि।

उक्ता योगसंलीनता, अधुना विविक्तचर्या, सा पुनरियम्-

"आरामुज्जाणादिसु थीपसुपंडगविवज्जिएसु जं ठाणं।
फलगादीण य गहणं तह भणियं एसणिज्जाणं ॥"

गता विविक्तचर्या, उक्ता संलीनता। 'बज्झो तवो होही' इति एतदनशनादि बाह्यं तपो-भवति, लौकिकैरप्यासेव्यमानं ज्ञायत इतिकृत्वा बाह्यमित्युच्यते विपरीतग्राहेण वा कुतीर्थिकैरपि क्रियत इतिकृत्वा इति गाथार्थः ॥ उक्तं बाह्यं तपः, इदानीमाभ्यन्तरमुच्यते। तच्च प्रायश्चित्ता-दिभेदमिति, आह च-

**नि.[४८]** पायच्छित्तं विनओ वेआवच्चं तहेव सज्झाओ।
झाणं उस्सग्गोऽवि अ अब्भिंतरओ तवो होइ ॥

**वृ.** तत्र पापं छिनत्तीति पापच्छित्, अथवा यथावस्थितं प्रायश्चितं शुद्धमस्मिन्निति प्राय-श्चित्तमिति, उक्तं च-

"पावं छिंदइ जम्हा पायच्छित्तंति भण्णए तम्हा।
पाएण वावि चित्तं विसोहई तेण पच्छित्तं ॥१॥"

तत्पुनरालोचनादि दशधेति, उक्तं च-

"आलोयणपडिक्कमणे मीसविवेगे तहा विउस्सग्गे।
तवछेअमूल अनवट्ठया य पारंचिए चेव ॥

भावार्थोऽस्या आवश्यकविशेषविवरणादवसेये इति। उक्तं प्रायश्चित्तं, साम्प्रतं विनय उच्यते-तत्र विनीयतेऽनेनाष्टप्रकारं कर्मेति विनय इति, उक्तं च-

"विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥१॥
संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम्।
तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥२॥
योगनिरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः।
तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥३॥

स च ज्ञानादिभेदात् सप्तधा, उक्तं च –

"नाणे दंसणचरणे मनवइकाओवयारिओ विनओ।
नाणे पंचपगारो मइनाणाईण सद्दहणं ॥१॥
भत्ती तह बहुमानो तद्दिट्ठत्थाण सम्म भावनया।
विहिगहणब्भासोवि अ एसो विनओ जिनाभिहिओ ॥२॥
सुस्सूसणा अनासायणा य विनओ अ दंसणे दुविहो।
दंसणगुणाहिएसुं कज्जइ सुस्सूसणाविनओ ॥३॥
सक्कारब्भुट्ठाणे सम्माणासण अभिग्गहो तह य।
आसनअनुप्पयाणं किइकम्मं अंजलिगहो अ ॥४॥
एं तस्सनुगच्छणया ठिअस्स तह पज्जुवासणा भणिया।
गच्छंतानुव्वयणं एसो सुस्सूसणाविनओ ॥५॥

इत्थ य सक्कारो–थुणणवंदनादि अब्भुट्ठाणं–जओ दीसइ तओ चेव कायव्वं, संमानो वत्थ-पत्तादीहिं पूअणं, आसनाभिग्गहो पुण–अच्छंतस्सेवायरेनासनानयनपुव्वगं उवविसह एत्थत्ति भण्णंति, आसनअनुप्पदानं तु ठाणाओ ठाणं संचारणं, किइकम्मादओ पगडत्था।

अनासायणा–विनओ पुण पन्नरसविहो, तंजहा –

"तित्थगर धम्म आयरिअ वायगे थेर कुलगणे संघे।
संभोइय किरियाए मइनाणाईण य तहेव ॥१॥"

एत्थ भावना–तित्थगराणमणासायणाए तित्थगरपन्नत्तस्स धम्मसस अनासायणाए। एवं सर्वत्र द्रष्टव्यम्।

"कायव्वा पुन भत्ती बहुमानो तह य वण्णवाओ अ।
अरिहंतमाइयाणं केवलनाणावसाणाणं ॥१॥"

उक्तो दर्शनविनयः, साम्प्रतं चारित्रविनयः–

"सामाइयाइचरणस्स सद्दहाणं तहेव काएणं।
संफासणं परूवणमह पुरओ भव्वसत्ताणं ॥१॥
मनवइकाइयविनओ आयरियाईण सव्वकालंपि।
अकुसलमनोनिरोहो कुसलाण उदीरणं तहय ॥२॥

इदानीमौपचारिकविनयः, स च सप्तधा,

"अब्भासऽच्छणछंदानुवत्तणं कयपडिकिई तहय।
कारियनिमित्तकरणं दुक्खत्तगवेसणा तहय ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह देसकालजानन सव्वत्थेसु तहयनुमई भणिया।
उवआरिओ उ विनओ एसो भणिओ समासेणं ॥२॥

तत्थ अब्भासऽच्छणं आएसत्थिणा निच्चमेव आयरियस्स अब्भासे-अदुरसामत्थे अच्छेअव्वं, छंदोऽणुवत्तियव्वो, कयपडिकिई णाम पसण्णा आयरिया सुत्तत्थतदुभयाणि दाहिंति न नाम निज्जरत्ति आहारादिणा जइयव्वं, कारियनिमित्तकरणं सम्ममत्थपदमहेज्जाविएण विणएण विसेसेण वट्टिअव्वं, तयट्ठानुट्ठाणं च कायव्वं, सेस भेदा पसिद्धा। उक्तो विनयः, इदानीं वैयावृत्यम्-तत्र व्यापृतभावो वैयावृत्त्यमिति, उक्तं च-

"वेआवच्चं वावडभावो इह धम्मसाहणनिमित्तं।
अन्नादियाण विहिणा संयापणंमेस भावत्थो ॥१॥
आयरिअ उवज्झाए थेर तवस्सी गिलाणसेहाणं।
साहम्मियकुलगणसंघसंगयं तमिह कायव्वं ॥२॥

तत्थ आयरिओ पंचविहो, तंजहा-पव्वावणायरिओ दिसायरिओ सुत्तस्स उद्देसणायरिओ, सुत्तस्स समुद्देस्सणायरिओ वायणायरिओत्ति, उवज्झाओ पसिद्धो चेव, थेरो नाम जो गच्छस्स संठितिं करेइ, जाइसुअपरियायाइसु वा थेरो, तवस्सी नाम जो उग्गतवचरणओ, गिलाणो नाम रोगभिभूओ, सिक्खगो नाम जो अहुणा पव्वइओ, साहम्मिओ नाम एगो पवयणओ न लिंगओ, एगो लिंगओ न पवयणओ, एगो लिंगओ वि पवयणओ वि, एगो न लिंगओ न पवयणओ, कुलगणसंघा पसिद्धा चेव। इदानीं सज्झाओ, सो अ पंचविहो-वायणा पुच्छणा परिअट्टणा अनुप्पेहा धम्मकहा, वायणा नाम सिस्सस्स अज्झावणं, पुच्छणा सुत्तस्स अत्थस्स वा हवइ, परिअट्टणा नाम परिअट्टणंति वा अब्भस्सणंति वा गुणणंति एगट्ठा, अनुप्पेहा नाम जो मनसा परिअट्टेइ णो वायाए, धम्मकहा नाम जो अहिंसाइलक्खणं सव्वन्नुपणीअं धम्मं अनुओगं वा कहेइ, सा धम्मकहा। गतः स्वाध्यायः इदानीं ध्यानमुच्यते-तत्पुनरार्त्तादिभेदाच्चतुर्विधम्, तद्यथा-आर्त्तध्यानं रौद्रध्यानं धर्मध्यानं शुक्लध्यानं चेति, तत्र-

राज्योपभोगशयनासनवाहनेषु, स्त्रीगन्धमाल्यमणिरत्नविभूषणेषु।
इच्छाभिलाषमतिमात्रमुपैति मोहाद्, ध्यानं तदार्त्तमिति तत्प्रवदन्ति तज्ज्ञाः ॥१॥
संछेदनैर्दहनभञ्जनमारणैश्च, बन्धप्रहारदमनैर्विनिकृन्तनैश्च।
यो याति रागमुपयाती च नानुकम्पां, ध्यानन्तु रौदमिति तत्प्रवदन्ति तज्ज्ञाः ॥२॥
सूत्रार्थसाधनमहाव्रतधारणेषु, बन्धप्रमोक्षगमनागमहेतुचिन्ता।
पञ्चेन्द्रियव्युपरमश्च दया च भूते, ध्यानं तु धर्ममिति तत्प्रवदन्ति तज्ज्ञाः ॥३॥
यस्येन्द्रियाणि विषयेषु पराङ्मुखानि, सङ्कल्पकल्पनविकल्पविकारदोषैः।
योगैः सदा त्रिभिरहो निभृतान्तरात्मा, ध्यानोत्तमं प्रवरशुक्लमिदं वदन्ति ॥४॥

आर्त्ते तिर्यगितिस्तथा गतिरधो ध्याने तु रौद्रे सदा, धर्मे देवगतिः शुभं बत फलं शुक्ले तु जन्म-क्षयः।
तस्माद् व्याधिरुगंतकेहितकरे संसारनिर्वाहके, ध्याने शुक्लवरे रजःप्रमथने कुर्यात् प्रयत्नं बुधः
उक्तं समासतो ध्यानं, विस्तरतस्तु ध्यानशतकादवसेयमिति।

साम्प्रतं व्यत्सर्गः, स च द्विधा-द्रव्यतो भावतश्च, द्रव्यतश्चतुर्धा-गणशरीरोपध्याहारभेदात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावतश्चित्रः, क्रोधादिपरित्याग-रूपत्वात्तस्येति, उक्तं च -

"दव्वे भावे अ तहा दुहा विसग्गो चउव्विहो दव्वे।
गणदेहोवहिभत्ते भावे कोहादिचाओ त्ति॥१॥
काले गणदेहाणं अतिरित्तासुद्धभत्तपाणाणं।
कोहाइयाण सययं कायव्वो होइ चाओ त्ति॥२॥

उक्तो व्यत्सर्गः, 'अब्भिंतरओ तवो होइ' त्ति, इदं प्रायश्चित्तादि व्युत्सर्गान्तमनुष्ठानं लौकिकैरनाभिलक्ष्यत्वात्तत्रान्तरीयैश्च भावतोऽनासेव्यमानत्वान्मोक्षप्राप्त्यन्तरङ्गत्वाच्चाभ्यन्तरं तपो भवतीति गाथार्थः॥ शेषपदानां प्रकटार्थत्वात् सूत्रपदस्पर्शिका निर्युक्तिकृता नोक्ता, स्वधिया तु विभागे(न) स्थापनीयेति॥ अत्राह- 'धर्मो मङ्गलमुत्कृष्ट' मित्यादौ धर्मग्रहणे सति अहिंसा-संयमतपोग्रहणमयुक्तं, तस्याहिंसासंयमतपोरूपत्वाव्यभिचारादिति, उच्यते, न, अहिंसादीनां धर्मकारणत्वाद्धर्म्मस्य च कार्यत्वात्कार्यकारणयोश्च कथञ्चिद्भेदात्, कथंचिद्भेदश्च तस्य द्रव्य-पर्यायोभयरूपत्वात्, उक्तं च-

"नत्थि पुढवीविसिट्ठो घडोत्ति जं तेन जुज्जइ अनन्नो।
जं पुण घडुत्ति पुव्वं नासी पुढवीइ तो अन्नो॥" इत्यादि।

गम्यादिधर्मव्यवच्छेदेन तत्स्वरूपज्ञापनार्थं वाऽहिंसादिग्रहणमदुष्टमित्यलं विस्तरणे॥ आह-अहिंसासंसयमतपोरूपो धर्मो मङ्गलमृत्युकृष्टमित्येतद्वचः किमाज्ञासिद्धमाहोस्विद्युक्तिसिद्ध-मपि?, अत्रोच्यते, उभयसिद्धं, कुतो?, जिनवचनत्वात्, तस्य च विनेयत्त्वापेक्षयाऽऽज्ञादिसिद्ध-त्वात्, आह च निर्युक्तिकारः-

**नि.[४९]** जिनवयणं सिद्धं चेव भण्णइ कत्थई उदाहरणं।
आसज्ज उ सोयारं हेऊऽवि कहिंचि भण्णेज्जा॥

**वृ.** जिनाः प्राग्निरूपितस्वरूपाः तेषां वचनं तदाज्ञया सिद्धमेव-सत्यमेव प्रतिष्ठितमेव अवि-चार्यमेवेत्यर्थः, कुतः?, जिनानां रागादिरहितत्वात्, रागादिमतश्च सत्यवचनासम्भवात्,

"रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्।
यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात्?॥१॥

" इत्यादि, तथापि तथाविधश्रोत्रपेक्षया तत्रापि भण्यते क्वचिदुदाहरणम्, तथा आश्रित्य तु श्रोतारं हेतुरपि कचिद्भण्यते, न तु नियोगतः तुशब्दः श्रोतृविशेषणार्थः, किंविशिष्टं श्रोतारम्?-पटुधियं मध्यमधीस्तु तेनैव बोध्यते, न त्वितर इत्यर्थः। तत्र साध्यसाधनान्वय-व्यतिरेकप्रदर्शनमुदाहरणमुच्ये, दृष्टान्त इत्यर्थः, साध्यधर्मान्वयव्यतिरेकलक्षणश्च हेतुः, इह च हेतुमुल्लंघय प्रथममुदाहरणाभिधानं न्यायानुगत्वात्तद्बलेनैव हेतोः साध्यार्थसाधकत्वोपपत्तेः क्वचिद्धेतुमनभिधाय दृष्टान्त एवोच्यत इति न्यायप्रदर्शनार्थं वा, यथा गतिपरिणामपरिणतानां जीवपुद्गलानां गत्युपष्टम्भको धर्म्मास्तिकायः, चक्षुष्मतो ज्ञानस्य दीपवत्, उक्तं च-

"जीवानां पुद्गलानां च, गत्युपष्टम्भकारणम्।
धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा॥"

तथा क्वचिद्धेतुरेव केवलोऽभिधीयते न दृष्टान्तः, यथा मदीयोऽयमश्वो, विशिष्टचिह्नोपलब्ध्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यथानुपपत्तेरित्यलं प्रसङ्गेनेति गाथार्थः ॥ तथा-

नि.[५०] कत्थइ पंचावयवं दसहा सव्वहा न पडिसिद्धं।
न य पुन भण्णइ हंदी सविआरमक्खायं॥

वृ. श्रोतारमेवाङ्गीकृत्य कचित्पञ्चावयवं 'दशधा वे'ति क्वचिद्दशावयवं, 'सर्वथा' गुरुश्रोत्र-पेक्षया न प्रतिपिद्धमुदाहरणाद्यभिधानमिति वाक्यशेषः, यद्यपि च न प्रतिषिद्धं तथाप्यविशेषेणैव, न च पुनः सर्वं भण्यते उदाहरणादि, किमित्यत आह- 'हंदी सविआरमक्खायं' हन्दीत्युपप्रदर्शने, विमुपप्रदर्शयति ?, यस्मादिहान्यत्र च शास्त्रान्तरे 'सविचारं' सप्रतिपक्षमाख्यातं साकल्यत उदाहरणाद्यभिधानमिति गम्यते, पञ्चावयवाश्च प्रतिज्ञादयः, यथोक्तम्-"प्रतिज्ञाहेतू-दाहरणोपनयनिगमनान्यवयवाः" दश पुनः प्रतिज्ञाविभक्त्यादयः, वक्ष्यति च- "ते उ पइण्ण-विहत्ती" इत्यादि। प्रयोगाश्चैतेषां लाघवार्थमिहैव स्वस्थाने दर्शयिष्याम इति गाथार्थः ॥ साम्प्रतं यदुक्तम्- 'जिनवयणं सिद्धं चेव भण्णई कत्थई उदाहरणं' इत्यादि, तत्रोदाहरणहेत्वोः स्वरूपा-भिधित्सयाऽऽह-

नि.[५१] तत्थाहरणं दुविहं चउव्विहं होइ एक्कमेक्कं तु॥
हेऊ चउव्विहो खलु तेन उ साहिज्जए अत्थो॥

वृ. तत्रशब्दो वाक्योपन्यासार्थो निर्धारणार्थे वा, उदाहरणं पूर्ववत्, तच्च मूलभेदतो 'द्विविधं' द्विप्रकार, चरितकल्पितभेदात्, उत्तरभेदतस्तु चतुर्विधं भवति, तयोर्द्वयोरेकैकमुदाहरणमाहरण तद्देश तद्दोषोपन्यासभेदात्, तच्च वक्ष्यामः, तथा हिनोती-गमयति जिज्ञासितधर्मविशिष्टानर्थानिति हेतुः, स 'चतुर्विधः' चतुष्प्रकारः, खलुशब्दो व्यक्तिभेदादनेकविधश्चेति विशेषणार्थः, तुशब्दस्य पुनःशब्दार्थत्वात् तेन पुनर्हेतुना साध्यार्थाविनाभावबलेन 'साध्यते' निष्पाद्यते ज्ञाप्यते वा 'अर्थः' प्रतिज्ञार्थ इति गाथार्थः ॥ साम्प्रतं नानादेशजविनेयगणहितायोदा-हरणैकार्थिकप्रतिपिपाद-यिषयाऽऽह-

नि.[५२] नायमुदाहरणंतिअ विट्ठंतोवम निदरिसणं तहय।
एगट्ठं तं दुविहं चउव्विहं चेव नायव्वं॥

वृ. ज्ञायतेऽस्मिन् सति दार्ष्टान्तिकोऽ इति ज्ञातम्, अधिकरणे निष्ठाप्रत्ययः, तथोदाह्रियते प्राबल्येन गृह्यतेऽनेन दार्ष्टान्तिकोऽर्थ इति उदाहरणम्, दृष्टमर्थमन्तं नयतीति दृष्टान्तः, अतीन्द्रिय-प्रमाणादृष्टं संवेदननिष्ठां नयतीत्यर्थः, उपमीयतेऽनेन दार्ष्टान्तिकोऽर्थ इत्युपमानम्, तथा च 'निदर्शनं' निश्चयेन दर्श्यतेऽनेन दार्ष्टान्तिक एवार्थ इति निदर्शनम्, 'एगट्ठं'ति इदमेकार्थम् एकार्थिक-जातम्, इदं च तत्प्रागुपन्यस्तं द्विविधमुदाहरणं चतुर्विधं चैवाङ्गीकृत्य ज्ञातव्यं प्रत्येकमपि, सामान्य-विशेषयोः कथञ्चिदेकत्वाद्, अत एव सामान्यस्यापि प्राधान्यख्यापनार्थमेकवचना-भिधानम् एकार्थमिति, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयाद्, गमनिकामात्रमेवैतदिति गाथार्थः ॥ साम्प्रतं यदुक्तं 'तत्रोदाहरणं द्विविध' मित्यादि, तद् द्वैविध्यादिप्रदर्शनायाह-

नि.[५३] चरिअं च कप्पिअं वा दुविहं तत्तो चउव्विहेक्केक्कं।
आहरणे तद्देसे तद्दोसे चेवुवन्नासे॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** चरितं च कल्पितं चे(वे) द्विविधमुदाहरणम्, तत्र चरितमभिधीयते यद्वृत्तं, तेन कस्य-चिद् दार्ष्टान्तिकार्थप्रतिपत्तिर्जन्यते, तद्यथा-दुःखाय निदानं, यथा ब्रह्मदत्तस्य। तथा कल्पितं स्वबुद्धिकल्पनाशिल्पनिर्मितमुच्यते, तेन च कस्यचिद्दार्ष्टान्तिकार्थप्रत्तिपत्तिर्जन्यते, यथा-पिप्पलपत्रैरनित्यतायामिति, उक्तं च-

"जह तुब्भे तह अम्हे तुब्भेहि अ होहिहा जहा अम्हे।
अप्पाहेइ पडंतं पंडुअपत्तं किसलयाणं ॥१॥
नवि अत्थि नवि अ होही उल्लावो किसलपंडुपत्ताणं।
उवमा खलु एस कया भविअजनविबोहणट्ठाए॥२॥" इत्यादि।

आह-इदमुदाहरणं दृष्टान्त उच्यते, तस्य च साध्यानुगमादि लक्षणमिति, उक्तं च-

"साध्येनानुगमो हेतोः, साध्याभावे च नास्तिता।
ख्याप्यते यत्र दृष्टान्तः, स साधर्म्येतरो द्विधा॥"

अस्य पुनस्तल्लक्षणा भावात् कथमुदाहरणत्वमिति?, अत्रोच्यते, तदपि कथञ्चित्साध्यानु-गमादिना दार्ष्टान्तिकार्थप्रतिपत्तिजनकत्वात्फलत उदाहरणम्, इहापि च साऽस्त्येवेतिकृत्वा किं नोदाहरणतेति?। साध्यानुगमादि क्षणमपि सामान्यविशेषोभयरूपानन्तधर्मात्मके वस्तुनि सति कथञ्चिद्भेदवादिन एव युज्यते, नान्यस्य, एकान्तभेदाभेदयोस्तदभावादिति, तथाहि-सर्वथा प्रतिज्ञादृष्टान्तार्थभेदवादिनोऽनुगमतः खलु घटादौ कृतकत्वादेरनित्यत्वादिप्रतिबन्धदर्शनमपि प्रकृतानुपयोग्येव, भिन्नवस्तुधर्मत्वात्, सामान्यस्य च परिकल्पित्वादसत्त्वाद्, इत्थमपि च तद्बलेन साध्यार्थप्रतिबन्धकल्पनायां सत्वामतिप्रसङ्गादित्यत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थ विस्तर-भयादिति, एवं सर्वथा अभेदवादिनोऽप्येकत्वादेव तदभावो भावनीयइति, अनेकान्तवादिनस्त्व-नन्तधर्मात्मके वस्तुनि तत्तद्धर्मसामर्थ्यात्तत्तद्वस्तुनः प्रतिबन्धबलेनैव तस्य तस्य वस्तुनो गमकं भवति, अन्यथा ततस्तस्मिंस्तत्प्रतिपत्त्यसम्भव इति कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः- चरितं च कल्पितं चे(वे) त्यनेन विधिना द्विविधम्, पुनश्चतुर्विधं,-चतुष्प्रकारमेकैकम्, कथमत आह-'उदाहरणं तद्देशः तद्दोषश्चैव उपन्यास' इति। तत्रोदाहरणशब्दार्थ उक्त एव, तस्य देशस्तद्देशः, एवं तद्दोषः, उपन्यसनमुपन्यासः, स च तद्वस्त्वादिलक्षणो वक्ष्यमाण इति गाथार्थः॥

साम्प्रत-मुदाहरणमभिधातुकाम आह-

**नि.[५४]** चउहा खलु आहारणं होइ अवाओ उवाय ठवणा य।
तहय पडुप्पन्नविनासमेव पढमं चउविगप्पं॥

**वृ.** चतुर्धा खलु उदाहरणं भवति, अथवा चतुर्धा खलु उदाहरणे विचार्यमाणे भेंदा भवन्ति, तद्यथाअपायः उपायः स्थापना च तथा च प्रत्युत्पन्नविनाशमेवेति, स्वरूपमेषां प्रपञ्चेन भेदतो निर्युक्तिकार एव वक्ष्यति, तथा चाह-'प्रथमम्' अपायोदाहरणं 'चतुर्विकल्पं' चतुर्भेदम्। तत्रा-पायश्चतुःप्रकारः, तद्यथा-द्रव्यापायः क्षेत्रापायः कालापायो भावापायश्च इति गाथार्थः॥ तत्र द्रव्यदपायो द्रव्यापायः, अपायः-अनिष्टप्राप्तिः द्रव्यमेव वा अपायो द्रव्यापायः, अपायहेतुत्वा-दित्यर्थः, एवं क्षेत्रादिष्वपि भावनीयम्। साम्प्रतं द्रव्यापायप्रतिपादनायाह-

**नि.[५५]** दव्वावाए दोन्नि उ वानिअगा भायरो धननिमित्तं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वहपरिणएक्कमेक्कं दहंमि मच्छेण निव्वेओ ॥

वृ. द्रव्यापाये उदाहरणं द्वौ तु, तुशब्दादन्यानि च, वणिजौ, भ्रातरौ 'धननिमित्तं' धनार्थं वधपरिणतौ 'एकैकम्' अन्योऽन्यं हृदे मत्स्येन निर्वेद इति गाथाक्षरार्थः ॥ भावार्थस्तु कथानकादवसेयः, तच्चेदमएगंमि संनिवेसे दो भायरो दरिद्दप्पाया, तेहिं सोरट्ठं गंतूण साहस्सिओ नउलओ रूवगाणं विढविओ, ते अ सयं गामं संपत्थिया, इंता तं णउलयं वारएण वहंति, जया एगस्स हत्थे तदा इयरो चिंतेइ-'मारेमि नवरमेए रूवगा ममं होतु एवं बीओ चिंतेइ "जहाऽहं एअं मारेमि" ते परोप्परं वहपरिणया अज्झवस्संति। तओ जाहे सग्गामसमीवं पत्ता तत्थ नईतडे जिट्ठेअरस्स पुनराविति्त जाया-'धिरत्थु ममं, जेन मए दव्वस्स कए भाउविनासो चिंतिओ परूण्णो, इअरेण पुच्छिओ, कहिओ, भणई-ममंपि एयारिसं चित्तं होंतं, ताहे एअस्स दोसेणं अम्हेहिं एअं चिंतिअंतिकाउं तेहिं सो नउलओ दहे छूढो, ते अ घरं गया, सो अ नउलओ तत्थ पडंतो मच्छएण गिलिओ, सो अ मच्छो मेएण मारिओ, वीहीए ओयारिओ। तेसिं च भाउगाणां भगिनी मायाए वीहिं पट्ठविआ जहा मच्छे आणेह जं भाउगाणं ते सिज्झंति, ताए अ समावत्तीए सो चेवमच्छओ आनीओ, चेडीए फालितीए नउलओ दिट्ठो, चेडीए चिंतिअं-एस नउलओ मम चेव भविस्सइत्ति उच्छंगे कओ, ठविज्जंतो य थेरीए दिट्ठो नाओ अ, तीए भणियं-किमेअं तुमे उच्छंगे कयं?, सावि लोहं गयाण साहइ, ताओ दोवि परोप्परं पहयातो, सा थेरी ताए चेडीए तारिसे मम्मप्पएसे आहया जेन तक्खणमेव जीवियाओ ववरोविया, तेहिं तु दारएहिं सो कलहवइअरो नाओ, स नउलओ दिट्ठो, थेरी गाढप्पहारा पाणविमुक्का निस्सट्ठं धरणितले पडिया दिट्ठा, चिंतिअं च नेहिं-इमो सो आयबहुलो अ(न)त्थोत्ति। एवं दव्वं अवायहेउत्ति ॥ लौकिके अप्याहुः-

"अर्थानामर्जने दुःखमर्जितानां च रक्षणे।
आये दुःखं व्यये दुःखं, धिग् द्रव्यं दुःखवर्धनम् ॥१॥
अपायबहुलं पापं, ये परित्यज्य संश्रिताः।
तपोवनं महासत्त्वास्ते धन्यास्ते तपस्विनः ॥२॥" इत्यादि।

एतावत्प्रकृतोपयोगि। तओ तेसिं तमवायं पिच्छिऊण णिव्वेओ जाओ, तओ तं दारियं कस्सइ दाऊण निव्विण्णकामभोआ पव्वइयत्ति गाथार्थः ॥ इदानीं क्षेत्राद्यपायप्रतिपादनायाह-

**नि.[५६]** खेत्तंमि अवकमणं दसारवग्गस्स होइ अवरेणं।
दीवायणो अ काले भावे मंडुक्किआखवओ ॥

**वृ.** तत्र क्षेत्र इति द्वारपरामर्शः, ततश्च क्षेत्रादपायःक्षेत्रमेव वा तत्कारणात्वादिति। तत्रोदाहरणमपक्रमणम्-अपसर्पणं 'दशारवर्गस्य' दशारसमुदायस्य भवति 'अपरेण' अपरत इत्यर्थः भावार्थः कथानकादवसेयः, तच्च वक्ष्यामः। द्वैपायनश्चकालं द्वैयापन ऋषिः, काल इत्यत्रापी कालादपायः कालापायः काल एव वा तत्कारणत्वादिति, अत्रापि भावार्थः कथानकगम्य एव, तच्च वक्ष्यामः 'भावे मंडुक्किकाक्षपक' इत्यत्रापि भावादपायो भावपायः स एव वा तत्कारणत्वादिति, अत्रापि च भावार्थः कथानकदवसेयः, तच्च वक्ष्याम इति गाथाक्षरार्थः ॥ भावार्थ उच्यते-खित्तापाओदाहरणं दसारा हरिवंसरायाणो एत्थ महई कहा जहा हरिवंसे। उवओगियं चेव भण्णए, कंसंमि विनिवाइए सावायं खेत्तमेयंतिकाऊण जरासंधरायभएण दसारवग्गो -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महुराओ अवक्कमिऊण बारवइं गओत्ति । प्रकृतयोजनां पुन-र्निर्युक्तिकार एव करिष्यति, किमकाण्डएव नः प्रयासेन? । कालावाए उदाहरणं पुण-कण्हपुच्छिएण भगवयाऽरिट्ठनेमिना वागरियं-बारसहिं संवच्छरेहिं दीवायणाओ बारवईन-यरीविनासो, उज्जोततराए नगरीए परंपराएण सुणिऊण दीवायणपरिव्वायओ मां नगरिं विणासेहामित्ति कालावधिमण्णओ गमेमित्ति उत्तरावहं गओ, सम्मं कालमाणमयानिऊण य बारसमे चेव -संवच्छरे आगओ, कुमारेहिं खलीकओ, कयनिआणो देवो उववन्नो, तओ य नगरीए अवाओ जाओत्ति, नन्नहा जिनभासियंति

भावावाए उदाहरणं खमओ-एगो खमओ चेल्लएण समं भिक्खायरियं गओ, तेन तत्थ मंडुक्कलिया मारिआ, चिल्लएण भणिअं-मंडुक्कलिआ तए मारिआ, खवगो भणइ-रे दुट्ठ सेह! चिरमइआ चेव एसा, ते गआ, पच्छा रत्तिं आवस्सए आलोइंताण खमगेन सा मंडुक्कलिया नालोइया ताहे चिल्लएण भणिअं-खमगा! तं मंडुक्कलियं आलोएहि, खमओ रुट्ठो तस्स चेल्लयस्स खेलमल्लयं घेत्तूण उद्धाइओ, अंसियालए खंभे आवडिओ वेगेन इंतो, मओ य जाइसिएसु उववन्नो, तओ चइत्ता दिट्ठीविसाणं कुले दिट्ठीविसो सप्पो जाओ, तत्थ य एगेन परिहिंडंतेन नगरे रायपुत्तो सप्पेण खइओ, अहितुंडएण विज्जाओ सव्वे सप्पा आवाहिआ, मंडले पवेसिया भणिया-अन्ने सव्वे गच्छंतु, जेन पुण रायपुत्तो खइओ सो अच्छउ, सव्वे गया, एगो ठिओ, सो भणिओ-अहवा विसं आवियह अहवा एत्थ अग्गिंमि निवडाहि, सो अ अगंधणो, सप्पाणं किल दो जाईओ-गंधणा अगंधणा य, ते अगंधणा मानिनो, ताहे सो अग्गिंमि पविट्ठो, न य तेन तं वंतं पच्चाइयं, रायपुत्तोवि मओ, पच्छा रण्णा रुट्ठेण घोसावियं रज्जे-जो मम सप्पसीसं आनेइ तस्साहं दीनारं देमि, पच्छा लोगो दीनारलोभेण सप्पे मारेउं आढत्तो, तं च कुलं जत्थ सो खमओ उप्पन्नो तं जाइसरं रत्तिं हिंडइ दिवसओ न हिंडइ, मा जीवे दहेहामित्तिकाउं, अन्नया आहितुंडिगेहिं सप्पे मग्गंतेहिं रत्तिचरेण परिमलेन तस्स खमगसप्पस्स बिलं दिट्ठंति दारे से टिओ, ओसहिओ आवाहेइ, चिंतेइ-दिट्ठो मे कोवस्स विवाओ, तो जइ अहं अभिमुहो निगच्छामि तो दहिदामि, ताहे पुच्छेन आढत्तो निप्फिडिउं, जत्तियं निप्फेडेइ तावइमेव आहिंडओ छिंदेइ, जावसीसं छिन्नं, मओ य, सो सप्पो देवयापरिग्गहिओ, देवयाए रन्नो सुमिणए दरिसणं दिन्नं-

जहा मा सप्पे मारेह पुत्तो ते नागकुलाओ उव्वट्टिऊण भविस्सइ, तस्स दारयस्स नागदत्तनामं करेज्जाहि सो अ खमगसप्पो मरित्ता तेन पाणपरिच्चाएण तस्सेव रण्णो पुत्तो जाओ, जाए दारए णामं कयं नागदत्तो, खुड्डुलओ चेव सो पव्वइओ, सो अ किर तेण तिरियाणुभावेण अतीव छुहालुओ, दोसीणवेलाए चेव आढवेइ भुंजिउं जाव सूरत्थमनवेलं, उवसंतो धम्मसद्धिओ य, तम्मि अ गच्छे चत्तारि खमगा, तंजहा-चाउम्मासिओ तिमासिओ दोमासिओ एगमासिओत्ति, रत्तिं च देवया वंदिउं आगया, चाउम्मासिओ पढमट्ठिओ, तस्स पुरओ तेमासिओ, तस्स पुरओ दोमासिओ, तस्स पुरओ एगमासिओ, ताण य पुरओ खुड्डुओ।

सव्वे खमगे अतिक्कमित्ता ताए देवयाए खुड्डुओ वंदिओ, पच्छा ते खमगा रुट्ठा, निग्गच्छंती अ गहिया चाउम्मासिअखमएण पोत्ते, भणिआ य अनेन-कडपूयणि! अम्हे तवस्सिणो न वंदसि, एयं कूरभायणं वंदसित्ति, सा देवया भणइ-अहं भावखमयं वंदामि, न पूआसक्कारपरे मानिओ अ वंदामि, पच्छा ते चेल्लयं तेन अमरिसं वहंति, देवया चिंतेइ-मा एए चेल्लयं खरंटोहिंति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो सण्णिहिआ चेव अच्छामि, ताहं पडिबोहेहामि, बितिअदिवसे अ चेल्लओ संदिसावेऊण गओ दोसीणस्स, पडिआगसो आलोइत्ता चाउम्मासियखमगं निमंतेइ, तेना पडिग्गहे से निच्छूढं, चेल्लओ भणइ-मिच्छामिदुक्कडं जं तुब्भे मए खेलमल्लओ न पणामिओ, तं तेन उप्पराउ चेव फेडित्ता खेलमल्लए छूढ, एवं जाव तिमासिएणं जाव एगमासिएणं निच्छूढं, तं तेन तहा चेव फेडिअं, अडुयालित्ता लंबणे गिण्हामित्तिकाउं खमएण चेल्लओ बाहं गहिओ, तं तेन तस्स चेल्लगस्स अदीनमनसस्स विसुद्धपरिणामस्स लेस्साहिं विसुज्झमाणीहिं तदावरणिज्जाणं कम्माणं खएण केवलनाणं समुप्पन्नं, ताहे सा देवया भणइ-किह तुब्भे वंदिअव्वा ? जेणेवं कोहाभिभूआ अच्छह, ताहे ते खमगा संवेगमावण्णा मिच्छामिदुक्कडंति, अहो बालो उवसंतचित्तो अम्हेहिं पावकम्मेहिं आसाइओ, एवं तेसिंपि सुहज्झवसाणेणं केवलनाणं समुप्पन्नं, एवं पसंगओ कहियं कहाणयं, उवणओ पुन कोहादिगाओ अपसत्थभावाओ दुग्गइए अवाओ त्ति ॥

परलोकचिन्तायां प्रकृतोपयोगितां दर्शयन्नाह-

**नि. [५७]** सिक्खगअसिक्खगाणं संवेगथिरट्ठयाइ दोण्हंपि।
दव्वाईया एवं दंसिज्जंते अवाया उ॥

**वृ.** 'शिक्षकाशिक्षकयोः' अभिनवप्रव्रजितचिरप्रव्रजितयोः अभिनवप्रव्रजितगृहस्थयोर्वा संवेगस्थैर्यार्थं द्वयोरपि द्रव्याद्या 'एवम्' उक्तेन प्रकारेण वक्ष्यमाणेन वा दर्श्यन्ते अपाया इति, तत्र संवेगो-मोक्ष-सुखाभिलाषः स्थैर्यं पुनः अभ्युपगतापरित्यागः, ततश्च कथं नु नाम दुःखनिबन्धनद्रव्याद्यवगमात्तयोः संवेगस्थैर्ये स्यातां ? द्रव्यादिषु चाप्रतिबन्ध इति गाथार्थः ॥

**नि. [५८]** दविअं कारणगहिअं विगिंचिअव्वमसिवाइखेत्तं च।
बारसहिं एस्सकालो कोहाइविवेग भावम्मि॥

**वृ.** इहोत्सर्गं मुमुक्षुणा द्रव्यमेवाधिकं वस्त्रपात्राद्यन्यद्वा कनकादि न ग्राह्यं, शिक्षकाहिसंदिष्टादिकारणगृहीतमपि तत्परिसमाप्तौ परित्याज्यम्, अत एवाह-द्रव्यं कारणगृहीतं, किम् ? 'विकिंचितव्यं' परित्याज्यम्, अनेकैहिकामुष्मिकापायहेतुत्वात्, दुरन्ताग्रहाद्यपाय्-हेतुता च मध्यस्थैः स्वधिया भावनीयेति। एवमशिवादिक्षेत्रं च, परित्याज्यमिति वर्त्तते, अशिवादि-प्रधानं क्षेत्रमशिवादिक्षेत्रम्, आदिशब्दाद्नोदरताराजद्विष्टादिपरिग्रहः, परित्याज्यं चेदमनेकैहिका-मुष्मिकापायसम्भवादिति। तथा द्वादशभिर्वर्षैरेष्यत्कालः, परित्याज्य इति वर्त्तते, तत एवापाय-सम्भवादिति भावना, एतदुक्तं भवति-अशिवादिदुष्ट एष्यत्कालः द्वादशभिर्वर्षैरनागतमेवोज्झितव्य-इति, उक्तं च-

"संवच्छरबारसएण होहिति असिवंति ते तओ निंति।
सुत्तत्थं कुव्वंता अतिसयमादीहि नाऊण॥" इत्यादि।

तथा 'क्रोधादिविवेको भाव' इति क्रोधादयोऽप्रशस्तवास्तेषां विवेकः-नरकपातनाद्यपायहेतुत्वात्परित्यागः, भाव इति-भावापाये, कार्य इत्ययं गाथार्थः ॥ एवं तावद्वस्तुतश्चरणकरणानुयोगमधिकृत्यापायः प्रदर्शितः, साम्प्रतं द्रव्यानुयोगमधिकृत्य प्रदर्श्यते-

**नि. [५९]** दव्वादिएहिं निच्चो एगंतेनेव जेसिं अप्पा उ।
होइ अभावो तेसिं सुहदुहसंसारमोक्खाणं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.'द्रव्यादिभिः' द्रव्यक्षेत्रकालभावैः नारकत्वविशिष्टक्षेत्रवयोऽवस्थितत्वाप्रसन्नत्वादिभिः 'नित्यः' अविचलितस्वभावः 'एकान्तेनैव' सर्वथैव 'येषां' वादिनाम् 'आत्मा' जीवः तु शब्दादन्यच्च वस्तु भवतिसंजायते 'अभावः' असंभवः 'तेषां' वादिनां केषाम्?-'सुखदुःखसंसार-मोक्षाणाम्' तत्राह्लादानुभवरूपं क्षणं सुखम्, तापानुभवरूपं दुःखम्, तिर्यग्नरनारकामरभवसंसरण-रूपः संसारः, अष्टप्रकारकर्मबन्धवियोगो मोक्षः, तत्र कथं पुनस्तेषां वादिनां सुखाद्यभावः?, आत्मनोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वाद्, अन्यथात्वापरिणतेः सदैव नारकत्वादिभावाद्, अपरित्यक्ताप्रसन्नत्वे पूर्वरूपस्य च प्रसन्नत्वेनाभवनाद्, एवं शेषेष्वपि भावनीयम्

**नि.[६०]** सुहदुक्खसंपओगो न विज्जइ निच्चवायपक्खंमि।
एगंतुच्छेअंमि अ सुहदुक्खविगप्पणमजुत्तं॥

वृ.सुखदुःखसंप्रयोगः, सम्यक् संगतो वा प्रयोगः संप्रयोगः अकल्पित इत्यर्थः 'न विद्यते' नास्ति न घटत इत्यर्थः, क्व?-'नित्यवादपक्षे' नित्यवादाभ्युपगमे संप्रयोगो न विद्यते, कल्पितस्तु भवत्येव, यथाऽऽहुर्नित्यवादिनः-"प्रकृत्युपधानतः पुरुषस्य सुखदुःखे स्तः, स्फटिके रक्ततादिवद् बुद्धिप्रतिबिम्बाद्वाऽन्ये" इति, कल्पितत्वं चास्य आत्मनस्तत्त्वत एव तथापरिणतिमन्तरेण सुखाद्यभावाद् उपधानसन्निधावप्यन्धोपले रक्ततादिवत्, तदभ्युपगमे चाभ्युपगमक्षतिः, बुद्धिप्रतिबिम्बपक्षेऽप्यविचलितस्यात्मनः सदैवेकस्वभावत्वात् सदैवैकरूपप्रतिबिम्बापत्तेः, स्वभावभेदाभ्युपगमे चानित्यत्वप्रसङ्ग इति। मा भूदनित्यैकान्तग्रह इत्यत आह- 'एकान्तेन' सर्वथा उत्-प्राबल्येन छेदो-विनाशः एकान्तोच्छेदः-निरन्वयो नाश इत्यर्थः, अस्मिश्च किम्?-सुखदुःखयोर्विकल्पनं सुखदुःखविकल्पनम्, 'अयुक्तम्' अघटमानकम्, अयमत्र भावार्थः-एकान्तोच्छेदेऽपि सुखाद्यनुभवितुस्तत्क्षण एवं सर्वथोच्छेदादहेतुकत्वात्तदुत्तरक्षणस्योत्पत्तिरपि न युज्यते, कुतः पुनस्तद्विकल्पनमिति गाथार्थः॥ उक्तोऽपायः, साम्प्रतमुपाय उच्यते-तत्रोपसामीप्येन (आयः) विवक्षितवस्तुनोऽविकललाभहेतुत्वाद्वस्तुनो लाभ एवोपायः-अभिलषितवस्त्ववाप्तये व्यापारविशेष इत्यर्थः, असावपि चतुर्विध एव, तथा चाह-

**नि.[६१]** एमेव चउविगप्पो होइ उवाओऽपि तत्थ दव्वंमि।
धातुव्वाओ पढमो नंगलकुलिएहि खेत्तं तु॥

वृ.'एवमेव' यथा अपायः, किम्?-'चतुर्विकल्पः' चतुर्भेदः भवत्युपायोऽपि, तद्यथाद्रव्योपायः क्षेत्रोपायः कालोपायः भावोपायश्च, तत्र 'द्रव्य' इति द्वारपरामर्शः द्रव्योपाये विचार्ये 'धातुर्वादः' सुवर्णपातनोत्कर्षलक्षणो द्रव्योपायः 'प्रथम' इति लौकिकः, लोकोत्तरे त्वध्वादौ पटलादिप्रयोगतः प्रासुकोदककरणम्, क्षेत्रोपायस्तु लाङ्गलादिना क्षेत्रोपक्रमणे भवति, अत एवाह-'लाङ्गलकुलिकाभ्यां क्षेत्रम्' उपक्रम्यत इति गम्यते, ततश्च लाङ्गलकुलिके तदुपायो लौकिकः, लोकोत्तरस्तु विधिना प्रातरशनाद्यर्थमटनादिना क्षेत्रभावनम्, अन्ये तु योनिप्राभृतप्रयोगतः काञ्चनपातनोत्कर्षलक्षणमेव सञ्जातप्रयोजनादौ द्रव्योपायं व्याचक्षते, विद्यादिभिश्च दुस्तराध्वतरणलक्षणं क्षेत्रोपायमिति। अत्र च प्रथमग्रहणपदार्थोऽतिरिच्यमान इवाभाति, पाठान्तरं वा 'धाउव्वाओ भणिओ' त्ति अत्र च कथञ्चिदविरोध एवेति गाथार्थः॥

**नि.[६२]** कालो अ नालियाइहिं होइ भावंमि पंडिओ अभओ।

चोरस्स कए नट्टिं वड्डकुमारिं परिकहेइ ॥

वृ.कालश्च नालिकादिभिः ज्ञायत इति शेषः, नालिका-घटिका आदिशब्दा-च्छङ्कादिपरिग्रहः ततश्च नालिकादयः कालोपायो लौकिकः, लोकोत्तरस्तु सूत्रपरावर्त्तनादिभिस्तथा भवति, 'भावे' चेति द्वारपरामर्शत्वाद्भावोपाये विचार्ये निर्दशनं, क इत्याह-'पण्डितो' विद्वान 'अभयः' अभयकुमारस्तथा चाह-चौरनिमित्तं नर्त्तक्यां वड्ड, कुमारीं, किम् ?, त्रिकालगोचरसूत्र-प्रदर्शनार्थमाह-परिकथयति, त तश्च यथा तेनोपायतश्चौरभावो विज्ञातः एवं शिक्षकादीनां तेन तेन विधिनोपायत एव भावो ज्ञातव्य इति गाथार्थः ॥

नवरं भावोवाए उदाहरणं-रायगिहं नाम नयरं, तत्थ सेणिओ राया, सो भज्जाए भणिओ जहा मम एगखंभं पासायं करेहि, तेन वड्डइणो आनत्ता, गया कट्ठच्छिंदगा, तेहिं अडवीए सलक्खणो सरलो महइमहालओ दुमो दिट्ठो, धूवो दिन्नं, जेनेस परिग्गहिओ रुक्खो सो दरिसावेउ अप्पाणं, तो णं ण छिंदामोत्ति, अह न देइ दरिसावं तो छिंदामोत्ति, ताहे तेन रुक्खवासिणा वाणमंतरेण अभयस्स दरि-सावो दिन्नो, अहं रन्नो एगंखंभं पासायं करेमि, सव्वोउयं च आरामं करेमि सव्ववणजाइउवेयं, मा छिंदहत्ति, एवं तेन कओ पासाओ। अन्नया एगाए मायंगीए अकाले अंबयाणि गहिआणि, पुणो अ उन्नमणीए उन्नामियं, पभाए रन्ना दिट्ठं, पयं न दीसइ, को एस मनुसो अतिगओ, ? जस्स एसा एरिसी सत्तित्ति सो मम अंतउरंपि धरिसेहित्तिकाउं अभयं सद्दावेऊण भणइ-सत्तरत्तस्स अभ्यंतरे जइ चोरं नानेसि तो नत्थि ते जीविअं।

ताहे अभओ गवेसिउं आढत्तो, नवरं एगंमि पएसे गोज्जो रमिउकामो, मिलिओ लोगो, तत्थ गंतुं अभओ भणति-जाव गोज्जो मंडेइ अप्पाणं ताव ममेगं अक्खाणगं सुणेह जहा कर्हिपि नयरे एगो दरिद्दसिट्ठी परिवसति, तस्स धूया वुड्ढकुमारी अईव कयत्थिउमाढत्ता, तीए सो भणिओ-मा मइं कुमारिं विनासेहि, तवावि भयणीभाणिज्जीओ अत्थि, तेन भणिआ-एक्काए ववत्थाए मुयामि, जइ नवरं जम्मि दिवसे परिणेज्जसि तद्दिवसं चेव भत्तारेण अणुग्घाडिया समाणी मम सयासं एहिसि तो मुयामि, तीए भणिओ-एवं हवउत्ति, तेन विसज्जिआ अन्नया परिणीआ, जाहे अपवरके पवेसिआ ताहे भत्तारस्स सब्भावं कहेइ, विसज्जिया वच्चइ, पट्ठिया आरामं, अंतरा अ चोरेहिं गहिया, तेसिंपि सब्भावो कहिओ, मुक्का, गच्छंतीए अंतरा रक्खसो दिट्ठो, जो छण्हं मासाणं आहारेइ, तेन गहिया, कहिए मुक्का, गया आरामियसगासं, तेन दिट्ठा, सो संभंतो भणइ-कहमागयासि ?, ताए भणिअंमया कओ सो पुव्विं समओ, सो भणइ-कहं भत्तारेण मुक्का ?, ताहे तस्स तं सव्वं कहिअं, अहो सच्चपइन्ना एसा महिलत्ति, एत्तिएहिं मुक्का किहाहं दुहामित्ति तेन विमुक्का, पडियंती अ गया सव्वेसिं तेसिं मज्झेणं, आगता तेहिं सव्वेहिं मुक्का, भत्तारसगासं अणहसमग्गा गया।

ताहे अभओ तं जनं पुच्छइ-अक्खह एत्थ केन दुक्करं कयं ?, ताहे इस्सालुया भणंति-भत्तारेणं, छुहालुया भणंति-रक्खसेणं, पारदारिया भणंति-मालागारेणं हरिएसेण भणिअं-चोरेहिं, पच्छा सो गहिओ, जहा एस चोरोत्ति। एतावत्प्रकृतोपयोगि। जहा अभएन तस्स चोरस्स उवाएण भावो नाओ एवमिहवि सेहाणमुवट्ठायंतयाणं उवाएण गीअत्थेण विपरिणामादिणा भावो जाणिअव्वोत्ति, किं एए पव्वावणिज्जा नवत्ति, पव्वाविएसुवि तेसु मुंडावणाइसु एमेव विभासा, यदुक्तम्-"पव्वाविओ सियत्ति अ मुंडावेउं न कप्पइ" इत्यादि। कहाणयसंहारो पुन-चोरो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेणिमारेमि, देमित्ति अब्भुवगए आसणे ट्ठिओ पढई, न ठाई, राया भणई-किं न ठाई ?, ताहे तं मायंगो भणइ-जहा अविनएणं पढसि, अहं भूमीए तुमं आसने, नीयतरे उवविट्ठो, ठियातो सिद्धाओ य विज्जाओत्ति। कृतं प्रसङ्गेन। एवं तावल्लौकिकमर्थाक्षिप्तं चरणकरणानुयोगं चाधिकृत्योक्ता द्रव्योपायादयः, साम्प्रतं द्रव्यानुयोगमधिकृत्य प्रदर्श्यन्त इति।

तत्राप्युपायदर्शनतो नित्यानित्यैकान्तवादयोः सुखादिव्यवहाराभावप्रसङ्गेन तथा प्रत्यक्षगोचरातिक्रान्तेश्च वस्तुत आत्माभाव एवेति मा भूच्छिष्यकाणां मतिविभ्रमोऽत उपायत एवात्मास्तित्वमभिधातुकाम आह-

**नि.[६३]**　　एवं तु इहं आया पच्चक्खं अनुवलब्भमाणोऽवि।
सुहदुक्खमाइएहिं गिज्झइ हेऊहिं अत्थित्ति॥

**वृ.**एवमेव यथा धातुवादादिभिर्द्रव्यादि 'इह' अस्मिँल्लोके 'आत्मा' जीवः 'प्रत्यक्ष' मिति तृतीयार्थे द्वितीया प्रत्यक्षेण 'अनुपलभ्यमानोऽपि' अदृश्यमानोऽपि 'सुखदुःखादिभिः' आदि-शब्दात् संसारपरिग्रहो गृह्यते 'हेतुभिः' युक्तिभिः 'अस्ति' विद्यत इति-एवं गृह्यते, तथाहि-सुखदुःखानां धर्मत्वाद्धर्मस्य चावश्यमनुरूपेण धर्मिणा भवितव्यं, न च भूतसमुदायमात्र एव देहोऽस्यानुरूपो धर्म्मी, तस्याचेतनत्वात् सुखादीनां च चेतनत्वादिति।

**नि.[६४]**　　जह वऽस्साओ हत्थिं गामा नगरं तु पाउसा सरयं।
ओदइयाउ उवसमं संकंति देवदत्तस्स॥

**वृ.**यथा'वे'त्ति प्रकारान्तरदर्शने 'अश्वात्' घोटकात् 'हस्तिनं' गजं ग्रामात् नगरं तु प्रावृषः शरदं प्रावृट्कालाच्छरत्कालमित्यर्थः, औदयिकाद् भावाद् 'उपशम' मित्यौपशमिकं 'संक्रान्तिः' संक्रमणं संक्रान्तिः कस्य ?-देवदत्तस्य, प्रत्यक्षेणेति शेषः॥

**नि.[६५]**　　एवं सउ जीवस्सवि दव्वाईसंकमं पडुच्चा उ।
अत्थित्तं साहिज्जइ पच्चक्खेणं परोक्खंपि॥

**वृ.**'एवं' यथा देवदत्तस्य तथा, किम् ?-'सत्तो' विद्यमानस्य जीवस्यापि द्रव्यादिषु संक्रमः, आदिशब्दात् क्षेत्रकालभावपरिग्रहः, तं 'प्रतीत्य' आश्रित्य 'अस्तित्वं' विद्यमानत्वं 'साध्यते' अवस्थाप्यते। आहसतोऽस्तित्वसाधनयुक्तम्, न, अव्युत्पन्नविप्रतिपन्नविषयत्वात् साधनस्य, 'प्रत्यक्षेण' अश्वादिसंक्रमेण, सर्वथा साक्षात्परिच्छित्तिमङ्गीयकृत्य 'परोक्षमपि' अप्रत्यक्षमपि, अवग्रहादिस्वसंवेदनतो लेशतस्तु प्रत्यक्षमेवैतत्, एतदुक्तं भवति-यथा अश्वादिराङ्क्रान्तिन देवदत्ताख्यं धर्मिणमतिरिच्य वर्त्तते, एवमियमप्यौदारिकाद्वैक्रिये तिर्यग्लोकादूर्ध्वलोके परिमितवर्षायुष्कपर्यायादपरिमितवर्षायुष्कपर्याये चारित्रभावादविरत-भावे च संक्रान्तिन जीवाख्यं धर्मिणमन्तरेणोपपद्यत इति वृद्धा व्याचक्षते। अन्ये तु द्वितीय-गाथापश्चार्द्धं पाठान्तर-तोऽन्यथा व्याचक्षते-तत्रायमभिसम्बन्धः,-'एवं तु इहं आये' त्यादि-गाथयोपायत एवात्मा-स्तित्वमभिधायाधुनोपायत एव सुखदुःखादिभावसङ्गतिनिमित्तं नित्यानित्यैकान्तपक्ष-व्यवच्छेदेनात्मानं परिणामिनमभिधित्सुराह-'जहवऽस्साओ' गाथाव्याख्या पूर्ववत्॥

**नि.[६६]**　　एवं सउ जीवस्सवि दव्वाईसंकमं पडुच्चा उ।
परिणामो साहिज्जइ पच्चक्खेणं परोक्खेवि॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ.पूर्वार्द्ध पूर्ववत्, पश्चार्द्धभावना पुनरियम्-न ह्येकान्तनित्यानित्यपक्षयोर्दृष्टाऽपि द्रव्यादिसंक्रान्तिर्देवदत्तस्य युज्यते इत्यतस्तद्भावान्यथानुपपत्त्यैव परिणामसिद्धेरिति।

"नार्थान्तरगमो यस्मात्, सर्वथैव न चागमः।
परिणामः प्रमासिद्ध, इष्टश्च खलु पण्डितैः ॥१॥
घटमौलिसुवर्णार्थी, नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं, जनो याति सहेतुकम्॥२॥
पयोव्रतो न दध्यत्ति, न पयोऽत्ति दधिव्रतः।
अगोरसव्रतो नोभे, तस्माद्वस्तु त्रयात्मकम्॥३॥"

इति गाथाद्वयार्थः॥ उक्तमुपायद्वारमधुना स्थापनाद्वारमभिधित्सुराह-

नि.[ ६७ ] ठवणाकम्मं एक्कं दिट्ठंतो तत्थ पोंडरीअं तु।
अहवाऽवि सन्नढक्कणहिंगुसिवकयं उदाहरणं॥

वृ.स्थाप्यते इति स्थापना तया तस्यास्तस्यां वा कर्म-सम्यगभीष्टार्थप्ररूपणलक्षणा क्रिया स्थापनाकर्म, 'एक'मिति तज्जात्यपेक्षया 'दृष्टान्तो' निदर्शनं 'तत्र' स्थापनाकर्मणि 'पौण्डरीकं तु' तुशब्दात्तथाभूतमन्यच्च, तथा च पौण्डरीकाध्ययने पौण्डरीकं प्ररूप्य प्रक्रिययैवान्यमतनिरासेन स्वमतं स्थापितमिति, अथवेत्यादि पश्चार्द्धं सुगमम्, लौकिकं चेदमिति गाथाक्षरार्थः॥ भावार्थस्तु कथानकादवसेयः, तच्चेदम्-जहा एगम्मि नगरे एगो मालायारो सण्णाइओ करंडे पुप्फे घेत्तूण वीहीए एइ, सो अईव अच्चइओ, ताहे तेन सिग्धं वोसिरिऊणं सा पुप्फपिडिगा तस्सेव उवरि पल्हत्थिया, ताहे लोओ पुच्छइ-किमेयंति?, जेणित्थ पुप्फाणि छड्डेसित्ति, ताहे सो भणइ-अहं आलोविओ, एत्थ हिंगुसिवो नामं, एतं तं वाणमंतरं हिंगुसिवं नाम उप्पन्नं, लोएण परिग्गहियं, पूया से जाया, खाइगयं अज्जवि तं पाडलिपुत्ते हिंगुसिवं नाम वाणमंतरं। एवं जइ किंचि उड्डाहं पावयणीयं कयं होज्जा केनवि पमाएण ताहे तहा पच्छाएयव्वं जहा पच्चुन्नं पवयणुब्भावना हवइ।

"संजाए उड्डाहे जह गिरिसिद्धेहिं कुसलवृद्धीहिं।
लोयस्स धम्मसद्धा पवयणवण्णेण सुद्धुकया॥१॥"

एवं तावच्चरणकरणानुयोगं लोकं चाधिकृत्य स्थापनाकर्म प्रतिपादितम्, अधुना द्रव्यानुयोगमधिकृत्योपदर्शयन्नाह-

नि.[६८] सव्वभिचारं हेतुं सहसा वोत्तुं तमेव अन्नेहिं।
उववूहइ सप्पसरं सामत्थं चऽप्पणो नाउं॥

वृ. सह व्यभिचारेण वर्त्तत इति सव्यभिचारस्तं 'हेतु' साध्यधर्मान्वयादिलक्षणं 'सहसा' तत्क्षणमेव 'वोत्तुं' अभिधाय 'तमेव' हेतुम् 'अन्यैः' हेतुभिरेव 'उपबृहंते' समर्थयति 'सप्रसरम्' अनेकधा स्फारयन् 'सामर्थ्यं' प्रज्ञाबलम्, चशब्दो भिन्नक्रमः 'आत्मनश्च' स्वस्य च 'ज्ञात्वा' विज्ञाय, चशब्दात्परस्य चेति गाथार्थः॥ भावार्थस्त्वयम्-द्रव्यास्तिकाद्यनेकनयसङ्कुलप्रवचनज्ञेन साधुना तत्स्थापनाय नयान्तरमतापेक्षया सव्यभिचारं हेतुमभिधाय प्रतिपक्षनयमतानुसारतः तथा समर्थनीयः यथा सम्यगनेकान्तवादप्रतिपत्तिर्भवतीति। आह-उदाहरणभेदस्थापना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धिकारचिन्तायां सव्यभिचारहेत्वभिधानं किमर्थमिति ?, उच्यते, तदाश्रयेण भूयसामुदाहरणानां प्रवृत्तेः, तदन्वितं चोदाहरणमपि प्राय इति ज्ञापनार्थम्, अलं प्रसङ्गेन। अभिहितं स्थापनाकर्म-द्वारम्, अधुना प्रत्युत्पन्नविनाशद्वारमभिधातुकाम आह-

नि.[६९] होंति पडुप्पन्नविनासणंमि गंधव्विया उदाहरणं।
सीसोऽवि कत्थवि जइ अज्झोवज्जिज्ज तो गुरुणा॥

वृ.भवन्ति प्रत्युत्पन्नविनाशने विचार्ये गान्धर्विका उदाहरणं लौकिकमिति। तत्र प्रत्युत्पन्नस्य वस्तुनो विनाशनं प्रत्युत्पन्नविनाशनं तस्मिन्निति समासः।

गान्धर्विका उदाहरणमिति यदुक्तं तदिदम्-जहा एगम्मि नगरे एगो वाणियओ, तस्स बहुयाओ भयणीओ भाइणिज्जा भाउज्जायाओ य, तस्स घरसमीवे राउलिया गंधव्विया संगीयं करेंति दिवसस्स तिन्नि वारे, ताओ वणियमहिलाओ तेन संगीयसद्देणतेसु गंधव्विएसु अज्झोववन्नाओ किंचि कम्मादानं न करेंति, पच्छा तेन वाणियएण चिंतियं-जहा विणट्ठा एयाओत्ति, को उवाओ होज्जा ? जहा न विनस्संतित्तिकाउं मित्तस्स कहियं, तेन भण्णइ-अप्पणो घरसमीवे वाणमंतरं करावेहि, तेन कयं, ताहे पाडहियाणं रूवए दाउं वायोवेइ, जाहे गंधव्विया संगीययं आढवेंति ताहे ते पाडहिया पडहे दिंति वंसादिणो य फुसंति गायंति य, ताहे तेसिं गंधव्वियाणं विग्धो जाओ, पडहसद्देण य न सुव्वइ गीयसद्दो, तओ ते राउले उवट्ठिया, वाणिओ सद्दाविओ, किं विग्धं करेसित्ति ? भणइ-मम घरे देवो, अहं तस्स तिन्नि वेला पडहे दवावेमि, ताहे ते भणिया-जहा अन्नत्थ आयह, किं देवस्स दिवे दिवे अंतराइयं कज्जइ ? एवं आयरिएणवि सीसेसु अगारीसु अज्झोववज्जमाणेसु तारिसो उवाओ कायव्वो जहा तेसिं दोसस्स तस्स निवारणा हवइ, मा ते चिंतादिएहिं नरयपडणादिए अवाए पावेहिंति, उक्तं च-

"चिंतेइ दट्ठुमिच्छइ दीहं नीससइ तह जरो दाहो।
भत्तारोयग मुच्छा उम्मत्तोन याणई मरणं॥१॥
पढमे सोयई वेगे दुट्ठुं तं गच्छई बिईयवेगे।
नीससइ तइयवेगे आरुहइ जरो चउत्थंमि॥२॥
डज्झइ पंचमवेगे छट्ठे भत्तं न रोयए वेगे।
सत्तमियंमि य मुच्छा अट्ठमए होइ उम्मत्तो॥३॥
नवमे न याणइ किंचि दसमे पाणेहिं मुच्चइ मनूसो।
एएसिमवाणाणं सीसे रक्खंति आयरिया॥४॥
परलोइया अवाया भग्गपइण्णा पडंति नरएसु।
ण लहंति पुणो बोहिं हिंडंति य भवसमुद्दंमि॥५॥"

अमुमेवार्थं चेतस्यारोप्याह-'शिष्योऽपि' विनयोऽपि 'क्वचित्' विलयादौ 'यदी' त्यभ्यु-पगमदर्शने 'अभ्युपपद्येत' अभिष्वङ्गः कुर्यादित्यर्थः ततो 'गुरुणा' आचार्येण, किम् ?-गाथा-

नि.[७०] वारेयव्वु उवाएण जइवा वाऊलिओ वदेज्जाहि।
सव्वेऽवि नत्थि भावा किं पुन जीवो स वोत्तव्वो॥

वृ.'वारयितव्यो' निषेद्धव्यः, किं यथाकथञ्चित् ? नेत्याह-'उपायेन' प्रवचन-प्रतिपा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दितेन, यथाऽसौ साम्यग्वर्त्तत इति भावार्थः। एवं तावल्लौकिकं चरणकरणानुयोगं चाधिकृत्य व्याख्यातं प्रत्युत्पन्नविनाशद्वारम्, अधुना द्रव्यानुयोगमधिकृत्याह-यदिवा 'वातूलिको' नास्तिको वदेत्, किं ?-'सर्वेऽपि' घटपटादयः 'नत्थि'त्ति प्राकृतशैल्या न सन्ति 'भावाः' पदार्थाः किं पुनर्जीवः ?, सुतरां नास्तीत्यभिप्रायः, 'स वक्तव्यः' सोऽभिधातव्यः, किमित्याह-

**नि.[७१]** जं भणसि नत्थि भावा वयणमिणं अत्थि नत्थि ?
जह अत्थि। एव पइन्नाहानी असओ नु निसेहए को नु !॥

**वृ.**'यद्भणसि' यद्ब्रवीषि 'न सन्ति भावा' न विद्यन्ते पदार्था इति, 'वचनमिदं' भावप्रतिषेधक मस्ति नास्तीति विकल्पौ ?, किं चातो ?, यद्यस्ति एवं प्रतिज्ञाहानिः, प्रतिषेधवचनस्यापि भावत्वात्, तस्य च सत्त्वादिति भावार्थः, द्वितीयं विकल्पमधिकृत्याह-'असनो नु'त्ति अथासन्निषेधते को नु ?, निषेधवचनस्यैवासत्त्वादित्यमभिप्राय इति गाथात्रयार्थः॥

यदुक्तम्- 'किं पुनर्जीवः' इत्यत्रापि प्रत्युत्पन्नविनाशमधिकृत्याह-

**नि.[७२]** नो य विवक्खापुव्वो सद्दोऽजीवुब्भवोत्ति न य सावि।
जमजीवस्स उ सिद्धो पडिसेहधणीओ तो जीवो॥

**वृ.**चशब्दस्यैवकारार्थत्वेनावधारणार्थत्वात् 'न च' नैव 'विवक्षापूर्वो' विवक्षाकारणाः इच्छा-हेतुरित्यर्थः, 'शब्दो' ध्वनिः 'अजीवोद्भवः' अजीवप्रभव इत्यर्थः, विवक्षापूर्वकश्च जीवनिषेधकः शब्द इती, मा भूद्विवक्षाया एव जीवधर्मत्वासिद्धिरित्यत आह-'न च' नैव 'सापि' विवक्षा 'यद्' यस्मात् कारणाद् 'अजीवस्य तु' अजीवस्यैव, घटादिष्वदर्शनात्, किन्तु मनस्त्व-परिणता-(त्य)न्वितततद्रव्यसाचिव्यतो जीवस्यैव, यतश्चैवमतः 'सिद्धः' प्रतिष्ठितः 'प्रतिषेधध्वनेः' नास्ति जीव इति प्रतिषेधशब्दादेवेत्यर्थः, 'ततः' तस्मात् 'जीव' आत्मेति, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति गाथार्थः॥ व्याख्यातं प्रत्युत्पन्नविनाशद्वारं, तदन्वाख्यानाच्चोदाहरणमिति मूलद्वारम्, अधुना तद्देशद्वारवयवार्थमभिधित्सुराह-

**नि.[७३]** आहरणं तद्देसे चउहा अनुसट्ठि तह उवालंभो।
पुच्छा निस्सावयणं होइ सुभद्दाऽनुसट्ठीए॥

**वृ.**उदाहरणमिति पूर्ववद्, उपलक्षणं चेदमत्र, तथा चाह-तस्य देशस्तद्देश उदाहरण-देश इत्यर्थः, अयं 'चतुर्द्धा' चतुष्प्रकारः, तदेव चतुष्प्रकारत्वमुपदर्शयति-अनुशासनमनुशास्तिः-सद्गुणोत्कीर्तनेनोपबृंहणमीत्यर्थः, तथोपालम्भनमुपालम्भः-भङ्ग्यैव विचित्रं भणनमित्यर्थः, पृच्छा-प्रश्नः किं कथं केनेत्यादि, निश्रावचनम्-एकं कञ्चन निश्राभूतं कृत्वा य विचित्रो-क्तिरसौ निश्रावचनमिति। तत्र भवति सुभद्रा नाम श्राविकोदाहरणम्, क्व ?-अनुशास्ताविति।

तत्थ अनुसट्ठीए सुभद्दा उदाहरणं-चंपाए नयरीए जिनदत्तस्स सुसावगस्स सुभद्दा नाम धूया, सा अईव रूववई सा य तच्चनियउवासएण दिट्ठा, सो ताए अज्झोववन्नो, तं मग्गई, सावगो भणइ-नाहं मिच्छादिट्ठिस्स धूयं देमि, पच्छा सो साहूणा समीवं गओ धम्मो य अनेन पुच्छिओ, कहिओ साहूहिं, ताहे कवडसावयधम्मं पगाहिओ, तत्थ य से सब्भावेणं चेव उवगओ धम्मो, ताहे तेन साहूणं सब्भावो कहिओ, जहा मए कवडेणं दारियाए कए, णं नायं जहा कवडेणं कज्जहित्ति, अन्नमियाणि देह मे अनुव्वयाइं, लोगे स पयासो सावओ जाओ, तओ काले गए

वरया मालया पइुवेइ, ताहे तेन जिनदत्तेन सावओत्तिकाऊण सुभद्दा दिन्ना, पाणिग्गहणं वत्तं, अन्नया सो भणइ-दारियं घरं नेमि, ताहे तं सावओ भणइ-तं सव्वंउवासयकूलं, एसा तं नाणुवत्तिहिति, पच्छा छोभयं वा लभेज्जत्ति, निब्बंधे विसज्जिया, नेऊण जुगयं घरं कयं, सासूनणंदाओ पउट्ठाओ भिक्खूण भत्तिं न करेइत्ति, अन्नया ताहिं सुभद्दाए भत्तारस्स अक्खायं-एसा य सेअवडेहिं समं संसत्ता, सावओ न सद्देहेइ, अन्नया खमगस्स भिक्खागयस्स अच्छिंमि कणुओ पविट्ठो, सुभद्दाए जिब्भाए सो किणुओ फडिओ, सुभद्दाए चीणपिट्ठेण तिलओ कओ, सो अ खमगस्स निलाडे लग्गो, उवासियाहिंसावयस्स दरिसिओ, सावएण पत्तीयं, न तहा अनुयत्तइ, सुभद्दा चिंतेइ-किं अच्छेरयं ? जं अहं गिहत्थी छोभगं लभामि, जं पवयणस्स उड्डाहो एयं मे दुक्खइत्ति, सा रत्तिं काउस्सग्गेण ठिया, देवो आगओ, संदिसाहि किं करेमि ?, सा भणइ-एअं मे अयसं पमज्जाहित्ति, देवो भणइ-एवं हवउ, अहमेयस्स नगरस्स चत्तारि दाराइं ठवेहामि, घोसणयं च घोसेहामित्ति, जहा-जा पइव्वया होइ सा एयाणि दाराणि उग्घाडेहिति, तत्थ तुमं चेव ऐगा उग्घाडेसी तानि य कवाडाणि, सयणस्स पच्चयनिमित्तं चालनीए उदगं छोढूण दरिसिज्जासि, तओ चालणी फुसियमवि न गिलिहिति, एवं आसासेऊण निग्गओ देवो, नयरदाराणि अनेन ठवियाणी, नायरजनो य अद्दन्नो, इओ य आगासे वाया 'नागरजना मा निरत्थयं किलिस्सह, जा सीलवई चालणीए छूढं उदगं न गिलति सा तेन उदगेन दारं अच्छोडेइ, तओ दारं उग्घाडज्जिस्सत्ति', तत्थ बहुयाओ सेट्ठिसत्थवाहादीणं धूयसुण्हाओ न सकंति पलयंपि लहिउं, ताहे सुभद्दा सयणं आपुच्छइ, अविसज्जंताण य चालणीए उदयं छोढूण तेसिं पाडिहेरं दरिसेइ, तओ विसज्जिया, उवासिआओ एवं चिंतिउमाढत्ताओ-जहा एसा समणडंपिलेहिया उग्घाडेहिति, ताए चालणीए उदयं छूढं, न गिलइत्ति पिच्छित्ता विसन्नाओ, तओ महाजनेन सक्कारिज्जंती तं दारसमीवं गया, अरहंताणं नमोकाऊण उदएण अच्छोडिया कवाडा, महया सद्देणं कोंकारवं करेमाणा तिन्नि वि गोपुरदारा उग्घाडिया, उत्तरदारं चालणिपाणिएणं अच्छोडेऊण भणइ-जा मया सरिसी सीलवई होहिति सा एवं दारकउग्घाडेहिति, तं अज्जवि ढक्कियं चेव अच्छइ, पच्छा नायरजनेन साहुकारो कओ-अहो महासइत्ति, अहो जयइ धम्मोत्ति। एवं लोइयं, चरणकरणानुओगं पुन पडुच्च वेयावच्चादिसु अनुसासियव्वा, उज्जुत्ता अनुज्जुत्ता य संठवेयव्वा जहा सीलवंताणं इह लोए एरिसं फलमिति। अमुमेवार्थमुपदर्शयन्नाह-

नि.[७४] साहुक्कारपुरोगं जह सा अनुसासिया पुरजणेणं।
वेयावच्चाईसु वि एव जयंते नुवोहेज्जा॥

वृ.साधुकारपुरःसरं यथा सुभद्रा 'अनुशासिता' सद्गुणोत्कीर्त्तनेनोपबृंहिता, केन ?-'पुरजनेन' नागरिकलोकेन, वैयावृत्यादिष्वपि-आदिशब्दात् स्वाध्यायादिपरिग्रहः, 'एवं' यथा सा सुभद्रा 'यतमानान्' उद्यभवतः, किम् ?-उपबृंहयेत्, सद्गुणोत्कीर्त्तनेन तत्परिणामवृद्धिं कुर्यात्, यथा

"भरहेणवि पुव्वभवे वेयावच्चं कयं सुविहियाणं।
सो तस्स फलविवागेन आसी भरहाहिवो राया॥१॥
भुंजित्तुं भरहवासं सामण्णमनुत्तरं अनुचरित्ता।
अट्ठविहकम्ममुक्को भरहनरिंदो गओ सिद्धिं॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति गाथार्थः ॥ उदाहरणदेशता पुरस्योदाहृतैकदेशस्यैवोपयोगित्वात्तेनैव चोपसंहारात्, तथा च अप्रमादवद्भिः साधूनां कणुकापनयनादि कर्तव्यमिति विहायानुशास्त्योपसंहारमहा, वैयावृत्त्यादिष्वपि देशेनैवोपसंहारः, गुणान्तररहितस्य भरतादेर्निश्चयेन तदकरणादिति भावनीय-मिति, एवं तावल्लौकिकं चरणकरणानुयोगं चाधिकृत्योक्तं तद्देशद्वारे अनुशास्तिद्वारम्, अधुना द्रव्यानुयोगमधिकृत्य दर्शयति-

नि.[७५] जेसिंपि अत्थि वत्तव्वा तेऽवि अम्हवि स अत्थि।
किंतु अकत्ता नभवइ वेययइ जेन सुहदुक्खं।

**वृ.** 'येषामपि' द्रव्यास्तिकादिनयमतावलम्बिनां तन्त्रान्तरीयाणां किम् ?-'अस्ति' विद्यते 'आत्मा' जीवः वक्तव्याः 'तेऽपि' तन्त्रान्तरीयाः, साध्वेतत् अस्माकमप्यस्ति सः, तदभावे सर्व-क्रियावैकल्यात्, किन्तु 'अकर्ता न भवति' सुकृतदुष्कृतानां कर्मणामकर्त्ता न भवतिअनिष्पादको न भवति, किन्तु? कर्तैव, अत्रैवोपपत्तिमाह-'वेदयते' अनुभवति 'येन' कारणेन, किम् ?-'सुखदुःख' सुकृतदुष्कृतकर्मफलमिति भावः॥ न चाकर्तुरात्मनस्तदनुभावो युज्यते, अति-प्रसङ्गात्, मुक्तानामपि सांसारिकसुखदःखवेदनाऽऽपत्तेः, अकर्तृत्वाविशेषात्, प्रकृत्यादि-वियोगस्याप्यनाधेयातिशयमेकान्तेनाकर्त्तारमात्मानं प्रत्यकिञ्चित्करत्वाद्, अलं विस्तरेणेति-गाथार्थः। उदाहरणदेशता त्वत्राप्युदाहृतस्यैकदेशेनैवोपसंहारात् तत्रैव चासंप्रतिपत्तौ समर्थनाय निदर्शनाभिधानादिति। गतमनुशास्तिदेशद्वारम्, अधुनोपालम्भद्वारविवक्षयाऽऽह-

नि.[७६] उवलम्भम्मि मिगावइ नाहियवाईवि एव वत्तव्वो।
नत्थित्ति कुविन्नाणं आयाऽभावे सइ अजुत्तं॥

**वृ.** उपालम्भे प्रतिपाद्ये मृगावतिदेव्युदाहरणम्। एयं च जहा आवस्सए दव्वपरंपराए भणियं तहेव दट्ठव्वं, जाव पव्वइया अज्जचंदनाए सिस्सिणी दिन्ना। अन्नया भगवं विहरमाणो कोसंबीए समोसरिओ, चंदादिच्चा सविमानेहिं वंदिउं आगया, चउपोरसीयं समोसरणं काउं अत्थमणकाले पडिगया, तओ मिगावई संभंता, अयि ! वियालीकयंति भणिऊणं साहुणीसहिया जाव अज्जचंदणासगासं गया, ताव य अंधयारयं जायं, अज्जचंदनापमुहाहिं साहुणीणं ताव पडिक्कंतं, ताहे सा मिगावई अज्जा अज्जचंदणाए उवालब्भइ, जहा एवं नाम तुमं उत्तमकुलप्पसूया होइऊण एवं करेसि ?, अहो न लट्ठयं, ताहे पणमिऊण पाएसु पडिया, परमेण विणएण खामेइ, खमह मे एगमवराहं, नामं पुणो एवं करेहामित्ति। अज्जचंदना य किल तंमि समए संथारोवगया पसुत्ता, इयरीए वि परमसंवेगगयाए केवलनाणं समुप्पन्नं, परमं च अंधयारं वट्टइ, सप्पो य तेनंतरेन आगच्छइ, पव्वत्तिनीए य हत्थो लंबमाणो तीए उप्पाडिओ, पडिबुद्धा य अज्जचंदना, पुच्छिया-किमेयं ?, सा भणइ-दीहजाइओ, कहं तुमं जाणसि ? किं कोइ अति-सओ ? आमंति, पडिवाइ अप्पडिवाइत्ति पुच्छिया सा भणइ-अप्पडिवाइत्ति, तओ खमिया।

लोगलोगुत्तरसाहरणमेयं। एवं पमायंतो सीसो उवालंभेयव्वोत्ति। उदाहरणदेशता पूर्व-वद्योजनीयेति। एवं तावच्चरणकरणानुयोगमधिकृत्य जीवनास्तित्वप्रतिपाद इत्यर्थः एवं 'वक्तव्यः' अभिधातव्यः-'नास्ति' न विद्यते, कः ? प्रकरणाज्जीव इति, एवंभूतं 'कुविज्ञानं' जीवसत्ताप्रतिषेधावभासीत्यर्थः, आत्माऽभावेसति न युक्तम्, आत्मधर्मत्वाद् ज्ञानस्येति भावना,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतधर्मता पुनरस्य धर्म्यननुरूपत्वादेव न युक्ता, तत्समुदायकार्यताऽपि प्रत्येकं भावाभाव-विकल्प-द्वारेण तिरस्कर्त्तव्येति गाथार्थः ॥ अमुवोवार्थं समर्थयन्नाह-

**नि.[७७]** अत्थित्ति जा वियक्का अहवा नित्थित्ति जं कुविन्नाणं।
अच्चंताभावे पोग्गलस्स एयं चिअ न जुत्तं।

**वृ.** अस्ति जीव इति एवंभूता या वितर्कोऽथवा 'नास्ति' न विद्यत इति एवंभूतं यत्कुविज्ञानं लोकोत्तरापकारि अत्यन्ताभावे 'पुद्गलस्य' जीवस्य 'इदमेव न युक्तम्' इदमेवान्याय्यं। भावना पूर्ववदिति गाथार्थः ॥ अधुना शेषद्वारद्वयं व्याचिख्यासुराह-

**नि.[७८]** पुच्छाए कोणिओ खलु निस्सावयणंमि गोयमस्सामी।
नाहियवाइं पुच्छे जीवत्थित्तं अनिच्छंतं ॥

**वृ.** 'पृच्छायां' प्रश्न इत्यर्थः, 'कोणिकः' श्रेणिकपुत्रः खलूदाहरणम्। जहा तेन सामी पुच्छिओ-चक्कवट्टिणो अपरिचत्तकामभोगा कालमासे कालं किच्चा कहिं उववज्जंति ?, सामिणा भणियं-अहे सत्तमीघ चक्कवट्टिणो उववज्जंति, ताहे भणइ-अहं कत्थ उववज्जिस्सामि ?, सामिणा भणियं-तुमं छट्ठीपुढवीए, सो भणइ-अहं सत्तमीए किं न उववज्जिस्सामि ?, सामिणा भणियं-सत्तमीए चक्कवट्टिणो उववज्जंति, ताहे सो भणइ-अहं किं न होमि चक्कवट्टी ? ममवि चउरासी दन्तिसयसहस्साणि, सामिणा भणियं-तव रयणाणि निहीओ य नत्थि, ताहे सो कित्तिमाइं रयणाइं करित्ता ओवतिउमाढ्ढो, तिमिसगुहाए पविसिउं पवत्तो, भणिओ य किरिमालएणं-वोलीणा चक्कवट्टिणो बारसवि, विनस्सिहिंसि तुमं, वारिज्जंतो विन ठाई, पच्छा कयमालएण आहओ, मओ य छट्ठिं पुढविं गओ, एयं लोइयं। एवं लोगुत्तरेवि बहुस्सुआ आयरिया अट्ठाणि हेऊ य पुच्छियव्वा, पुच्छित्ता य सक्कणिज्जाणि समायरियव्वाणि, असक्कणिज्जाणि परिहरियव्वाणि, भणियं च-

"पुच्छह पुच्छावेह य पंडियए साहवे चरणजुत्ते।
मा मयलेवविलित्ता पारत्तहियं न यानिहिह ॥"

उदाहरणदेशाता पुनरस्याभिहितैकदेश एव प्रष्टुर्ग्रहात् तेनैव चोपसंहारादिति। एवं तावच्च-रणकरणानुयोगमधिकृत्य व्याख्यातं पृच्छाद्वारम्, अधुनैतत्प्रतिबद्धां द्रव्यानुयोगवक्तव्यतामपास्य गाथोपन्यासानुलोमतो निश्रावचनमभिधातुकाम आह-'निश्रावचने' निरूप्ये गौतमस्वाम्युदाहरण-मिति। एत्थ गागलिमादी जहा पव्वइया तावसा य एवं जहा वइरसामिउप्पत्तीए आवस्सए तहा ताव नेयं जाव गोयमसामिस्स किल अधिई जाया। तत्थ भगवया भण्णइ-चिरसंसट्ठोऽसि मे गोयमा ! चिरपरिचितोऽसि मे गोयमा ! चिरभाविओऽसि मे गोयमा ! तं मा अधिइं करेहि, अंते दोन्निवि तुल्ला भविस्सामो, अन्ने य तन्निस्साए अनुमासिया दुमपत्तए अज्झयणित्ति। एवं जे असहणा विनेया ते अन्ने मद्दवसंपन्ने निस्सं काऊण तहाऽनुसासियव्वा उवाएण जहा सम्मं पडिवज्जंति। उदाहरणदेशता त्वस्य देशेन-प्रदर्शितलेशत एव तथानुशासनाद्। एवं तावच्चरण-करणानुयोगमधिकृत्य व्याख्यातं पृच्छानिश्रावचनद्वारद्वयम्, अधुना द्रव्यानुयोगमधिकृत्य व्याख्यायते-तत्रेदं गाथादलम्-'नाहियवाइ' मित्यादि, 'नास्तिकवादिनं' चार्वाकं पृच्छेज्जीवा-स्तित्वमनिच्छन्तं सन्तमिति गाथार्थः ॥ किं पृच्छेत् ?-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[ ७९ ] केणंति नत्थि आया जेन परोक्खोत्ति तव कुविन्नाणं।
होइ परोक्खं तम्हा नत्थित्ति निसेहए को नु ?॥

वृ. 'केनेति' केन हेतुना ? 'नास्त्यात्मा' न विद्यते जीव इति पृच्छेत्, स चेद् ब्रूयात् 'येन परोक्ष' इति येन प्रत्यक्षेण नोपलभ्यत इत्यर्थः, स च वक्तव्यः-भद्र ! तव 'कुविज्ञानं' जीवास्तित्वनिषेधकध्वनिनिमित्तत्वेन तन्निषेधकं भवति परोक्षम्, अन्यप्रमातृणामिति गम्यते, 'तस्माद् भवदुपन्यस्तयुक्त्या नास्तीति कृत्वा निषेधते को नु?, विवक्षाऽभावे विशिष्टशब्दानुत्पत्तेरिति गाथार्थः ॥ उदाहरणदेशता चास्य पूर्ववदिति गतं पृच्छाद्वारम् ॥

नि.[८०] अन्नावएसओ नाहियवाई जेसिं नत्थि जीवो उ।
दानाइफलं तेसिं न विज्जइ चउह तद्दोसं॥

वृ. 'अन्यापदेशतः' अन्यापदेशेन 'नास्तिकवादी' लोकायतो वक्तव्य इति शेषः, अहो धिक्कष्टं 'येषां' वादिनां 'नास्ति जीव एव' न विद्यते आत्मैव 'दानादिफलं तेषां न विद्यते' दानहोमयागतपः समाध्यादिफलं-स्वर्गापवर्गादि तेषां-वादिनां न विद्यते-नास्तीत्यर्थः। कदाचित्त एवं श्रुत्वैवं ब्रूयुः-मा भवतु, का नो हानिः ?, 'न ह्यभ्युपगमा एव बाधायै भवन्ती'ती, ततश्च सत्त्ववैचित्र्यान्यथानुपपत्तितस्ते सम्प्रतिपत्तिमानेतव्याः, इत्यलं विस्तरेण, गमनिकामात्रमेतद्, उदाहरणदेशता चरणकरणानुयोगानुसारेण भावनीयेति। गतं निश्राद्वारं, तदन्वाख्यानाश्च तद्देशद्वारम्, अधुना तद्दोषद्वारावयवार्थप्रचिकटयिषयोपन्यासार्थं गाथावयवमहा-'चउह तद्दोसं' चतुर्धा तद्दोष-इति उदाहरणदोषः, अनुस्वारस्त्वलाक्षणिकः, अथवोदाहरणेनैव सामानधिकरण्यं, ततश्च तद्दोषमिति तस्योदाहरणस्यैव दोषा यस्मिंस्तत्तद्दोषमिति गाथार्थः ॥ उपन्यस्तं चातुर्विध्यं -

नि.[८१] पढमं अहम्मजुत्तं पडिलोमं अत्तणो उवन्नासं।
दुरुवणियं तु चउत्थं अहम्मजुत्तंमि नलदामो॥

वृ. 'प्रथमम्' आद्यम् 'अधर्मयुक्तं' पापसम्बद्धमित्यर्थः, तथा 'प्रतिलोमं' प्रतिकूलम्, 'आत्मन उपन्यास' इति आत्मन एवोपन्यासः-तथानिवेदनं यस्मिन्निति, 'दुरुपनीतं चेति दुष्टमुपनीतं-निगमितमस्मिन्निति चतुर्थमिदं वर्तते, अमीषामेव यथोपन्यासमुदाहरणैर्भावार्थमुपदर्शयती-अर्धमयुक्ते नलदामः कुविन्दः, लौकिकमुदाहरणमिति गाथाक्षरार्थः ॥

पर्यन्तावयवार्थः कथानकादवसेयः तच्चेदम्-

चाणक्केन नंदे उत्थाइए चंदगुत्ते रायाणए ठविए एवं सव्वं वण्णित्ता जहा सिक्खाए, तत्थ नंदसंतिएहिं मणुस्सेहिं सह चोरग्गाहो मिलिओ, नगरं मुसइ, चाणक्कोऽवि अन्नं चोरग्गाहं ठविउकामो तिदंडं गहेऊण परिवायगवेसेण नयरं पविट्ठो, गओ नलदामकोलियसगासं, उवविट्ठो वणणसालाए अच्छइ, तस्स दारओ मक्कोडएहिं खइओ, तेन कोलिएण बिलं खणित्ता दड्ढा, ताहे चाणक्केन भण्णइ-किं एए डहसि ?, कोलिओ भणइ-जइ एए समूलजाला न उच्छाइज्जंति, तो पुणोऽवि खाइस्संति, ताहे चाणक्केन चिंतिय-एस मए लद्धो चोरग्गाहो, एस नंदतेनया समूलया उद्धरिस्सिहिइत्ति चोरग्गाहो कओ, तेन तिखंडिया विसंभिया अम्हे संमिलिया मुसामोत्ति, तेहिं अन्नेवि अक्खाया जे तत्थ मुसगा, बहुया सुहतरागं मुसामोत्ति, तेहिं अन्नेवि अक्खाया, ताहे ते तेन चोरग्गाहेण मिलिऊण सव्वेऽवि मारिया। एवं अहम्मजुत्तं न भाणियव्वं, न य कायव्वंति। इदं तावल्लौकिकम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन लोकोत्तरमपि चरणकरणानुयोगं चाधिकृत्य सूचितमवगन्तव्यम्, 'एकग्रहणे तज्जातीयग्रहणंमिति न्यायात् तत्र चरणकरणानुयोगेन।

"नेवं अहम्मजुत्तं कायव्वं किंचि भाणियव्वं वा।
थोवगुणं बहुदोसं विसेसओ ठाणपत्तेणं॥"

जम्हा सो अन्नेसिंपि आलंबणं होइ'। द्रव्यानुयोगे तु-

"वादम्मि तहारूवे विज्जाय बलेण पवयणट्ठाए।
कुज्जा सावज्जं पिहु जह मोरीणउलिमादीसु॥"

'सो परिवायगो विलक्खीकओ त्ति'। उदाहरणदोषता चास्याधर्मयुक्तत्वादेव भावनीयेति। गतमधर्मयुक्ताद्वारम्, अधुना प्रतिलोमद्वारावयवार्थव्याचिख्यासयाऽऽह-

नि.[८२] पडिलोमे जह अभओ पज्जोयं हरइ अवहिओ संतो।
गोविंदवायगोऽवीय जह परपक्खं नियत्तेइ॥

वृ.'प्रतिलोमे' उदाहरणदोषे यथा 'अभयः' अभयकुमारः प्रद्योतं राजानं हृतवान्अपहृतः सन्निति, एतद् ज्ञापकम्, इह च त्रिकालगोचरसूत्रदर्शनार्थो वर्त्तमाननिर्दश इत्यक्षरार्थः। भावार्थः कथानकादवसेयः, तच्च यथाऽऽवश्यके शिक्षायां तथैव द्रष्टव्यमिति। एवं तावल्लौकिकं प्रतिलोमं, लोकोत्तरं तु द्रव्यानुयोगमधिकृत्य सूचयन्नाह- 'गोविंदे'त्वादि गाथादलम्, अनेन चरणकरणानुयोगमप्यधिकृत्य सूचितमवगन्तव्यम्, आद्यान्तग्रहणे तन्मध्यपतितस्य तद्ग्रहणे-नैव ग्रहणात्, तत्र चरणकरणे।

"नो किंचि य पडिलोमं काथव्वं भवभएण मन्नेसिं।
अविनीयसिक्खगाण उ जयणाइ जहोचिअं कुज्जा॥"

द्रव्यानुयोगे तु गोपेन्द्रवाचकोऽपि च यथा परपक्षं निवर्तयतीत्यर्थः। सो य किर तच्चण्णिओ आसि, विनासनी मित्तं पव्वइओ, पच्छा भावो जाओ, महावादी जात इत्यर्थः। सूचकमिदम्,

"दव्वट्ठियस्स पज्जवणयट्ठियमेयं तु होइ पडिलोमं।
सुहदुक्खाइअभावं इयरेनियरस्स चोइज्जा॥१॥
अन्ने उ दुट्ठवादिम्मि, किंचि बूया उ किल पडिकूलं।
दोरासिपइण्णाइ तिन्नि जहा पुच्छ पडिसेहो॥२॥

उदाहरणदोषता त्वस्य प्रथमपक्षे साध्यार्थासिद्धेः, द्वितीयपक्षे तु शास्त्राविरुद्धभाषणादेव भावनीयेति गाथार्थः॥ गतं प्रतिलोमद्वारम्, इदानीमात्मोपन्यासद्वारं विवृण्वन्नाह-

नि.[८३/१] अत्तउवन्नासंमि य तलागभेयंमि पिंगलो थवइ।

वृ.आत्मन एवोपन्यासो-निवेदनं यस्मिंस्तदात्मोपन्यासं तत्र च तडागभेदे पिङ्गलस्थपतिः उदाहरणमित्यक्षरार्थः॥ भावार्थः कथानकगम्यः तच्चेदम्-इह एगस्स रन्नो तलागं सव्वरज्जस्स सारभूअं, तं च तलागां वरिसे वरिसे भरियं भिज्जइ, ताहे राया भणइ-को सो उवाओ होज्जा? जेण तं न भिज्जेज्जा, तत्थ एगो कविलओ मनूसो भणइ-जइ नवरं महाराय! इत्थ पिंगलो कविलियाओ से दाढियाओ सिरं से कविलियं सो जीवंतो चेव जंमि ठाणे भिज्जइ तंमि ठाणे निक्खमइ, तो नवरं न भिज्जइ, पच्छा कुमारामच्चेण भणियं-महाराय! एसो चेव एरिसो जारसियं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणइ, एरिसो नत्थि अन्नो, पच्छाअ सो तत्थेव मारेत्ता निक्खित्तो। एवं एरिसं न भाणियव्वं जं अप्पवहाए भवइ। इदं लौकिकम्, अनेन च लोकोत्तरमपि सूचितम्, एक-ग्रहणे तज्जातीय-ग्रहणात्, तत्र चरणकरणानुयोगे नैवं ब्रूयात् यदुत-

"लोइयधम्माओविहु जे पब्भट्ठा नराहमा ते उ।

कह दव्वसोयरहिया धम्मस्साराहया होंति ?॥ इत्यादि।

द्रव्यानुयोगे पुनरेकेन्द्रिया जीवाः, व्यक्तोच्छ्वासनिश्वासादिजीवलिङ्गसद्भावात्, घटवत्, इह ये जीवा न भवन्ति न तेषु व्यक्तोच्छ्वासनिश्वासादिजीवलिङ्गसद्भावो, यथा घटे, न च तथै-तेष्वसद्भाव इति, तस्माज्जीवा एवैत इति, अत्रात्मनोऽपि तद्रुपाऽऽपत्यात्मोपन्यासत्वं-भावनीयमिति। उदाहरण दोषता चास्यात्मोपघातजनकत्वेन प्रकटार्थैवेति न भाव्यते।

गतमा-त्मोपन्यासद्वारम्, अधुना दुरुपनीतद्वारं व्याचिख्यासुराह-

**नि. [८३/२]** अनिमिसगिण्हण भिक्खुग दुरुवणीए उदाहरणं॥

**वृ.** अत्रानिमिषा-मत्स्यास्तद्ग्रहणे भिक्षुरुदाहरणम्, इदं च लौकिकम्, अनेन चोक्तन्या-याल्लोकोत्तरमप्याक्षिप्तं वेदितव्यमिति गाथादलाक्षरार्थः॥ भावार्थः कथानकादवसेयः, तच्चेदम्-कील कोइ तच्चणिओ जालववाडकरो मच्छगवहाए चलिओ, धुत्तेण भण्णइ-आयरिय! अघना ते कंथा, सो भणइ जालमेतमित्यादि श्लोकादवसेयम-"कन्थाऽऽचार्याघना ते ननु शफरवधे जालमश्नासि मत्स्यान् ?, ते मे मद्योपदंशान् पिबसि ननु ? युतो वेश्यया यासि वेश्याम् ?। कृत्वाऽरीणां गलेऽङ्घ्री क्व नु तव रिपवो ? येषु सन्धिं छिनद्मि, चौरस्त्वं ? द्यूतहेतोः कितव इति कथं ? येन दासीसुतोऽस्मि॥१॥ इदं लौकिकं, चरणकरणानुयोगे तु-

इय सासणस्सऽवण्णो जायइ जेणं न तारिसं बूया।

वादेवि उवहसिज्जइ निगमणओ जेण तं चेव॥१॥

उदाहरणदोषता पुनरस्य स्पष्टैवेति। गतं दुरुपनीतद्वारं, मूलद्वाराणां चोदाहरणदोषद्वार-मिति, साम्प्रतमुपन्यासद्वारं व्याख्यायते, तत्राह-

**नि. [८४]** चत्तारि उवन्नासे तव्वत्थुग अन्नवत्थुगे चेव।

पडिनिभए हेउम्मि य होंति इणमो उदाहरना॥

**वृ.** चत्वारः 'उपन्यासे' विचार्ये अधिकृते वा, भेदा भवन्ति इति शेषः, ते चामीसूचनात् सूत्र मितिकृत्वा तथाधिकारानुवृत्तेश्च तद्वस्तूपन्यासस्तथा तदन्यवस्तुपन्यासः तथा प्रतिनिभोपन्यासः तथा हेतूपन्यासश्च। तत्रैतेषु भेदेषु भवन्ति 'अमूनि' वक्ष्यमाणान्युदाहरणानीति गाथार्थः॥ भावार्थस्तु प्रतिभेदं स्वयमेव वक्ष्यति निर्युक्तिकारः। तत्राद्यभेदव्याख्यानं-

**नि. [८५/१]** तव्वत्थुयंमि पुरिसो सव्वं भमिऊण साहइ अपुव्वं।

**वृ.** 'तद्वस्तुके' तद्वस्तूपन्यास इत्यर्थः, पुरि शयनात्पुरुषः 'सर्वं भ्रान्त्वा' सर्वमाहिण्ड्य किम् ? - कथयपि अपूर्वम्, वर्त्तमाननिर्देशः पूर्ववदिति गाथादलार्थः॥ भावार्थः कथानका-दवसेयः तच्चेदम्-एगम्मि देवकुले कप्पडिया मिलिया भणंति-केण भे भमन्तेहिं किंचि अच्छेरियं दिट्ठं ?, तत्थ एगो कप्पडिगो भणइ मए दिट्ठंति, जइ पुण एत्थ समणोवासओ नत्थि तो साहेमि,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तओ सेसेहिं भणियं-नत्थित्थ समणोवासओ, पच्छा सो भणइ-मए हिंडंतेनं पुव्ववेतालीए समुद्दस्स तडे रुक्खो महइमहंतो दिट्ठो, तस्सेगा साहा समुद्दे पइट्ठिया, एगा य थले, तत्थ जाणि पत्ताणि जले पडंति ताणि जलचराणि सत्ताणि हवंति, जाणि थले ताणि थलचराणि हवंति, ते कप्पडिया भणंति- अहो अच्छेरयं देवेन भट्टारएण निम्मियंति, तत्थेगो सावगो कप्पडिओ, सो भणइ-जाणि अद्धमज्झे पडंति ताणि किं हवंति ?, ताहे सो खुद्धो भणइ- भया पुव्वं चेव भणियं-जइ सावओ नत्थि तो कहेमि । एतेनं तं चेव पडणवत्थुमहिकिच्चोदाहरियं । एवं तावल्लौकिकम्, इदं चौक्तन्यायाल्लोकोत्तरस्यापि सूचकं, तत्र चरणकरणानुयोगे यः कश्चिद्विनेयः कञ्चनासद्ग्राहं गृहीत्वा न सम्यग्वर्त्तते स खलु तद्वस्तूपन्यासेनैव प्रज्ञापनीयः, यथा कश्चिदाह-

"न मांसभक्षणे दोषो, न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला॥"

इदं च किलैवमेव युज्यते, प्रवृत्तिमन्तरेण निवृत्तेः फलाभावात्, निर्विषयत्वेनासम्भवाच्च, तस्मात्फलनिबन्धननिवृत्तिनिमित्तत्वेन प्रवृत्तिरप्यदुष्टेवेति, अत्रोच्यते, इह निवृत्तेर्महाफलत्वं किं दुष्टप्रवृत्तिपरिहारात्मकत्वेनाहोस्विददुष्टप्रवृत्तिपरिहारात्मकत्वेनेति ?, यद्याद्यः पक्षः कथं प्रवृत्तेरदुष्टत्वम्, अथापरस्तो निवृत्तरप्यदुष्टत्वात् तन्निवृत्तेरपि प्रवृत्तिरूपाया महाफलत्वप्रसङ्गः, तथा च सति पूर्वापरविरोध इति भावना । द्रव्यानुयोगे तु य एवमाह-एकान्तनित्यो जीवः अमूर्त्तत्वादाकाशवदिति, स खलु तदेवामूर्त्तत्वमाश्रित्य तस्योत्क्षेपणादावनित्ये कर्मण्यपि तावद्वक्तव्यः, कर्मामूर्त्तनित्यं चेत्ययं वृद्धदर्शनेनोदाहरणदोष एव, यथाऽन्येषां साधर्म्यसमा जातिरिति। गतं तद्वस्तूपन्यासद्वारम्, अधुना तदन्यवस्तूपन्यासद्वारमभिधातुकाम आह-

**नि.[८५/२]** तयअन्नवत्थुगंमिवि अन्नत्ते होइ एगत्तं॥

**वृ.**तदन्यवस्तुकेऽपि उदाहरणे, किम् ?-अन्यत्वे भवत्येकत्वमित्यक्षरार्थः। भावार्थस्त्वयम्-कश्चिदाह इह यस्य वादिनोऽन्यो जीवः अन्यच्च शरीरामिति, तस्यान्यशब्दस्याविशिष्टत्वात्तयोरपि तद्वाच्याविशिष्टत्वेनैकत्व प्रसङ्ग इति, तस्य जीवशरीरपेक्षया तदन्यवस्तूपन्यासेन परिहारः कर्त्तव्यः, कथम् ?, नन्वेवं सति सर्व भावानां परमाणुद्व्यणुकघटपटादीनामेकत्वप्रसङ्गः, अन्यः परमाणुरन्यो द्विप्रदेशिक इत्यादिना प्रकारेणान्यशब्दस्याविशिष्टत्वात्, तेषां च तद्वाच्यत्वेनाविशिष्टत्वादिति, तस्मादन्यो जीवोऽन्यच्छरीरमित्येतदेव शोभनमिति। एत-द्रव्यानुयोगे, अनेन चेतरस्याप्याक्षेपः, तत्र चरणकरणानुयोगे 'न मांसभक्षण' इत्यादावेव कुग्राहे तदन्वयस्तूपन्यासेन परिहारः, कथम् ?, 'न हिंस्यात् सर्वाणि भूतानी' त्येतदेवं विरुध्यते इति। लौकिकं तु तस्मिन्नेवोदाहरणे तदन्यवस्तूपन्यासेन परिहारः-जहा जाणि पुण पाडिऊण पाडीऊण कोइ खाइ वीणेइ वा ताणिं किं हवंति त्ति ?।

गतं तदन्यवस्तूपन्यासद्वारम्, साम्प्रतं प्रतिनिभम-भिधित्सुराह-

**नि.[८६/१]** तुज्झ पिया मह पिउणो धारेइ अनूनयं पडिनिभंमि।

**वृ.** तव पिता मम पितुर्धारयत्यनूनं शतसहस्रमित्यादि गम्यते। 'प्रतिनिभ' इति द्वारोपलक्षणम्, अयमक्षरार्थः, भावार्थः कथानकादसेयः, तच्चेदम्-एगम्मि नगरे एगो परिव्वायगो सोवण्णएण खोरएण तहिं हिंडइ, सो भणइ-जो मम असुयं सुणावेइ तस्स एवं देमि खोरयं, तत्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगो सावओ, तेन भणिअं।

तुज्झ पिया मम पिउणो धारेइ अणूणयं सयसहस्सं।
जइ सुयपुव्वं दिज्जउ अह न सुयं खोरयं देहि ॥१॥

इदं लौकिकम्, अनेन च लोकोत्तरमपि सूचितमवगन्तव्यम्, तत्र चरणकरणानुयोगे येषां सर्वथा हिंसायामधर्मः तेषां विध्यनशनविषयोद्रेकचित भङ्गादात्महिंसायामपि अधर्म एवेति तदकरणम्। द्रव्यानुयोगे पुनरदुष्टं मद्वचनमिति मन्यमानो यः कश्चिदाह-'अस्ति जीव' इति, अत्र वद किञ्चित्, स वक्तव्यो यद्यस्ति जीवः एवं तर्हि घटादीनाप्यस्तित्वाज्जीवत्यप्रसङ्ग इति। गतं प्रतिनिभम्, अधुना हेतुमाह-

**नि.[८६/२]** किं नु जवा किज्जंते ? जेन मुहाए न लब्भंति॥

**वृ.** किं न युवाः क्रीयन्ते ?, येन मुधा न लभ्यन्त इत्यक्षरार्थः। भावार्थस्त्वयम्कोवि गोधो जवे किणाइ, सो अन्नेण पुच्छिज्जइ-किं जवे किणासि ?, सो भणइ-जेन सुहियाए न लब्भामि। लौकिकमिदं हेतूपन्यासोदाहरणम्, अनेन च लोकोत्तरमप्याक्षिप्तमवगन्तव्यम्, तत् चरणकरणानुयोगे तावत् यद्याह विनेयः-किमितीयं भिक्षाटनाद्याऽतिकष्टा क्रिया क्रियते ?, स वक्तव्यो-येन नरकादिषु न कष्टतरा वेदना वेद्यत इति। द्रव्यानुयोगे तु यद्याह कश्चित्-किमित्यात्मा न चक्षुरादिभिरुपलभ्यते ?, स वक्तव्यो-येनातीन्द्रिय इति। गतं हेतुद्वारम्, तदभिधानाच्चोपन्यासद्वारम्, तदभिधानाच्चोदाहरणद्वारमिति॥ साम्प्रतं हेतुरुच्यते-तथा चाह-

**नि.[८७]** अहवावि इमो हेऊ विन्नेओ तत्थिओ चउविअप्पो।
जावग थावग वंसग लूसग हेऊ चउत्थो उ॥

**वृ.** अथवा तिष्ठतु एष उपन्यासः, उदाहरणचरमभेदलक्षणो हेतुः, 'अपिः' सम्भावने, किं सम्भावयति?, 'इमो' अयं अन्यद्वार एवोपन्यस्तत्वात्तदुपन्यासनान्तरीयकत्वेन गुणभूतत्वादहेतुरपि, किं तु 'हेऊ विन्नेओ तत्थिमो' त्ति व्यवहितोपन्यासात् तत्रायं-वक्ष्यमाणो हेतुर्विज्ञेयः 'चतुर्विकल्प' इति चतुर्भेदः, विकल्पानुदर्शयति-यापकः स्थापकः व्यंसकः लूषकः हेतुः चतुर्थस्तु। अन्ये त्वेवं पठन्ति-'हेउत्ति दारमहुणा, चउव्विहो सो उ होइ नायव्वो' त्ति, अत्राप्युक्तमुदाहरणम्, हेतुरित्येतद् द्वारमधुना-तुशब्दस्य पुनःशब्दार्थत्वात् स पुनर्हेतुश्चतुर्विधो भवति ज्ञातव्य इत्येवं गमनिका क्रियते, पश्चार्द्धं तु पूर्ववदेवेति गाथाक्षरार्थः॥

भावार्थं तु यथावसरं स्वयमेव वक्ष्यति॥ तत्राद्यभेदव्याचिख्यासयाऽऽह-

**नि.[८८/१]** उब्भामिगा य महिला जावगहेउंमि उंटलिंडाई।

**वृ.** असति महिला, किम् ?-यापयतीति यापकः यापकश्चासौ हेतुश्च यापकहेतुः तस्मिन् उदाहरणमिति शेषः, उष्ट्रलिण्डानीति कथानकसंसूचकमेतदिति अक्षरार्थः॥

भावार्थः कथान-कादवसेयः, तच्चेदं कथानकम्

एगो वाणियओ भज्जं गिण्हेऊण पच्चंतं गओ, पाएण खीणदव्वा घणियपरद्धा कयावराहा य।
पच्चंतं सेवंती पुरिसा दुरहीयविज्जा य॥१॥

सा य महिला उब्भामिया, एगंमि पुरिसे लग्गा, तं वाणिययं सागारियंति चिंतिऊण भणइ-वच्च वाणिज्जेण, तेन भणिया-किं घेत्तूण वच्चामि ?, सा भणइ-उट्टलिंडियाओ घेत्तूणं वच्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उज्जेनि, पच्छा सो सगडं भरेत्ता उज्जेनिं गतो, ताए भणिओ य-जहा एक्केक्कयं दीणारेण दिज्ज-हत्ति, सा चिंतेइवरं खु चिरं खिण्पंतो अच्छउ, तेन ताओ वीहीए उड्डियाओ, कोई न पुच्छइ, मूलदेवेण दिट्ठो, पुच्छिओ य, सिट्ठं तेन, मूलदेवेन चिंतियं-जहा एस वराओ महिलाछोभिओ, ताहे मूलदेवेण भण्णति-अहमेयाउ तव विक्किणामि जइ ममवि मुल्लस्स अद्धं देहि, तेन भणियं-देमित्ति, अब्भुवगए पच्छा मूलदेवेणं सो हंसो जाएऊण आगासे उप्पइओ, नगरस्स मज्झे ठाइ-ऊण भणइ-जस्स गलए चेडरूवस्स उट्टलिंडिया न बद्धा तं मारेमि, अहं देवो, पच्छा सव्वेण लोएण भीएण दीनारिक्काओ उट्टलिंडियाओ गहियाओ, विक्कियाओ य, ताहे तेन मूलदेवस्स अद्धं दिन्नं। मूलदेवेण य सो भणइ-मंदभग्ग! तव महिला धुत्ते लग्गा, ताए तव एयं कयं, पत्तियंति, मूलदेवेन भण्णइ-एहि वच्चामो जा ते दरिसेमि जदि न पत्तियसि, ताहे गया अन्नाए लेसाए, वियाले ओवासो मग्गिओ, ताए दिन्नो, तत्थ एगंमि पएसे ठिया, सो धुत्तो आगओ, इयरी वि धुत्तेणसह पिबेउमाढत्ता, इमं च गायइ-

"इरिमंदिरपन्नहारओ, मह कंतु गतो वणिजारओ।
वरिसाण सयं च जीवउ मा जीवंतु घरं कयाइ एउ॥"

मूलदेवो भणइ-

"कयलीवणपत्तवेढीया, पइ भणामि देव जं मद्दलएण गज्जती, मुणउ तं मुहुत्तमेव॥"

पच्छा मूलदेवेन भण्णति-किं धुत्ते?, तओ पभाए निग्गंतूणं पुनरवि आगओ, तीय पुरओ ठिओ, सा सहसा संभंता अब्भुट्ठिया, तओ खाणपिबणे वट्टंतो तेन वाणिएणं सव्वं तीए गीय-पज्जन्तयं संभारियं। एसो लोइओ हेऊ, लोउत्तरेवि चरणकरणानुयोगे एवं सीसोऽवि केइ पयत्थे असद्दहंतो कालेण विज्जादीहिं देवतं आयंपइत्ता सद्दहावेयव्वो। तहा दव्वानुओगेहिं पडिवाइं नाऊण तहा विसेसणबहुलो हेऊ कायव्वो जहा कालजावणा हवइ, तओ सो नावगच्छइ पगयं, कुत्तियावणचच्चरी वा कज्जइ, जहा सिरिगुत्तेण छलुए कया। उक्तो यापकहेतुः।

साम्प्रतं स्थापकहेतुमधिकृत्याह-

**नि.[८८/२]** लोगस्स मज्झजाणण थावगहेऊ उदाहरणं॥

**वृ.**'लोकस्य' चतुर्दशरज्ज्वात्मकस्य मध्यज्ञानम्, किम्?, स्थापकहेतावुदाहरणमित्यक्ष-रार्थः॥ भावार्थः कथानकादवसेयः, तच्चेदम्-एगो परिव्वायगो हिंडइ, सो य परूवेइ-खेत्ते दाणाई सफलंतिकट्टु समखेत्ते कायव्वं, अहं लोगस्स मज्झं जाणामि न पुण अन्नो, तो लोगो तमाढाति, पुच्छिओ य संतो चउसुवि दिसासु खीलए निहणिऊण रज्जूए पमाणं काऊण माइट्ठाणिओ भणइ-एयं लोयमज्झंति, तओ लोओ विम्हयं गच्छइ-अहो भट्टारएण जाणियंती, एगो य सावओ, तेन नायं, कहं धुत्तो लोयं पयारेइत्ति?, तो अहंति वंचामित्ति कलिऊण भणियं-न एस लोयमज्झो, भुल्लो तुमंति, तओ सावएण पुणो मवेऊण अन्नो देसो कहिओ, जहेस लोयमज्झोत्ति, लोगो तुट्ठो, अण्णे भणंति-अनेगट्ठाणेसु अन्नं अन्नं मज्झं परूवंतयं दट्ठूण विरोधो चोइओत्ति। एवं सो तेन परिवायगो निप्पिट्ठपसिणवागरणो कओ। एसो लोइओ थावगहेऊ, लोउत्तरेऽवि चरणकरणानुयोगे कुस्सुतीसुअसंभावणिज्जासग्गाहरओ सीसो एवं चेव पन्नवे-यव्वो। दव्वानुजोगे वि साहुणा तारिसं भाणियव्वं तारिसो य पक्खो गोण्हियव्वो जस्स परो उत्तरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेच दाउं न तीरइ, पुव्वावरविरुद्धो दोसो य न हवइ ॥ उक्तः स्थापकः साम्प्रतं व्यंसकमाह-

**नि.[८९/१]** सा सगडतित्तिरी वंसगंमि हेउम्मि होइ नायव्वा।

**वृ.** सा शकटतित्तिरी व्यसंकहेतौ भवति ज्ञातव्येत्क्षरार्थः ॥ भावार्थः कथानकादवसेयः, तच्चेदम्-जहा एगो गामेल्लगो सगडं कट्ठाण भरेऊण णगरं गच्छइ, तेन गच्छंतेन अंतरा एगा तित्तिरी मइया दिट्ठा, सो तं गिण्हेऊण सगडस्स उवरिं पक्खिविऊण णगरं पइट्ठो, सो एगेण नगरधुत्तेण पुच्छिओ-कहं सगडतित्तिरी लब्भइ?, तेन गामल्लेएण भण्णइ-तप्पणादुयालियाए लब्भति, तओ तेन सक्खिण उहाणहित्ता सगडं तित्तिरीए सह गहियं, एत्तिलगो सेव किल एस वंसगो त्ति, गुरवो भणंति-तओ सो गामेल्लगो दीनमनसो अच्छइ, तत्थ य एगो मूलदेवसरिसो मनुस्सो आगच्छइ, तेन सो दिट्ठो, तेन पुच्छिओ-किं झियायसि अरे देवाणुप्पिया?, तेन भणियं-अहमेगेन गोहेण इमेण पगारेण छलिओ, तेन भणियं-मा बीहिह, तप्पणादुयालियं तुमं सोवयारं मग्ग, माइट्ठाणं सिक्खाविओ, एवं भवउति भणिऊण तस्स सगासं गओ, भणियं चनेनमम जइ सगडं हियं तो मे इयाणिं तप्पणादुयालियं सोवयारं दवावेहि, एवं होउत्ति, घरं नीओ, महिला संदिट्ठा, अलंकियविभूसिया परमेण विनएण एअस्स तप्पणादुयालियं देहि, सा वय-णसमं उवट्ठिया, तओ सो सागडिओ भणति-मम अंगुली छिन्ना, इमा चीरेणावेढिया, न सक्केमि उड्डुयालेउं, तुमां अदुयालिउं देहि, अदुआलिया तेन हत्थेण गहिया, गामं तेना संपट्ठिओ, लोगस्स य कहेइ-जहा मए सतित्तिरीगेण सगडेण गहियां तप्पणादुयालिया, ताहे तेन धुत्तेण सगडं विसज्जियं, तं च पसाएऊण भज्जा नियत्तिया। एस पुण लूसओ चेव कहाणयवसेण भणिओ।

एस लोइओ, लोगुत्तरेऽवि चरणकारणनुयोगे कुस्सुतिभावियस्स तस्स तहा वंसगो पउ-ज्जति जहा संमं पडिवज्जइ। दव्वानुओगे पुण कुप्पावयणिओ चोइज्जा-जहा जइ जिनपणीए मग्गे अत्थि जीवो अत्थि घडो, अत्थित्तं जीवेऽवि घडेवि, दोसु अविसेसेण वट्टइत्ति, तेना अत्थित्तसद्दतुल्लत्तणेण जीवघडाणं एगत्तं भवति, अह अत्थिभावाओ वतिरित्तो जीवो, तेन जीवस्स अभावो भवइत्ति। एस किल एद्दहमेत्तो चेव वंसगो, लूसगेण पुण एत्थ इमं उत्तरं भाणितव्वंजइ जीवघडा अत्थित्ते वट्टंति, तम्हा तेसिमेगत्तं संभावेहि, एवं ते सव्वभावाणं एगत्तं भवति, कहं?, अत्थि घडो अत्थि पडो अत्थि परमाणू अत्थि दुपएसिए खंऐ, एवं सव्वभावेसु अत्थिभावो वट्टइत्तिकाउं किं सव्वभावा एगीभवंतु?, एत्थ सीसो भणति-कहं पुन एयं जाणियव्वं? सव्व-भावेसु अत्थिभावो वट्टइ, न य ते एगीभवंति, आयरिओ आह-अनेगंताओ एयं सिज्झइ, एत्थ दिट्ठंतो-खइरो वणस्सई वणस्सई पुण खदिरो पलासो वा, एवं जीवोऽवि नियमा अत्थि, अत्थि-भावो पुन जीवो व होज्ज अन्नो वा धम्माधम्मागासादीणं ति।

उक्तो व्यंसकः, साम्प्रतं लूषकमधि-कृत्याह-

**नि.[८९/२]** तउसगवंसग लूसगहेउम्मि य मोयओ य पुणो॥

**वृ.** त्रपुरुषव्यंसकप्रयोगे पुनर्लूषके हेतौ च मोदको निदर्शनमिति गाथाक्षरार्थः ॥ भावार्थः कथानकादवसेयः, तच्चेदम्-जहा एगो मनुस्सो तउसाणं भरिएण सगडेण नयरं पविसइ, सो पविसंतो धुत्तेण भण्णइ जो एयं तउसाण सगडं खाइज्जा तस्स तुमं किं देसि?, ताहे सगडत्तेण सो धुत्तो भणिओ-तस्साहं तं मोयगं देमि जो नगरद्दारेण न निप्फडइ, धुत्तेण भण्णति-तोऽहं एयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तउससगडं खयामि, तुमं पुण तंमोयगं देज्जासि जो नगरद्दारेण न नीसरति, पच्छा सागडिएण अब्भुवगए धुत्तेण सक्खिणो कया, सुगडं अहिट्ठित्ता तेसिं तउसाणं एक्केक्कयं खंडं अवनित्ता पच्छा तं सागडियं मोदकं मग्गति, ताहे सागडिओ भणतिइमे तउसा न खाइया तुमे, धुत्तेण भण्णति-जइ न खाइया तउसा अग्घवेह तुमं, तओ अग्घविएसु कइया आगया, पासंति खंडिया तउसा, ताहे कइया भणंति-को एए खइए तउसे किणइ ?, तओ करणे ववहारो जाओ खइयत्ति, जिओ सागडिओ। एस वंसगो चेव लूसगनिमित्तमुवण्णत्थो, ताहे धुत्तेण मोदगं मग्गिज्जति, अच्चाइओ सागडिओ, जूतिकरा ओलग्गिया, ते तुट्ठा पुच्छंति, तेसिं जहावत्तं सव्वं कहेति, एवं कहिते तेहिं उत्तरं सिक्खाविओ-जहा तुमं खुड्डुयं मोदग णगरदारे ठवित्ता भण एस स मोदगो न नीसरइ नगरदारेण, गिण्हाहि, जिओ धुत्तो। एस लोइओ, लोगुत्तरेवि चरणकारणानुयोगे कुस्सतिभावितस्स तहा लूसगो पउंजइ-जहा सम्मं पडिवज्जइ। दव्वानुजोगे पुन पुज्जा भणंति-पुव्वं दरिसिओ चेव।

अन्ने पुण भणंति-पुव्वं सयमेव सव्वभिचारं हेउं उच्चारेऊण परविसंभणानिमित्तं सहसा वा भणितो होज्जा, पच्छा तमेव हेउं अन्नेणं निरुत्तवयणेणं ठावेइ। उक्तो लूषकस्तदभिधा-नाच्चा हेतुरपि। साम्प्रतं यदुक्तं 'क्वचित्पञ्चावयव' मिति, तदधिकृतमेव सूत्रं 'धम्मो मंगलं' मित्यादिलक्षणमधिकृत्य निदर्श्यते-अहिंसासंयमतपोरूपो धर्म्मः मङ्गलमिति साध्यो धर्मः, धर्मिधर्मसमुदायः प्रतिज्ञा, इयं श्लोकार्द्धेनोक्ता इति, देवादिपूजितत्वादिति हेतुः, आदिशब्दात् सिद्धविद्याधरनरपरिग्रहः, अयं च श्लोकतृतीयपादेन खलूक्तोऽवसेयः, अर्हदादिवदिति दृष्टान्तः, अत्रापि चादिशब्दाद् गणधरादिपरिग्रहः, अयं च श्लोकचरमपादेनोक्तो वेदितव्य इति। न च भावमनोऽधिकृत्यार्हद्दृष्टान्तेऽसि कश्चिद्विरोध इति, इह यो यो देवादिपूजितः स स उत्कृष्टं-मङ्गलं यथाऽर्हदादयस्तथा च देवादिपूजितो धर्म इत्युपनयः, तस्माद्देवादिपूजितत्वादुत्कृष्टं मङ्गल-मिति निगमनम्। इदं चावयवद्वयं सूत्रोक्तावयवत्रयाविनाभूतमितिकृत्वा तेन सूचितमवगन्त-व्यमित्यलं विस्तरेण॥ साम्प्रतमेतानेवावयवान् सूत्रस्पर्शिकनिर्युक्त्या प्रतिपादयन्नाह-

**नि.[९०]** धम्मो गुणा अहिंसाइया उ ते परममंगल पइन्ना।
देवावि लोगपुज्जा पणमंति सुधम्ममिइ हेऊ॥

**वृ.** 'धर्मः' प्राग्निरूपितशब्दार्थः, स च क इत्याह-गुणा अहिंसादयः, आदिशब्दात् संयम-तपःपरिग्रहः, तुरेवकारार्थः, अहिंसादय एव, ते परममङ्गलमिति प्रतिज्ञा, तथा देवा अपि, अपि-शब्दात् सिद्धविद्याधरनरपतिपरिग्रहः, 'लोकपूज्या' लोकपूजनीयाः 'प्रणमंति' नमस्कुर्वन्ति, कम्?-'सुधर्माणं' शोभनधर्मव्यवस्थितमिति, अयं हेत्वर्थसूचकत्वाद्धेतुरिति गाथार्थः॥

**नि.[९१]** दिट्ठंतो अरहंता अनगारा य बहवो उ जिनसीसा।
वत्तणुवत्ते नज्जइ जं नरवइणोऽवि पणमंति॥

**वृ.** 'दृष्टान्तः' प्राग्निरूपितशब्दार्थः, स चाशोकाद्यष्टमहाप्रातिहार्यादिरूपा पूजामर्हन्ती-त्यर्हन्तः, तथा अनगाराश्च बहव एव जिनशिष्या इति, न गच्छन्तीत्यगा-वृक्षास्तैः कृतमगारंगृहं तद्येषां विद्यत इति अर्शआदेशकृतिगणत्वादच्प्रत्ययः अगारा-गृहस्थाः न अगारा-अनागाराः, चशब्दः समुच्चयार्थः, तुरेवकारार्थः, ततश्च बहव एव नाल्पाः, रागादिजेतृत्वाज्जिनस्तच्छिष्याः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्विनेया गौतमादयः, आह-अर्हदादीनां परोक्षत्वात् दृष्टान्तत्वमेवायुक्तम्, कथं चैतद्विनिश्चियते ? यथा ते देवादिपूजिता इति, उच्यते यत्तावदुक्तं 'परोक्षत्वा'दिति, तदुष्टम्, सूत्रस्य तिकालगोचरत्वात् कदाचित्प्रत्यक्षत्वात्, देवादिपूजिता इति च एतद्विनिश्चयायाह-वृत्तम्-अतिक्रान्तम् अनुवर्त्तमानेन-साम्प्रतकालभाविना ज्ञायते, कथमित्यत आह-'यद्' यस्माद् नरपतयोऽपि-राजानोऽपि प्रणमन्ति, इदानीमपि भावसाधुं, ज्ञानादिगुणयुक्तमिति गम्यते। अनेन गुणानां पूज्यत्वमावेदितं भवतीति गाथार्थः ॥

नि.[९२] उवसंहारो देवा जह तह रायावि पणमइ सुधम्मं।
तम्हा धम्मो मंगलमुक्किट्ठमिइ अ निगमनं॥

वृ. 'उपसंहारः' उपनयः, स चायम-देवा यथा तीर्थकरादीन् तथा राजाऽप्यन्योऽपि जनः प्रणमतीदानीमपि सुधर्माणमिति। यस्मादेवं तस्माद्देवादिपूजितत्वाद् धर्मो मङ्गलमुत्कृष्टमिति च निगमनम्। 'प्रतिज्ञाहेत्वोः पुनर्वचनं निगमन' मिति गाथार्थः ॥ उक्तं पञ्चावयवम्, एतदभिधानाच्चार्थाधिकारोऽपि धर्मप्रशंसा। साम्प्रतं दशावयवं तथा स चेहैव जिनशासन इत्यधिकारं चोपदर्शयति-इह च दशावयवाः-प्रतिज्ञादय एव प्रतिज्ञादिशुद्धिसहिता भवन्ति। अवयवत्वं च तच्छुद्धीनामधिकृतवाक्यार्थोपकारकत्वेन प्रतिज्ञा दीनामिव भावनीयमिति, अत्र बहु वक्तव्यं, तत्तु नोच्यते, गमनिकामात्रत्वात् प्रारम्भस्येति॥ साम्प्रतमधिकृतदशावयवप्रतिपादनायाह-

नि.[९३] बिइयपइन्ना जिनसासणंमि साहेंति साहवो धम्मं।
हेऊ जम्हा सब्भाविएसुऽहिंसाइसु जयंति॥

वृ. द्वितोया पञ्चावयवोपन्यस्तप्रथमप्रतिज्ञापेक्षया, प्रतिज्ञा पूर्ववत्, द्वितीया चासौ प्रतिज्ञा च द्वितीयप्रतिज्ञा, सा चेयम्-'जिनशासने' जिनप्रवचने, किम् ?-'साधयन्ति' निष्पादयन्ति 'साधवः' प्रव्रजिताः 'धर्म' प्राग्निरूपितशब्दार्थम्। इह च साधव इति धर्म्मिनिर्देशः, शेषस्तु साध्यधर्म इति, अयं प्रतिज्ञानिर्देशः। हेतुनिर्देशमहा-हेतुर्यस्मात् 'साद्भाविकेषु' पारमार्थिकेषु निरुपचरितेषवर्थेष्वित्यर्थः अहिंसादिषु, आदिशब्दान्मृषावादादिविरतिपरिग्रहः, अन्ये तु व्याचक्षते-'सब्भाविएहिं'त्ति सद्भावेन निरुपचरितसकलदुःखक्षयायैवेत्यर्थः 'यतन्ते' प्रयत्नं कुर्वन्ति इति गाथार्थः॥ साम्प्रतं प्रतिज्ञाशुद्धिमभिधातुकाम आह-

नि.[९४] जह जिनसासननिरया धम्मं पालेंति साहवो सुद्धं।
न कुतित्थिएसु एवं दीसइ परिवालणोवाओ॥

वृ. 'यथा' येन प्रकारेण जिनशासननिरता-निश्चयेन रता 'धर्म' प्राग्निरूपितशब्दार्थं 'पालयन्ति' रक्षन्ति 'साधवः' प्रव्रजिताः षड्जीवनिकायपरिज्ञानेन कृतकारितादिपरिवर्जनेन च 'शुद्धम्' अकलङ्कं, नैवं तत्रान्तरीयाः, यस्मान्न कुतीर्थिकेषु, 'एवं' यथा साधुषु दृश्यते परिपालनोपायः, षड्जीवनिकायपरिज्ञानाद्य भावात्। उपायग्रहणं च साभिप्रायकम्, शास्त्रो-क्तः खलूपायोऽत्र चिन्त्यते, न पुरुषानुष्ठानं, कापुरुषा हि वितथकारिणोऽपि भवन्त्येवेति- गाथार्थः ॥ अत्राह-

नि.[९५] तेसुवि य धम्मसद्दो धम्मं निययं च ते पसंसंति।
ननु भणिओ सावज्जो कुतित्थिधम्मो जिनवरेहिं॥

वृ. 'तेष्वपि च' तत्रान्तरीयधर्मेषु, किम् ?-धर्मशब्दो लोके रूढः, तथा धर्मं 'निजं च'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मीयमेव यथातथं ते 'प्रशंसन्ति' स्तुवन्ति, ततश्च कथमेतदिति, अत्रोच्यते, 'नन्वि'त्यक्षमायां 'भणित' उक्तः पूर्वं 'सावद्यः' सपापः 'कुतीर्थिकधर्मः' चरकादिधर्मः। कैः ?-'जिनवरैः' तीर्थकरैः 'न जिनेहिं उ पासत्थो' इति वचनात्, षड्जीवनिकायपरिज्ञानाद्यभावादेवेति, अत्रापि बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति गाथार्थः ॥ तथा-

**नि.[९६]** जो तेसु धम्मसद्दो सो उवयारेण निच्छएण इहं।
जह सीहसद्दु सीहे पाहण्णुवयारओऽन्नत्थ॥

**वृ.** यः 'तेषु' तत्रान्तरीयधर्मेषु धर्मशब्दः स 'उपचारेण' अपरमार्थेन, निश्चयेन 'अत्र' जिनशासने, कथम् ?-यथा सिंहशब्दः सिंहे व्यवस्थितः प्राधान्येन, 'उपचारतः' उपचारेण 'अन्यत्र' माणवकादौ, यथा सिंहो माणवकः, उपचारनिमित्तं च शौर्यक्रौर्यादयः धर्मे त्वहिंसाद्यभिधानादय इति गाथार्थः ॥

**भा.[१]** एस पइन्नासुद्धी हेऊ अहिंसाइएसु पंचसुवि।
सब्भावेण जयंती हेउविसुद्धी इमा तत्थ॥

**वृ.** 'एषा' उक्तस्वरूपा प्रतिज्ञायाः शुद्धिः प्रतिज्ञाशुद्धिः, हेतुरहिंसादिषु पञ्चस्वपि सद्भावेन यतन्त इति, अयं च प्राग् व्याख्यात एव, शुद्धिमभिधातुकामेन च भाष्यकृता पुनरुपन्यस्त इति, अत एवाह-हेतोर्विशुद्धिर्हेतुविशुद्धिः, विषयविभाषाव्यवस्थापनं विशुद्धः, 'इमा' इयं 'तत्र' प्रयोग इति गाथार्थः ॥

**भा.[२]** जं भत्तपानउवगरणवसहिसयनासनाइसु जयंति।
फासुयअकयअकारियअणणुमयाणुद्दिट्ठभोई य॥

**वृ.** 'यद' यस्मात्, भक्तं च पानं चोपकरणं च वसतिश्च शयनासनादयश्चेति समासस्तेषु, किम् ?-'यतन्ते' प्रयत्नं कुर्वन्ति, कथमेतदेवमित्यत्राह-यस्मात् प्रासुकं चाकृतं चाकारितं चाननुमतं चानुद्दिष्टं च तद्भोक्तुं शीलं येषां ते तथाविधाः, तत्रासवः-प्राणाः प्रगता असवः-प्राणा यस्मादिति प्रासुकं-निर्जीवम्, तच्च स्वकृतमपि भवत्यत आह-अकृतम्, तदपि कारितमपि भवत्यत आह-अकारितम्, तदप्यनुमतमपि भवत्यत आह-अननुमतम्, तदप्युद्दिष्टमपि भवति यावदर्थिकादि न च तदिष्यत इत्यत आह-अनुद्दिष्टमिति। एतत्परिज्ञानोपायश्चोपन्यस्तसकलप्रदानादिलक्षणसूत्रादिवगन्तव्य इति गाथार्थः ॥ तदन्ये पुनः किमित्यत आह-

**भा.[३]** अफासुयकयकारियअनुमयउद्दिट्ठभोइणो हंदि।
तसथावरहिंसाए जना अकुसला उ लिप्पंति॥

**वृ.** अप्रासुककृतकारितानुमोदितोद्दिष्टभोजिनश्चरकादयः, हन्दीत्युपप्रदर्शने, किमुपप्रदर्शयति ?-त्रसन्तीति त्रसाः-द्वीन्द्रियादयः तिष्ठन्तीति स्थावराः-पृथिव्यादयः तेषां हिंसा-प्राणव्यपरोपणलक्षणा तया 'जनाः' प्राणिनः 'अकुशलाः' अनिपुणाः स्थूलमतयश्चरकादयो 'लिप्यन्ते' सम्बध्यन्त इत्यर्थः इह च हिंसाक्रियाजनितेन कर्मणा लिप्यन्त इति भावनीयम्, कारणे कार्योपचारात्, ततश्च ते शुद्धधर्मसाधका न भवन्ति साधव एव भवन्तीति गाथार्थः ॥

**भा.[४]** एसा हेउविसुद्धी दिट्ठंतो तस्स चेव य विसुद्धी।
सुत्ते भणिया उ फुडा सुत्तफासे उ इयमन्ना॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'एषा' अनन्तरोक्ता 'हेतुविशुद्धिः' प्राग्निरूपितशब्दार्था, अधुना 'दृष्टान्तः' प्राग्निरूपित-शब्दार्थः, तथा 'तस्यैव च' दृष्टान्तस्य विशुद्धिः, किम्?--सूत्रे भणिता, उक्तैव 'स्फुटा' स्पष्टा॥ तच्चेदं सूत्रम्-

*मू. (२) जहा दुमस्स पुप्फेसु, भमरो आवियइ रसं।*
*न य पुप्फं किलामेई, सो अ पीणेइ अप्पयं॥*

वृ-अत्राह-अथ कस्माद्दशावयवनिरूपणायां प्रतिज्ञादीन् विहाय सूत्रकृता दृष्टान्त एवोक्त इति? उच्यते, दृष्टान्तादेव हेतुप्रतिज्ञे अभ्यूह्ये इति न्यायप्रदर्शनार्थम्, कृतं प्रसङ्गेन प्रकृतं - प्रस्तुमः। तत्र 'यथा' येन प्रकारेण 'द्रुमस्य' प्राग्निरूपितशब्दार्थस्य 'पुष्पेषु' प्राग्निरूपित-शब्दार्थेष्वेव, असमस्तपदाभिधानमनुतये (उपमेये) गृहिद्रुमाणामाहारादिपुष्पाण्यधिकृत्य विशिष्टसंबन्धप्रतिपादनार्थमिति, तथा च अन्यायोपार्जितवित्तदानेऽपि ग्रहणं प्रतिषिद्धमेव, 'भ्रमरः' चतुरिन्द्रियविशेषः, किम्?-'आपिबति' मर्यादया पिबत्यापिबति, किम्?-रस्यत इति रसस्तं-निर्यासं मकरन्दमित्यर्थः, एष दृष्टान्तः, अयं च तद्देशोदाहरणमधिकृत्य वेदितव्य इति, एतच्च सूत्रस्पर्शिकनिर्युक्तौ दर्शयिष्यति, उक्तं च 'सूत्रस्पर्शे त्वियमन्ये'ति। अधुना दृष्टान्त-विशुद्धमाह-'न च' नैव 'पुष्पं' प्राग्निरूपितस्वरूपं 'क्लामयति' पीडयति, 'स च' भ्रमरः 'प्रीणाति' तर्पयत्यात्मानमिति सूत्रसमुदायार्थः॥

अवयवार्थं तु निर्युक्तिकारो महता प्रपञ्चेन व्याख्यास्यति। तथा चाह-

नि.[९७] जह भमरोत्ति य एत्थं दिट्ठंतो होइ आहरणदेसे।
चंदमुहि दारिगेयं सोमत्तवहारण न सेसं॥

वृ. यथा भ्रमर इति च 'अत्र' प्रमाणे दृष्टान्तो भवत्युदाहरणदेशमधिकृत्य, यथा चन्द्रमुखी दारिकेयमित्यत्र सौम्यत्वावधारणं गृह्यते, न शेषं-कलङ्काङ्कितत्वानवस्थितत्वादीति गाथार्थः॥

नि.[९८] एवं भमराहरणे अनिययवित्तित्तणं न सेसाणं।
गहणं दिट्ठंतविसुद्धि सुत्त भणिया इमा चऽन्ना॥

वृ. एवं भ्रमरोदाहरणे अनियतवृत्तित्वं, गृह्यत इति शेषः, न 'शेषाणाम्' अविरत्यादीनां भ्रमरधर्माणां ग्रहणं, दृष्टान्त इति। एषा दृष्टान्तविशुद्धिः सूत्रे भणिता, इयं चान्या सूत्रस्पर्शनिर्युक्तौ

नि.[९९] एत्थ य भणिज्ज कोई समणाणं सुविहियाण।
पागोवजीविणो त्ति य लिप्पंतारंभदोसेणं॥

वृ. अत्र चैवं व्यवस्थिते सति ब्रूयात्कश्चिद्यथा-श्रमणानां क्रियते सुविहितानामिति, एतदुक्तं भवति-यदिहं पाकनिर्वर्तनं गृहिभिः क्रियते, इदं पुण्योपादानसंकल्पेन श्रमणानां क्रियते 'सुविहिताना' मिति तपस्विनां, गृह्णन्ति च ते ततो भिक्षामित्यतः पाकोपजीविन इति-कृत्वा लिप्यन्ते आरम्भदोषेण--आहारकरणक्रियाफलेनेत्यर्थः, तथा च लौकिका अप्याहुः-

'क्रयेण क्रायको हन्ति, उपभोगेन खादकः।
घातको वधचित्तेन, इत्येष त्रिविधो वधः॥'

इति गाथार्थः॥ साम्प्रतमेतत्परि-हरणाय गुरुराह-

नि.[१००] वासइ न तणस्स कए न तणं वड्ढइ कए मयकुलाणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न य रुक्खा सयसाला फुल्लन्ति कए महुयराणं॥

**वृ.** वर्षति न तृणस्य कृते, न तृणार्थमित्यर्थः, तथा न तृणं वर्धते कृते मृगकुलानाम्अर्थाय तथा नच वृक्षाः शतशाखाः पुष्प्यन्ति 'कृते' अर्थाय मधुकराणाम्, एवं गृहिणोऽपि न साध्वर्थं पाकं निर्वर्तयन्तीत्यभिप्राय इति गाथार्थः ॥ अत्र पुनरप्याह-

**नि.[१०१]** अग्गिम्मि हवी हूयइ आइच्चो तेन पीणिओ संतो।
वरिसइ पयाहियाए तेनोसहिओ परोहंति॥

**वृ.** इह यदुक्त 'वर्षति न तृणार्थ' मित्यादि, तदसाधु, यस्मादग्नौ हविर्हूयते, आदित्यः 'तेन' हविषा घृतेन प्रीणितः सन वर्षति, किमर्थम् ?-'प्रजाहितार्थं' लोकहिताय, 'तेन' वर्षितेन, किम् ?, औषध्यः 'प्ररोहन्ति' उद्गच्छन्ति, तथा चोक्तम्-

"अग्नावाज्याहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥"

इति गाथार्थः ॥ अधुनैतत्प-रिहारायेदमाह-

**नि.[१०२]** किं दुब्भिक्खं जायइ ? जइ एवं अह भवे दुरिट्ठं तु।
किं जायइ सव्वत्था दुब्भिक्खं अह भवे इंदो ? ॥

**नि.[१०३]** वासइ तो किं विग्धं निग्धायाईहिं जायए तस्स।
अह वासइ उउसमए न वासई तो तणट्ठाए॥

**वृ.** किं दुर्भिक्षं जायते यद्येवम् ?, कोऽभिप्रायः ?-तद्धविः सदा हूयत एव, ततश्च कारणाविच्छेदे न कार्यविच्छेदो युक्त इति, अथ भवेद् 'दुरिष्टं तु' दुर्नक्षत्रं दुर्यजनं वा, अत्राप्युत्तरमकिं जायते सर्वत्र दुर्भिक्षं ?, नक्षत्रस्य दुरिष्टस्य वा नियतदेशविषयत्वात्, सदैव सद्यज्वनां भावात्, उक्तं च-

"सदैव देवाः सद्भवो, ब्राह्मणाश्च क्रियापराः।
यतयः साधवश्चैव, विद्यन्ते स्थितिहेतवः॥"

इत्यादि, अथ भवेदिन्द्र इति, किम् ?, वर्षति, ततः किं 'विघ्नः' अन्तरायो निर्घातादिभिर्जायते ?, आदिशब्दद्दिग्दाहादिपरिग्रहः, 'तस्य' इन्द्रस्य, परमैश्वर्ययुक्तत्वेन विघ्नानुपपत्तेरिति भावना, अथ वर्षति ऋतुसमये गर्भसद्भात इति वाक्यशेषः, न वर्षति ततस्तृणार्थं, तस्येत्थम्भूतस्याभिसन्धेरभावादिति गाथाद्वयार्थः ॥ किं च-

**नि.[१०४]** किं च दुमा पुप्फंति भमराणं कारणा अहासमयं।
मा भमरमहुयरिगणा किलामएज्जा अनाहारा॥

**वृ.** किं च द्रुमाः पुष्प्यन्ति भ्रमराणां 'कारणात्' कारणेन 'यथासमयं' यथाकालं मा भ्रमरमधुकरीगणाः 'क्लामन्' (क्लामिषुः) ग्लानिं प्रतिपद्येरन्, 'अनाहारा' अविद्यामानाहाराः सन्तः, काक्वा नैवैतदित्थमिति गाथार्थः ॥ साम्प्रतं पराभिप्रायमाह-

**नि.[१०५]** कस्सइ बुद्धी एसा वित्ती उवकप्पिया पवावइणा।
सत्ताणं तेन दुमा पुप्फंति महुयरिगणट्ठा॥

**वृ.** अथ 'कस्यचिद्बुद्धिः' कस्यचिदभिप्रायः स्याद्यदुत-एषा वृत्तिरुपकल्पिता, केन ?-प्रजापतिना, केषाम् ?-'सत्त्वानां' प्राणिनां तेन कारणेन द्रुमाः पुष्प्यन्ति मधुकरीगणार्थमेवेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाथार्थः ॥ अत्रोत्तरमाह-

नि.[१०६] तं न भवइ जेन दुमा नामागोयस्स पुव्वविहियस्स।
उदएणं पुप्फफलं निवत्तयंती इमं चऽन्नं॥

वृ. यदुक्तं परेण तन्न भवति, कुत इत्याह-येन द्रुमा नामगोत्रस्य कर्मणः 'पूर्वविहितस्य' जन्मान्तरोपात्तस्य 'उदयेन' विपाकानुभवलक्षणेन पुष्पफलं 'निर्वर्तयन्ति' कुर्वन्ति, अन्यथा सदैव तद्भावप्रसङ्ग इति भावनीयम्। इदं चान्यत्कारणं, वक्ष्यमाणमिति गाथार्थः॥

नि.[१०७] अत्थि बहू वनसंडा भमरा अत्थ न उवेंति न वसंति।
तत्थऽपि पुप्फंति दुमा पगई एसा दुमगणाणं॥

वृ. सन्ति बहूनि वनखण्डानि तेषु तेषु स्थानेषु, भ्रमरा यत्र नोपयान्ति अन्यतः, न वसन्ति तेष्वेव तथापि पुष्प्यान्ति द्रुमाः, अतः 'प्रकृतिरेषा' स्वभाव एष द्रुमगणानामिति गाथार्थः॥

नि.[१०८] जइ पगई कीस पुणो सव्वं कालं न देंति पुप्फफलं।
जं काले पुप्फफलं दयंति गुरुराह अत एव॥

नि.[१०९] पगई एस दुमाणं जं उउसमयम्मि आगए संते।
पुप्फंति पायवगणा फलं च कालेन बंधंति॥

वृ. यदि प्रकृतिः किमिति पुनः सर्वकालं 'न ददति' न प्रयच्छन्ति, किम्? पुष्पफलम्?, एवमाशङ्कयाह-यद्-यस्मात्काले नियत एव पुष्पफलं ददति, गुरुराह-अत एवअस्मादेव हेतोः।प्रकृतिरेषा द्रूमाणां यद् 'ऋतुसमये' वसन्तादावागते सति पुष्प्यन्ति 'पादपगणा' वृक्षसङ्घाताः तथा फलं च कालेन बध्नन्ति, तदर्थानभ्युपगमे तु नित्यप्रसङ्ग इति गाथाद्वयार्थः॥

साम्प्रतं प्रकृतेऽप्युक्तार्थयोजनां कुर्वन्नाह-

नि.[११०] किं नु गिही रंधंती समणाणं कारणा अहासमयं।
मा समणा भगवंतो किलामएज्जा अनाहारा॥

वृ. किं न गुहिणो 'राध्यन्ति' पाकं निर्वर्तयन्ति श्रमणानां कारणेन यथाकालं?, 'मा श्रमणा भगवन्तः क्लामन्ननाहारा' इति पूर्ववदिति गाथार्थः॥ न चैतदित्थमित्यभिप्रायः॥ अत्राह-

नि[१११] समणऽनुकंपनिमित्तं पुण्णनिमित्तं च गिहनिवासी उ।
कोइ भणिज्जा पागं करेंति सो भण्णइ न जम्हा॥

नि.[११२] कंतारे दुब्भिक्खे आयंके वा महइ समुप्पन्ने।
रत्तिं समणसुविहिया सव्वाहारं न भुंजंति॥

नि.[११३] अह कीस पुण गिहत्था रत्तिं आयतरेण रंधंति।
समणेहिं सुविहिएहिं चउव्विहाहारविरएहिं?॥

वृ. श्रमणेभ्योऽनुकम्पा श्रमणानुकम्पा तन्निमित्तम्, न ह्येते हिरण्यग्रहणादिना अस्माकमनुकम्पां कुर्वन्तीति मत्वा भिक्षादानार्थं पाकं निर्वर्तयन्त्यतः श्रमणानुकम्पानिमित्तं, तथा सामान्येन पुण्य-निमित्तं च गृहनिवासिन एव कश्चिद् ब्रूयात्पाकं कुर्वन्ति, स भण्यते-नैतदेवम्, कुतः?-यस्मात् 'कान्तारे' अरण्यादौ 'दुर्भिक्षे' अन्नाकाले 'आतङ्के वा' ज्वरादौ महति समुत्पन्ने सति रात्रौ श्रमणाः 'सुविहिताः' शोभनानुष्ठानाः, किम्?-'सर्वाहारम्' ओदनादि न भुञ्जते॥ अथ किमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनर्गृहस्थाः तत्रापि रात्रौ 'आदरतरेणं अत्यादरेण राध्यन्ति, श्रमणैः सुविहितैश्चतुर्विधाहारविरतैः सद्भिरिति गाथात्रयार्थः ॥ किंच-

**नि.[११४]** अत्थि बहुगामनगरा समणा जत्थ न उवेंति न वसंति।
तत्थवि रधंति गिही पगई एसा गिहत्थाणं ॥

**वृ.** सन्ति बहूनि ग्रामनगराणि तेषु तेषु देशेषु 'श्रमणाः' साधवो यत्र नोपयान्ति अन्यतो, न वसन्ति तत्रेव, अथ च तत्रापि राध्यन्ति गृहिणः, अतः प्रकृतिरेषा गृहस्थानामिति गाथार्थः ॥

अमुमेवार्थं स्पष्टयन्नाह-

**नि.[११५]** पगई एस गिहीणं जं गिहिणो गामनगरनिगमेसुं।
रंधंति अप्पणो परियणस्स कालेण अट्ठाए ॥

**वृ.** प्रकृतिरेषा गृहिणां वर्त्तते यद्गृहिणो ग्रामनगरनिगमेषु, निगमः-स्थानविशेषः, राध्यन्ति आत्मनः परिजनस्य 'अर्थाय' निमित्तं कालेनेति योग इति गाथार्थः ॥

**नि.[११६]** तत्थ समणा तवस्सी परकडपरनिट्ठियं विगयधूमं।
आहारं एसंति जोगाणं साहणट्ठाए ॥

**वृ.** तत्र श्रमणाः 'तपस्विन' इति उद्यतविहारिणो नेतरे, परकृतपरनिष्ठितमिति, कोऽर्थः ?-परार्थं कृतम्-आरब्धं परार्थं च निष्ठितम्-अन्तं गतं, विगतधूमम्-धूमरहितम्, 'एकग्रहणे तज्जातीयग्रहण' मिति न्यायाद्विगताङ्गारं च रागद्वेषमन्तरेणेत्यर्थः, उक्तं च- "रागेण सइंगालं दोसेण सधूमगं वियाणाहि" 'आहारम्' ओदनादिलक्षणम् 'एषन्ते' गवेषन्ते, किमर्थम्? अत्राह 'योगानां' मनोयोगादीनां संयमयोगानां वा साधनार्थं, न तु वर्णाद्यर्थमिति गाथार्थः ॥

**प्र.[१]** नवकोडीपरिसुद्ध उग्गमउप्पायणेसणासुद्धं।
छट्ठाणरक्खणट्ठा अहिंसअनुपालणट्ठाए ॥

**वृ.** इयं च किल भिन्नकर्तृकी, अस्या व्याख्या-नवकोटीपरिशुद्धम्, तत्रैता नव कोट्यः, यदुत-न हणइ १ न हणावेइ २ हणंतं नानुजाणइ ३, एवं न किणइ ३, एवं न पयई ३, एताभिः परिशुद्धं, तथा उद्गमोत्पादनैषणाशुद्धमिति, एतद्वस्तुतः सकलोपाधिविशुद्धकोटिख्यापनमेव, एवम्भूतमपि किमर्थं भुञ्जते ?-षट्स्थानरक्षणार्थम्, तानि चामूनि-

'वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए।
तह पाणवत्तियाए छट्ठं पुन धम्मचिंताए ॥'

अमून्यपि च भवान्तरे प्रशस्तभावनाभ्यासादहिंसानुपालनार्थम्, तथा चाह-

"नाहारत्यागतोऽभावितमतेर्देहत्यागो भवान्तरेऽप्यहिंसायै भवती" तिगाथार्थः ॥

**नि.[११७]** दिट्ठंतसुद्धि एसा उवसंहारो य सुत्तनिद्दिट्ठो।
संति विज्जंतित्ति य संति सिद्धिं न साहेंति ॥

**वृ.** दृष्टान्तशुद्धिरेषा, प्रतिपादिता, 'उपसंहारस्तु' उपनयस्तु 'सूत्रनिर्दिष्टः' सूत्रोक्तः तच्चेदं सूत्रम्-

*मू.(३)* *एमेए समणा मुत्ता, जे लोए संति साहुणो।*
*विहंगमा व पुप्फेसु, दानभत्तेसणेरया ॥*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वृ-'एवम्' अनेन प्रकारेण 'एते' येऽधिकृताः प्रत्यक्षेणा वा परिभ्रमन्तो दृश्यन्ते, श्राम्यन्तीति श्रमणाः, तपस्यन्तीत्यर्थः, एते च तत्रान्तरीया अपि भवन्ति, यथोक्तम्-"निग्गंथसक्कतावसगेरुय-आजीव पंचहा समणा" अत आह- 'मुक्ता' बाह्याभ्यन्तरेण ग्रन्थेन, ये 'लोके' अर्धतृतीय-द्वीपसमुद्रपरिमाणे 'सन्ति' विद्यन्ते, अनेन समयक्षेत्रे सदैव विद्यन्त इत्येदाह, साधयन्तीति - साधवः, किं साधयन्ति ?-ज्ञानादीति गम्यते। अत्राह-ये मुक्तास्ते साधव एवेत्यत इदमयुक्तम्, अत्रोच्यते, इह व्यवहारेण निह्नवा अपि मुक्ता भवन्त्येव न च ते साधव इति तद्वयवच्छेदार्थत्वान्न दोषः। आह-न च ते 'सदैवसन्ती' त्यनेनैव व्यवच्छिन्ना इति, उच्यते, वर्तमानतीर्थापेक्षयैवेदं सूत्रमिति न दोषः, अथवा-अन्यथा व्याख्यायते-ये लोके सन्ति साधव इत्यत्र य इत्युद्देशः, लोक इत्यनेन समयक्षेत्र एव नान्यत्र, किम् ?-शान्तिः-सिद्धिरुच्यते तां साधयन्तीति शान्ति-साधवः, तथा चोक्तं निर्युक्तिकारेण-"संति विज्जंतित्ति य संतिं सिद्धिं व साहेंति" इदं व्याख्यात-मेव। 'विहंगमा इव' भ्रमरा इव पुष्पेषु, किम् ?-'दानभक्तैषणासु रताः' दानग्रहणाद्दत्तं गृह्यन्ति नादत्तम्, भक्तग्रहणेन तदपि भक्तं प्रासुकं न पुनराधाकर्मादि, एषणाग्रहणेन गवेषणादित्रय-परिग्रहः, तेषु स्थानेषु 'रताः' सक्ता इति सूत्रसमासार्थः। अवयवार्थं सूत्रस्पर्शिकनिर्युक्त्या प्रतिपादयति-तत्रापि च विहङ्गमं व्याचष्टे-स द्विविधः-द्रव्यविहङ्गमो भावविहङ्गमश्च।

तत्र तावद्द्रव्यविहङ्गमं प्रतिपादयन्नाह-

**नि.[११८]** धारेइ तं तु दव्वं तं दव्वविहङ्गमं वियाणाहि।
भावे विहंगमो पुन गुणसन्नासिद्धिओ दुविहो॥

**वृ.** 'धारयति' आत्मनि लीनं धत्ते तत्तु 'द्रव्य' मित्यनेन पूर्वोपात्तं कर्म निर्दिशति, येन हेतुभूतेन विहङ्गमेषूत्पत्स्यत इति, तुशब्द एवकारार्थः, अस्थानप्रयुक्तश्च, एवं तु द्रष्टव्यः धारयत्येव, अनेन च धारयत्येव यदा तदा द्रव्यविहङ्गमो भवति नोपभुंक्त इत्येतदावेदितं भवति, द्रव्यमिति चात्र कर्मपुद्गलद्रव्यं गृह्यते, न पुनराकाशादि, तस्यामूर्त्तत्वेन धारणायोगात्, संसारिजीवस्य च कथञ्चिन्मूर्त्तत्वेऽपि प्रकृतानुपयोगित्वात्, तथाहि-यदसौ भवान्तरं नेतुमलं यच्च विहङ्गमहेतुतां प्रतिपद्यते तदत्र प्रकृतं न चैवमन्यः संसारिजीव इति, 'तं द्रव्यविहङ्गम' मित्यत्र यत्तदोर्नित्या-भिसंबन्धादन्यतरोपादानेनान्यतरपरिग्रहादयं वाक्यार्थ उपजायते-धारयत्येव तद्द्रव्यं यस्तं द्रव्य-विहङ्गममिति, द्रव्यं च तद्विहङ्गमश्च स इति द्रव्यविहङ्गमः, द्रव्यं जीवद्रव्यमेव, विहङ्गम-पर्याये-णाऽऽवर्तनाद्, विहङ्गमस्तु कारणे कार्योपचारादिति, तं 'विजानीहि' अनेकैः प्रकारैरागमतो ज्ञाताऽनुपयुक्त इत्येवमादिभिर्जानीहि 'भावे विहङ्गम' इत्यत्रायं भावशब्दो बह्वर्थः, क्वचिद्द्रव्य-वाचकस्तद्यथा 'नासओ भुवि भावस्स, सद्दोहवइ केवलो' भावस्य-द्रव्यस्य वस्तुन इति गम्यते, क्वचिच्छुक्लादिष्वपि वर्त्तते- "जं जं जे जे भावे परिणमइ" इत्यादि यान २ शुक्लादीन् भावा-निति गम्यते, कचिदौदयिकादिष्वपि वर्तते यथा-'ओदइए ओवसमिए' इत्याद्युक्ता 'छव्विहो भावलोगो उ' औदयिकादय एव भावा लोक्यमानत्वाद् भावलोक इति, तदेवमनेकार्थवृत्तिः सन्नौदयिकादिष्वेव वर्तमान इह गृहीत इति, भवनं भावः भवन्त्यस्मिन्निति वा भावः तस्मिन् भावे-कर्मविपाकलक्षणे, किम् ?-'विहङ्गमो' वक्ष्यमाणशब्दार्थः, पुनःशब्दो विशेषणे, न पूर्वस्मादत्यन्तमयमन्य एव जीवः, किंतु स एव जीवस्त एव पुद्गलास्तथाभूता इति विशेष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यति, गुणश्च संज्ञा च गुणसञ्ज्ञे गुणः-अन्वर्थः संज्ञा पारिभाषिकी ताभ्यां सिद्धिः गुणसंज्ञासिद्धिः, सिद्धिशब्दः सम्बन्धवाचकः, तथा च लोकेऽपि "सिद्धर्भवतु" इत्युक्ते इष्टार्थसम्बन्ध एव प्रतीयत इति, तया गुणसंज्ञासिद्धया हेतुभूतया, किम्?-'द्विविधो' द्विप्रकारः, गुणसिद्धया-अन्वर्थसम्बन्धेन तथा संज्ञासिद्धया च-यदृच्छाभिधानयोगेन च। आह-यद्येवं द्विविध इति न वक्तव्यम्, गुणसञ्ज्ञासिद्धयेत्यनेनैव द्वैविध्यस्य गतत्वात्, न, अनेनैव प्रकारेणेह द्वैविध्यं, आगम-नोआगमादिभेदेन नेति ज्ञापनार्थमिति गाथार्थः ॥ तत्र 'यथोद्देशं निर्देश' इति न्यायमाश्रित्य गुणसिद्धया यो भावविहङ्गमस्तमभिधित्सुराह-

**नि.[११९]** विहमागासं भण्णइ गुणसिद्धि तप्पइट्ठिओ लोगो।
तेन उ विहङ्गमो सो भावत्थो वा गई दुविहा॥

**वृ.** विजहाति-विमुञ्चति जीवपुद्गलानिति विहं, ते हि स्थितिक्षयात्स्वयमेव तेभ्य आकाश-प्रदेशेभ्यश्च्यवन्ते, ताँश्च्यवमानान्विमुञ्चतीति, शरीरमपि च मलगण्डोलकादि विमुञ्चत्येव (इति) मा भूत् संदेह इत्यत आह-आकाशं भण्यते, न शरीरादि, संज्ञाशब्दत्वात्, आकाशन्तेदीप्यन्ते स्वधर्मोपेता आत्मादयो यत्र तदाकाशम्, किम्?-संतिष्ठत इत्यादिक्रियाव्यपोहार्थमाह-'भण्यते' आख्यायते, गुणसिद्धिरित्येतत्पदं गाथाभङ्गभयादस्थाने प्रयुक्तम्, संबन्धश्चास्य 'तेन तु विहंगमः स इत्यत्र तेन त्वित्यनेन सह वेदितव्य इति, ततश्चायं वाक्यार्थः-तेन तुशब्दस्यैवकारार्थत्वेना-वधारणार्थत्वाद्येन विहमाकाशं भण्यते तेनैव कारणेन गुणसिद्धया-अन्वर्थसम्बन्धेन विहङ्गमः, कोऽभिधीयत? इत्याह-'तत्प्रतिष्ठितो लोकः' तदित्यनेनाकाशपरामर्शः, तस्मिन्नाकाशे प्रतिष्ठितः तत्प्रतिष्ठितः, प्रतिष्ठितिः स्म प्रतिष्ठितः-प्रकर्षेण स्थितवानित्यर्थः, अनेन स्थितः स्थास्यति चेति गम्यते, कोऽसावित्थमित्यत आह-'लोकः' लोक्यत इति लोकः, केवल-ज्ञानभास्वता दृश्यत इत्यर्थः, इह धर्मादिपञ्चास्तिकायात्मकत्वेऽपि लोकस्याकाशास्ति-काया-स्याधारत्वेन निर्दिष्टत्वाच्चात्वार एवास्तिकाया गृह्यन्ते, यतो निर्युक्तिकारेणाभ्यधायि-'तत्प्रतिष्ठितो लोकः', 'विहङ्गमः स' इत्यत्र विहे-नभसि गतो गच्छति गमिष्यति चेति विहङ्गमः, गमिरय-मनेकार्थ-त्वाद्धातूनामवस्थाने वर्तते, ततश्च विहे स्थितवांस्तिष्ठति स्थास्यति चेति भावार्थः, स इति-चतुरस्तिकायात्मकः, 'भावार्थ' इति भावश्चासावर्थश्च भावार्थः, अयं भावविहङ्गम इत्यर्थः। उक्त एकेन प्रकारेण भावविहङ्गमः, पुनरपि गुणसिद्धिमन्येन प्रकारेणाभिधातुकाम आह-'वा गति-र्द्विविधे'ति, वाशब्दस्य व्यवहित उपन्यासः, एवं तु दृष्यव्यः-गतिर्वा द्विविधेति, तत्र गमनं गच्छति वाऽनयेति गतिः, द्वे विधे यस्याः सेयं द्विविधा, द्वैविध्यं वक्ष्यमाणलक्षणमिति गाथार्थः॥

तथा चेदमेव द्वैविध्यमुपदर्शयन्नाह-

**नि.[१२०]** भावगई कम्मगई भावगइं पप्प अत्थिकाया उ।
सव्वे विहंगमा खलु कम्मगईए इमे भेया॥

**वृ.** भवन्ति भविष्यन्ति भूतवन्तश्चेति भावाः, अथवा भवन्त्येषु स्वगता उत्पादविगमध्रौ-व्याख्याः परिणामविशेषा इति भावा-अस्तिकायास्तेषां गतिः-तथापरिणामवृत्तिर्भावगतिः, तथा कर्मगतिरित्यत्र क्रियत इति कर्म-ज्ञानावरणादि पारिभाषिकम्, क्रिया वा, कर्म च तद्गतिश्चासौ कर्मगतिः, गमनं गच्छत्यनया वेति गतिः, तत्र 'भावगतिं प्राप्य अस्तिकाया-स्तु' इति अत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावगतिः पूर्ववत्तां प्राप्य-अभ्युपगम्याश्रित्य, किम्? 'अस्तिकायास्तु' धर्मादयः, तुशब्द एवकारार्थः, स चावधारणे, तस्य च व्यवहितः प्रयोगः, भावगतिमेव प्राप्य न पुनः कर्मगतिं, 'सर्वे विहङ्गमाः खलु' सर्वे-चत्वारः नाकाशमाधारत्वात्, 'विहङ्गमा इति' विहं गच्छन्त्य-वतिष्ठन्ते स्वसत्तां बिभ्रतीति विहङ्गमाः, खलुशब्दोऽवधारणे, विहङ्गमा एव, न कदाचिन्न विहङ्गमा इति। 'कर्मगतेः' प्राग्निरूपितशब्दार्थायाः, किम्?-'इमौ भेदौ' वक्ष्यमाणलक्षणाविति गाथार्थः॥

तावेवोपदर्शयन्नाह-

**नि.[१२१]** विहगगई चलणगई कम्मगई उ समासओ दुविहा।
तदुदयवेययजीवा विहंगमा पप्प विहगगई॥

**वृ.** इह गम्यतेऽनया नामकर्मान्तर्गतया प्रकृत्या प्राणिभिरिति गतिः, विहायसि-आकाशे गतिर्विहायोगतिः, कर्मप्रकृतिरित्यर्थः, तथा चलनगतिरिति, चलिरयं परिस्पन्दने -वर्त्तते, चलनं स्पन्दमित्येकोऽर्थः, चलनं च तद्गतिश्च सा चलनगतिः--गमनक्रियेति भावः। कर्मगतिस्तु समासतो द्विविधेत्यत्र तुशब्द एवकारार्थः, स चावधारणे कर्मगतिरेव द्विविधा न भावगतिः, तस्या एकरूपत्वेन व्याख्यातत्वात्, तत्र 'तदुदयवेदकजीवा' इति, अत्र तदित्यनेना-न्तरनिर्दिष्टां विहायोगतिं निर्दिशति, तस्या-विहायोगतेः उदयस्तदुदयो विपाक इत्यर्थः, तथा वेदयन्ति-निर्जरयन्ति उपभुञ्जन्तीति वेदकाः तदुदयस्य वेदकाश्च ते जीवाश्चेति समासः, आह-तदुदयवेदका जीवा एव भवन्तीति विशेषणानर्थक्यम्, न, जीवानां वेदकत्वावेदकत्वयोगेन सफलत्वात्, अवेदकाश्च सिद्धा इति। 'विहङ्गमाः प्राप्य विहायोगति'मिति, अत्र विहे विहायोगतेरुदया-दुद्गच्छन्तीति विहङ्गमाः, 'प्राप्य' आश्रित्य, किं प्राप्य?-'विहायोगितिम्' विहायोगतिरुक्ता तां, विपर्यस्तान्यक्षरण्येवं तु द्रष्टव्यानि-विहायोगतिं प्राप्य तदुदयवेदकजीवा विहङ्गमा इति - गाथार्थः॥ अधुना द्वितीयकर्मगतिभेदमधिकृत्याह-

**नि.[१२२]** चलनंकम्मगइं खलु पडुच्च संसारिणो भवे जीवा।
पोग्गलदव्वाइं वा विहंगमा एस गुणसिद्धी॥

**वृ.** चलनं-स्पन्दनं, तेन कर्मगतिर्विशेष्यते, कथम्?-चलनाख्या या कर्मगतिः सा चलनकर्मगतिः, एतदुक्तं भवति-कर्मशब्देन क्रियाऽभिधीयते, सैव गतिशब्देन सैव चलनशब्देन च। तत्र गतेर्विशेषणं क्रिया क्रियाविशेषणं चलनम्। कुतः?-व्यभिचाराद्, इह गतिस्तावन्नरका-दिका भवति अतः क्रियया विशेष्यते, क्रियाऽप्यनेकरूपा भोजनादिका ततश्चलनेन विशेष्यते, अतश्चलनाख्या कर्मगतिश्चलनकर्मगतिस्ताम्, अनुस्वारोऽलाक्षणिकः, खलुशब्द एवकारार्थः, स चावधारणे, चलनकर्मगतिमेव, न विहायोगतिं, 'प्रतीत्य' आश्रित्य, किम्?-संसरणं संसारः, संसरणं ज्ञानावरणादिकर्मयुक्तानां गमनं, स एषामस्तीति संसारिणः, अनेन सिद्धानां व्युदासः, 'भवे' इति, अयं शब्दो भवेयुरित्यस्यार्थे प्रयुक्तः, 'जीवा' उपयोगादिलक्षणाः। ततश्चायं वाक्यार्थः-चलनकर्मगतिमेव प्रतीत्य संसारिणो भवेयुर्जीवा विहङ्गमा इति, विहं गच्छन्ति-चलन्ति सर्वैरात्म-प्रदेशैरिति विहङ्गमाः।

तथा 'पुद्गलद्रव्याणि वे'त्यादि, पूरणगलनधर्माणः पुद्गलाः, पुद्गलाश्च ते द्रव्याणि च तानि पुद्गलद्रव्याणि, द्रव्यग्रहणं विप्रतिपत्तिनिरासार्थम्, तथा चैते पुद्गलः कैश्चिदद्रव्याः सन्तोऽभ्यु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पगम्यन्ते, 'सर्वे भावा निरात्मानः' इत्यादिवचनाद्, अतः, पुद्गलानां परमार्थसद्रूपता-ख्यापनार्थं द्रव्यग्रहणम्, वाशब्दो विकल्पवाची, पुद्गलद्रव्याणी वा संसारिणो वा जीवा विहङ्गमा इति। तत्र जीवान्धिकृत्यान्वर्थो निदर्शितः, पुद्गलास्तु विहं गच्छन्तीति विहङ्गमाः, तच्च गमन-मेषां स्वतः परतश्च संभवति, अत्र स्वतः परिगृह्यते, विहङ्ग मा इति च प्राकृतशैल्या जीवापेक्षया वोक्तम्, अन्यथा द्रव्यपक्षे विहङ्गमानीति वक्तव्यम्, एष भावविहङ्गमः, कथम्?-'गुणसिद्ध्या' अन्वर्थ-सम्बन्धेन, प्राकृतशैल्या वाऽन्यथोपन्यास इति गाथार्थः॥ एवं गुणसिद्धया भावविहङ्गम उक्तः, साम्प्रतं संज्ञासिद्धया अभिधातुकाम आह-

**नि.[१२३]** सन्नासिद्धि पप्पा विहंगमा होंति पक्खिणो सव्वे।
इहइं पुन अहिगारो विहासगमनेहि भमरेहिं॥

**वृ.** संज्ञानं संज्ञा नाम रूढिरिति पर्यायाः तया सिद्धिः संज्ञासिद्धिः, संज्ञासम्बन्ध इतियावत्, तां संज्ञासिद्धि 'प्राप्य' आश्रित्य, किम्?-विहे गच्छन्तीति विहङ्गमा भवन्ति, के?-पक्षा येषां सन्ति ते पक्षिणः, 'सर्वे' समस्ता हंसादय, पुद्गलादीनां विहङ्गमत्वे सत्यप्यमीषामेव लोके प्रतीतत्वात्, इत्थमनेकप्रकारं विहङ्गममभिधाय प्रकृतोपयोगमुपदर्शयति'इह' सूत्रे, पुनः-शब्दोऽवधारणे, इहैव नान्यत्र 'अधिकारः' प्रस्तावः प्रयोजनम्, कैरित्याह-विहायोगमनैः' आकाशगमनैः 'भ्रमरैः' षट्पदैरिति गाथार्थः॥

**नि.[१२४]** दानेति दत्तगिण्हण भत्ते सेव फासुगेण्हणया।
एसणतिगंमि निरया उवसंहारस्स सुद्धि इमा॥

**वृ.** 'दानेति' सूत्रे दानग्रहणं दत्तग्रहणप्रतिपादनार्थम्, दत्तमेव गृह्यन्ति, नादत्तम्, 'भक्त' इति भक्तग्रहणं 'भज सेवायाम्' इत्यस्य निष्ठान्तस्य भवति, अर्थश्चास्य प्रासुकग्रहणं, प्रासुकम्-आधाकर्मादिरहितं गृह्यन्ति, नेतरदिति, एसण त्ति एषणाग्रहणम्, 'एषणात्रितये' गवेषणादि-लक्षणे 'निरताः' सक्ताः, उपसंहारस्य-उपनयस्य शुद्धिः 'इयं' वक्ष्यमाणलक्षणेति गाथार्थः॥

**नि.[१२५]** अवि भमरमहुयरिगणा अविदिन्नं आवियंति कुसुमरसं।
समणा पुण भगवंतो नादिन्नं भोत्तुमिच्छंति॥

**वृ.** अपि भ्रमरमधुकरीगणा, मधुकरीग्रहणमिहापि स्त्रीसंग्रहार्थं, जातिसंग्रहार्थमिति चान्ये, अविदत्तं सन्तं किम्?-आपिबन्ति 'कुसुमरसं' कुसुमासवम्, श्रमणाः पुनर्भगवन्तो नादत्तं भोक्तु मिच्छन्तीति विशेष इति गाथार्थः॥ साम्प्रतं सूत्रेणैवोपसंहारविशुद्धिरुच्यते-कश्चिदाह-'दाणभत्तेसणे रया' इत्युक्तम्, यत एवमत एव लोको भक्त्याकृष्टमानसस्तेभ्यः प्रयच्छ-त्याधा-कर्मादि, अस्य ग्रहणे सत्त्वोपरोधः, अग्रहणे स्ववृत्त्यलाभ इति, अत्रोच्यते-

*मू.(४)* *वयं च वित्तिं लब्भामो, न य कोइ उवहम्मइ।*
*अहागडेसु रीयंते, पुप्फेसु भमरा जहा॥*

**वृ.** वयं च वृत्तिं 'लप्स्यामः' प्राप्स्यामः तथा यथा न कश्चिदुपहन्यते, वर्तमानैष्यत्कालोपन्यास-स्त्रैकालिकन्यायप्रदर्शनार्थः, तथा चैते साधवः सर्वकालमेव 'यथाकृतेषु' आत्मार्थमभि-निर्वर्तितेष्वाहारादिषु 'रीयन्ते' गच्छन्ति, वर्त्तन्ते इत्यर्थः, 'पुष्पेषु भ्रमरा यथा' इति, एतश्च पूर्व भावितमेवेति सूत्रार्थः॥ यतश्चैवमतो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.(५) *महुगारसमा बुद्धा, जे भवंति अनिस्सिया।*
*नानापिंडरया दंता, तेन वुच्चंति साहुणो॥ तिबेमि*

**वृ.** 'मधुकरसमा' भ्रमरतुल्याः बुध्यन्ते स्म वृद्धा-अधिगततत्त्वा इत्यर्थः, क एवंभूता - इत्यत आह-ये भवन्ति भ्रमन्ति वा 'अनिश्रिताः' कुलादिष्वप्रतिबद्धा इत्यर्थः, अत्राह-

**नि.[१२६]** अस्संजएहिं भमरेहिं जइ समा संजया खलु भवंति।
एवं(यं) उवमं किच्चा नूनं अस्संजया समणा॥

**वृ.** 'असंयतैः' कुतश्चिदप्ययनिवृत्तैः, 'भ्रमरैः' षट्पदैः यदि 'समाः' तुल्याः 'संयताः' साधवः, खल्विति समा एव भवन्ति, ततश्चासंज्ञिनोऽपि ते, अत एवैनामित्थंप्रकारामुपमां कृत्वा इदमापद्यते-नूनमसंयताः श्रमणा इति गाथार्थः॥ एवमुक्ते सत्याहाचार्यः-एतच्चायुक्तं, सूत्रोक्त-विशेषणतिरस्कृतत्वात्, तथा च बुद्धग्रहणादसंज्ञिनो व्यवच्छेदः, अनिश्रितग्रहणाच्चासंय-तत्वस्येति। निर्युक्तिकारस्त्वाह-

**नि.[१२७]** उवमा खलु एस कया पुव्वुत्ता देसलक्खणोवणया।
अनिययवित्तिनिमित्तं अहिंसअनुपालणट्ठाए॥

**वृ**-व्याख्या-उपमा खलु 'एषा' मधुकरसमेत्वादिरूपा कृता 'पूर्वोक्तात्' पूर्वोक्तेन 'देश-लक्षणोपनयाद' देशलक्षणोपनयेन, यथा चन्द्रमुखी कन्येति, तृतीयार्थे चेह पञ्चमी, इयं चानियत-वृत्तिनिमित्तं कृता, अहिंसानुपालनार्थम्, इदं च भावय(यिष्य)त्येवेति गाथार्थः॥

**नि.[१२८]** जह दुमगणा उ तह नगरजणवया पयणपायणसहावा।
जह भमरा तह मुणिणो नवरि अदत्तं न भुंजंति॥

**वृ.**यथा'द्रुमगणाः' वृक्षसङ्घाताः स्वभावत एव पुष्पफलनस्वभावाः तथैव 'नगरजनपदा' नगरादिलोकाः स्वयमेव पचनपाचनस्वभावा वर्तन्ते, यथा भ्रमरा इति, भावार्थं वक्ष्यति, तथा मुनयो नवरम्-एतावान्विशेषः-अदत्तं स्वामिभिर्न भुञ्जन्त इति गाथार्थः॥ अमुमेवार्थं स्पष्टयति-

**नि.[१२९]** कुसुमे सहावफुल्ले आहारंति भमरा जह तहा उ।
भत्तं सहावसिद्धं समणसुविहिया गवेसंति॥

**वृ.**'कुसुमे' पुष्पे 'स्वभावफुल्ले' प्रकृतिविकसिते 'आहारयन्ति' कुसुमरसं पिबन्ति 'भ्रमरा' मधुकरा 'यथा' येन प्रकारेण कुसुमपीडामनुत्पादयन्तः 'तथा' तेनैव प्रकारेण 'भक्तम्' ओदनादि 'स्वभावसिद्धम्' आत्मार्थं कृतम् उद्गमादिदोषरहितम् इत्यर्थः, श्रमणाश्च ते सुविहिताश्च श्रमणसुविहिताः-शोभनानुष्ठानवन्त इत्यर्थः 'गवेषयन्ति' अन्वेषयन्तीति गाथार्थः॥ साम्प्रतं पूर्वोक्तो यो दोषः मधुकरसमा इत्यत्र तत्परिजिहीर्षयैव यावतोपसंहारः क्रियते तदुपदर्शयन्नाह-

**नि.[१३०]** उवसंहारो भमरा जह तह समणावि अवहजीवित्ति।
दंतत्ति पुण पयंमी नायव्वं वक्कसेसमिणं॥

**वृ.**'उपसंहार' उपनयः, भ्रमरा यथा अवधजीविनः तथा 'श्रमणा अपि' साधवोऽप्येतावतै-वांशेनेति गाथादलार्थः॥ इतश्च भ्रमरसाधूनां नानात्वमवसेयं, यत आह सूत्रकारः 'नानापिण्डरया दन्ता' इति नाना-अनेकप्रकारोऽभिग्रहविशेषात्प्रतिगृहमल्पाल्पग्रहणाच्च पिण्डआहारपिण्डः,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाना चासौ पिडश्च नानापिण्डः, अन्तप्रान्तादिर्वा, तस्मिन् रता-अनुद्वेगवन्तः, 'दान्ता' इन्द्रिय-दमनेन, अनयोश्च स्वरूपमधस्तपसि प्रतिपादितमेव, अत्र चोपन्यस्तगाथाचरम-दलस्यावसरः 'दान्ता' इति पुनः पदे सौत्रे, किम् ? -ज्ञातव्यो वाक्यशेषोऽयमिति गाथार्थः ॥

किंविशिष्टो वाक्यशेषः ?, दान्ता ईर्यादिसमिताश्च। तथा चाह-

नि.[१३१] जह इत्थ चेव इरियाइएसु सव्वंमि दिक्खियपयारे।
तसथावरभूयहियं जयंति सब्भावियं साहू॥

वृ. यथा 'अत्रैव' अधिकृताध्ययने भ्रमरोपमयैषणासमितौ यतन्ते, तथा ईर्यादिष्वपि तथा सर्वस्मिन् 'दीक्षितप्रचारे' साध्वाचरितव्य इत्यर्थः, किम् ? -त्रसस्थावरभूतहितं यतन्ते 'साद्भा-विकं' पारमार्थिकं साधव इति गाथार्थः ॥

अन्ये पुनरिदं गाथादलं निगमने व्याख्यानयन्ति, न च तदतिचारु, यत आह-

नि.[१३२] उवसंहारविसुद्धि एस समत्ता उ निगमनं तेनं।
वुच्चंति साहुणोत्ति (य) जेणं ते महुयरसमाणा॥

वृ. उपसंहारविशुद्धिरेषा समाप्ता तु, अधुना निगमनावसरः, तच्च सौत्रमुपदर्शयति' निगमन-मिति' द्वारपरामर्शः, तेनोच्यन्ते साधव इति, येन प्रकारेण ते मधुकरसमाना-उक्तन्यायेन भ्रमरतुल्या इति गाथार्थः ॥ निगमनार्थमेव स्पष्टयति

नि.[१३३] तम्हा दयाइगुणसुट्ठिएहिं भमरोव्व अवहवित्तीहिं।
साहूहिं साहिउ त्ति उकिट्ठं मंगलं धम्मो ॥

वृ. तस्माद्दयादिगुणसुस्थितैः, आदिशब्दात् सत्यादिपरिग्रहः, भ्रमरइवावधवृत्तिभिः, कैः ?-साधुभिः 'साधितो' निष्पादितः, 'उत्कृष्टं मङ्गलम्' प्रधानं मङ्गलं 'धर्मः' प्राग्निरूपितशब्दार्थ इति गाथार्थः ॥ इदानीं निगमनविशुद्धिमभिधातुकाम आह-

नि.[१३४] निगमनसुद्धी तित्थंतरावि धम्मत्थमुज्जया विहरे।
भण्णइ कायाणं ते जयणं न मुणंति न करेंति॥

वृ. निगमनशुद्धिः प्रतिपाद्यते, अत्राह-'तीर्थान्तरीया अपि' चरकपरिव्राजकादयः, किम् ?-'धर्मार्थं' धर्माय 'उद्यता' उद्युक्ता विहरन्ति, अतस्तेऽपि साधवः एवेत्यभिप्रायः। भण्यतेऽत्र प्रतिवचनम्, 'कायानां' पृथिव्यादीनां 'ते' चरकादयः, किम् ?-यतनां-प्रयत्नकरणलक्षणां 'न मन्यन्ते(मुणन्ति)' न जानन्ति न मन्वते वा तथाविधागमाश्रवणात्, न कुर्वन्ति, परिज्ञानाभावात्, भावितमेवेदमधस्तादिति गाथार्थः ॥ किंच-

नि.[१३५] न य उग्गमाइसुद्धं भुंजंती महुयरा वऽनुवरोही।
नेव य तिगुत्तिगुत्ता जह साहू निच्चकालंपि॥

वृ. न चोद्गमादिशुद्धं भुञ्जते, आदिशब्दादुत्पादनादिपरिग्रहः, 'मधुकरा इव' भ्रमरा इव सत्त्वानामनुपरोधिनः सन्तो, नैव च त्रिगुप्तिगुप्ताः, यथा साधवो नित्यकालमपि, एतदुक्तं भवति-यथा साधवो नित्यकालं त्रिगुप्तिगुप्ता एवं ते न कदाचिदपि, तत्परिज्ञानशून्यत्वात्, तस्मान्नैते साधव इति गाथार्थः ॥ साधव एव तु साधवः, कथम् ?, यतः-

नि.[१३६] कायं वायं च मनं च इंदियाइं च पंच दमयंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धारेंति बंभचेर संजमयंति कसाए य ॥

वृ. कायं वाचं मनश्चेन्द्रियाणि च पञ्च दमयन्ति, तत्र कायेन सुसमाहितपाणिपादास्तिष्ठन्ति गच्छन्ति वा, वाचा निष्प्रयोजनं न ब्रुवते प्रयोजनेऽप्यालोच्य सत्त्वानुपरोधेन, मनसा अकुशलमनोनिरोधं कुशलमनउदीरणं च कुर्वन्ति, इन्द्रियाणि पञ्च दमयन्ति इष्टानिष्टविषयेषु रागद्वेषाकरणेन, पञ्चेति साङ्ख्यपरिकल्पितैकादशेन्द्रियव्यच्छेदार्थम्, तथा च वाक्पाणि-पादपायूपस्थमनांसीन्द्रियाणि तेषामिति, धारयन्ति ब्रह्मचर्यं, सकलगुप्तिपरिपालनात्, तथा संयमयन्ति कषायाँश्च, अनुदयेनोदयविफलीकरणेन चेति गाथार्थः ॥

नि.[१३७] जं च तवे उज्जुत्ता तेनेसिं साहुलक्खणं पुन्नं।
तो साहुणो त्ति भण्णति साहवो निगमनं चेयं ॥

वृ. यच्च 'तपसि' प्राग्वर्णितस्वरूपे, किम्?-'उद्युक्ता' उद्यताः तेन कारणेनैषां साधुलक्षणं 'पूर्णम्' अविकलम्, कथम्?-अनेन प्रकारेण साधयन्त्यपवर्गमिति साधवः, यत-श्चैवं ततः साधव एव भण्यन्ते साधवो, न चरकादय इति, निगमनं चैतदिति गाथार्थः ॥ इत्थमुक्तं दशावयवम्, प्रयोगं त्वेवं वृद्धा दर्शयन्तिअहिंसादिलक्षणधर्मसाधकाः साधव एव, स्थावरजङ्गमभूतोपराध-परिहारित्वात्, तदन्यैवंविधपुरुषवत्, विपक्षो दिगम्बरभिक्षुभौतादिवत्, इह ये स्थावरजङ्गम-भूतौपरोधपरिहारिणस्ते उभयप्रसिद्धैवंविधपुरुषवदहिंसादिलक्षणधर्मसाधका दृष्टाः, तथा च साधवः स्थावरजङ्गमभूतोपरोधपरिहारित्वात्तेऽहिंसादिलक्षणधर्मसाधकाः साधव एवेति निगम-नम्, पक्षादिशुद्धयस्तु निदर्शिता एवेति न प्रतन्यन्ते॥ एवमर्थाधिकारद्वयवशात् पञ्चावयवदशाव-यावाभ्यां वाक्याभ्यां व्याख्यातमध्ययनमिदम्, इदानीं भूयोऽपि भङ्ग्यन्तरभाजा दशावयवेनैव वाक्येन सर्वमध्ययनं व्याचष्टे निर्युक्तिकारः-

नि.[१३८] ते उ इति विभत्ती विवक्खपडिसेहो।
दिट्ठंतो आसंका तप्पडिसेहो निगमनं च ॥

वृ. ते इति अवयवाः, तुः पुनःशब्दार्थः, तु पुनरमी प्रतिज्ञादयः-तत्र प्रतिज्ञानं प्रतिज्ञा-वक्ष्यमाणस्वरूपेत्येकोऽवयवः, तथा विभजनं विभक्तिः-तस्या विषयविभागकथनमिति द्वितीयः, तथा हिनोतिगमयति जिज्ञासितधर्मविशिष्टानर्थानिति हेतुस्तृतीयः, तथा विभजनं विभक्तिरिति पूर्ववच्चतुर्थः, तथा विसदृशः पक्षो विपक्षः साध्यादिविपर्यय इति पञ्चमः, तथा प्रतिषेधनं प्रतिषेधः विपक्षस्येति गम्यते इत्ययं षष्ठः, तथा दृष्टमर्थमन्तं नयतीति दृष्टान्त इति सप्तमः, तथा आशङ्काप्रतिषेध इति नवमः, तथा निश्चितं गमनं निगमनं निश्चितोऽवसाय इति दशमः, चशब्द उक्तमुच्चयार्थ इति गाथासमासार्थः ॥ व्यासार्थं तु प्रत्यवयवं वक्ष्यति ग्रन्थकार एव, तथा चाह-

नि.[१३९] धम्मो मंगलमुक्किट्ठंति पइन्ना अत्तवयणनिद्देसो।
सो य इहेव जिनमए नन्नत्थ पइन्नपविभत्ति ॥

वृ. 'धर्मो मङ्गलमुत्कृष्ट' मिति पूर्ववत् इयं प्रतिज्ञा, आह-केयं प्रतिज्ञेति?, उच्यते, 'आप्तवचन-निर्देश' इति तत्राप्तः-अप्रतारकः, अप्रतारकश्चाशेषरागादिक्षयाद्भवति, उक्तं च-

"आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः।
वीतरागोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसंभवात् ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य वचनम् आप्तवचनं तस्य निर्देश आप्तवचननिर्देशः, आह-अयमागम इति, उच्यते, विप्रति-पन्नसंप्रतिपत्तिनिबन्धनत्वेनैष एव प्रतिज्ञेति न दोषः, पाठान्तरं वा साध्यवचननिर्देश इति, साध्यत इति साध्यम् उच्यत इति वचनम्-अर्थः यस्मात्स एवोच्यते, साध्यं च तद्वचनं च साध्यवचनं साध्यार्थ इत्यर्थः, तस्य निर्देशः प्रतिज्ञेति, उक्तः प्रथमोऽवयवः, अधुना द्वितीय उच्यते-स च-अधिकृतो धर्मः किम् ?-'इहैव जिनमते' अस्मिन्नैव मौनीन्द्रे प्रवचने 'नान्यत्र' कपिलादिमतेषु, तथाहि-प्रत्यक्षत एवोपलभ्यन्ते वस्त्राद्यपूतप्रभूतोदकाद्युपभोगेषु परिवाट्प्रभृतयः प्राण्युपमर्दं कुर्वाणाः, ततश्च कुतस्तेषु धर्मः ?, इत्याद्यत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तरभयाद् भावितत्वाच्चेति। प्रतिज्ञा-प्रविभक्तिरियं-प्रतिज्ञाविषयविभागकथनमिति गाथार्थः ॥

उक्तो द्वितीयोऽवयवः, अधुना तृतीय उच्यते-तत्र

**नि.[१४०]** सूरपूइओत्ति हेऊ धम्मट्ठाणे ठिया उ जं परमे।
हेउविभत्ति निरुवहि जियाण अवहेण य जियंति॥

**वृ.** सुरा-देवास्तैः पूजितः सुरपूजितः, सुरग्रहणमिन्द्राद्युपलक्षणम्, इतिशब्द उपप्रदर्शने, कोऽयम् ?-'हेतुः' पूर्ववत्, हेत्वर्थसूचकं चेदं वाक्यम्, हेतुस्तु सुरेन्द्रादिपूजितत्वादिति द्रष्टव्यः, अस्यैव सिद्धतां दर्शयति-'धर्मः' पूर्ववत् तिष्ठत्यस्मिन्निति स्थानम्, धर्मश्चासौ स्थानं च धर्मस्थानम्, स्थानम्-आलयः, तस्मिन् स्थिताः, तुरयमेवकारार्थः, स चावधारणे, अयं चोपरिष्टात् क्रियया सह योक्ष्यते, 'यद्' यस्मात्, किंभूते धर्मस्थाने ?-'परमे' प्रधाने, किम् ?-सुरेन्द्रादिभिः पूज्यन्त एवेति वाक्यशेषः, इति तृतीयोऽवयवः, अधुना चतुर्थ उच्यते-हेतुविभक्तिरियम-हेतु-विषय-विभागकथनम्, अथ क एते धर्मस्थाने स्थिता इत्यत्राह-'निरुपधयः' उपधिः छद्म मायेत्यन-र्थान्तरम्, अयं च क्रोधाद्युपलक्षणम्, ततश्च निर्गता उपध्यादयः सर्व एव कषाया येभ्यस्ते निरुपधयो-निष्कषायाः, 'जीवानां' पृथ्वीकायादीनाम् 'अवधेन' अपीडया, चशब्दात्तपश्चरणा-दिना च हेतुभूतेन 'जीवन्ति' प्राणान् धारयन्ति ये त एव धर्मस्थाने स्थिताः, नान्य इति गाथार्थः ॥

उक्त-श्चतुर्थोऽवयवः, अधुना पञ्चममभिधित्सुराह-

**नि.[१४१]** जिनवयणपदुट्ठेवि हु ससुराईए अधममरुइणोऽवि।
मंगलबुद्धीइ जनो पणमइ आईदुयविवक्खो॥

**वृ.** इह विपक्षः पञ्चम इत्युक्तम्, स चायम्-प्रतिज्ञाविभक्त्योरिति, जिनाःतीर्थकराः तेषां वचनम्आगमलक्षणं तस्मिन् प्रद्विष्टा-अप्रीता इति समासस्तान्, अपिशब्दादप्रद्विष्टानपि, हु इत्ययं निपातोऽवधारणार्थः अस्थानप्रयुक्तश्च, स्थानं तु दर्शयिष्यामः, 'श्वसुरादीन्' श्वसुरो-लोकप्रसिद्धः, आदिशब्दात्पितृपत्रादिपरिग्रहः, न विद्यते धर्मे रुचिर्येषां तेऽधर्मरुचयस्तान्, अपिशब्दाद्धर्म-रुचीनपि, किम् ?- 'मङ्गलबुद्ध्या' मङ्गलप्रधानया धिया, मङ्गलबुद्ध्यैव नामङ्गल-बुद्ध्येत्येवम-वधारणस्थानम्, किम् ?-'जनो' लोकः, प्रकर्षेण नमति प्रणमति, 'आद्यद्वयविपक्ष' इति अत्राद्यद्वयं प्रतिज्ञा तच्छुद्धिश्च तस्य विपक्षः साध्यादिविपर्यय इति आद्यद्वयविपक्षः, तत्राधर्मरुचीनपि मङ्गलबुद्ध्या जनः प्रणमतीत्यनेन प्रतिज्ञाविपक्षमाह, तेषामधर्माव्यतिरेकात्, जिनवचन-प्रद्विष्टानपीत्यमेन तु तच्छुद्धेः, तत्रापि हेतुप्रयोगप्रवृत्त्या धर्मसिद्धेरिति गाथार्थः ॥

**नि.[१४२]** बिइयदुयस्स विवक्खो सुरेहिं पूज्जंति जत्रजाईवि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धाईवि सुरणया वुच्चन्ते नायपडिवक्खो ॥

**वृ.** द्वयोः पूरणं द्वितीयं द्वितीयं च तद्वयं च द्वितीयद्वयं-हेतुस्तच्छुद्धिश्च, इदं च प्रागुक्तद्वयापेक्षया द्वितीयामुच्यते, तस्यायं विपक्षः-इह सुरैः पूज्यन्ते यज्ञयाजिनोऽपीति, इयमत्र भावना-यज्ञयाजिनो हि मङ्गलरूपा न भवन्त्यथ च सुरैः पूज्यन्ते ततश्च सुरपूजितत्वमकारणमिति, एष हेतुविपक्षः, तथा अजितेन्द्रियाः सोपधयश्च यतस्ते वर्तन्ते अतोऽनेनैव ग्रन्थेन 'धर्मस्थाने स्थिताः परम' इत्यादिकाया हेतुविभक्तेरपि विपक्ष उक्तो वेदितव्य इति। उदाहरणविपक्षमधिकृत्याह-बुद्धादयोऽप्यादिशब्दात्कापिलादिपरिग्रहः, ते किम्?-'सुरनता' देवपूजिता 'उच्यते' भण्यन्ते तच्छासनप्रतिपन्नैरिति ज्ञातप्रतिपक्ष इति गाथार्थः ॥

आह-ननु दृष्टान्तमुपरिष्टाद्वक्ष्यति, एवं ततश्च तत्स्वरूप उक्ते तत्रैव विपक्षस्तत्प्रतिषेधश्च वक्तुं युक्तः तत्किमर्थमिह विपक्षः तत्प्रतिषेधश्चाभिधीयते?, उच्यते, विपक्षसाम्यादधिकृत एव विपक्षद्वारे लाघवार्थमभिधीयते, अन्यथेदमपि पृथग्द्वारं स्यात्, तथैव तत्प्रतिषेधोऽपि द्वारान्तरं प्राप्नोति, तथा च सति ग्रन्थगौरवं जायते, तस्माल्लाघवार्थमत्रैवोच्यत इत्यदोषः।

आह-''दिट्ठंतो आसंका तप्पडिसेहो'' त्ति वचनात् उत्तरत्र दृष्टान्तमभिधायपुनराशङ्कां तत्प्रतिषेधं च वक्ष्यत्येव, तदाशङ्का च तद्विपक्ष एव, तत् किमर्थमिह पुनर्विपक्षप्रतिषेधावभिधीयते?, उच्यते, अनन्तरपरम्पराभेदेन दृष्टान्तद्वैविध्यख्यापनार्थम्, यः खल्वनन्तरमुक्तोऽपि परोक्षत्वादागमगम्यत्वाद्दार्ष्टान्तिकार्थसाधनायालं न भवति तत्प्रसिद्धये चाध्यक्षसिद्धो योऽन्य उच्यते स परम्परादृष्टान्तः, तथा च तीर्थकरांस्तथा साधूंश्च द्वावपि भिन्नावेवोत्तरत्र दृष्टान्तावभिधास्येते, तत्र तीर्थकृल्लक्षणं दृष्टान्तमङ्गीकृत्येह विपक्षप्रतिषेधावुक्तौ, साधूंस्त्वधिकृत्य तत्रैवाशङ्कातत्प्रतिषेधौ दर्शयिष्यते इत्यादोषः। स्यान्मतं-प्रागुक्तेन विधना लाघवार्थमनुक्ते एव दृष्टान्ते उच्यतां कामम्, इहैव दृष्टान्तविपक्षस्तत्प्रतिषेधश्च, स एव दृष्टान्तः किमित्युत्तरत्रोपदिश्यते ? येन हेतविभक्तेरनन्तरमिहैव न भण्यते, तथाहि-अत्र दृष्टान्ते भण्यमाने प्रतिज्ञादीनामिव द्विरूपस्यापि दृष्टान्तस्यार्हत्साधुलक्षणस्य एतावेव विपक्षतत्प्रतिषेधावुपपद्येते, ततश्च साधुलक्षणस्य दृष्टान्तस्याशङ्कातत्प्रतिषेधावुत्तरत्र न पृथग् वक्तव्यौ भवतः, तथा च सति ग्रन्थलाघवं जायते, तथा प्रतिज्ञाहेतूदाहरणरूपाः सविशुद्धकास्त्रयोऽप्यवयवाः क्रमेणोक्ता भवन्तीति, अत्रोच्यते, इहाभिधीयमाने दृष्टान्तस्येव प्रतिज्ञादीनमपि प्रत्येकमाशङ्कातत्प्रतिषेधौ वक्तव्यौ स्तः, तथा च सत्यवयवबहुत्वं, दृष्टान्तस्य वा प्रतिज्ञादीनामिव विपक्षतत्प्रतिषेधाभ्यां पृथगाशङ्कातत्प्रतिषेधौ न वक्तव्यौ स्याताम्, एवं सति दशावयवा न प्राप्नुवन्ति, दशावयवं चेदं वाक्यं भङ्गन्तरेण प्रतिपिपादयिषितम्, अस्यापि न्यायस्य प्रदर्शनार्थम्, अत एव यदुक्तं 'साधुलक्षणदृष्टान्त-स्याशङ्कातत्प्रतिषेधावुत्तरत्र न पृथग् वक्तव्यौ स्याता' मित्यादि तदपाकृतं वेदितव्यम्, इत्यलं प्रसङ्गेन। एवं प्रतिज्ञादीनां प्रत्येकं विपक्षोऽभिहितः, अधुनाऽयमेव प्रतिज्ञादिविपक्षः पञ्चमोऽवयवो वर्तत इत्येदर्शयन्निदमाह-

नि.[१४३] एवं तु अवयवाणं चउण्ह पडिवक्खु पंचमोऽवयवो।
एत्तो छट्ठोऽवयवो विवक्खपडिसेह तं वोच्छं ॥

**वृ.** 'एवम्' इत्ययम्, एव(वं)कार उपप्रदर्शने, तुरवधारणे, अयमेव 'अवयवानां' प्रमाणाङ्ग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षणानां 'चतुर्णां' प्रतिज्ञादीनां 'प्रतिपक्षो' विपक्षः, पञ्चमोऽवयव इति, आह-दृष्टान्तस्याप्यत्र विपक्ष उक्त एव, तत्किमर्थं चतुर्णामित्युक्तम्?, उच्यते, हेतोः सपक्षविपक्षाभ्यामनुवृत्ति-व्यावृत्तिरूपत्वेन दृष्टान्तधर्मत्वात्, तद्विपक्ष एव चास्यान्तर्भावाददोष इति। उक्तः पञ्चमोऽवयवः षष्ठ उच्ये, तथा चाह-'इत' उत्तरत्र 'षष्ठोऽवयवो' विपक्षप्रतिषेधस्तं 'वक्ष्ये' अभिधास्य इति गाथार्थः॥ इत्थं सामान्येनाभिधायेदानीमाद्यद्वयविपक्षप्रतिषेधमभिधातुकाम आह-

**नि.[१४४]** सायं संमत्त पुमं हासं रइ आउनामगोयसुहं।
धम्मफलं आइदुगे विवक्खपडिसेह मो एसो॥

**वृ.**'सायं'ति सातवेदनीयं कर्म 'संमत्तं'ति सम्यक्त्वं सम्यग्भावः सम्यक्तमोहनीयं कर्मैव, 'पुमं' ति पुंवेदमोहनीयं 'हासं'ति हस्यतेऽनेनेति हासः तद्भावो हास्यं-हास्यमोहनीयम्, रम्यतेऽति रतिः-क्रीडाहेतुः रतिमोहनीयं कर्मैव, 'आउनामगोयसुहं'ति अत्र शुभशब्दः प्रत्येक-मभिसंबध्यते अन्ते वचनात्, ततश्च आयुः शुभं नाम शुभं गोत्रं शुभम्, तत्रायुः शुभं तीर्थकरादि-सम्बन्धि नामगोत्रे अपि कर्मणी शुभे तेषामेव भवतः, तथाहि-यशोनामादि शुभं तीर्थकरादीनामेव भवति, तथोच्चैर्गोत्रं तदपि शुभं तेषामेवेति, 'धर्मफल'मिति धर्मस्य फलम् धर्मफलं, धर्मेण वा फलं धर्मफलमं, एतद् अहिंसादेर्जिनोक्तस्यैव धर्मस्य फलम्, अहिंसादिना जिनोक्तेनैव वा धर्मेण फलमवाप्यते, सर्वमेव चैतत्सुखहेतुत्वाद्धितम्, अतः स एव धर्मो मङ्गलं न श्वसुरादयः, तथाहि-मङ्ग्यते हितमनेनेति मङ्गलम्, तच्च यथोक्तधर्मेणैव मङ्ग्यते नान्येन, तस्मादसावेव मङ्गलं न जिनवचनबाह्याः श्वसुरादय इति स्थितम्।

आह-'मङ्गलबुद्धयैव जनः प्रणमती'त्युक्तं तत्कथम्? इति, उच्यते, मङ्गलबुद्धयापि गोपा-लाङ्गनादिर्मोहतिमिरोपप्लुतबुद्धिलोचनो जनः प्रणमन्नपि न मङ्गलत्वनिश्चायायालम्, तथाहि न तैमिरिकद्विचन्द्रोपदर्शनं सचेतसां चक्षुष्मतां द्विचन्द्राकारायाः प्रतीतेः प्रत्ययतां प्रतिपद्यते, अत-द्रुप एव तद्रुपाध्यारोपद्वारेण तत्प्रवृत्तेरिति। 'आइदुगं'ति आद्यद्वयं प्रागुक्तं तस्मिन् आद्यद्वयविषये, विपक्षप्रतिषधः, 'मो' इति निपातो वाक्यालङ्कारार्थः 'एष' इति यथा वर्णित इति गाथार्थः॥

इत्थमाद्यद्वयविपक्षप्रतिषेधः प्रतिपादितः सम्प्रति हेतुतच्छुद्धयोर्विपक्षप्रतिषेध-प्रतिपादयिषयेदमाह-

**नि.[१४५]** अजिइंदिय सोवहिया वहगा जइ तेऽवि नाम पुज्जंति।
अग्गीवि होज्ज सीओ हेउभित्तीण पडिसेहो॥

**वृ.**न जितानी श्रोत्रादीनीन्द्रियाणि यैस्ते तथोच्यन्ते उपधिश्छद्म मायेत्येनर्थान्तरम्, उपधिना सह वर्तन्त इति सोपधयो-मायाविनः परव्यंसका इतियावत् अथवा उपदधातीत्युपधिःवस्त्रा-द्यनेकरूपः परिग्रहः, तेन सह वर्त्तन्ते ये ते तथाविधा महापरिग्रहा इत्यर्थः, वधन्तीति वधकाः-प्राण्युपमर्दकर्तारः, 'जइ तेऽवि नाम पुज्जंति'त्ति यदीति पराभ्युपगमसंसूचकः, त इति याज्ञिकाः, अपिः संभावने, नाम इति निपातो वाक्यालङ्कारार्थः, येऽजितेन्द्रियादिदोषदुष्टा यज्ञयाजिनो वर्त्तन्ते, यदि ते नाम पूज्यन्ते तर्ह्यग्निरपि भवेच्छीतः, न च कदाचिदप्यसौ शीतो भवति, तथा वियदिन्दी-वरस्रजोऽपि वान्ध्येयोरःस्थलशोभामादधीरन्, न चैतद् भवति, यथैवमादिरत्यन्ताभाव-स्तथेदमपीति मन्यते, अथापि कालदौर्गुण्येन कथञ्चिदविवेकिनाजनेन पूज्यन्ते तथापि तेषां न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गलत्वसंप्रसिद्धिः, अप्रेक्षावतामतद्रूपेऽपि वस्तूनि तद्रूपाध्यारोपेण प्रवृत्तेः, तथाहि-अकलङ्क-धियामेव प्रवृत्तिर्वस्तुनस्तद्वत्तां गमयति, अतथाभूते वस्तुनि तद्बुद्धया तेषामप्रवृत्तेः, सुविशुद्धबुद्धयश्च दैत्यामरेन्द्रादयः, ते चाहिंसादिलक्षणं धर्ममेव पूजयन्ति न यज्ञयाजिनः तस्माद्दैत्यामरेन्द्रादि-पूजितत्वाद्धर्म एवोत्कृष्टं मगलं न याज्ञिका इति स्थितम्, 'हेउविभत्तीण' -त्ति एष हेतुतद्विभक्तयोः 'पडिसेहो' त्ति विपक्षप्रतिषेधः, विपक्षशब्द इहानुक्तोऽपि प्रकरणा-ज्ज्ञातव्य इति गाथार्थः ॥ एवकहेतुतच्छुद्धयोर्विपक्षप्रतिषेधो दर्शितः, साम्प्रतं दृष्टान्त-विपक्षप्रतिषेधं दर्शयन्नाह-

**नि.[१४६]** बुद्धाई उवयारे पूयाठाणं जिना उ सब्भावं।
दिट्ठंते पडिसेहो छट्ठो एसो एवयवो उ॥

**वृ.** 'बुद्धादयः' आदिशब्दात्कपिलादिपरिग्रहः, उपचारइति 'सुपां सुपो भवन्ती' ति न्यायादुप-चारेण किञ्चिदतीन्द्रियं कथयन्तीतिकृत्वा न वस्तुस्थित्या पूजायाः स्थानं पूजास्थानम्, जिनास्तु 'सद्भावं' परमार्थमधिकृत्येति वाक्येशषः सर्वज्ञत्वाद्यसाधारणगुणयुक्तत्वादिति भावना, 'दृष्टान्त-प्रतिषेध' इति विपक्षशब्दलोपाद् दृष्टान्तविपक्षप्रतिषेधः, किम्?-षष्ठ एषोऽवयवः, तुर्विशेष-णार्थः, किं विशिनष्टि?-सर्वोऽप्ययमनन्तरोदितः प्रतिज्ञादिविपक्षप्रतिषेधः पञ्चप्रकारोऽप्येक एवेति गाथार्थः ॥ षष्ठमवयवमभिधायेदानीं सप्तं दृष्टान्तनामानमभिधातुकाम आह-

**नि.[१४७]** अरिहंत मग्गगामी दिट्ठंतो साहुणोऽवि समचित्ता।
पागरएसु गिहीसु एसंते अवहमाणा उ॥

**वृ.** पूजामर्हन्तीत्यर्हन्तः, न रुहन्तीति वा अरुहन्तः, किम्?-दृष्टान्त इति सम्बन्धः, तथा 'मार्गगामिन' इति प्रक्रमात्तदुपदिष्टेन मार्गेण गन्तुं शीलं येषां त एव गृह्यन्ते, के च त इत्यत-आह-'साधवः' साधयन्ति सम्यग्दर्शनादियोगैरपवर्गमिति साधवः, तेऽपि दृष्टान्त इति योगः, किंभूताः?-'समचित्ता' रागद्वेषरहितचित्ता इत्यर्थः, किमिति तेऽपि दृष्टान्त इति?, अहिंसादिगुण-युक्तत्वात्, आह च-'पाकरतेषु' आत्मार्थमेव पाकसक्तेषु 'गृहीषु' अगारिषु 'एषन्ते' गवेषयन्ति पिण्डपातमित्यध्याहारः, किं कुर्वाणा इत्यत आह- 'अवहमाणा उ' न घन्तोऽघ्नन्तः, तुरवधारणार्थः, ततश्चाघ्नन्त एव, आरम्भाकरणेन पीडामकुर्वाणा इत्यर्थः। एवं द्विविधोऽपि दृष्टान्त उक्तः, दृष्टान्त-वाक्यं चेदं, स तु संस्कृत्य कर्त्तव्योऽर्हदादिवदिति गाथार्थः ॥

उक्तः सप्तमोऽवयवः, साम्प्रतमष्टमभिधित्सुराह-

**नि.[१४८]** तत्थ भवे आसंका उद्दिस्स जइवि कीरए पागो।
तेन र विसमं नायं वासतणा तस्स पडिसेहे॥

**वृ.** 'तत्र' तस्मिन् दृष्टान्ते 'भवेदाशङ्का भवत्याक्षेपः, तथा 'उद्दिश्य' अङ्गीकृत्य 'यतीनपि' संयतानपि, अपिशब्दादपत्यादीन्यपि, 'क्रियते' निर्वर्त्यते पाकः, कैः?-गृहिभिरिति गम्यते, ततः किमित्यत आह-तेन कारणेन, र इति निपातः किलशब्दार्थः, 'विषमम्' अतुल्यं 'ज्ञातम्' उदाहरण्, वस्तुतः पाकोपजीवित्येन साधूनामनवद्यवृत्त्यभावदिति, भावितमेवैतत् पूर्वम्, इत्यष्ट-मोऽवयवः, इद्यानीं नवममधिकृत्याह-'वर्षातृणानि तस्य प्रतिषेधे' इति, एतच्च भाष्यकृता प्राक् प्रपञ्चितमेवेति न प्रतन्यत इति गाथार्थः ॥ उक्तो नवमोऽवयवः, साम्प्रतं चरममभिधित्सुराह-

**नि.[१४९]** तम्हा उ सुरनराणं पुज्जत्ता मंगलं सया धम्मो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दसमो एस अवयवो पइन्नहेऊ पुणोवयणं॥

वृ.यस्मादेवं तस्मात् 'सुरनराणां' देवमनुष्याणां पूज्यत इति पूज्यस्तद्भावस्तस्मात् पूज्यत्वात् 'मङ्गलं' प्राग्निरूपितशब्दार्थं 'सदा' सर्वकालं 'धर्मः' प्रागुक्तः, 'दशम एषोऽवयव' इति सङ्ख्याकथनम्, किंविशिष्टोऽयमित्यत आह-'प्रतिज्ञाहेत्वोः पुनर्वचनं' पुनर्हेतुप्रतिज्ञावचनमिति गाथार्थः ॥ उक्तं द्वितीयं दशावयवं, साधनाङ्गता चावयवानां विनेयापेक्षया विशिष्टप्रतिपत्तिजनकत्वेन भावनीयेति। उक्तोऽनुगमः, साम्प्रतं नया उच्यन्ते-ते च नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूतभेदभिन्नाः खल्वोधतः सप्त भवन्ति, स्वरूपं चैतषामध आवश्यक-सामायिकाध्ययने न्यक्षेण प्रदर्शितमेवातो नेह प्रतन्यते, इह पुनः स्थानाशून्यार्थमेते ज्ञानक्रियानयद्वयान्तर्भावद्वारेण समासतः प्रोच्यन्ते-ज्ञाननयः क्रियानयश्च, तत्र ज्ञाननयदर्शनमिदम्-ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चाह-

नि.[१५०] नायंमि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि।
जइयव्वमेव इह जो उवएसो सो नओ नामं॥

वृ. 'णायंमि'त्ति ज्ञाते सम्यक्परिच्छिन्ने 'गिण्हियव्वे'त्ति ग्रहीतव्य उपादेये 'अगिण्हियव्वंमि'त्ति अग्रहीतव्येऽनुपादेये हेय इत्यर्थः, चशब्दः खलूभयोर्ग्रहीतव्याग्रहीतव्योर्ज्ञातत्वानुकर्षणार्थः उपेक्षणीयसमुच्चयार्थो वा, एवकारस्त्ववधारणार्थः, तस्य चैवं व्यवहितः प्रयोगो द्रष्टव्यः-ज्ञात एव ग्रहीतव्ये तथाऽग्रहीतव्ये तथोपेक्षणीये चार्थे तु ज्ञात एव नाज्ञाते, 'अत्थंमि'त्ति अर्थे ऐहिकामुष्मिके, तत्रेहिको ग्रहीतव्यः स्रक्चन्दनाङ्गनादिः अग्रहीतव्यो विषशस्त्रकण्टकादिः उपेक्षणीयः तृणादिः, आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनादिः अग्रहीतव्यो मिथ्यात्वादिः उपेक्षणीयो विवक्षयाऽभ्युदयादिरिति, तस्मिन्नर्थे 'यतितव्यमेवे'त्ति अनुस्वारलोपाद्यतितव्यम्, एवम्-अनेन प्रक्रमेणैहिकामुष्मिकफलप्राप्त्यर्थिना सत्त्वेन प्रवृत्त्यादिलक्षणः प्रयत्नः कार्य इत्यर्थः। इत्थं चैतदङ्गीकर्तव्यम्, सम्यग्ज्ञाने प्रवर्त्तमानस्य फलविसंवाददर्शनात्, तथा चान्यैरप्युक्तम्-

"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता।
मिथ्याज्ञानात्प्रवृत्तस्य, फलप्राप्तेरसंभवात्॥"

तथाऽऽमुष्मिकफलप्राप्त्यर्थिनापि ज्ञात एव यतितव्यम्, तथा चागमोऽप्येवमेव व्यवस्थितः, यत उक्तम्-

"पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए।
अन्नाणी किं काही?, किंवा णाहिति छेयपावगं?॥"

इतश्चैतदेवाङ्गीकर्त्तव्यं यस्मात्तीर्थकरगणधरैरगीतार्थानां केवलानां विहारक्रियाऽपि निषिद्धा, तथा चागमः-

"गीयत्थो य विहारो बीओ गीयत्थमीसिओ चेव।
इत्तो तइयविहारो नाणुन्नाओ जिनवरेंहि॥"

यस्मादन्धेनान्धः समाकृष्यमाणः सम्यक्पन्थानं न प्रतिपद्यत इत्यभिप्रायः। एवं तावत्क्षायोपशमिकं ज्ञानमधिकृत्योक्तं, क्षायिकम(प्य)ङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव विज्ञेयम्, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षां प्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावदपवर्गप्राप्तिः संजायते यावज्जीवाजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्नमिति, तस्माज्ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणमिति स्थितम् 'इति जो उवएसो सो नओ नामं'ति 'इति' एवमुक्तेन न्यायेन य उदपेशो-ज्ञानप्राधान्यख्यापनपरः स नयो नाम-ज्ञाननय इत्यर्थः, अयं च ज्ञानवचनक्रियारूपेऽस्मिन्नध्ययने ज्ञानरूपमेवेदमिच्छति, ज्ञानात्मकत्वादस्य, वचनक्रिये तु तत्कार्यत्वात्तदायत्तत्वान्नेच्छति, गुणभूते चेच्छति इति गाथार्थः ॥ उक्तो ज्ञाननयः, अधुना क्रियानयावसरः, तद्दर्शनं चेदम्-क्रियैव प्रधानं, ऐहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चायमप्युक्तलक्षणामेव स्वपक्षसिद्धये गाथामाह-

नायंमि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि।
जइयव्वमेव इह जो उवएसो सो नओ नामं॥

अस्याः क्रियानयदर्शनानुसारेण व्याख्या-ज्ञाते ग्रहीतव्ये अग्रहीतव्ये चैव अर्थे ऐहिकामुष्मिकफलप्राप्त्यर्थिना यतितव्यमेव, न यस्मात्प्रवृत्त्यादिलक्षणप्रयत्नव्यतिरेकेण ज्ञानवतोऽप्यभिलषितार्थावाप्तिर्दृश्यते, तथा चान्यैरप्युक्तम्-

"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत्॥"

तथाऽऽमुष्मिकफलप्राप्त्यर्थिनाऽपि क्रियैव कर्त्तव्या, तथा च मौनीन्द्रप्रवचनमप्येवमेव व्यवस्थितम्, यत उक्तम्-

"चेइयकुलगणसंघे आयरियाणंच पवयणसुए य।
सव्वेसुवि तेन कयं तवसंजममुज्जमंतेणं॥"

इतश्चैतदेवमङ्गीकर्त्तव्यम्, यस्मात्तीर्थकरगणधरैः क्रियाविकलाना ज्ञानमपि विफलमेवोक्तं, तथा चागमः-

"सुबहुंपि सुयमहीयं किं काही चरणविप्पमुक्कस्स?।
अंधस्स जह पलित्ता दीवसयसहस्सकोडीवि॥१॥"

दृशिक्रियाविकलत्वात्तस्येत्यभिप्रायः। एवं तावत्क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तम्, चारित्रं क्रियेत्यनर्थान्तरम्, क्षायिकमप्यङ्गीकृत्य प्रकृष्टफलसाधकत्वं तस्यैव विज्ञेयम्, यस्मादर्हतोऽपि भगवतः समुत्पन्नकेवलज्ञानस्यापि न तावन्मुक्त्यवाप्तिः संजायते, यस्मा(याव)दखिलकर्मेन्धनानलभूता ह्रस्वपञ्चाक्षरोच्चारणमात्रकालावस्थायिनी सर्वसंवररूपा चारित्रक्रिया नावाप्तेति, तस्मात्क्रियैव प्रधानमैहिकामुष्मिकफलप्राप्ति कारणमिति स्थितम्। 'इति जो उवएसो सो नओ नामं'त्ति 'इति' एवमुक्तेन न्यायेन य उपदेशः किम्?-क्रियाप्राधान्यख्यापनपरः स नयो नाम-क्रियानय इत्यर्थः। अयं च ज्ञानवचनक्रियारूपेऽस्मिन्नध्ययने क्रियारूपमेवेदमिच्छति, तदात्मकत्वादस्य, ज्ञानवचने तु तदर्थमुपादीयमानत्वादप्रधानत्वान्नेच्छति गुणभूते चेच्छतीति गाथार्थः॥ उक्तः क्रियानयः, इत्थं ज्ञाननयाक्रियानयस्वरूपं श्रुत्वाऽविदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह-किमत्र तत्त्वं?, पक्षद्वयेऽपि युक्तिसंभवाद्, आचार्यः पुनराह-अथवा ज्ञानक्रियानयमतं प्रत्येकमभिधायाधुना स्थितपक्षमुपदर्शयन् पुनराह-

नि.[१५१] सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामेत्ता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू॥

**वृ.**'सर्वेषा'मिति मूलनयानामपिशब्दात्तद्भेदानां च द्रव्यास्तिकादीनां 'बहुविधवक्तव्यतां' सामान्यमेव विशेषा एव उभयमेव वाऽनपेक्षमित्यादिरूपाम्, अथवा नामादीनां नयानां कः कं साधुमिच्छतीत्यादिरूपां 'निशम्य' श्रुत्वा तत् 'सर्वनयविशुद्धं' सर्वनयसंमतं वचनं 'यच्चरणगुणस्थितः साधुः' यस्मात्सर्वनया एव भावविषयं निक्षेपमिच्छन्तीति गाथार्थः॥

**नि.[१५२]** दुमपुप्फियनिज्जुत्ती समासओ वण्णिया विभासाए।
जिनचउद्दसपुव्वी वित्थरेण कहयंती से अट्ठं॥

व्याख्यायाध्ययनमिदं प्राप्तं यत्कुशलमिह मया किञ्चित्।
सद्धर्मलाभमखिलं लभतां भव्यो जनस्तेन॥

अध्ययनं-१ समाप्तम्

**मुनिदीपरत्न सागरेण संशोधिता सम्पादिता दशवैकालिकसूत्रे प्रथम अध्ययनस्य भद्रबाहुस्वामि विरचिता निर्युक्ति एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता**

## अध्ययनं-२ श्रामण्यपूर्वं

**वृ**-व्याख्यातं द्रुमपुष्पिकाध्ययनम्, अधुना श्रामण्यपूर्वकाख्यमारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तराध्ययने धर्मप्रशंसोक्ता, सा चेहैव जिनशासन इति, इह तु तदभ्युपगमे सति मा भूदभिनवप्रव्रजितस्याधृतेः संमोह इत्यतो धृतिमता भवितव्यमित्येतदुच्यते, उक्तं च-

"जस्स धिई तस्सो तवो जस्स तवो तस्स सुग्गई सुलभा।
जे अधिइमंत पुरिसा तवोऽवि खलु दुल्लहो तेसिं॥"

अनेनाभिसंबन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि पूर्ववत्, नवरं नामवदध्ययनविषयत्वादुपक्रकमादिद्वारकलापस्य व्याप्तिप्राधान्यतो नामनिष्पन्नं निक्षेपमभिधित्सुराह निर्युक्तिकारः-

**नि.[१५३]** सामण्णपुव्वगस्स उ निक्खेवो होइ नामनिप्फन्नो।
सामण्णस्स चउक्को तेरसगो पुव्वयस्स भवे॥

**वृ.**श्राम्यतीति श्रमणः, (श्राम्यति तपस्यति) तद्भावः श्रामण्यं, तस्य पूर्वं-कारणं श्रामण्यपूर्वं तदेव श्रामण्यपूर्वकमिति संज्ञायां कन्, श्रामण्यकारणं च धृतिः, तन्मूलत्त्वात्तस्य, तत्प्रतिपादकं चेदमध्ययनमिति भावार्थः। अतः श्रामण्यपूर्वकस्य तु निक्षेपो भवति नामनिष्पन्नः, कोऽसौ?-अन्यस्याश्रुतत्त्वात् श्रामण्यपूर्वकमित्ययमेव, तुशब्दः सामान्यविशेषवन्नामविशेषणार्थः, श्रामण्यपूर्वकमिति सामान्ययम्, श्रामण्यं पूर्वं चेति विशेषः, तथा चाह-श्रामण्यस्य चतुष्ककस्त्रयोदशकः पूर्वकस्य भवेन्निक्षेप इति गाथार्थः॥ निक्षेपमेव विवृणोति-

**नि.[१५४]** समणस्स उ निक्खेवो चउक्कओ होइ आनुपुव्वीए।
दव्वे सरीरभविओ भावेन उ संजओ समणो॥

**वृ.**'श्रमणस्य तु' तुशब्दोऽन्येषां च मङ्गलादीनामिह तु श्रमणेनाधिकार इति विशेषणार्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्षेपश्चतुर्विधो भवति, 'आनुपूर्व्या' नामादिक्रमेण, नामस्थापने पूर्ववत्, द्रव्यश्रमणो द्विधा-आगमतो नोआगमतश्च, आगमतो ज्ञाताऽनुपयुक्तः, नोआगमतस्तु ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तोऽभिलापभेदेन द्रुमवदवसेयः, तं चानेनोपलक्षयति-'दव्वे सरीरभविउ' त्ति। भावश्रमणोऽपि द्विविध एव-आगमतो ज्ञातोपयुक्तः नोआगमतस्तु चारित्रपरिणामवान् यतिः, तथा चाह-भावतस्तु संयतः श्रमण इति गाथार्थः ॥ अस्यैव स्वरूपमाह-

नि.[१५५] जह मम न पियं दुक्खं जाणिय एमेव सव्वजीवाणं।
न हणइ न हणावेइ य सममणई तेन सो समणो।

वृ.यथा मम न प्रियं दुःखं, प्रतिकूलत्वात्, ज्ञात्वैवमेव सर्वजीवानां, दुःखप्रतिकूलत्वम्, न हन्ति स्वयं न घातयत्यन्यैः, चशब्दाद घन्तं च नानुमन्यतेऽन्यम्, इत्यनेन प्रकारेण समम् अणति-तुल्यं गच्छति यतस्तेनासौ श्रमण इति गाथार्थः ॥

नि.[१५६] नत्थि य सि कोइ वेसो पिओ व सव्वेसु चेव जीवेसु।
एएण होइ समणो एसो अन्नोऽवि पज्जाओ ॥

वृ. नास्ति च 'सि' तस्य कश्चिद् द्वेष्यः प्रियो वा सर्वेष्वेव जीवेषु, तुल्यमनस्त्वात्, एतेन भवति सममनाः, समं मनोऽस्येति सममनाः, एषोऽन्योऽपि पर्याय इति गाथार्थः ॥

नि.[१५७] तो समणो जइ सुमणो भावेन य जइ न होई पावमणो।
सयणे य जणे य समो समो य मानावमानेसु ॥

वृ.ततः श्रमणो यदि सुमनाः, द्रव्यमनः प्रतीत्य, भावेन च यदि न भवति पापमनाः, एतत्फलमेव दर्शयति-स्वजने च जने च समः, समश्च मानापमानयोरिति गाथार्थः ॥

नि.[१५८] उरगगिरिजलणसागरनहयलतरुगणसमो य जो होई।
भमरमिगधरणिजलरुहरविपवणसमो जओ समणो ॥

वृ.उरगसमः परकृतबिलनिवासित्वादाहारनास्वादनात्संयमैदृष्टित्वाच्च, गिरिसमः परीषह-पवनाकम्प्यत्वात्, ज्वलनसमः तपस्तेजः प्रधानत्वात् तृणादिष्विव सूत्रार्थेष्वतृप्तेः एषणीयाशनादौ चाविशेषप्रवृत्तिरिति, सागरसमो गम्भीरत्वाज्ज्ञानादिरत्नाकरत्वात् स्वमर्यादा-नतिक्रमाच्च, नभस्तलसमः सर्वत्र निरालम्बनत्वात्, तरुगणसमः अपवर्गफलार्थिसत्त्वशकुनालयत्वात् वासी-चन्दनकल्पत्वाच्च, भ्रमरसमः अनियतवृत्तित्वात्, मृगसमः संसारभयोद्विग्नत्वात्, धरणिसमः सर्वखेदसहिष्णुत्वात्, जलरुहसमः कामभोगोद्भवत्वेऽपि पङ्कजलाभ्यामिव तदूर्ध्ववृत्तेः, रवि-समः धर्मास्तिकायादिलोकमधिकृत्य विशेषेण प्रकाशकत्वात्, पवनसमः अप्रतिबद्धहारित्वात्, इत्थमुरगादिसमश्च यतो भवति ततः श्रमण इति गाथार्थः ॥

प्र.[२] विसतिणिसवायवंजुलकणियारुप्पलसमेण समणेणं।
भमरुदुरुनडकुक्कुडअद्दागसमेण होयव्वं ॥

वृ. श्रमणेन विषसमेन भवितव्यं भावतः सर्वरसानुपातित्वमधिकृत्य, तथा तिनिशसमेन मानपरित्यागतो नम्रेण, वातसमेनेति पूर्ववत्, वञ्जुलो-वेतसस्तत्समेन क्रोधादिविषाभिभूतजीवानां तदपनयनेन, एवं हि श्रूयते-किल वेतसमवाप्य निर्विषा भवन्ति सर्पा इति, कर्णिकारसमेनेति तत्पुष्पवत्प्रकटेन अशुचिगन्धापेक्षया च निर्गन्धेनेति, उत्पलसदृशेन प्रकृति-धवलतया सुगन्धि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेन च, भ्रमरसमेनेति पूर्ववत्, उन्दुरुसमेन उपयुक्तदेशकालचारितया, नटसमेन तेषु तेषु प्रयोजनेषु तत्तद्वेषकरणेन, कुकुर्टसमेन संविभागाशीलतया, स हि किल प्रासमाहारं पादेन विक्षिप्यान्यैः सह भुक्तं इति, आदर्शसमेन निर्मलतया तरुणाद्यनुवृत्तिप्रतिबिम्बभावेन च-

"तरुणंमि होइ तरुणो थेरो थेरेहिं डहरए डहरो।
अद्दाओविव रूवं अनुयत्तइ जस्स जं सीलं ॥"

एवंभूतेन श्रमणेन भवितव्यमिति गाथार्थः ॥ इयं किल गाथा भिन्नकर्तृकि, अतः पवनादिषु न पुनरुक्तदोष इति ॥

साम्प्रतं 'तत्त्वभेदपर्यायैर्व्याख्ये'ति न्यायाच्छ्रमणस्यैव पर्यायशब्दानभिधित्सुराह-

**नि.[१५९]** पव्वइए अनगारे पासंडे चरग तावसे भिक्खू।
परिवाइए य समणे निग्गंथे संजए मुत्ते ॥

**वृ.**प्रकर्षेण व्रजितो-गतः प्रव्रजितः, आरम्भपरिग्रहादिति गम्यते, अगारं-गृहं तदस्यास्तीत्यगारोगृही न अगारोऽनगारः, द्रव्यभावगृहरहित इत्यर्थः, पाखण्डं-व्रतं तदस्यास्तीति पाखण्डी, उक्तं च-

"पाखण्डंव्रतमित्याहुस्तद्यस्तास्त्यमलं भुवि।
स पाखण्डी वदन्त्यन्ये, कर्मपाशाद्विनिर्गतः (तम्)॥"

चरतीति चरकः तप इति गम्यते, तपोऽस्यास्तीति तापसः, भिक्षणशीलो भिक्षुः भिनत्ति वाऽष्टप्रकारंकर्मेति भिक्षुः, परिसमन्तात्पापवर्जनेन व्रजति-गच्छतीति परिव्राजकः, चः समुच्चये, श्रमणः पूर्ववत्, निर्गतो ग्रन्थान्निर्ग्रन्थः बाह्याभ्यन्तरग्रन्तरहित इत्यर्थः, सम्-एकीभावेनाहिंसादिषु यतः-प्रयत्नवान् संयतः, मुक्तो बाह्याभ्यन्तरेण ग्रन्थेनैवेति गाथार्थः ॥

**नि.[१६०]** तिन्ने ताई दविए मुणी य खंते य दन्त विरए य।
लूहे तीरट्ठेऽविय हवंति समणस्स नामाइं ॥

**वृ.**तीर्णवांस्तीर्णः, संसारमिति गम्यते, त्रायत इति त्राता, धर्मकथादिना संसारदुःखेभ्य इति भावः, रागादिभावरहितत्वाद्द्रव्यम्, द्रवति-गच्छति ताँस्तान् ज्ञानादिप्रकारानिति द्रव्यम्, मुनिः पूर्ववत्, चः समुच्चये, क्षाम्यतीति क्षान्तः-क्रोधविजयी, एवमिन्द्रयादिदमना-द्दान्तः, विरतः-प्राणातिपातादिनिवृत्तिः, स्नेहपरित्यागाद्रूक्षः, तीरेणार्थोऽस्येति तीरार्थी, संसार-स्येति गम्यते, तीरस्थो वा सम्यक्तवादिप्राप्तेः संसारपरिमाणात्, एतानि भवन्ति श्रमणस्य 'नामानि' अभिधानानीति गाथार्थः ॥ निरूपितः श्रमणशब्दः, अधुना पूर्वशब्दश्चिन्त्यते-अस्य च त्रयोदशविधो निक्षेपः, तथा चाह-

**नि.[१६१]** नामं ठवणा दविए खेत्ते काले दिसि तावखेत्ते य।
पन्नवगपुव्ववत्थू पाहुडअइपाहुडे भावे ॥

**वृ.**नामस्थापने क्षुण्णे, द्रव्यपूर्वम् अङ्कुराद्बीजं दध्नः क्षीरं फाणिाद्रस इत्यादि, क्षेत्रपूर्वं यवक्षेत्राच्छालिक्षेत्रं, तत्पूर्वकत्वात्तस्य, अपेक्षया चान्यथाऽप्यदोषः, कालपूर्वं पूर्वः कालः शरदः प्रावृट् रजन्या दिवस इत्यादि आवलिकाया वा समय इत्यादि, दिक्पूर्वं पूर्वा दिग्, इयं च रुचकापेक्षया, तापक्षेत्रपूर्वम्-आदित्योदयमधिकृत्य यत्र या पूर्वा दिक्, उक्तं च-"जस्स जओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदिच्चो उदेइ सा तस्स होइ पुव्वदिसा" इत्यादि, प्रज्ञापकपूर्वं-प्रज्ञापनं(कं) प्रतीत्य पूर्वा दिक् यदभिमुख एवासौ सैव पूर्वा, पूर्वपूर्वं चतुर्दशानां पूर्वाणामाद्यं, तच्च उत्पादपूर्वम्, एवं वस्तुप्राभृतातिप्राभृतेष्वपि योजनीयम्, अप्रत्यक्षस्वरूपाणि चैतानि, भावपूर्वम्-आद्यो भावः स चौदयिक इति गाथार्थः ॥ उक्तो नामनिष्पन्नो निक्षेपः साम्प्रतं सूत्रालापकनिष्पन्न-निक्षेपस्यावसरः, इत्यादिचर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्-

*मू.(६) कहं नु कुज्जा सामण्णं, जो कामे न निवारए।*
*पए पए विसीदंतो, संकप्पस्स वसं गओ?*

**वृ.** इह च संहितादिक्रमेण प्रतिसूत्रं व्याख्याने ग्रन्थगौरवमिति तत्परिज्ञाननिबन्धनं भावार्थमात्रमुच्यते-तत्रापि कत्यहं कदाहं कथमहमित्याद्यदश्यपाठान्तरपरित्यागेन दृश्यं व्याख्याते-'कथं नु कुर्याच्छ्रामण्यं यः कामान्न निवारयति?' 'कथं' केन प्रकारेण, नु क्षेपे, यथा कथं नु स राजा यो न रक्षति?, कथं नु स वैयाकरणो योऽपशब्दान् प्रयुंक्ते, एवं कथं नु स कुर्यात्, 'श्रामण्यं' श्रमणभावं यः कामान्, 'न निवारयति' न प्रतिषेधते?, किमिति न करोति?, तत्र "निमित्त-कारणहेतेषु सर्वासां विभक्तिनां प्रायो दर्शनम्" इति वचनात् कारणमाह-'पदे पदे विषीदन् संकल्पस्य वशं गतः' कामानिवारणेनेन्द्रियाद्यपराधपदापेक्षया पदे पदे विषीदनात्संकल्पस्य वशंगतत्वात्। (अप्रशस्ताध्यवसायः संकल्पः) इति सूत्रसमासार्थः अवयवार्थं तु सूत्रस्पर्शनिर्युक्त्या प्रतिपादयति-तत्रापि शेषपदार्थान् परित्यज्य कामपदार्थस्य हेयतयोपयोगित्वात्स्वरूपमाह-

**नि.[१६२]** नामंठवणाकामा दव्वकामा य भावकामा य।
एसो खलु कामाणं निक्खेवो चउविहो होइ॥

**वृ.** नामस्थापनाकामा इत्यत्र कामशब्दः प्रत्येकभिसंबध्यते, द्रव्यकामाश्च भावकामाश्च, चशब्दौ स्वगतानेकभेदसमुच्चयार्थो, एष खलु कामानां निक्षेपश्चतुर्विधो भवतीति गाथार्थः॥ तत्र नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यकामान् प्रतिपादयन्नाह-

**नि.[१६३]** सद्दरसरूवगंधाफासा उदयंकरा य जे दव्वा।
दुविहा य भावकामा इच्छकामा मयणकामा॥

**वृ.** शब्दरसरूपगन्धस्पर्शाः मोहोदयाभिभूतैः सत्त्वैः काम्यन्त इति कामाः, मोहोदयकारीणि च यानि द्रव्याणि संघाटकविकटमांसादीनि तान्यपि मदनकामाख्यभावकामहेतुत्वाद्द्रव्यकामा इति, भावकामानाह-'द्विविधाश्च' द्विप्रकाराश्च भावकामाः, इच्छाकामा मदनकामाश्च, तत्रैषणमिच्छा सैव चित्ताभिलाषस्वरूपत्वात्कामा इतीच्छामाकामाः, मदयतीति तथा मदनः-चित्रो मोहोदयः स एव काम प्रवृत्तिहेतुत्वात्कामा मदनकामा इति गाथार्थः ॥ इच्छाकामान् प्रतिपादयति-

**नि.[१६४]** इच्छा पसत्थमपसत्थिगा य मयणंमि वेयउवओगो।
तेनहिगारो तस्स उ वयंति धीरा निरुत्तमिणं॥

**वृ.** इच्छा प्रशस्ता अप्रशस्ता च, अनुस्वारोऽलाक्षणिकः सुखमुखोच्चारणार्थः, तत्र प्रशस्ता धर्मेच्छा मोक्षेच्छा, अप्रशस्ता युद्धेच्छा, राज्येच्छा, उक्ता इच्छकामाः, मदनकामानाह 'मदने' इति उपलक्षणार्थत्वान्मदनकामे निरूप्ये काऽसावित्यत आह-'वेदोपयोगः' वेद्यत इति वेदः-स्त्रीवेदादिस्तदुपयोगः-तद्विपाकानुभवनम्, तद्व्यापार इत्यन्ते, यथा स्त्रीवेदोदयेन पुरुषं प्रार्थयत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'तेनाधिकार' इति मदनकामेन, शेषा उच्चारितसदृशा इति प्ररूपिताः, 'तस्य तु' मदन-कामस्य वदन्ति 'धीराः' तीर्थकरगणधरा निरुक्तम्, 'इदं' वक्ष्यमाणलक्षणमिति गाथार्थः ॥

**नि.[१६५]** विसयसुहेसु पसत्तं अबुहजनं कामरागपडिबद्धं।
उक्कामयंति जीवं धम्माओ तेन ते कामा॥

**वृ.**विषीदन्ति-अवबध्यन्ते एतेषु प्राणिन इति विषयाः-शब्दादयः तेभ्यः सुखानि तेषु प्रसक्तः-आसक्तस्तं, जीवमिति योगः, स एव विशेषयते-अबुधः-अविपश्चिज्जनः-परिजनो यस्य सः अबुधजनस्तम्, अकल्याणमित्रपरिजनमित्यर्थः, अनेन बाह्यं विषय-सुखप्रसक्तिहेतुमाह, 'कामरागप्रतिबद्ध'मिति कामामदनकामास्तेभ्यो रागा-विषयाभिष्वङ्गास्तैः प्रतिबद्धो-व्याप्तस्तम्, अनेन त्वान्तरं विषयसुखप्रसक्तिहेतुमाह, ततश्चाबुधजनत्वात्काम-रागप्रतिबद्धत्वाच्च विषयसुखेषु प्रसक्तमिति भावः, किम्?-निरुक्तवैचित्र्यादाह-तत्व-प्रत्यनीकत्वादुत्क्रामयन्ति-अपनयन्ति जीवमनन्तरविशेषितम्, कुत्तो?, धर्मात्, यत्तदोर्नि-त्याभिसंबन्धात् येन कारणेन तेन (ते) सामान्येनैव कामरागः कामा इति गाथार्थः ॥ अन्ये पठन्ति-उत्क्रामयन्ति यस्मादिति, अत्र चाबुधजन एव विशेष्यः, शेषं पूर्ववत्॥

**नि.[१६६]** अन्नंपिय से नामं कामा रोगत्ति पंडिया बिंति।
कामे पत्थेमाणो रोगे पत्थेइ खलु जंतू॥

**वृ.** अन्यदपि च 'एषां' कामानां नाम, किंभूतमित्याह-कामा रोगा 'इति' एवं पण्डिता ब्रुवते, किमित्येतदेवमत आह-कामान् प्रार्थयमानः-अभिलषन् रोगान् प्रार्थयते खलु जन्तुः तद्पत्वादेव, कारणे कापर्योपचारादिति गाथार्थः॥

इत्थं पूर्वार्धे सूत्रस्पर्शिक-निर्युक्तिम-भिधायाधुनोत्तरार्धे पदावयवमधिकृत्याह-

**नि.[१६७]** णामपयं ठवणपयं दव्वपयं चेव होइ भावपयं।
एक्केक्कंपिय एत्तो णेगविहं होइ नायव्वं।

**वृ.**नामपदं स्थापनापदं द्रव्यपदं चैव भवति भावपदम्, एकैकमपि च 'अत' एतेभ्योऽनेक-विधं भवति ज्ञातव्यमिति गाथासमासार्थः॥

अवयवार्थं तु नामस्थापने क्षुण्णत्वादनादत्य द्रव्य-पदमभिधित्सुराह-

**नि.[१६८]** आउट्टिमउक्किन्नं उन्नेज्जं पीलिमं च रंगं च।
गंथिमवेढिमपूरिम वाइमसंघाइमच्छेज्जं॥

**वृ.**आकोट्टिमं जहा रूवओ हेट्ठा वि उवरिंपि मुहं काऊण आउडिज्जति, उत्कीर्णं शिलादिषु नामकादि, तहा बउलादिपुप्फसंठणाणि चिक्खिल्लमयपडिबिंबगाणि काउं पच्चंति, तओ तेसु वग्धारित्ता मयणं छुब्भति, तओ मयणमया पुप्फा हवन्ति, एतुदुपनेयम्, पीडावच्च-संवेष्टितवस्त्र-भङ्गावलीरूपं, रत्तावयवच्छविधिचित्तरूवं रङ्गं, चः समुच्चये, 'ग्रथितं' मालादि, 'वेष्टिमं' पुष्पमयमुकुटरूपं, चिक्खिल्लमयं कुण्डिकारूपं अनेगच्छिद्दं पुप्फथामं पूरिमं, वातव्यं कुविन्दैर्वस्त्रविनिर्मितमश्वादि, संघात्यं-कञ्चुकादि, छेद्यं-पत्रच्छेद्यादि। पदता चास्य पद्यतेऽने-नेत्यर्थयोगात्, द्रव्यता च तद्रूपत्वादिति गाथार्थः॥ उक्तं द्रव्यपदम्, अधुना भावपदमाह-

**नि.[१६९]** भावपयंपि य दुविहं अवराहपयं च नो य अवराहं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोअवराहं दुविहं माउगनोमाउगं चेव॥

वृ. भावपदमपि च द्विविधम्, द्वैविध्यमेव दर्शयति-अपराधहेतुभूतं पदमपराधपदम्-इन्द्रियादि वस्तु, चशब्दः स्वगतानेकभेदसमुच्चार्थः, 'नोअवराहं'त्ति चशब्दस्य व्यवहितोपन्यासान्नो-अपराधपदं च, चः पूर्ववत्, नोअपराधमिति-नोअपराधपदं द्विविधम्-'माउअ नोमाउअं चेव'त्ति मातृकापदं नोमातृकापदं च, तत्र मातृकापदं-मातृकाक्षराणि, मातृकाभूतं वा पदं मातृकापदं, यथा दृष्टिवादे ''उप्पन्ने इ वा'' इत्यादि, नोमातृकापदं त्वन्तरगाथया वक्ष्यतीति गाथार्थः ॥

**नि. [१७०]** नोमाउगंपि दुविहं गहियं च पइन्नयं च बोद्धव्वं।
गहियं चउप्पयारं पइन्नगं होइ(अ)नेगविहं॥

वृ. 'नोमाउयंपि' त्ति नोमातृकापदमपि द्विविधम्, कथमित्याह-'ग्रथितं च प्रकीर्णकं च बोद्धव्यम्' ग्रथितं रचितं बद्धमित्यनर्थान्तरम्, अतोऽन्यत्प्रकीर्णकं-प्रकीर्णकथोपयोगिज्ञान-पदमित्यर्थः, ग्रथितं चतुष्प्रकारं-गद्यादिभेदात्, प्रकीर्णकं भवत्यनेकविधम्, उक्तलक्षणत्वा-देवेति गाथार्थः ॥ ग्रथितमभिधातुकाम आह-

**नि. [१७१]** गज्जं पज्जं गेयं चुण्णं च चउव्विहं तु गहियपयं।
तिसमुट्ठाणं सव्वं इह बेंति सलक्खणा कइणो।

वृ. गद्यं पद्यं गेयं चौर्णं च चतुर्विधमेव ग्रथितपदम्, एभिरेव प्रकारैर्ग्रथनात, एतच्च त्रिभ्यो धर्मार्थकामेभ्यः समुत्थानं-तद्विषयत्वेनोत्पत्तिरस्येति त्रिसमुत्थानं 'सर्वं' निरवशेषम्, आह-एवं मोक्षसमुत्थानस्य गद्यादेरभावप्रसङ्गः, न, तस्य धर्मसमुत्थान एवान्तर्भावात्, धर्मकार्य-त्वादेव मोक्षस्येति, लौकिकपदलक्षणमेवैतदित्यन्ये, अतस्त्रिसमुत्थानं सर्वम्, 'इह' एवं ब्रुयते 'सलक्षणा' लक्षणज्ञाः कवय इति गाथार्थः ॥

**नि. [१७२]** महुरं हेउनिजुत्तं गहियमपायं वीरामसंजुत्तं।
अपरिमियं चऽवसाने कव्वं गज्जं ति नायव्वं॥

वृ. गद्यलक्षणमाह-'मधुरं' सूत्रार्थोभयैः श्रव्यम् 'हेतुनियुक्तं' सोपपत्तिकम् 'ग्रथितं' बद्ध-मानुपूर्व्या 'अपादं' विशिष्टच्छन्दोरचनायोगात्पाद-वर्जितम् विरामः-अवसानं तत्संयुक्तमर्थतो न तु पाठतः इत्येके, जहा-जिनवरपादारविंद-संदाणिउरुनिम्मल्लसहस्स एवमादि असमाणिउं न चिट्ठइत्ति, यतिविशेषसंयुक्त अन्ये अपरि-मितं चावसाने बृहद्भवतीत्येके, अन्ये त्वपरिमितमेव भवति बुहदित्यर्थः, अवसाने मृदु पव्यत इति शेषः, काव्यं गद्यम्, 'इति' एवंप्रकारं ज्ञातव्यमिति गाथार्थः ॥

**नि. [१७३]** पज्जं तु होइ तिविहं समसद्धसमं च नाम विसमं च।
पाएहिँ अक्खरेहिँ य एव विहिन्नू कई बेंति॥

वृ. अधुना पद्याह-पद्यं तु, तुशब्दो विशेषणार्थः, भवति 'त्रिविधं' त्रिप्रकारं, सममर्धसमं च नाम विषमं च, कैः सममित्यादि।, अत्राह-पादैरक्षरैश्च, पादैः चतुःपादादिभिरक्षरैः गुरुलघुभिः, अन्ये तु व्याचक्षते-समं यत्र चतुर्ष्वपि पादेषु समान्यक्षराणि, अर्धसमं यत्र प्रथमतृतीयोर्द्वितीय-चतुर्थयोश्च समान्यक्षराणि, विषमं तु सर्वपादेष्वेव विषमाक्षरमित्येवं 'विधिज्ञाः' छन्दःप्रकारज्ञाः कवयो ब्रुवत इति गाथार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[१७४] तंतिसमं तालसमं वण्णसमं गहसमं लयसमं च।
कव्वं तु होइ गेयं पंचविहं गीयसन्नाए॥

वृ. अधुना गेयमाह-तन्त्रीसमं तालसमं वर्णसमं ग्रहसमं लयसमं च काव्यं तु भवति, तु-शब्दोऽवधारणार्थ एव, गीयत इति गेयं, 'पञ्चविधम्' उक्तैर्विधिभिः 'गीतसंज्ञायां' गेयाख्यायाम्, तत्र तन्त्रीसमं वीणादितन्त्रीशब्देन तुल्यं मिलितं च, एवं तालादिष्वपि योजनीयम्, नवरं ताला-हस्तगमाः, वर्णा-निषादपञ्चमादयः, ग्रहा-उत्क्षेपाः, प्रारम्भरसविशेषा इत्यन्ते, लयाः-तन्त्रीस्वन-विशेषाः। तत्थ किल कोणएण तंती छिप्पइ तओ नहेहि अनुमज्जिइ, तत्थ अन्नारिसो सरो उट्ठेइ, सो लयो त्ति गाथार्थः॥

नि.[१७५] अत्थबहुलं महत्थं हेउनिवाओवसग्गगंभीरं।
बहुपायमवोच्छिन्नं गमनयसुद्धं च चुण्णपयं॥ नोअवराहंपयं गयं

वृ.साम्प्रतं चौर्णं पदमाह-अर्थो बहुलो यस्मिस्तदर्थबहुलम्,
'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति॥''

ततश्चैभिः प्रकारैर्बह्वर्थम्, महान्-प्रधानो हेयोपादेयप्रतिपादकत्वेनार्थो यस्मिँस्तन्महार्थम्, 'हेतुनिपातोपसर्गैर्गभीरम्' तत्रान्यथाऽनुपपत्तिलक्षणो हेतुः, यथा-मदीयोऽयमश्वो विशिष्टचिह्नो-पलक्षितत्वात्, चवास्वल्वादयो निपाताः, पर्युतसमवादय उपसर्गाः, एभिरगाधम्, 'बहुपादम्' अ-परिमितपादम् 'अव्यवच्छिन्नं' श्लोकवद्विरामरहितम्, गमनयैः शुद्धम्, गमाः-तदक्षरोच्चारणप्रवणा भिन्नार्थाः, यथा 'इह खलु छज्जीवणिया० कयरा खलु सा छज्जीवणिया०' इत्यादि, नयाः-नैगमा-दयः प्रतीताः, तुरवधारणे, गमनयशुद्धमेव चौर्णं पदं ब्रह्मचर्याध्ययनपदवदिति गाथार्थः॥

उक्तं ग्रथितं, प्रकीर्णकं लोकादवसेयम्, उक्तं नोअपराधपदम्, अधुना अपराधपदमाह-

नि.[१७६] इंदियविसयकसाया परीसहा वेयणा य उवसग्गा।
एए अवराहपया जत्थ विसीयंति दुम्मेहा॥

वृ.इन्द्रियाणि-स्पर्शनादीनि विषयाः-स्पर्शादयः कषायाः-क्रोधादयः इन्द्रियाणि चेत्यादि-द्वन्द्वः, 'परिषहाः' क्षुत्पिपासादयः 'वेदना' असातानुभवलक्षणा उपसर्गा-दिव्यादयः, एतानि, 'अपराधपदानि' मोक्षमार्गं प्रत्यपराधस्थानानि, 'यत्र' येष्विन्द्रियादिषु सत्सु 'विषीदन्ति' आ(अव)बध्यन्ते, किं सर्व एव?, नेत्याह-दुर्मेधसः क्षुल्लकवत्, कृतिनस्तु एभिरेव कारणभूतैः संसारकान्तारमुत्तरन्तीति गाथार्थः॥

क्षुल्लकस्तु पदे पदे विषीदन् संकल्पस्य वश गतः, कोऽसौ खुल्लओ त्ति?, कहाणयं-कंकुणओ जहा एगो खंतो सपुत्तो पव्वइओ, सो य चेल्लओ तस्स अईव इट्ठो, सीयमाणो य भणइ-खंता! न सक्केमि अनुवाहणो हिंडिउं, अनुकंपाए खंतेण दिन्नाओ उवाहणाओ, ताहे भणइ-उवरितला सीएणं फुट्टंति, खल्लिता से कयाओ, पुणो भणइ-सीसं मे अईव डज्झइ, ताहे सीसुदुवारिया से अणुन्नाया, ताहे भणइ-न सक्केमि भिक्खं हिंडिउं, तो से पडिसए ठियस्स आनेइ, एवं न तरामि खंत! भूमिए सुविउं, ताहे संथारो से अणुन्नाओ, पुणो भणइ-न तरामि खंत! लोयं काउं, तो खुरेण पंकिज्जियं, ताहे भणइ-अण्हाणयं न सक्केमि, तओ से फासुयवानएण कप्पो दिज्जइ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयरियणाउग्गं वत्थजुयलयं धिप्पइ, एवं जं जं भणइ तं तं सो खंतो नेहपडिबद्धो तस्सनुजाणइ, एवं काले गच्छमाणे पभाणिओ-न तरामि अविरइयाए विणा अच्छिउं खंतत्ति, ताहे खंतो भणइ-सढो, अजोग्गोत्ति काऊण पडिसयाओ निप्फेडिओ, कम्मं काउं न याणेइ, अयाणंतो खण-संखडीए धाणिं काउं अजिण्णेण मओ, विसयविसट्टो मरिउं महिसो आयाओ, वाहिज्जइ य, सो य खंतो सामण्णपरियागं पालेऊण आउक्खए कालगओ देवेसु उववण्णो, ओहिं पउंजइ, ओहिणा आभोएऊण त चेल्लयं तेन पुव्वणेहेणं तेसिं गोहाणं हत्थओ किणइ, वेउव्वियभंडीए जोएइ, वाहेइ य गरुगं, तं अतरंतो वोढुं तोत्तएण विंधेउं भणइ-न तरामि खंता ! भिक्खं हिण्डिउं, एवं भूमीए सयणं लोयं काउं एवं ताणि वयणानि सव्वाणि उच्चारेइ जाव अविरययाए विना न तरामि खंतत्ति, ताहे एवं भणंतस्स तस्स महिसस्स इमं चित्तं जायं-कहिं एरिसं वक्कं सुअं ति ?, ताहे ईहावुहमग्गणगवेसणं करेइ, एवं चिंतयंतस्स तस्स जाईसरणं समुप्पन्नं, देवेन ओही पउत्ता, सं-बुद्धो, पच्छा भत्तपच्चक्खाइत्ता देवलोगं गओ। एवं पए पए विसीदन्तो संकप्पस्स वसं गच्छइ, जम्हा एस दासो तम्हा अट्ठारससीलंगसहस्साणं सारणाणिमित्तं एएल अवराहपए वज्जेज्ज।

तथा चाह-

**नि.[१७७]** अट्ठारस उ सहस्सा सीलंगाणं जिनेहिं पन्नत्ता।
तेसिँ पडि(रि)रक्खणट्ठा अवराहपए उ वज्जेज्जा॥

**वृ.**अष्टादश सहस्राणि, तुरवधारणे, अष्टादशैव, शीलं-भावसमाधिलक्षणं तस्याङ्गानि-भेदाः कारणानि वा शीलाङ्गानि तेषां 'जिनैः' प्राग्निरूपितशब्दार्थैः 'प्रज्ञप्तानि' प्ररूपितानि, 'तेषां' शीलाङ्गानां 'परिरक्षणार्थं' परिरक्षणनिमित्तम् 'अपराधपदानि' प्राग्निरूपितस्वरूपाणि 'वर्जयेत्' जह्यादिति गाथार्थः॥

**नि.[१७८]** जोए करणे सन्ना इंदिय भोमाइ समणधम्मे य।
सीलंगसहस्साणं अट्ठारसगस्स निप्फत्ति॥

**वृ.** तत्थ ताव जोगो तिविहो, कायेण वायाए मणेणं ति, करणं तिविहं-कयं कारियं अनुमोइयं, सन्नाचउव्विहा, तंजहा-आहारसण्णा भयसण्णा मेहुणसण्णा परिग्गसण्णा, इंदिए पंच, तंजहा-सोइंदिए चक्खिंदिए धाणिंदिए जिब्भिंदिए फासिंदिए, पुढविकाइयाइया पञ्च, बेइंदिया जाव पंचेदिंया अजीवनिकायपंचमा, समणधम्मो दसविहो, तंजहा-खंती मुत्ती अज्जवे मद्दवे लाघवे सच्चे तवे संजमे य आकिंचणया बंभचेरवासे। एसा ठाणपरूवणा, इयाणिं अट्ठारसण्हं सीलंगसहस्साणं समुक्कित्तणा-काएणं न करेमि आहारसन्नापडिविरए सोइंदियपरिसंवुडे पुढविकायसमारंभपडिविरए खंतिसंपजुत्ते, एस पढमो गमओ १, इयदानिं बिइओ भण्णइ-काएणं करेमि आहारसण्णापडिविरए सोइंदियपरिसंवुडेपुढविकायसमारंभपडिविरए मुत्तिसंपजुत्ते, एस बीइओ गमओ, इयदानिं तइयओ एवं एएण कमेण जाव दसमो गमओ बंभचेरसंपउत्तो, एस दसमओ गमओ।

एए दस गमा पुढविकायसंजमं अमुंचमाणेण लद्धा, एवं आउकाएणवि दस चेव, एवं जाव अजीवकाएणवि दस चेव, एवमेयं अणूणं सयं गमयाणं सोइंदियसंवुडं अमुंचमाणेण लद्धं, एवं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्खिंदिएणवि सयं, घाणिंदिएणवि सयं, जिब्भिंदिएणवि सयं, फासिंदिएणवि सयं, एवमेयाणि पंच गमसयाणि आहारसण्णापडिविरयममुंचमाणेणं लद्धाणि, एवं भयसण्णाएवि पंच सयाणि, मेहुणसण्णाएवि पंचसयाणि, परिग्गह सण्णाएवि पंच सयाणि, एवमेयाणि वीसं गमसयाणि न करेमि अमुञ्चमाणेण लद्धाणि, एवं ण कारवेमित्ति वीसं सयाणि, करंतंपि अन्नं न समणुजाणामित्ति वीसं सयाणि, एवमेयाणि छ सहस्साणि कायं अमुंचमाणेण लद्धाणि, एवं वायाएवि छ सहस्साणि, एवं मणेणावि छ सहस्साणि। एवमेतेन प्रकारेण शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिर्भवतीति गाथार्थः ॥ न केवलमयमधिकृतसूत्रोक्तं उक्तवच्छ्रामण्याकरणादश्रमणः किन्त्वाजीविकादिभयप्रव्रजितः संक्लिष्टचित्तो द्रव्यक्रियां कुर्वन्नप्यश्रमण एव-अत्याम्येव, कथम्?, यत आह सूत्रकारः-

*मू.(७) वत्थगंधमलंकारं, इत्थीओ सयणाणि य।*
*अच्छंदा जे न भुंजंति, न से चाइत्ति वुच्चइ॥*

**वृ.** 'वस्त्रागन्धालङ्कारानि'ति, अत्र वस्त्राणि-चीनांशुकादीनि गन्धाः-कोष्ठपुटादयः अलङ्काराः-कटकादयः, अनुस्वारोऽलाक्षणिकः, स्त्रियोऽनेकप्रकाराः, 'शयनानि' पर्यङ्कादीनि, चशब्द आसनाद्यनुक्तसमुच्चायार्थः, एतानि वस्त्रादीनि किम्?, 'अच्छन्दाः' अस्ववशा ये केचन 'न भुञ्जते' नासेवन्ते, किं बहुवचनोद्देशेऽप्येकवचननिर्देशः?, विचित्रत्वात्सूत्रगतेर्विपर्ययश्च भवत्येवेतिकृत्वा, आह-'नासौ त्यागीत्युच्यते' सुबन्धुवन्नासौ श्रमण इति सूत्रार्थः।

कः पुनः सुबन्धुरिति?, अत्र कथानकमजया नंदो चंदगुत्तेण निच्छुड्ढो, तया तस्स दारेण निगच्छंतस्स दुहिया चंदगुत्ते दिट्ठिं बंधेइ, एयं अक्खाणयं जहा आवस्सए जाव बिंदुसारो राया जाओ, नंदसंतिओ य सुबंधू नाम अमच्चो, सो चाणक्कस्स पदोसमावण्णो छिद्दाणि मग्गइ, अन्नया रायाणं विन्नवेइ-जइवि तुम्हे अम्हं वित्तणं देह तहावि अम्हेहिं तुम्ह हियं वत्तव्वं, भणियं च-तुम्ह माया चाणक्केण मारिया, रन्ना धाई पुच्छिया, आमंति, कारणं ण पुच्छियं, केणवि कारणेण रन्नो य सगासं चाणक्को आगओ, जावं दिट्ठिं न देई ताव चाणक्को चिंतेइ-रुट्ठो एस राया, अहं गयाउओत्तिकाउं दव्वं पुत्त पउत्ताणं दाऊणं संगोवित्ता य गंधा संजोइआ, पत्तयं च लिहिऊण सोऊवि जोगो समुग्गे छूढो, समुग्गो य चउसु मंजूसासु छूढो, तासु छुभित्ता पुणो गन्धोवरए छूढो, तं बहूहिं कीलियाहिं सुघडियं करेत्ता दव्वजायं नातिवग्गं च धम्मे निओइत्ता अडवीए गोकुलट्ठाणे इंगिनिमरणं अब्भुवगओ, रन्ना य पुच्छियं चाणक्को किं करेइ?, धाई य से सव्वं जहावत्तं परिकहेइ, गहियपरमत्थेण य भणियं अहो मया असमिक्खयं कयं, सव्वंतेउरजोहबलसमग्गो खामेउं निग्गओ, दिट्ठो अनेन करीसमज्झट्ठिओ, खामियं सबहुमाणं, भणिओ अनेन-नगरं वच्चामो, भणइ-मए सव्वपरिच्चाओ कओत्ति।

तओ सुबंधुना राया विन्नविओ-अहं से पूयं करेमि अनुजाणह, अणुन्नाए धूवं डहिऊण तंमि चेव एगप्पएसे करीसस्सोवरि ते अंगारे परिट्ठवेइ, सो य करीसो पलित्तो, दड्ढो चाणक्को, ताहे सुबंधुना राया विन्नविओ-चाणक्कस्स संतियं घरं ममं अनुजाणए, अणुन्नाए गओ, पच्चुविक्खमाणेण य घरं दिट्ठो अपवरओ घट्टिओ, सुबंधू चिंतेइ-किमवि इत्थत्ति कवाडे भंजित्ता उग्घाडिओ, मंजूसं पासइ, सावि उग्घाडिया, जाव समुग्गं पासइ, मघमघंतं गंधं सपत्तयं पेच्छइ, तं पत्तयं वाएइ, तस्स य पत्तगस्स एसो अत्थो-जो एयं चुण्णयं अग्घाइ सो जइ ण्हाइ वा समालभइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा अलंकारेइ सीउदगं पिवइ महईए सेज्जाए सुवइ जाणेण गच्छइ गंधव्वं वा सुणेइ एवमाई अन्ने वा इट्ठे विसए सेवेइ जहा साहुणो अच्छंति तह सो जइ न अच्छेइ तो मरइ, ताहे सुबंधुना विण्णासणत्थं अन्नो पुरिसो अग्घाविता सद्दाइणो विसए भुंजाविओ मओ य, तओ सुबंधू जीवियट्ठी अकामो साहू जहा अच्छंतोवि ण साहू। एवमधिकृतसाधुरपि न साधुः, अतो न त्यागीत्युच्यते, अभिधेयार्थाभावात्। यथा चोच्यते तथाऽभिधातुकाम आह-

मू.(८) *जे य कंते पिए भोए, लद्धे वि पिट्ठिकुव्वइ।*
*साहीणे चयइ भोए, से हु चाइत्ति वुच्चई।*

वृ. चशब्दस्यावधार(णार्थ)त्वात् य एव 'कान्तान्' कमनीयान् शोभनानित्यर्थः 'प्रियान्' इष्टान्, इह कान्तमपि किञ्चित् कस्यचित् कुतश्चिन्निमित्तान्तरादप्रियं भवति, यथोक्तम्- ''चउहिं ठाणेहिं संते गुणे नासेज्जा, तंजहा-रोसेणं पडिनिवेसेणं अकयण्णुयाए मिच्छत्ताभिनिवेसेणं'' अतो विशेषणं प्रियानिति, 'भोगान्' शब्दादीन् विषयान् 'लब्धान्' प्राप्तान् उपनतानितियावत्, 'वि पिट्ठिकुव्वइ'त्ति विविधम्-अनैकैः प्रकारैः शुभभावनादिभिः पृष्ठतः करोति, परित्यजतीत्यर्थः, स च न बन्धनबद्धः प्रोषितो वा किन्तु ? 'स्वाधीनः' अपरायत्तः स्वाधीनानेव त्यजति भोगन्, पुनस्त्यागग्रहणं प्रतिसमयं त्यागपरिणामवृद्धिसंसूचनार्थम्, भोगग्रहणं तु संपूर्णभोगग्रहणार्थं-त्यक्तोपनतभोगसूचनार्थं वा, ततश्च य ईदृशः हुशब्दस्यावधारणार्थत्वात् स एव त्यागीत्युच्यते, भरतादिवदिति।

अत्राह-जइ भरहजंबुनामाइणो जे संते भोए परिच्चयंति ते परिच्चाइणो, एवं ते भणंतस्स अयं दोसो हवइ-जे केऽवि अत्थसारहीणा दमगाइणो पव्वइऊण भावओ अहिंसाइगुणजुत्ते सामण्णे अब्भुज्जुया ते किं अपरिच्चाइणो हवंति ?, आयरिय आह-तेऽवि तिन्नि रयणकोडीओ परिच्चइऊण पव्वइया-अग्गी उदयं महिला तिन्नि रयणाणि लोगसाराणि परिच्चइऊण पव्वइया, दिट्ठंतो-एगो पुरिसो सुधम्मसामिणो सयासे कट्ठहारओ पव्वइओ, सो भिक्खं हिंडंतो लोएण भण्णइ-एसो कट्ठहारओ पव्वइओ, सो सेहत्तेण आयरियं भणइ-ममं अन्नत्थ नेह, अहं न सक्केमि अहियासेत्तए, आयरिएहिं अभओ आपुच्छिओ-वच्चामोत्ति, अभओ भणइ-मास-कप्पपाउग्गं खित्तं किं एयं न भवइ ? जेन अत्थक्के अन्नत्थ वच्चह ?, आयरिएहिं भणियं-जहा सेहनिमित्तं, अभओ भणइ-अच्छह वीसत्था, अहमेयं लोगं उवाएण निवारेमि, ठिओ आयरिआ। बिइए दिवसे तिन्नि रयणकोडीओ ठवियाओ, उग्घोसावियं नगरे-जहा अभओ दानं देइ, लोगो आगओ, भणियं चऽनेन-तस्साहं एयाओ तिन्नि कोडिओ देमि जो एयाइं तिन्नि परिहरइ-अग्गीं पाणियं महिलियं च, लोगो भणइ-एएहिं विना किं सुवन्नकोडिहिं ?, अभओ भणइ-ता किं भणह-दमओत्ति पव्वइओ, जोऽवि निरत्थओ पव्वइओ तेनवि एयाओ तिन्नि सुवन्नकोडीओ परिच्चत्ताओ, सच्चं सामि ! ठिओ लोगो पत्तीओ। तम्हा अत्थपरिहीनोऽवि संजमे ठिओ तिन्नि लोगसाराणि अग्गी उदयं महिलाओ य परिच्चयंतो चाइत्ति लब्भइ। कृतं प्रसङ्गेनेति सूत्रार्थः।

मू.(९) *समाइ पेहाइ परिव्वयंतो, सिया मणो निस्सरई बहिद्धा।*
*न सा महं नोवि अहंपि तीसे, इच्चेव ताओ विणइज्ज रागं।*

वृ. तस्यैवं त्यागिनः 'समया' आत्मपरतुल्यया प्रेक्ष्यतेऽनयेति प्रेक्षा-दृष्टिस्तया प्रेक्षया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टया परि-समन्ताद्व्रजतो-गच्छतः परिव्रजतः, गुरूपदेशादिना संयमयोगेषु वर्तमानस्येत्यर्थः, 'स्यात्' कदाचिद्चिन्त्यत्वात् कर्मगतेः मनो निःसरति 'बहिर्धा' बहिः भुक्तभोगिनः पूर्वक्रीडितानुस्मरणादिना अभुक्तभोगिनस्तु कुतूहलादिना मनः-अन्तःकरणं निःसरति-निर्गच्छति बहिर्धा-संयमगेहाद्बहिरित्यर्थः। एत्थ उदाहरणम्-जहा एगो रायपुत्तो बाहिरियाए उवट्ठाणसालाए अभिरमंतो अच्छइ, दासी य तेण अंतेण जलभरियघडेण बोलेइ, तओ तेन तीए दासीए सो घडो गोलियाए भिन्नो, तं च अधिइं करिंतिं दट्ठूण पुनरावत्ती जाया, चिंतियं च -

जे चेव रक्खगा ते चेव लोलगा कत्थ कुविउं सक्का ?।
उदगाउ समुज्जलिओ अग्गी किह विज्झवेयव्वो ॥

पुणो चिक्खलगोलएण तक्खणा एव लहुहत्थयाए तं एडछिड्डुं ढक्कियं। एवं जइ संजयस्स - संजमं करेंतस्स बहिया मणो निग्गच्छइ तत्थ पसत्थेण परिणामेण तं असुहसंकप्पछिड्डुं चरित्तजलरक्खणट्ठाए ढक्केयव्वं। केनालम्बनेनेति ?, यस्यां राग उत्पन्नस्तां प्रति चिन्तनीयम्-न सा मम नाप्यहं तस्याः, पृथक्कर्मफलभुजो हि प्राणिन इति, एवं ततस्तस्याः सकाशाद्व्यपनयेत रागं, तत्त्वदर्शिनो हि सन्निवर्त्तन्त (स निवर्त्तते) एव, अतत्वदर्शननिमित्तत्वात्तस्येति।

तत्थ न सा महं नोऽपि अहंवि तीसेत्ति, एत्थ उदाहरणं-एगो वाणियदारओ, सो जायं उज्झित्ता पव्वइओ, सो य ओहाणुप्पेही भूओ, इमं च घोसेइ-न सा महं नोवि अहंपि तीसे, सो चिंतेइ-सावि ममं अहंपि तीसे, सा ममाणुरत्ता कहमहं तं छड्डुंहामित्तिकाउं गहियायारभंडगणेवत्थो चेव संपट्ठिओ। गओ अ तं गामं जत्थ सा सो इ(य) निवाणतडं संपत्तो, तत्थ य सा पुव्वजाया पाणियस्स आगया, सा य साविया जाया पव्वइउकामा य, ताए सो नाओ, इयरो तं न याणइ, तेन सा पुच्छिया-अभुगस्स धूया किं मया जीवइ वा ?, सो चिंतेइ-जइ सासहरा तो उप्पव्वयामि, इयरहा न, ताए नयं-जहा एस पव्वज्जं पयहिउकामो, तो दोवि संसारे भमिस्सामि (मो)त्ति, भणियं चऽणाए-सा अन्नस्स दिन्ना, तओ सो चिंतिउमारद्धो-सच्चं भगवंतेहिं साहूहिं अहं पाढिओ-जहा न सा महं नोवि अहंपि तीसे, परमसंवेगमावण्णो, भणियं चऽनेन-पडिणियत्तामि, तीए वेरग्गपडिओत्ति नाऊण अनुसासिओ 'अनिच्चं जीवियं कामभोगा इत्तरिया' एवं तस्स केवलिपन्नत्तं धम्मं पडिकहेइ, अणुसिट्ठो जाणाविओ य पडिगओ आयरियसगासं पवज्जाए थिरीभूओ। एवं अप्पा साहारेतव्वो जहा तेणंति सूत्रार्थः ॥ एवं तावदान्तरो मनोनिग्रहविधि-रुक्तः, न चायं बाह्यविधिमन्तरेण कर्तुं शक्यते अतस्तद्विधानार्थमाह-

*मू.(१०) आयावयाहि चय सोगमल्लं, कामे कमाही कमियं खु दुक्खं*
*छिंदाहि दोसं विणएज्ज रागं, एवं सुही होहिसि संपराए॥*

**वृ.** संयमगेहान्मनसोऽनिर्गमनार्थम् 'आतापय' आतापनां कुरु, 'एकग्रहणे तज्जातीय-ग्रहण' मिति न्यायाद्यथानुरूपमूनोदरतादेरपि विधिः, अनेनात्मसमुत्थदोषपरिहारमाह, तथा 'त्यज सौकुमार्यं' परित्यज सुकुमारत्वम्, अनेन तूभयसमुत्थदोषपरिहारम्, तथाहि-सौकुमार्यात्का-मेच्छा प्रवर्तते योषितां च प्रार्थनीयो भवति, एवमुभयासेवनेन 'कामान्' प्राग्निरूपितस्वरूपान् 'क्राम' उल्लङ्घय, यतस्तैः क्रान्तैः क्रान्तमेव दुःखं, भवति इति शेषः, कामनिबन्धनत्वादुःखस्य, खुशब्दोऽवधारणे, अधुनाऽऽन्तरकामक्रमणविधिमाहछिन्द्धि द्वेषं व्यपनय रां सम्यग्ज्ञानबलेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपाकालोचनादिना, क्व ?, कामेष्विति गम्यते, शब्दादयो हि विषया एव कामा इतिकृत्वा। एवं कृते फलमाह- 'एवम्' अनेन प्रकारेण प्रवर्तमानः, किम् ?-सुखमस्यास्तीति सुखी भविष्यसि, क्व ?- 'संपराये' संसारे, यावदपवर्गं न प्राप्स्यसि तावत्सुखी भविष्यसि, 'संपराये' परीषहो- पसर्गसंग्राम इत्यन्ये। कृतं प्रसङ्गेनेति सूत्रार्थः ॥

किं च संयमगेहान्मनस एवानिर्गमनार्थमिदं चिन्तयेत्, यदुत-

मू. [११] *पक्खंदे जलियं जोइं, धुमकेउं दुरासयं।*
*नेच्छंति वंतयं भोत्तुं, कुले जाया अगंधने॥*

वृ. 'प्रस्कन्दन्ति' अध्यवस्यन्ति 'ज्वलितं' ज्वालामालाकुलं न मुर्मुरादिरूपं, कम् ?- 'ज्योतिषम्' अग्निं 'धूमकेतुं' धूमचिह्नं, धूमध्वजं नोल्कादिरूपं 'दुरासदं' दुःखेनासद्यतेऽभि- भूयत इति दुरासदस्तं, दुरभिभवमित्यर्थः, चशब्दलोपात् न चेच्छन्ति-न च वाञ्छन्ति 'वान्तं भोक्तुं' परित्यक्तमादातुं, विषमिति गम्यते, के ?-नागा इति गम्यते, किंविशिष्टा इत्याह-कुले 'जाताः' समुत्पन्ना अगन्धने। नागानां हि भेदद्वयं-गन्धनाश्चागन्धनाश्च, तत्थ गंधणा नाम जे डसिए मंतेहिं आकड्डिया तं विसं वणमुहाओ आवियंति, अगंधणाओ अवि मरणमज्झवस्संति न य वंतमावियंति। उदाहरणं द्रुमपुष्पिकायामुक्तमेव। उपसंहारस्त्वेवं भावनीयः-यदि तावत्तिर्यञ्चोऽप्यभिमानमात्रादपि जीवितं परित्यजन्ति न च वान्तं भुञ्जते तत्कथमहं जिनवचना- भिज्ञो विपाकदारुणान् विषयान् वान्तान् भोक्ष्ये ? इति सूत्रार्थः ॥ अस्मिन्नेवार्थे द्वितीयमुदाहरणम्- यदा किल अरिट्ठनेमी पव्वइओ तया रहनेमी तस्स जेट्ठो भाउओ राइमइं उवयरइ, जइ नाम एसा ममं इच्छिज्जा, सावि भगवई निव्विन्नकामभोगा, नायं च तीए-जहा एसो मम अज्झोववण्णो, अन्नया य तीए महुघयसंजुत्ता पेज्जा पीया, रहनेमी आगओ, मयणफलं मुहे काऊण य तीए वंतं, भणियं च-एयं पेज्जं पियाहि, तेण भणियं-कहं वन्तं पिज्जइ ?, तीए भणिओ-जइ न पिज्जइ वंतं तओ अहंपि अरिट्ठनेमिसामिणा वंता कहं पिविउमिच्छसि ?।

तथा ह्यधिकृतार्थसंवाद्येवाह-

मू. [१२] *धिरत्थु ते जसोकामी, जो तं जीवियकारणा।*
*वंतं इच्छसि आवेउं, सेयं ते मरणं भवे॥*

वृ. तत्र राजीमतिः किलैवमुक्तवती-'धिगस्तु' धिक्शब्दः कुत्सायाम् 'अस्तु' भवतु 'ते' तव, पौरुषमिति गम्यते, हे यशस्कामिन्निति सासूयं क्षत्रियामन्त्रणम्, अथवा अकारप्रश्लेषा- दयशस्कामिन्!, धिगस्तु तव यस्त्वं 'जीवितकारणात्' असंयमजीवितहेतोः वान्तमिच्छस्यापातुं- परित्यक्तां भगवता अभिलषसि भोक्तुम्, अत उत्क्रान्तमर्यादस्य 'श्रेयस्ते मरणं भवत्' शोभनतरं तव मरणं, न पुनरिदमकार्यासेवनमिति सूत्रार्थः ॥ तओ धम्मो से कहिओ, संबुद्धो पव्वइओ य, राईमईवि तं बोहेऊणं पव्वइया। पच्छा अन्नया कयाइ सो रहनेमी बारवईए भिक्खं हिंडिऊणं सामिसगासमागच्छन्तो वासवद्दलएण अब्भाहओ एक्कं गुहं अनुप्पविट्ठो। राईमईवि सामिणो वंदनाए गया, वंदित्ता पडिस्सयमागच्छइ, अंतरे य वरिसिउमाढत्तो, तिंता य(भिन्ना) तमेव गुहमणुप्पविट्ठा-जत्थ सो रहनेमी, वत्थाणि य पविसारियाणि, ताहे तीए अंगपच्चंगं दिट्ठं, सो रहनेमी तीए अज्झोववन्नो, दिट्ठो अनाए इंगियागारकुसलाए य नाओ असोहणो भावो एयस्स।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽसाविदमवोचत-

*मू.( १३ )* *अहं च भोगरायस्स, तं चऽसि अंधगवण्हिणो।*
*मा कुले गंधणा होमो, संजमं निहुओ चर॥*

**वृ.** अहं च भोगराज्ञः-उग्रसेनस्य, दुहितेति गम्यते, त्वं च भवसि अन्धकवृष्णेः समुद्र-विजयस्य, सुत इति गम्यते, अतो मा एकैकप्रधानकुले आवां गन्धनौ भूव, उक्तं च-'जह न सप्प-तुल्ला होमुत्ति भणियं होइ' अतः संयमं निभृतश्चर-सर्वदुःखनिवारणं क्रियाकलापम-व्याक्षिप्तः कुर्विति सूत्रार्थः॥

*मू.( १४ )* *जइ तं काहिसि भावं, जा जा दिच्छसि नारीओ।*
*वायाविद्धुव्व हडो, अट्ठिअप्पा भविस्ससि॥*

**वृ.** किञ्च-यदि त्वं करिष्यसि भावम्-अभिप्रायं प्रार्थनामित्यर्थः, क्व?-या या द्रक्ष्यसि नारीः-स्त्रियः, तासु तासु एताः शोभना एताश्चाशोभना अतः सेवे काममित्येवंभूतं भावं यदि करिष्यसि ततो वातविद्ध इव हडः-वातप्रेरित इवाबद्धमूलो वनस्पतिविशेषः अस्थितात्मा भविष्यसि, सकलदुःखक्षयनिबन्धनेषु संयमगुणेष्व(प्रति)बद्धमूलत्वात् संसारसागरे प्रमादपवनप्रेरित इतश्चे-तश्च पर्यटिष्यसीति सूत्रार्थः।

*मू.( १५ )* *तीसे सो वयणं सोच्चा, संजयाइ सुभासियं।*
*अंकुसेण जहा नागो, धम्मे संपडिवाइओ।*

**वृ.** 'तस्याः' राजीमत्या 'असौ' रथनेमिः 'वचनम्' अनन्तरोदितं 'श्रुत्वां' आकर्ण्य, किंवि-शिष्टायास्तस्याः?-'संयतायाः' प्रव्रजिताया इत्यर्थः, किंविशिष्टं वचनम्?-'सुभाषितं' संवेग-निबन्धनम्, अङ्कुशेन जहा नागो'त्ति, एत्थं उदाहरणं-वसंतपुरं नयरं, तत्थ एगा इब्भण्हुया नदीए ण्हाइ, अन्नो य तरूणो तं दट्ठूण भणइ-

"सुण्हायं ते पुच्छइ एसा नइ पवरसोहियतरङ्गा।
एए य नदीरुक्खा अहं च पाएसु ते पडिओ॥"

ताहे सा पडिभणइ-

"सुहया होउ नईते चिरं च जीवंतु जे नईरुक्खा।
सुण्हायपुच्छयाणं धत्तीहामो पियं काउं॥"

सो य तीसे घरं वा दारं वा न याणइ, तीसे व बितिज्जियाणि चेडरूवाणि रुक्खे पलोयंताणि अच्छंति, तेन ताणं पुप्फफलाणि सुबहूणि दिन्नाणि पुच्छियाणि य-का एसा?, तानि भणन्ति-अमुगस्स सुण्हा, सो य तीए विरहं न लहति, तओ परिव्वाइयं ओलग्गिउमाढत्तो, भिक्खा दिन्ना, सा तुट्ठा भणइ-किं करेमि ओलग्गाए फलं?, तेन भणिया-अमुगस्स सुण्हं मम कए भणाहि, तीए गन्तूण भणिया-अमुगो ते एवंगुणजातीओ पुच्छई, ताए रुट्ठाए पउल्लगाणि धोवन्तीए मसिलित्तएण हत्थेण पिट्ठीए आहया, पंचंगुलियं उट्ठियं, अवदारेण निच्छुड्ढा, गया तस्स साहइ-नामं पि सा तव न सुणेइ, तेन नायं-कालपंचमीए अवदारेण अइगंतव्वं, अइगओ य, असोगवणियाए मिलियाणि सुत्ताणि य, जाव पस्सवणागएण ससुरेण दिट्ठाणि।

तेन नायं-न एस मम पुत्तो, पारदारिओ कोइ, पच्छा पायाओ तेन नेउरं गहियं, चेइयं च तीए, सो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणिओ-णास लहुं, आवइकाले साहेज्जं करेज्जासि, इयरी गंतूण भत्तारं भणइ-एत्थ धम्मो असोयवणियं वच्चामो, गंतूण सुत्ताणि, खणमेत्तं सुविऊणं भत्तारं उट्ठवेइ भणइ य-एयं तुज्झ कुलाणुरूवं ? जं णं मम पायाओ ससुरो नेउरं कड्ढइ, सो भणइ-सुवसु पभाए लब्भिहिति, पभाए थेरेणं सिट्ठं, सो य रुट्ठो भणइ-विवरीओ थेरोत्ति, थेरो भणइ-मया दिट्ठो अन्नो पुरिसो, विवाए जाए सा भणइ- अहं अप्पाणं सोहयामि ?, एवं करेहि, तओ ण्हाया कयबलिकम्मा गया जक्खघरं, तस्स जक्खस्स अंतरेणं गच्छंतो जो कारगारी सो लग्गइ, अकारगारी नीसरइ, तओ सो विडपियतमो पिसायरूवं काऊण निरंतरं घणं कंठे गिण्हइ, तओ सा गंतूण तं जक्खं भणइ-जो मम मायापिउदिन्नओ भत्तारो तं च पिसायं मोत्तूण जइ अन्नं पुरिसं जाणामि तो मे तुमं जाणिज्जसित्ति, जक्खो विलक्खो चिंतेइ-एस य (पास) केरिसाइं धुत्ती मंतेइ ?, अहगंपि वंचिओ तीए, नत्थि सइत्तणं खु धुत्तीए, जाव जक्खो चिंतेइ ताव सा निप्फिडिया, तओ सो थेरो सव्वलोगेण विलक्खीओ हीलिओ य। तओ थेरस्स तीए अधिईए निद्दा नट्ठा, रन्नो य कन्ने गयं, रन्ना सद्दाविऊण अंतेउरवालओ कओ, अभिसेक्कं च हत्थिरयणं वासघरस्स हेट्ठा बद्धं अच्छइ, इओ य एगा देवी हत्थिमिंठे आसत्ता, नवरं हत्थी चोंवालयाओ हत्थेण अवतारेइ, पभाए पडिनीणेइ, एवं वच्चइ कालो।

अन्नया य एगाए रयणीए चिरस्स आगया हत्थिमिंठेण रुट्ठेण हत्थिसंकलाए आहया, सा भणइ-एयारिसो तारिसो य न सुव्वइ, मा मज्झ रूसह, तं थेरो पिच्छइ, चिंतियं च णेण-एवंपि रक्खिज्जमाणीओ एयाओ एवं ववहरंति, किं पुण ताओ सदा सच्छंदाओ त्ति ? सुत्तो, पभाए सव्वलोगो उट्ठिओ, सो न उट्ठेइ, रन्नो कहियं, रन्ना भणियं-सुवउ, चिरस्स य उट्ठिओ पुच्छिओ य, कहियं सव्वं, भणइ-जहा एगा देवीण याणामि कयरावि, तओ राइणा भंडहत्थी कारविओ, भणियाओ-एयस्स अच्चणियं काऊणं ओलंडेह, तओ सव्वाहिं ओलंडिओ, एगा णेच्छइ, भणइ य-अहं बीहेमि, तओ रन्ना उप्पलेण आहया, मुच्छिया पडिया, रन्ना जाणियं-एसा कारित्ति, भणियं चनेन-

मत्तगयं आरुहंतीए भंडमयस्स गयस्स बीहीहि।
तत्थ न मुच्छिय संकलाहया, एत्थ मुच्छिय उप्पलाहया॥

तओ सरीरं जोइयं जाव संकलापहारो दिट्ठो। तओ परुट्ठेण रन्ना देवी मिंठो हत्थी य तिन्निवि छिन्नकडए चडावियाणि, भणियो य मिंठो-एत्थं वाहेहि हत्थिं, दोहि य पासेहिं ते(वे)लुग्गाहा उट्ठिया, जाव एगो पाओ आगासे ठविओ, जणो भणइ-किं एस तिरिओ जाणइ ?, एयाणि मारियव्वाणि, तहवि राया रोसं न मुयइ, जाव तिन्निअ पाया आगासे कया, एगेण ठिओ, लोगेण कओ अक्कन्दो-किमेयं हत्थिरयणं विनासिज्जई ?, रन्ना मिंठो भणिओ-तरसि नियतेउं ?, भणइ-जइ दुयगाणंपि अभयं देसि, दिन्नं तओ तेन अंकुसेण नियत्तिओ हत्थित्ति। दार्ष्टान्तिकयोजना कृतैवेति सूत्रार्थः॥

*मू. (९६) एवं करंति संबुद्धा, पंडिया पवियक्खणा।*
*विणियट्टंति भोगेसु, जहा से पुरिसुत्तमो॥ तिबेमि॥*

**वृ.** एवं कुर्वन्ति 'संबुद्धा' बुद्धिमन्तो बुद्धाः सम्यग्-दर्शनसाहचर्येण दर्शनैकीभावेन वा बुद्धाः संबुद्धा-विदितविषयस्वभावाः, सम्यग्दृष्टय इत्यर्थः, त एव विशेष्यन्ते-पण्डिताः प्रविचक्षणाः, तत्र पण्डिताः-सम्यग्ज्ञानवन्तः प्रविचक्षणाः-चरणपरिणामवन्तः, अन्ये तु व्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्षते-संबुद्धाः सामान्येन बुद्धिमन्तः पण्डिता वान्तभोगासेवनदोषज्ञाः प्रविचक्षणा अवद्य-भीरव इति, किं कुर्वन्ति ?-'विनिवर्तन्ते भोगेभ्यः' विविधम्-अनेकैः प्रकारैरनादिभवाभ्यास-बलेन कदर्थ्यमाना अपि मोहोदयेन(वि)निवर्तन्ते भोगेभ्यो-विषयेभ्यः, यथा क इत्यत्राह-यथाऽसौ 'पुरुषोत्तमः' रथनेमिः। आह-कथं तस्य पुरुषोत्तमत्वं, यो हि प्रव्रजितोऽपि विषयाभिला-षीति ?, उच्यते, अभिलाषेऽप्यप्रवृत्तेः, कापुरुषस्त्वभिलाषानुरूपं चेष्टत एवेति। अपरस्त्वाह-दशवैकालिक नियतश्रुतमेव, यत उक्तम्-

'नायज्झयणाहरणा इसि भासियमो पइन्नयसुया य।
एए होंति अनियया निययं पुण सेसमुस्सन्नं॥'

तत्कथमभिनवोत्पन्नमिदमुदाहरणं युज्यते इति ?, उच्यते एवम्भूतार्थस्यैव नियतश्रुतेऽपि भावाद्, उत्सन्नग्रहणाच्चादोषः, प्रायो नियतं न तु सर्वथा नियतमेवेत्यर्थः। ब्रवीमीति न स्वमनीषिकया किन्तु तीर्थकरगणधरोपदेशेन। उक्तोऽनुगमो, नयाः पूर्ववदिति॥

अध्ययनं २ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिक सूत्रे द्वितीय अध्ययनं सनिर्युक्तिः सवृत्तिः समाप्तम्**

## अध्यदनं-३ क्षुल्लिकाचारकथा

**वृ**- व्याख्यातं श्रामण्यपूर्वकाध्ययनमिदानीं क्षुल्लिकाचारकथाख्यमारभ्यते, अस्य चायमभि-सम्बन्धः, इहानन्तराध्ययने धर्माभ्युपगमे सति मा भूदभिनवप्रव्रजितस्याधृतेः संमोह इत्यतो धृतिमता भवितव्यमित्युक्त, इह तु सा धृतिराचारे कार्या नत्वनाचारे, अयमेवात्मसंयमोपाय इत्येतदुच्यते, उक्तञ्च-

'तस्यात्मा संयतो यो हि, सदाचारे रतः सदा।
स एव धृतिमान् धर्मस्तस्यैव च जिनोदितः॥"

इत्यनेनाभिसम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि पूर्ववत्, नामनिष्पन्ने निक्षेपे क्षुल्लिकाचारकथेति नाम, तत्र क्षुल्लकनिक्षेपः कार्यः, आचारस्य कथायाश्च, महदपेक्षया च क्षुल्लक-मित्यतश्चित्रन्यायप्रदर्शनार्थमपेक्षणीयमेव महदभिधित्सुराह-

**नि.[१७९]** नामंठवणादविए खेत्ते काले पहाण पइभावे।
एएसि महंताणं पडिवक्खे खुड्डया होंति॥

**नि.[१८०]** पइखुड्डुएण पगयं आयारस्स उ चउक्कनिक्खेवो।
नामठंवणादविए भावायारे य बोद्धव्वे॥

**नि.[१८१]** नामणधावणवासणसिक्खावणसुकरणाविरोहीणि।
दव्वाणि जाणि लोए दव्वायारं वियाणाहि॥

**वृ**-नाममहन्मदिति नाम, स्थापनामहन्महदिति स्थापना, द्रव्यमहानचित्तमहास्कन्धः, क्षेत्र-महल्लोकालोकाकाशम्, कालमहानतीतादिभेदः सम्पूर्णः कालः प्रधानमहत्त्रिविधम्-सचित्ताचित्त-मिश्रभेदात्, सचित्तं त्रिविधम्-द्विपदचतुष्पदापदभेदात्, तत्र द्विपदानां तीर्थकरः प्रधानः चतुष्प-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानां हस्ती अपदानां पनसः अचित्तानां वैडूर्यरत्नं मिश्राणां तीर्थकर एव वैडूर्यादिविभूषितः प्रधान इत्यत एव चैतेषां महत्त्वमिति, प्रतीत्यमहद्आपेक्षिकम्, तद्यथा-आमलकंप्रतीत्य महत् बिल्वं प्रतीत्य कपित्थमित्यादि, भावमहत्रिविधं-प्राधान्यतः कालत आश्रयतश्चेति, प्राधान्यतः क्षायिको महान् मुक्तिहेतुत्वेन तस्यैव प्रधानत्वात्, कालतः पारिणामिकः, जीवत्वाजीवत्व परिणामस्यानाद्य-पर्यवसितत्वान्न कदाचिज्जीवाअजीवतया परिणमन्ते अजीवाश्च जीवतयेति, आश्रयतस्त्वौ-दयिकः, प्रभूत(संसारि) सत्त्वाश्रयत्वात् सर्वसंसारिणामेवासौ विद्यत इति, 'एतेषाम्' अनन्तरोदितानां महतां प्रतिपक्षे क्षुल्लकानि भवन्ति, 'अभिधेयवल्लिङ्गवचनानि भवन्ती'ति न्यायात् यथार्थं क्षुल्लक-लिङ्गवचनमिति,

तत्र नामस्थापने क्षुण्णे, द्रव्यक्षुल्लकः परमाणुः, द्रव्यं चासौ क्षुल्लकश्चेति, क्षेत्रक्षुल्लक आकाश-प्रदेशः, कालक्षुल्लकः समयः, प्रधानक्षल्लकं त्रिविधम्-त्रिविधम्-सचित्ताचित्तमिश्रभेदात्, सचित्तं त्रिविधम्-द्विपदचतुष्पदापदभेदात्, द्विपदेषु क्षुल्लकाः प्रधानाश्चानुत्तरसुराः, शरीरेषु क्षुल्लकमाहार-कम्, चतुष्पदेषु प्रधानः क्षुल्लकश्च सिंहः, अपदेषु जातिकुसुमानि, अचित्तेषु वज्रं प्रधानं क्षुल्लकं च, मिश्रेष्वनुत्तरसुरा एव शयनीयगता इति, प्रतीत्यक्षुल्लकं तु कपित्थं प्रतीत्य बिल्वं क्षुल्लकं बिल्वं प्रती-त्यामलकमित्यादि, भावक्षुल्लकस्तु क्षायिको भावः स्तोकजीवाश्रयत्वादिति गाथार्थः। इत्थं क्षुल्लक-निक्षेपमभिधायाधुना प्रकृतयोजनापुरःसरमाचारनिक्षेपमाह-प्रतीत्य यत् क्षुल्लकमुपदिष्टं तेना-त्राधिकारः, यतो महती खल्वाचारकथा धर्मार्थकामाध्ययनं तदपेक्षया क्षुल्लिकेयमिति।

आचारस्य तु चतुष्को निक्षेपः, स चायम-नामाचारः स्थापनाचारो द्रव्यचारो भावाचारश्च बोद्धव्य इति गाथाक्षरार्थः ॥ भावार्थं तु वक्ष्यति, तत्र नामस्थापने क्षुण्णे, अतो द्रव्याचारमाह-नामानधावनवासनशिक्षापनसुकरणाविरोधीनि द्रव्याणि यानि लोके तानि द्रव्याचारं विजानीहि। अयमत्र भावार्थः-आचारणं आचारः द्रव्यस्याचारो द्रव्याचारः, द्रव्यस्य यदाचरणं तेन तेन प्रकारेण परिणमनमित्यर्थः, तत्र नामनमवनतिकरणमुच्यते, तत्प्रति द्विविधं द्रव्यं भवति-आचारवदना-चारवच्च, तत्परिणामयुक्तमयुक्तं चेत्यर्थः, तत्र तिनिशलतादि आचारवत्, एरण्डाद्यनाचारवत्, एतदुक्तं भवति-तिनिशलताद्याचरति तं भावं-तेन रूपेण परिणमति न त्वेरण्डादि, एवं सर्वत्र भावना कार्या, नवरमुदाहरणानि प्रदर्श्यन्ते-धावनं प्रति हरिद्रारक्तं वस्त्रमाचारवत् सुखेन प्रक्षाल-नात्, कृमिरागरक्तमनाचारवत् तद्भस्मनोऽपि रागानपगमात्, वासनं प्रति कवेलुकाद्याचारवत् सुखेन पाटलाकुसुमादिभिर्वास्यमानत्वात्, वैडूर्याद्यनाचारवत् अशक्यत्वात्, शिक्षणं प्रत्याचार-वच्छुकसारिकादि सुखेन मानुषभाषासम्पादनात्, अनाचारवच्छकुन्तादि तदनुपपत्तेः, सुकरणं प्रत्याचारवत् सुवर्णादि सुखेन तस्य तस्य कटकादेः करणात् अनाचारवत् घण्टालोहादि तत्रान्यस्य तथाविधस्य कर्तुमशक्यत्वादिति, अविरोधं प्रत्याचारवन्ति गुडदध्यादीनि रसोत्कर्षादुपभोग-गुणाच्च, अनाचारवन्ति तैलक्षीरादीनि विपर्ययादिति, एवम्भूतानि द्रव्याणि यानि लोके तान्येव तस्याचारस्य तद्रव्याव्यतिरेकाद्रव्याचारस्य च विवक्षतत्वात्तथाऽऽचरणपरिणामस्य भावत्वेऽपि गुणाभावाद्रव्याचारं विजानीहिअवबुध्यस्वेति गाथार्थः ॥

उक्तो द्रव्याचारः, साम्प्रतं भावा-चारमाह-

**नि. [१८२]** दंसणनाणचरित्ते तवआयारे य वीरियायारे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एसो भावायारो पंचविहो होइ नायव्वो॥

नि.[१८३] निस्संकिय निक्कंखियनिव्वितिगिच्छा अमूढदिट्ठी अ।
उववूह थिरीकरणे वच्छल्लपभावणे अट्ठ॥

नि.[१८४] अइसेसइड्डियायरियवाइधम्मकहीखमगनेमित्ती।
विज्जारायगणसंयमा य तित्थ पभाविंति॥

नि.[१८५] काले विनए बहुमाणे उवहाणे तह य अनिण्हवणे।
वंजणअत्थतदुभए अट्ठविहो नाणमायारो॥

नि.[१८६] पणिहाणजोगजुत्तो पंचहिं समिईहिं तिहि य गुत्तीहिं।
एस चरित्तायारो अट्ठविहो होइ नायव्वो॥

नि.[१८७] बारसविहम्मिवि तवे सब्भिंतरबाहिरे कुसलदिट्ठे।
अगिलाइ अनाजीवी नायव्वो सो तवायारो॥

नि.[१८८] अनिगूहियबलविरियो परक्कमइ जो जहुत्तमाउत्तो।
जुंजइ अ जहाथामं नायव्वो वीरियायारो॥

वृ.दर्शनज्ञानचारित्रदिष्वाचारशब्दः प्रत्येकमभिसम्बध्यते, दर्शनाचारो ज्ञानाचारश्चारित्राचारस्तपआचारो वीर्याचारश्चेति, तत्र दर्शनं सम्यग्दर्शनमुच्यते, न चक्षुरादिदर्शनं, तच्च क्षायापशमिकादिरूपत्वाद्भाव एव, ततश्च तदाचरणं दर्शनाचार इत्येवं शेषेष्वपि योजनीयं, भावार्थं तु वक्ष्यति-एष भावाचारः पञ्चविधो भवति ज्ञातव्यः, इति गाथाक्षरार्थः। अधुना भावार्थ उच्यते-तत्र 'यथोद्देशं निर्देश' इत्यादौ दर्शनाचारभावार्थः, दर्शनाचारश्चाष्टधा, तथा चाह गाथा-'निस्संकी'त्यादि, निःशङ्कित इत्यत्र शङ्का शङ्कितं निर्गतं शङ्कितं यतोऽसौ निःशङ्कितः देशसर्वशङ्कारहित इत्यर्थः, तत्र देशशङ्का समाने जीवत्वे कथमेको भव्योऽपरस्त्वऽभव्य इति शङ्कते, सर्वशङ्का तु प्राकृतनिबद्धत्वात्सकलमेवेदं परिकल्पितं भविष्यतीति, न पुनरालोचति यथा-भावा हेतुग्राह्या अहेतुग्राह्याश्च, तत्र हेतुग्राह्या जीवास्तित्वादयः, अहेतुग्राह्या भव्यत्वादयः, अस्माद्यपेक्षया प्रकृष्टज्ञानगोचरत्वातए तद्धेतूनामिति, प्राकृतनिबन्धोऽपि बालादिसाधारण इति, उक्तञ्च-

"बालस्त्रीमूढमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम्।
अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः स्मृतः॥"

दृष्टेष्टाविरुद्धश्चेति, उदाहरणं चात्र पेयापेयकौ यथाऽऽवश्यके, ततश्च निःशङ्कितो जीव एवार्हच्छासनप्रतिपन्नो दर्शनाचारणात् तत्प्रभावात् मोक्षाभाव इति, एवं शेषपदेष्वपि भावना कार्येति १।

तथा निष्काङ्क्षितो-देशसर्वकाङ्क्षरहितः, तत्र देशकाङ्क्षा एकं दर्शनं काङ्क्षति दिगम्बरदर्शनादि, सर्वकाङ्क्षा तु सर्वाण्येवेति, नालोचयति षड्जीवनिकायपीडामसत्प्ररूपणां च, उदाहरणं चात्र राजामात्यौ यथाऽऽवश्यक इति २।

विचिकित्सा-मतिविभ्रमः निर्गता विचिकित्सा-मतिविभ्रमो यतोऽसौ निर्विचिकित्सः, साध्वेव जिनदर्शनं किन्तु प्रवृत्तस्यापि सतो ममास्मात्फलं भविष्यति न भविष्यतीति ?, क्रियायाः कृषीबलादिषूभयोपलब्धेरिति विकल्परहितः, न ह्यविकल्प उपाय उपेयवस्तुपरिप्रापको न भवतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्जातनिश्चयो निर्विचिकित्स उच्यते एतावताऽंशेन निःशङ्कितादिभिन्नः, उदाहरणं चात्र विद्यासाधको यथाऽऽवश्यक इति, यद्वा निर्विज्जुगुप्सः-साधुजुगुप्सारहितः, उदाहरणं चात्र श्रावकदुहिता यथाऽऽवश्यक एव ३।

तथाऽमूढदृष्टिश्च बालतपस्वितपोविद्याऽतिशयदर्शनैर्न मूढा-स्वरूपान्नलिता दृष्टिः-सम्यग्दर्शनरूपा यस्यासावमूढदृष्टिः, अत्रोदाहरणं सुलसा साविया, जहा लोइयरिसी अंबडो रायगिहं गच्छंतो बहुयाणं भवियाणं थिरीकरणणिमित्तं सामिणा भणिओ-सुलसं पुच्छिज्जासि, अंबडो चिंतेइ-पुन्नमतिया सुलसा जं अरहा पच्छेइ, तओ अम्बडेण परिक्खणाणिमित्तं सा भत्तं मग्गिया, ताए न दिन्नं, तओ तेन बहूणि रूवाणि विउव्वियाणि, तहवि ण दिन्नं, ण य संमूढा, तह कुतित्थियरिद्धीओ दट्ठुण अमूढदिट्ठिया भवियव्वं ४।

एतावान् गुणप्रधानो दर्शनाचारनिर्देशः, अधुना गुणप्रधानः 'उपबृंहणस्थिरीकरणे' इति, उपबृहणं च स्थिरीकरणं च उपबृंहणस्थिरीकरणे, तत्रोपबृंहणं नाम समानधार्मिकाणां सद्गुणप्रशंसनेन तदवृद्धिकरणम्, स्थिरीकरणं तु धर्माद्विषीदतां सतां तत्रैव स्थापनं। उववूहणाए उदाहरणं जहा रायगिहे नयरे सेणिओ राया, इओ य सक्को देवराया सम्मत्तं पसंसइ। इओ य एगो देवो असद्दहंतो नगरबाहिं सेणियस्स निग्गयस्स चेल्लयरूवं काऊणं अनिमिसे गेण्हइ, ताहे तं निवारेइ, पुणरवि अन्नत्थ संजई गुव्विणी पुरओ ठिया, ताहे अपवरगे ठविऊण जहा ज कोइ जाणइ तहा सूइगिहं कारवेइ, जं किंचि सुइकम्मं तं सयमेव करेइ, तओ सो देवो संजइरूवं परिच्चइऊण दिव्वं देवरूवं दरिसेइ, भणइ य-भो सेणिय! सुलद्धं ते जम्मजीवियस्स फलं जेण ते पवयणस्सुवरिं एरिसी भत्ती भवइत्ति उववूहेऊण गओ। एवं उववूहियव्वा साहम्मिया।

स्थिरीकरणे उदाहरणं जहा उज्जेनीए अज्जासाढो कालं करेंते संजए अप्पाहेइ-मम दरिसावं दिज्जह, जहा उत्तरज्झयणेसु एतं अक्खाणयं सव्वं तहेव, तम्हा जहा सो अज्जासाढो थिरो करो एवं जे भविया ते थिरीकरेयव्वा।

तथा 'वात्सल्यप्रभावना' इति वात्सल्यं च प्रभावना च वात्सल्यप्रभावने; तत्र वात्सल्यंसमान-धार्मिकप्रीत्युपकारकरणं प्रभावना-धर्मकथादिभिस्तीर्थख्यापनेति, तत्र वात्सल्ये उदाहरणं अज्जवइरा, जहा तेहिं दुब्भिक्खे संघो नित्थारिओ एयं सव्वं जहा आवस्सए तहा नेयं, पभावणाए उदाहरणं ते चेव अज्जवइरा जहा तेहिं अग्गिसिहाओ सुहुमकाइआइं आनेऊण सासनस्स उब्भावणा कया एयमक्खाणयं जहा आवस्सए तहा कहेयव्वं, एवं साहुणावि सव्वपयत्तेण सासनं उब्भावेयव्वं। अष्टावित्यष्टप्रकारो दर्शनाचारः, प्रकाराश्चोक्ता एव निःशङ्कितादयः, गुणप्रधानश्चायं निर्देशो गुणगुणिनोः कथंचिद्भेदख्यापनार्थः, एकान्ताभेदे तन्निवृत्तौ गुणिनोऽपि निवृत्तेः शून्यतापत्तिरिति गाथार्थः।

स्वपरोपकारिणी प्रवचनप्रभावना तीर्थकरनामकर्मनिबन्धनं चेति भेदेन प्रवचनप्रभावकानाह-अतिशयी-अवध्यादिज्ञानयुक्तः ऋद्धिग्रहणादामर्षौषध्यादिऋद्धिप्राप्तः ऋद्धि(मत्)-प्रव्रजितो वा आचार्यवादिधर्मकथिक्षपकनैमित्तिकाः प्रकटार्थः विद्याग्रहणाद् विद्यासिद्धः आर्यस्वपुटवत् सिद्धमत्रः 'रायगणसंमया' राजगणसंमताश्चेति राजसंमता-मन्त्र्यादयः गणसंमता-महत्तरादयः चशब्दाद्दनश्राद्धकादिपरिग्रहः, एते तीर्थं-प्रवचनं प्रभावयन्ति-स्वतः प्रकाश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावमेव सहकारितया प्रकाशयन्तीति गाथार्थः ।

उक्तो दर्शनाचारः, साम्प्रतं ज्ञानाचारमाह-'काल' इति, यो यस्याङ्गप्रविष्टादेः श्रुतस्य काल उक्तः तस्य तस्मिन्नेव काले स्वाध्यायः कर्तव्यो नान्यदा, तीर्थकरवचनात्, दृष्टं च कृष्यादेरपि कालग्रहणे फलं विपर्यये च विपर्यय इति, अत्रोदाहरणम्-एक्को साहू पादोसियं कालं घेत्तूणं अइक्कंताएवि पढमपोरिसीए अनुवओगेण पढइ कालियं सुयं, सम्मदिट्ठी देवया चिंतेइ-मा अन्ना पंतदेवया छलिज्जइत्तिकाउं तक्कं कुंडे घेत्तूणं तक्कं तक्कंति तस्स पुरओ अभिक्खणं अभिक्खणं आगयागयाइं करेइ, तेन ये चिरस्स सज्झायस्स वाघायं करेइत्ति, भणिआ य-अयाणिए! को इमो तक्कस्स विक्कणकालो ?, वेलं ता पलोएह, तीएवि भणियं-अहो को इमो कालियसुअस्स य सज्झायकालोत्ति, तओ साहुणा नायं-जहा न एसा पागइत्थियत्ति उवउत्तो, नाओ अड्ढरत्तो, दिन्नं मिच्छादुक्कडं, देवयाए भणियं-मा एवं करेज्जासि, मा पंता छलेज्जा, तओ काले सज्जाइयव्वं न उ अकालेत्ति ।

तथा श्रुतग्रहणं कुर्वता गुरोर्विनयः कार्यः, विनयः-अभ्युत्थानपादधावनादिः, अविनयगृहीतं हि तदफलं भवति, इत्थ उदाहरणं सेणिओ राया भज्जाए भण्णइ-ममेगखंभं पासायं करेहि, एवं दुमपुप्फियज्झयणे वक्खाणियं, तम्हा विनएण अहिज्झियव्वं नो अविनएण । तथा श्रुतग्रहणोद्यतेन गुरोर्बहुमानः कार्यः, बहुमानो नामाऽऽन्तरो भावप्रतिबन्धः, एतस्मिन् सत्यक्षेपेणाधिकफलं श्रुतं भवति, विनयबहुमाणेसु चउभंगा-एगस्स विनओ न बहुमाणो अवरस्स बहुमाणो न विनओ अन्नस्स विनओऽवि बहुमाणोऽवि अन्नस्स न विनओ न बहुमाणो ।

एत्थ दोण्हवि विसेसोवदंसणत्थं इमं उदाहरणं-एगंमि गिरिकंदरे सिवो, तं च बंभणो पुलिंदो य अच्चंति, बंभणो उवलेवणसम्मज्जणावरिसे य पयओ सूईभूओ अच्चिवत्ता थुणइ विनयजुत्तो, न पुण बहुमानेन, पुलिंदो पुण तंमि सिवे भावपडिबद्धो गल्लोदएण ण्हावेइ, ण्हविऊण उवविट्ठो, सिवो य तेन समं आलावसंलाकहाहिं अच्छइ, अन्नया य तेसिं बंभणेणं उल्लावसद्दो सुओ, तेन पडियारिऊण उवलद्धो-तुमं एरिसो चेव कडपूयणसिवो जो एरिसेण उच्छिट्ठएण समं मंतेसि, तओ सिवो भणइ-एसो मे बहुमाणेइ, तुमं पुणो न तहा, अन्नया य अच्छीणि उक्खणिऊण अच्छइ, सिवो, बंभणो अ आगंतुं रडिउमुवसंतो, पुलिंदो य आगओ सिवस्स अच्छिं न पेच्छइ, तओ अप्पनयं अच्छिं कंडफलेण ओक्खणित्ता सिवस्स लाएइ, तओ सिवेण बंभणो पत्तियाविओ, एवं नाणमंतेसु विनओ बहुमाणो य दोऽवि कायव्वाणि ।

तथा श्रुतग्रहणमभीप्सतोपधानं कार्यं, उपदधातीत्युपधानं-तपः, तद्धि यद्यत्राध्ययने आगाढादियोगलक्षणमुक्तं तत्तत्र कार्यं, तत्पूर्वकश्रुतग्रहणस्यैव सफलत्वात्, अत्रोदाहरणम्-एगे आयरिया, ते वायणाए संता परितंता सज्झाएऽपि असज्झाइयं घोसेउमारद्धा, नाणंतरायं बंधिऊण कालं काऊण देवलोकं गया, तओ देवलोगाओ आउक्खएण चुया आहीरकुले पच्चायाया भोगे भुजंति, अन्नया य से धूया जाया, सा य अईव रूवस्सिणी, ताणि य पच्चंतयाणि गोचारणनिमित्तं अन्नत्थ वच्चंति, तीए दारियाए पिउणो सगडं सव्वसगडाणं पुरओ गच्छइ, सा य दारिया तस्स सगडस्स धुरतुंडे ठिया वच्चइ, तरुणइत्तेहिं चिंतियंसमाइं काउं सगडाइं दारियं पेच्छामो, तेहिं सगडाओ उप्पहेण खेडिया, विसमे आवडिया समाणा भग्गा, तओ लोएण तीए दारियाए नामं कयं असगडत्ति, ताए दारियाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असगडाए पिया असगडपियत्ति, तओ तस्स तं चेव वेरग्गं जायं, तं दारियं एगस्स दाऊण पव्वइओ जाव चाउरंगिज्जं ताव पढिओ, असंखए उद्दिट्ठे तं नाणावरणिज्जं से कम्मं उदिन्नं, पढंतस्सऽवि किंचि न ठाइ, आयरिया भणंति, छट्ठेणं ते अनुन्नवइत्ति, तओ सो भणइ-एयस्स केरिसो जोओ ?, आयरिया भणंति-जाव न ठाइ ताव आयंबिलं कायव्वं, तओ सो भणइ-तो एवं चेव पढामि, तेन तहा पढंतेन बारस रूवाणि बारससंवच्छरेहिं अहियाणि, ताव से आयंबिलं कयं, तओ नाणावरणिज्जं कम्मं खीणं, एवं जहाऽसगपियाए आगाढजोगो अनुपालिओ तहा सम्मं अनुपालियव्वं, उवहाणेत्ति गयं।

तथा 'अनिण्हवणि'त्ति गृहीतश्रुतेनाह्निवः कार्यः, यद्यस्य सकाशेऽधीतं तत्र स एव कथनीयो नान्यः, चित्तकालुष्यापत्तेरिति, अत्र दृष्टान्तः-एगस्स ण्हावियस्स खुरभंडं विज्जासामत्थेण आगासे अच्छइ, तं च एगो परिव्वायगो बहूहिं उवसंपज्जणाहिं उवसंपाज्जिऊण, तेन सा विज्जा लद्धा, ताहे अन्नत्थ गंतुं तिदंडेण आगासगएण महाजनेन पूइज्जइत्ति, रन्ना य पुच्छिओ-भयवं ! किमेस विज्जाइसयो उय तवाइसओ त्ति?, सो भणइ-विज्जाइसओ, कस्स सगासाओ गहिओ ?, सो भणइ-हिमवंते फलाहारस्स रिसिणो सगासे अहिज्जिओ, एवं तु वुत्ते समाणे संकिलेसदुट्ठयाए तं तिदंडं खडत्ति पडियं, एवं जो अप्पागमं आयरियं निण्हवेऊण अन्नं कहेइ तस्स चित्तसंकिलेसदोसेणं सा विज्जा परलोए न हवइत्ति, अनिण्हवणित्ति गयं।

तथा व्यञ्जनार्थतदुभयान्याभश्रित्य भेदो न कार्य इति वाक्यशेषः एतदुक्तं भवति-श्रुतप्रवृत्तेन तत्फलमभीप्सता व्यञ्जनभेदोऽर्थभेद उभयभेदश्च न कार्य इति, तत्र व्यञ्जनभेदो यथा-'धम्मो मंगलमुक्किट्ठं'मिति वक्तव्ये 'पुण्णं कल्लाणमुक्कोस'मिति, अर्थभेदस्तु यथा 'आवन्ती केयावन्ती लोगंसि विप्परामुसन्ती' त्यत्राचारसूत्रे यावन्तः केचन लोके-अस्मिन् पाखण्डिलोके विपरामृशन्तीत्येवंविदधार्थाभिधाने अवन्तिजनपदे केया-रज्जुर्वान्ता-पतिता लोकः परामृशति कूप इत्याह, उभयभेदस्तु द्वयोरपि याथात्म्योपमर्देन यथा-'धर्मो मङ्गलमुत्कृष्टः अहिंसा पर्वतमस्तक' इत्यादि, दोषश्चात्र व्यञ्जनभेदेऽर्थभेदस्तद्भेदे क्रियाया भेदस्तद्भेदे मोक्षाभाव-स्तदभावे च निरर्थिका दीक्षेति, उदाहरणं चात्रांधीयतां कुमार इति सर्वत्र योजनीयं, क्षुण्णत्वाद-नुयोगद्वारेषु चोक्तत्वान्नेह दर्शितमिति । अष्टविधः-अष्टप्रकारः कालदिभेदद्वारेण ज्ञानाचारो-ज्ञानासेवनाप्रकार इति गाथार्थः।

उक्तो ज्ञानचारः, साम्प्रतं चारित्राचारमाह-प्रणिधानं-चेतःस्वास्थ्यं तत्प्रधाना योगा-व्यापारास्तै-र्युक्तः-समन्वितः प्रणिधानयोगयुक्तः, अयं चौघतोऽविरतसम्यग्दृष्टिरपि भवत्यत आह-पञ्चभिः समितिभिस्तिसृभिश्च गुप्तिभिर्यः प्रणिधानयोगयुक्तः, एतद्योगयुक्त एतद्योगवानेव, अथवा पञ्चसु समितिसु तिसृषुगुप्तिष्वस्मिन् विषये-एता आश्रित्य प्रणिधानयोगयुक्तो य एष चारित्राचारः, आचाराचारवतोः कथंचिदव्यतीरेकादष्टविधो भवति ज्ञातव्यः, समितिगुप्तियोगभेदात्, समिति-गुप्तिरूवं च शुभं प्रवीचाराप्रवीचाररूपं यथा प्रतिक्रमणे इति गाथार्थः।

उक्तश्चारित्राचारः, साम्प्रतं तपआचारमाह-द्वादशविधेऽपि तपसि-प्रथमाध्ययनोक्तस्वरूपे साभ्यन्तरबाह्येऽनशनादिप्रायश्चित्तादिलक्षणे कुशलदृष्टे-तीर्थकरोपलब्धे अग्लान्या न राजवेष्टि-कल्पेन यथाशक्त्या वा अनाजीविको-निःस्पृहः फलान्तरमधिकृत्य यो ज्ञातव्योऽसौ तपआचारः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचारतद्वतोरभेदादिति गाथार्थः।

उक्तस्तपआचारः, अधुना वीर्याचारमाह-अनिगूहितबलवीर्यः-अनिह्नुतबाह्याभ्यन्तरसामर्थ्यः सन् पराक्रमते-चेष्टते यो यथोक्तं षट्त्रिंशल्लक्षमाचारमाश्रित्येति वाक्यशेषः, षट्त्रिंशद्विधत्वं चाचारस्य ज्ञानदर्शनचारित्राचारणामष्टविधत्वात्तपआचारास्य च द्वादशविधत्वाच्चेति, उपयुक्त इत्यनन्यचित्तः, पराक्रमते ग्रहणकाले, तत ऊर्ध्वं युनक्ति च योजयति च-प्रवर्तयति च यथोक्तं षट्त्रिंशल्लक्षणमाचारमिति सामर्थ्याद्गम्यते, यथास्थायं-यथासामर्थ्यः यो ज्ञातव्योऽसौ वीर्याचारः आचाराचारवतोः कथञ्चिदव्यतिरेकादिति गाथार्थः॥

अभिहितो वीर्याचारः, तद-भिधानाच्चाचार इति, साम्प्रतं कथामाह-

नि.[१८९] अत्थकहा कामकहा धम्मकहा चेव मीसिया य कहा।
एत्तो एक्केक्कावि य नेगविहा होइ नायव्वा॥

नि.[१९०] विज्जासिप्पमुवाओ अनिवेओ संचओ य दक्खत्तं।
सामं दंडो भेओ उवप्पयाणं च अत्थकहा॥

नि.[१९१] सत्थाहसुओ दक्खत्तणेण सेट्ठीसुओ य रूवेणं।
बुद्धीए अमच्चसुओ जीवइ पुन्नेहिं रायसुओ॥

नि.[१९२] दक्खत्तणयं पुरिस्सं पचग सइगमाहु सुंदेरं।
बुद्धी पुण साहस्सा सयसाहस्साइं पुन्नाइं।

**वृ.**'अर्थकथे'ति विद्यादिरर्थस्तत्प्रधाना कथाऽर्थकथा, एवं कामकथा धर्मकथा चैव मिश्रा च कथा, अत आसां कथानां चैकैकापि च कथा अनेकविधा भवति ज्ञातव्येत्युपन्यस्तगाथार्थः। अधुनाऽर्थकथामाह-विद्याशिल्पं उपायोऽनिर्वेदः सञ्चयश्च दक्षत्वं साम दण्डो भेद उपप्रदानं चार्थकथा, अर्थप्रधानत्वादित्यक्षरार्थः, भावार्थस्तु वृद्धविवरणादवसेयः, तच्चेदम्विज्जं पडुच्चऽत्थकहा जो विज्जाए अत्थं उवज्जिणति, जा एगेण विज्जा साहिया सा तस्स पंचयं पइप्पभायं देइ, जहा वा सच्चइस्स विज्जाहरचक्कवट्टिस्स विज्जापभावेण भोगा उवणाया, सच्चइस्स उप्पत्ती जहा य सड्ढकुलेऽवत्थितो जहा य महेसरो नामं कयं एवं निरवसेसं जहावस्सए जोगसंगहेसु तहा भाणियव्वं विज्जत्ति गयं। इदानिं सिप्पेत्ति, सिप्पेणत्थो उवज्जिणइ त्ति, एत्थ उदाहरणं कोक्कासो जहावस्सए, सिप्पेत्ति गयं, इयदानिं उवाएत्ति, एत्थ दिट्ठंतो चाणक्को, जहा चाणक्केण नानाविहेहिं उवायेहिं अत्थो उवज्जिओ, कहं ?-दो मज्झ धाउरत्ताओ०, एयंपि अक्खाणयं जहावस्सए तहा भाणियव्वं। उवाए त्तिगयं, इयदानिं अनिव्वेए संचए य एक्कमेव उदाहरणं मम्मणवाणिओ, सोवि जहावस्सए तहा भाणियव्वो।

साम्प्रतं दक्षत्वं तत्सप्रसङ्गमाह-दक्षत्वं पुरुषस्य सार्थवाहसुतस्य पञ्चगमिति-पञ्चरूपकफलं, शतिकं-शतफलमाहुः सौन्दर्यं श्रेष्ठीपुत्रस्य, बुद्धिः पुनः सहस्रवती-सहस्रफला मन्त्रिपुत्रस्य, शतसहस्राणि पुण्यानि-शतसहस्रफलानि राजपुत्रस्येति गाथाक्षरार्थः। भावार्थस्तु कथानकादवसेयः, तच्चेदम्-जहा बंभदत्तो कुमारो कुमारच्चपुत्तो सेट्ठिपुत्तो सत्थवाहपुत्तो, एए चउरोऽवि परोप्परं उल्लावेइ-जहा को भे केण जीवइ ?, तत्थ रायपत्तेण भणियं-अहं पुन्नेहिं जीवामि, कुमारामच्चपुत्तेण भणियं-अहं बुद्धीए, सेट्ठिपुत्तेण भणियं-अहं रूवसिसत्तणेण, सत्थवाहपुत्ता भणइ-अहं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्खत्तणेण, ते भणंति-अन्नत्थ गंतुं विन्नाणेमो, ते गया अन्नं नयरं जत्थ न नज्जंतिअ, उज्जाणे आवासिया, दक्खस्स आदेसो दिन्नो, सिग्धं भत्तपरिव्वयं आणेहि, सो वीहिं गंतुं एगस्स थेरवाणिययस्स आवणे ठिओ, तस्स बहुगा कइया एंति, तद्दिवसं कोवि ऊसवो, सो न पहुप्पति पुडए बंधेउं, तओ सत्थवाहपुत्तो दक्खत्तणेण जस्स जं उवउज्जइ लवणतेल्लधयगुडसुंठिमिरिय-एवमाइ तस्स तं देइ, अइविसिट्ठो लाहो लद्धो, तुट्ठो भणइ-तुम्हेत्थ आगंतुया उदाहु वत्थव्वया?, सो भणइ-आगंतुया, तो अम्ह गिहे असनपरिग्गहं करेज्जह, सो भणइ-अन्ने मम सहाया उज्जाणे अच्छंति तेहिं विना नाहं भुंजामि, तेन भणियं-सव्वेऽवि एंतु, आगया, तेन तेसिं भत्तसमालहणतंबोलाइ उवउत्तं तं पञ्चण्हं रूवयाणं। बिइयदिवसे रूवस्सी वणियपुत्तो वुत्तो-अज्ज तुमे दायव्वो भत्तपरि-व्वओ, एवं भवउत्ति सो उट्ठेऊण गणियापाडगं गओ अप्पयं मंडेउं, तत्थ य देवदत्ता नाम गणिया पुरिसवेसिणी बहूहिं रायपुत्तसेट्ठिपुत्तादीहिं मग्गिया नेच्छइ, तस्स य तं रूवसमुदयं दट्ठुण खुब्भिया पडिदासियाए गंतूण तीए माऊए कहियं जहा दारिया सुंदरजुवाणे दिट्ठिं देइ, तओ सा भणइ-भण एयं मम गिहमनुवरोहेण एज्जह इहेव भत्तवेलं करेज्जइ तहेवागया सइओ दव्ववओ कओ।

तइयदिवसे बुद्धिमन्तो अमच्चपुत्तो संदिट्ठो अज्ज तुमे भत्तपरिव्वओ दायव्वो, एवं हवउत्ति, सो गओ करणसालं, तत्थ य तईओ दिवसो ववहारस्स छिज्जंतस्स परिच्छेजं न गच्छइ, दो सवत्तीओ, तासिं भत्ता उवरओ, एक्काए पुत्तो अत्थि इयरी अपुत्ता य, सा तं दारयं नेहेण उवचरइ, भणइ य-मम पुत्तो, पुत्तमाया भणइ य-मम पुत्तो, तासिं न परिछिज्जइ, तेन भणियं-अहं छिंदामि ववहारं, दारओ दुहा कज्जउ दव्वंपि दुहा एव, पुत्तमाया भणइ-ण मे दव्वेण कज्जं दारगोऽवि तीए भवउजीवन्तं पासिहामि पुत्तं, इयरी तुसिणिया अच्छइ, ताहे पुत्तमायाए दिन्नो, तहेव सहस्सं उवओगो। चउत्थे दिवसे रायपुत्तो भणिओ-अज्ज रायपुत्त - तुम्हेहिं पुण्णाहिएहिं जोगवहणं वहियव्वं, एवं भवउत्ति, तओ रायपुत्तो तेसिं अंतियाओ निग्गंतुं उज्जाणे ठियो, तंमि य नयरे अपुत्तो राया मओ, आसो अहिवासिओ, जीए रुकखछायाए रायपुत्तो निवण्णो सा न ओयत्ताति, तओ आसेण तस्सोवरि ठाइऊण हिंसितं, राया य अभिसित्तो, अनेगाणि सयसहस्साणि जायाणि, एवं अत्थुप्पत्ती भवइ।

दक्खत्तणं ति दारं गयं,

इदानिं सामभेयदण्डुवप्पयाणेहिं चउहिं जहा अत्थो विढप्पति, एत्थिमं उदाहरणं-सियालेण भणंतेन हत्थी मओ दिट्ठो, सो चिंतेइ-लद्धो मए उवाएण ताव निच्छएण खाइयव्वो, जाव सिंहो आगओ, तेन चिन्तिंय-सचिट्ठेण ठाइयव्वं एयस्स, सिंहेण भणियं-किं अरे! भाइणेज्ज अच्छि-ज्जइ?, सियालेण भणियंआमंति माम!, सिंहो भणई-किमेयं मयं ति?, सियालो भणइ-हत्थी, केन मारिओ?-वग्घेण, सिंहो चिंतेइ-कहमहं ऊणजातिएण मारियं भक्खामि?, गओ सिंहो, नवरं वग्घो आगओ, तस्स कहियं-सीहेण मारिओ, सो पाणियं पाउं णिग्गओ, वग्घो नट्ठो, एस भेओ, जाव काओ आगओ, तेन चिन्तियं-जइ एयस्स न देमि तओ काउ काउत्तिवासियसद्देणं अन्ने कागा एहिंति, तेसिं कागरडणसद्देणं सियालादि अन्ने बहवे एहिंति, कित्तिया वारेहामि, ता एयस्स उवप्पयाणं देमि, तेन तओ तस्स खंडं छित्ता दिण्णं, सो तं घेत्तूण गओ, जाव सियालो आगओ, तेन नायमेयस्स हठेण वारणं करेमिति भिउडिं काऊण वेगो दिन्नो, नट्ठो सियालो, उक्तं च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत्।
नीचमल्यप्रदानेन, सदृशं च पराक्रमैः ॥'

इत्युक्तः कथागाथाया भावार्थः, उक्ताऽर्थकथा साम्प्रतं कामकथामाह-

नि.[१९३] रूवं वओ य वेसो दक्खत्तं सिक्खियं च विसएसुं।
दिट्ठं सुयमणुभूयं च संथवो चेव कामकहा ॥

वृ. रूप सुन्दरं वयश्चोदग्रं वेषः उज्ज्वलः दाक्षिण्यं-मार्दवं, शिक्षितं च विषयेषु-शिक्षा च कलासु, दृष्टमद्‌भूतदर्शनमाश्रित्य श्रुतं चानुभूतं च संस्तवश्च-परिचयश्चेति कामकथा। रूपे च वसुदेवादय उदाहरणं, वयसि सर्व एव प्रायः कमनीयो भवति लावण्यात्, उक्तं च-

"यौवनमुदग्रकाले विदधाति विरूपकेऽपि लावण्यम्।
दर्शयति पाकसमये निम्बलफलस्यापि माधुर्यम् ॥" इति,

वेष उज्जवलः कामाङ्गं, 'यं कञ्चन उज्जवलवेषं पुरुषं दृष्ट्वा स्त्री कामयते' इति वचनात्, एवं दाक्षिण्यमपि "पञ्चालः स्त्रीषु मार्दवम्" इति वचनात्, शिक्षा च कलासु कामाङ्गं वैदग्ध्यात्,

"कलानां ग्रहणादेव, सौभाग्यमुपजायते।
देशकालौ त्वपेक्ष्यासां, प्रयोगः संभवेन्न वा ॥"

अन्ये त्वत्राचलमूलदेवौ देवदत्तां प्रतीत्येक्षुयाचनायां प्रभूतासंस्कृतस्तोकसंस्कृतप्रदान-द्वारेणोदाहरणमधभिदधति, दृष्टमधिकृत्य कामकथा यथा नारदेन रुक्मिणीरूपं दृष्ट्वा वासुदेवे कृता, श्रुतं त्वधिकृत्य यथा पद्मनाभेन राज्ञा नारदाद्रौपदीरूपमाकर्ण्य पूर्वसंस्तुतदेवेभ्यः कथिता, अनुभतं चाधिकृत्य कामकथा यथा-तरङ्गवत्या निजानुभवकथने, संस्तवश्च-कामकथापरिचयः 'कारणानी' तिकामसूत्रपाठात्, अन्ये त्वभिदति-

'सइदंसणाउ पेम्मं पेमाउ रई रईय विस्संभो।
विस्संभाओ पणओ पञ्चविहं वड्डए पेम्मं ॥"

इति गाथार्थः। उक्ता कामकथा, धर्मकथामाह-

नि.[१९४] धम्मकहा बोद्धव्या चउव्विहा धीरपुरिसपन्नत्ता।
अक्खेवणि विक्खेवणि संवेगे चेव निव्वेए।

नि.[१९५] आयारे ववहारे पन्नत्ती चेव दिट्ठीवाए य।
एसा चउव्विहा खलु कहा उ अक्खेवणी होइ।

नि.[१९६] विज्जा चरणं च तवो पुरिसक्कारो य समिइगुत्तीओ।
उवइस्सइ खलु जहियं कहाइ अक्खेवणीइ रसो ॥

नि.[१९७] कहिऊण ससमयं तो कहेइ परसमयमह विवच्चासा।
मिच्छासम्मावाए एमेव हवंति दो भेया ॥

नि.[१९८] जा ससमयवज्जा खलु होइ कहा लोगवेयसंजुत्ता।
परसमयाणं च कहा एसा विक्खेणी नाम ॥

नि.[१९९] जा ससमएण पुव्विं अक्खाया तं छुभेज्ज परसमए।
परसासणवक्खेवा परस्स समयं परिकहेइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[२००] आयपरसरीरगया इहलोए चेव तहय परलोए।
एसा चउव्विहा खलु कहा उ संवेयणी होइ॥

नि.[२०१] वीरियविउव्वणिड्ढी नाणचरणदंसणाण तह इड्ढी।
उवइस्सइ खलु जहियं कहाइ संवेयणीइ रसो॥

नि.[२०२] पावाणं कम्माणं असुभविभागो कहिज्जए जत्थ।
इह य परत्थ य लोए कहा उ निव्वेयणी नाम।

नि.[२०३] थोवंपि पमायकयं कम्मं साहिज्जई जहिं नियमा।
पउरासुहपरिणामं कहाइ निव्वेयणीइ रसो॥

नि.[२०४] सिद्धि य देवलोगो सुकुलप्पत्ती य होइ संवेगो।
नरगो तिरिक्खजोणी कुमाणुसत्तं च निव्वेओ॥

नि.[२०५] वेणइयस्स(य) पढमया कहा उ अक्खेवणी कहेयव्वा।
तो ससमयमहियत्थो कहिज्ज विक्खेवणी पच्छा॥

नि.[२०६] अक्खेणीअक्खित्ता जे जीवा ते लभन्ति संमत्तं।
विक्खेवणीएँ भज्जं गाढतरागं च मिच्छत्तं॥

**वृ.** धर्मविषया कथा धर्मकथा असौ बोद्धव्या चतुर्विधा धीरपुरुषप्रज्ञप्ता-तीर्थकरगणधर-प्ररूपितेत्यर्थः, चातुर्विध्यमेवाह-आक्षेपणी विक्षेपणी संवेगश्चैव निर्वेद इति, 'सूचनात्सूत्र'-मितिन्यायात् संवेजनी निर्वेदनी चैवेत्युपन्यासगाथाक्षरार्थः॥ भावार्थं त्वाह-आचारेलोचास्ननादिः व्यवहारः-कथञ्चिदापन्नदोषव्यपोहाय प्रायश्चित्तलक्षणः प्रज्ञप्तिश्चैव-संशयापन्नस्य मधुरवचनैः प्रज्ञापना दृष्टिवादश्च-श्रोत्रपेक्षया सूक्ष्मजीवादिभावकथनं, अन्ये त्वभिद्धति, आचारादयो ग्रन्था एव परिगृह्यन्ते, आचाराद्यभिधानादिति, एषा-अनन्तरोदिता चतुर्विधा खलुशब्दो विशेषणार्थः श्रोत्रपेक्षयाऽऽचारदिभेदानाश्रित्यानेकप्रकारेति कथा त्वाक्षेपणी भवति, तुरेवकारार्थः, कथैव प्रज्ञापकेनोच्यमाना नान्येन, आक्षिप्यन्ते मोहात्तत्त्वं प्रत्यनया भव्यप्राणिन इत्याक्षेपणी भवतीति गाथार्थः।

इदानीमस्या रसमाह-विद्या-ज्ञानं अत्यन्तापकारिभावतमोभेदकं चरणं-चारित्रं समग्रविरति-रूपं तपः-अनशनादि पुरुषकारश्च-कर्मशत्रुन् प्रति स्ववीर्योत्कर्षलक्षणः समितिगुप्तयः-पूर्वोक्ता एव, एतदुपदिश्यते खलु-श्रोतृभावापेक्षया सामीप्येन कथ्यते, एवं यत्र कचिदसावुपदेशः कथाया आक्षेपण्या रसो-निष्यन्दः सारइति गाथार्थः। गताऽऽक्षेपणी, विक्षेपणीमाह-कथयित्वा स्वसमयं-स्वसिद्धान्तं ततः कथयति परसमयं-परसिद्धान्तमित्येको भेदः, अथवा विपर्यासाद्-व्यत्ययेन कथयति-परसमयं कथयित्वा स्वसमयमिति द्वितीयः, मिथ्यासम्यग्वादयोरेवभेव भवतो द्वौ भेदाविति, मिथ्यावादं कथयित्वा सम्यग्वादं कथयति सम्यग्वादं च कथयित्वा मिथ्यावादमिति, एवं विक्षिप्यतेऽनया सन्मार्गात् कुमार्गे कुमार्गाद्वा सन्मार्गे श्रोतेति विक्षेपणीति गाथाक्षरार्थः।

भावार्थस्तु वृद्धविवरणादवसेयः तच्चेदम्-विक्खेवणी सा चउव्विहा पन्नत्ता, तंजहा-ससमयं कहेत्ता परसमयं कहेइ १ परसमयं कहेत्ता ससमयं कहेइ २ मिच्छावादं कहेत्ता सम्मावादं कहेइ-३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्मावादं कहेता मिच्छावायं कहेइ ज तत्थ पुव्वीं असमय कहेता परसमयं कहेइ – ससमय गुणे दीवेइ परसमयदोसे उवदंसेइ, एसा पढमा विक्खेवणी गया। इयदानिं बिइया भन्नइ-पुव्विं परसमयं कहेत्ता तस्सेव दोसे उवदंसेइ, पुणो ससमयं कहेइ, गुणे य से उवदंसेइ, एसा बिइया विकखेवणी गया।

इदानिं तइया–परसमयं कहेत्ता तेसु चेव परसमएसु जे भावा जिनप्पणीएहिं भावेहिं सह विरुद्धा असंता चेव वियप्पिया ते पुव्विं कहित्ता दोसा तेसिं भाविऊण पुणो जे जिनप्पणीयभावसरिसा घुणक्खरमिव कहवि सोभणा भणिया ते कहयइ, अहवा मिच्छावादो नत्थित्तं भन्नइ सम्मावादो अत्थित्तं भण्णति, तत्थ पुव्विं नाहियवाईणं दिट्ठीओ कहित्ता पच्छा अत्थित्तपक्खवाईणं दिट्ठीओ कहेइ, एसा तइया विक्खेवणी गया। इदानिं चउत्थी विक्खेवणी, सा वि एवं चेव, नवरं पुव्विं सोभने कहेइ पच्छा इयरेत्ति, एवं विक्खिवति सोयारं ति गाथाभावार्थः।

साम्प्रतमधिकृतकथामेव प्रकारान्तरेणाह–या स्वसमयवर्जा खलुशब्दस्य विशेषणार्थत्वादत्यन्तं प्रसिद्धनीत्या स्वसिद्धान्तशून्या, अन्यथा विधिप्रतिषेधद्वारेण विश्वव्यापकत्वात् स्वसमयस्य तद्वर्जा कथैव नास्ति, भवति कथा 'लोकवेदसंयुक्ता', लोकग्रहणाद्रामायाणादिपरिग्रहः वेदास्तु ऋग्वेदादय एव, एतदुक्ता कथेत्यर्थः, परसमयानां च साङ्ख्यशाक्यादिसिद्धान्तानां च कथा या सा सामान्यतो दोषदर्शनद्वारेण वा एषा विक्षेपणी नाम, विक्षिप्यतेऽनया सन्मार्गात् कुमार्गे कुमार्गाद्वा सन्मार्गे श्रोतेति विक्षेपणी, तथाहि–सामान्यत एव रामायणादिकथायामिदमपि तत्त्वमपि भवति सन्मार्गाभिमुखस्य ऋजुमतेः कुमार्गप्रवृत्ति, दोषदर्शनद्वारेणाप्येकेन्द्रियप्रायस्याहो मत्सरणि एत इति मिथ्यालोचनेनेति गाथार्थः।

अस्या अकमने प्राप्ते विधिमाह–या स्वसमयेन–स्वसिद्धान्तेन करणभूतेन पूर्वमाख्याता–आदौ कथिता तां क्षिपेत् परसमये क्वचिद्दोचषदर्शनद्वारेण यथाऽस्माकमहिंसादिलक्षणो धर्मः साङ्ख्यादी–नामप्येवं, 'हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति' इत्यादिवचनप्रामाण्यात् किंत्वसावपरिणा–मिन्यात्मनि न पुज्यते, एकान्तनित्वानित्ययोर्हिंसाया अभावादिति, अथवा परशासनव्याक्षेपात्–'सुषां सुपो भवन्ति' इति सप्तम्यर्थे पञ्चमी, परशासनेन कथ्यमानेन व्याक्षेपेसन्मार्गाभिमुखतायां सत्यां परस्य समयं कथयति, दोषदर्शनद्वारेण केवलमपीति गाथार्थः।

उक्ता विक्षेपणी, अधुना संवेजनीमाह–आत्मपरशरीरविषया इहलोके चैव तथा परलोके–इहलोक विषया परलोकविषया च एषा चतुर्विधा खलु अनन्तरोक्तेन प्रकारेण कथा तु संवेजनी भवति, संवेज्यते–संवेगं ग्राह्यतेऽनया श्रोतेति संवेजनी, एषोऽधिकृतगाथाक्षरार्थः। भावार्थस्तु वृद्धविवरणादवसेयः, तच्चेदम्–संवेयणी कहा चउव्विहा, तंजहा–आयसरीरसंवेयणी परसरीर–संवेयणी इहलोयसंवेयणी परलोयसंवेयणी, तत्थ आयसरीरसंवेयणी जहा जमेयं अम्हच्चयं सरीरयं एवं सुक्कसोणियमंसव–साभेदमज्जट्ठिण्हारुचम्मकेसरोमणहदंतअंतादिसंघायनिप्फण्णत्तणेण मुत्तपुरीसभायणत्तणेण य असुइत्ति कहेमाणो सोयारस्स संवेगं उप्पाएइ, एसा आयसरीरसंवेयणी, एवं परसरीरसंवेयणीवि परसरीरं एरिसं चेव असुई, अहवा परस्स सरीरं वण्णेमाणो सोयारस्स संवेगमुप्पाएइ, परसरीर–संवेयणी गया, इयदानिं इहलोयसंवेयणी–जहा सव्वमेयं मानुसत्तणं असारमधुवं कदलीथंभ–समाणं एरिसं कहं कहेमाणो धम्मकही सोयारस्स संवेगमुप्पाएइ, एसा इहलोयसंवेयणी गया, इयदानिं परलोयसंवेयणी जहा देवावि इस्साविसायमयकोहलोहाइएहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुक्खेहिं अभिभूया किमंग पुण तिरियनारया?, एयारिसं कहं कहेमाणो धम्मकही सोयारस्स संवेग-मुप्पाएइ, एसा परलोय-संवेयणी गयत्ति गाथाभावार्थः । साम्प्रतं शुभकर्मोदयाशुभकर्मक्षय-फलकथनतः संवेजनीर-समाह-'वीर्यवैक्रियर्द्धिः' तपःसामर्थ्योद्भवा आकाशगमनजङ्घा-चारणादिवीर्यवैक्रिय-निर्माणलक्षणा 'ज्ञानचरणदर्शनानां तथार्द्धिः' तत्र ज्ञानर्द्धिः 'पभू नं भंते! चोद्दसपुव्वी घडाओ घडसहस्सं पडाओ पडसहस्सं विउव्वित्तए?, हंता पहू विउव्वित्तए' तहा-

"जं अन्नाणी खवेइ बहुयाहिं वासकोडीहिं।
तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं॥" इत्यादि,

तथा चरणर्द्धिः नास्त्यसाध्यं नाम चरणस्य, तद्वन्तो हि देवैरपि पूज्यन्त इत्यादि, दर्शनार्द्धिः प्रशमादिरूपा, तथा-

"सम्मदिट्ठी जीवो विमाणवज्जं न बंधए आउं।
जइवि न सम्मत्तजढो अहव न बद्धाउओ पुव्विं॥"

इत्यादि, उपदिश्यते-कथ्यते खलु यत्र प्रक्रमे कथायाः संवेजन्या रसो निष्यन्द एष इति - गाथार्थः । उक्ता संवेजनी, निर्वेदनीमाह-पापानां कर्मणां चौर्यादिकृतानामशुभविपाकः-दारुण-परिणामः कथ्यते यत्र-यस्यां कथायामिह च परत्र च लोके-इहलोके कृतानि कर्माणि इहलोक एवोदीर्यन्ते इति, अनेन चतुर्भङ्गिकामाह, कथा तु निर्वेदनी नाम, निर्वेद्यते भवादनया श्रोतेति निर्वे-दनी एष गाथाक्षरार्थः । भावार्थस्तु वृद्धविवरणादवसेयः, तच्चेदम्-

इदानिं निव्वेयणी, सा चउव्विहा, तंजहा-इहलोए दुच्चिण्णा कम्मा इहलोए चेव दुहविवाग-संजुत्ता भवन्तित्ति, जहा चोराणं पारदारियाणं एवमाइ एसा पढमा निव्वेयणी, इयाणिं बिइया, इहलोए दुच्चिण्णा कम्मा परलोए दुहविवागसंजुत्ता भवन्ति, कहं?, जहा नेरइयाणं अन्नम्मि भवे कयं कम्मं निरयभवे फलं देइ, एसा बिइया निव्वेयणी गया, इयाणीं तइया, परलोए दुच्चिण्णा कम्मा इहलोए दुहविवागसंजुत्ता भवंति, कहं?, जहा बालप्पभितिमेव अंतकुलेसु उप्पन्ना स्वयकोढादिहिं रोगेहिं दारिद्देण य अभिभूया दीसन्ति, एसा तइया णिव्वेयणी, इयाणिं चउत्थी णिव्वेयणी, परलोए दुच्चिण्णा कम्मा परलोए चेव दुहविवागसंजुत्ता भवंति, कहं?, जहा पुव्विं दुच्चिण्णेहिं कम्मेहिं जीवा संडासतुंडेहिं पक्खीहिं उववज्जंति, तओ ते णरयपाउग्गाणि कम्माणि असंपुण्णाणि तानि ताए जातीए पूरिंति, पूरिऊण नरयभवे वेदेन्ति, एसा चउत्था निव्वेयणी गया, एवं इहलोगो परलोगो वा पन्नवयं पडुच्च भवइ, तत्थ पन्नवयस्स मनुस्सभवो इहलोगो अवसेसाओ तिन्निवि गईओ परलोगोत्ति गाथाभावार्थः।

इदानीमस्या एव रसमाह-स्तोकमपि प्रमादकृतम्-अल्पमपि प्रमादजनितं कर्म-वेदनीयादि 'साहिज्जई'त्ति कथ्यते यत्र नियमात्-नियमेन, किंविशिष्टमित्याह-'प्रभूताशुभपरिणामं' बहुतीव्रफलमित्यर्थः, यथा यशोधरादीनामिति कथाया निर्वेदिन्या रसः-एष निष्यन्द इति - गाथार्थः संक्षेपतः ।

संवेगनिर्वेदबन्धनमाह-सिद्धश्च देवलोकः सुकुलोत्पत्तिश्च भवति संवेगः, एतत्प्ररूपणं, संवेगहेतुत्वादिति भावः, एवं नरकस्तिर्यग्योनिः कुमानुषत्वं च निर्वेद इति गाथार्थः, आसां कथानां या यस्य कथनीयेत्येतदाह-विनयेन चरति वैनयिकः-शिष्यस्तस्मै प्रथमतया-आदि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथनेन कथा तु आक्षेपणी उक्तलक्षणा कथयितव्या, ततः स्वसमयगृहीतार्थे सति तस्मिन् कथयेद् विक्षेपणीं-उक्तलक्षणामेव पश्चादिति गाथार्थः । किमित्येतदेवमित्याह-आक्षेपण्या कथया आक्षिप्ताः-आवर्जिता आक्षेपण्याक्षिप्ता ये जीवास्ते लभन्ते सम्यक्त्वम्, तथा आवर्जनं शुभभावस्य मिथ्यात्वमोहनीयक्षयोपशमोपायत्वात्, विक्षेपण्य भाज्यं-सम्यक्त्वं कदाचिल्लभन्ते कदाचिन्नेति तच्छ्रवणात्तथाविधपरिणामभावात्, गाढतरं वा मिथ्यात्वं, जडमतेः परसमयदोषानवबोधान्निदा-करिण एते न द्रष्टव्या इत्यभिनिवेशेनेति गाथार्थः । उक्ता धर्मकथा, साम्प्रतं मिश्रामाह-

नि.[२०७] धम्मो अत्थो कामो उवइस्सइ जत्थ सुत्तकव्वेसुं।
लोगे वेए समये सा उ कहा मीसिया नाम॥

नि.[२०८] इत्थिकहा भत्तकहा रायकहा चोरजनवयकहा य।
नडनट्टजल्लमुट्ठियकहा उ एसा भवे विकहा।

नि.[२०९] एया चेव कहाओ पन्नवगपरूवगं समासज्ज।
अकहा क हा य विकहा हविज्ज पुरिसंतरं पप्प॥

नि.[२१०] मिच्छत्तं वेयन्तो जं अन्नाणी कहं परिकहेइ।
लिंगत्थो व गिही वा सा अकहा देसिया समए॥

नि.[२११] तवसंजमगुणधारी जं चरणत्था कहिंति सब्भावं।
सव्वजगज्जीवहियं सा उ कहा देसिया समए॥

नि.[२१२] जो संजओ पमत्तो रागद्दोसवगओ परिकहेइ।
सा उ विकहा पवयणे पन्नत्ता धीरपुरिसेहिं॥

नि.[२१३] सिंगाररसुत्तइया मोहकुवियफुंफुगा सहासिंति।
जं सुणमाणस्स कहं समणेण न सा कहेयव्वा॥

नि.[२१४] समणेण कहेयव्वा तवनियमकहा विरागसंजुत्ता।
जं सोऊण मनुस्सो वच्चइ संवेगनिव्वेयं॥

नि.[२१५] अत्थ महंतीवि कहा अपरिकिलेसबहुला कहेयव्वा।
हंदि माहया चडगरत्तणेण अत्थं कहा हणइ॥

नि.[२१६] खेत्तं कालं पुरिसं सामत्थं चऽप्पणो वियाणेत्ता।
समणेण उ अणवज्जा पगयंमि कहा कहेयव्वा।

**वृ.** धर्मः-प्रवृत्यादिरूपः अर्थो-विद्यादिः कामः-इच्छादिः उपदिश्यते-कथ्यते यत्र 'सूत्र-काव्येषु' सूत्रेषु काव्येषु च-तल्लक्षणवत्सु, केत्यत आह-लोके-रामायणादिषु वेदेयज्ञक्रियादिषु समये-तरङ्गवत्यादिषु सा पुनः कथा 'मिश्रा' मिश्रानाम, संकीर्णपुरुषार्थाभिधानात् इति गाथार्थः। उक्ता मिश्रकथा, तदभिधानाच्चतुर्विधा कथेति। साम्प्रतं कथाविपक्षभूतां त्याज्यां विकथामाह, अज्ञातस्वरूपायास्त्यागासंभवादिति-स्त्रीकथा-एवंभूता द्रविडा इत्यादि-लक्षणा भक्तकथा सुन्दरः शाल्योदन इत्यादिरूपा राजकथा अमुकः शोभन इत्यादिलक्षणा चौरजनपदकथा च गृहीतोऽद्य चौरः स इत्थं कदर्थितः तथा रम्यो मध्यदेश इत्यादिरूपा नटनर्तकजल्लमुष्टिककथा च एषा भवेद्विकथा प्रेक्षणीयकानां नटो रमणीयः यद्वा नर्तकः यदा जल्लः, जल्लो नाम वरत्राखेलकः मुष्टिको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मल्लः, इत्यादिलक्षणा विकथा, कथालक्षणविरहादिति गाथार्थः।

उक्ता विकथा, इदानीं प्रज्ञापकापेक्षयाऽऽसां प्राधान्यमाह-एता एवोक्तलक्षणाः कथाः प्रज्ञापयतीति प्रज्ञापकः प्रज्ञापकश्चासौ प्ररूपकश्चेति विग्रहस्तमवबोधकप्ररूपकं न तु घरट्टभ्रमणकल्पं यतो न किञ्चिदवगम्यत इत्यर्थः समाश्रित्य-प्राप्य किमित्याह-'अकथा' वक्ष्यमाणलक्षणा कथा चोक्तस्वरूपा विकथा चोक्तस्वरूपैव भवति, पुरुषान्तरं-श्रोतृलक्षणं प्राप्य-आसाद्य, साध्वसाध्वाशयवैचित्र्यात् सम्यक्श्रुतादिवत्, अन्ये तु प्रज्ञापकं-मूलकर्त्तारं प्ररूपकं-तत्कृतस्याख्यातारमिति व्याचक्षते, न चैतदतिशोभनं, 'पन्नवयपरूवगे समासज्ज' त्ति पाठप्रसङ्गादिति गाथार्थः। इदानीमकथालक्षणमाह-मिथ्यात्वमिति-मिथ्यात्वमोहनीयं कर्म वेदयन् विपाकेन यां काञ्चिदज्ञानी कथां कथयति, अज्ञानित्वं चास्य मिथ्यादृष्टित्वादेव, यद्येवं नार्थोऽज्ञानिग्रहणेन मिथ्यात्ववेदकस्याज्ञानित्वाव्यभिचारादिति चेद्, त, प्रदेशानुभववेदकेन सम्यग्दृष्टिना व्यभिचारादिति, किंविशिष्टोऽसावित्याह-'लिङ्गस्थो वा' द्रव्यप्रव्रजितोऽङ्गारमर्दकादिः 'गृही वा' यः कश्चिदितर एव 'सा' एवं प्ररूपकप्रयुक्तयुक्त्या श्रोतर्यपि प्रज्ञापकतुल्यपरिणामनिबन्धना अकथा देशिता समये, ततः प्रतिविशिष्टकथाफलाभावादिति गाथार्थः।

अत्रैव प्रक्रमे कथामाह-तपःसंयमगुणान् धारयन्ति तच्छीलाश्चेति तपःसंयमगुणधारिणः यां काञ्चन चरणरताः-चरणप्रतिबद्धा न त्वन्यत्र निदानादिना कथयन्ति सद्भावं-परमार्थं, किंविशिष्टमित्याह-सर्वजगज्जीवहितं, नतु व्यवहारतः कतिपयसत्त्वहितमित्यर्थः, तुशब्दस्यावधारणार्थत्वात्, सैव कथा निश्चयतो देशिता समये, निर्जराख्यफलसाधनात्कर्तृणां श्रोतृणामपि चेतःकुशलपरिणामनिबन्धना कथैव, नो चेद्भाज्येति गाथार्थः॥ इहैव विकथामाह-यः संयतः प्रमत्तः-कषायादिना प्रमादेन रागद्वेषवशं गतः सन् नु तु मध्यस्थः परिकथयति किञ्चित् सा तु विकथा प्रवचने-सा पुनर्विकथा सिद्धान्ते प्रज्ञप्ता धीरपुरुषैः-तीर्थकरादिभिः, तथाविधपरिणामनिबन्धनत्वात् कर्तृश्रोत्रोरिति, श्रोतृपरिणामभेदे तु तं प्रति कथान्तरमेव, एवं सर्वत्र भावना कार्येति गाथार्थः। साम्प्रतं श्रमणेन यथाविधा न कार्या तथाविधामाह-श्रृङ्गाररसेन-मन्मथदीपकेन उत्तेजिता-अधिकं दीपिता, केत्याह-मोह एव-चारित्रमोहनीयकर्मोदयसमुत्थात्मपरिणामरूपउ कुपितफुफुका-घटितकुकुला 'हसहसिति' त्ति जाज्वल्यमाना जायत इति वाक्यशेषः, यां श्रृणवतः कथां मोहोदयो जायत इत्यर्थः, श्रमणेन-साधुना न सा कथयितव्या, अकुशलभावनिबन्धनत्वादिति गाथार्थः। यत्प्रकारा कथनीया तत्प्रकारामाह-श्रमणेन कथयितव्या, किंविशिष्टेत्याह-'तपोनियमकथा' अनशनादिपञ्चाश्रवविरमणादिरूपा, साऽपि विरागसंयुक्ता न निदानादिना रागादिसंगता, अत एवाह-यां कथां श्रुत्वा मनुष्यः- श्रोता व्रजति-गच्छति 'संवेयनिव्वेदं' ति संवेग निर्वेदं चेति गाथार्थः।

कथाकथनविधिमाह- महार्थापि कथा अपरिक्लेशबहुला कथयितव्या, नातिविस्तरकथनेन परिक्लेशः कार्य इत्यर्थः, किमित्येवमित्यत आह-'हंदी' त्युपदर्शने महता चडकरत्वेन-अतिप्रपञ्चकथनेनेत्यर्थः किमित्याह-अर्थं कथा हन्ति- भावार्थं नाशयतीति गाथार्थः। विधिशेषमाह-क्षेत्रं- भौतादिभावितं कालं-क्षीयमाणादिलक्षणं पुरुषं-पारिणामिकादिरूपं सामर्थ्यं चात्मनो ज्ञात्वा प्रकृते वस्तुनीति योगः श्रमणेन त्वनवद्या-पापानुबन्धरहिता कथा कथयितव्या,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्येति गाथार्थः। उक्ता कथा, तदभिधानाद्दतो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्न-स्यावसर इत्यादि-चर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारीणयम्, तच्चेदम्-

*मू.(१७) संजमे सुट्ठिअप्पाणं, विप्पमुक्काणं ताइणं।*
*तेसिमेयमणाइण्णं, निग्गंथाण महेसिणं॥*

वृ.इह संहितादिक्रमः क्षुण्णः, भावार्थस्तवपम्-'संयमे' द्रुमपुष्पिकाव्यावर्णितस्वरूपे शोभनेन प्रकारेण आगमनीत्या स्थित येषां ते सुस्थितात्मानस्तेषां, त एव विशेष्यन्तेविविधम्-अनेकैः प्रकारैः, प्रकर्षेण-भावसारं मुक्ताः-परित्यक्ताः बाह्याभ्यन्तरेण ग्रन्थेनेति विप्रमुक्तास्तेषां, त एव विशेष्यन्ते-त्रायन्ते आत्मानां परमुभयं चेति त्रातारः, आत्मानं प्रत्येकबुद्धाः परं तीर्थकराः, स्वतस्तीर्णत्वाद्, उभयं स्थविरा इति, तेषामिदं-वक्ष्यमाणलक्षणं अनाचरितम्-अकल्प्यं, केषामित्याह-'निर्ग्रन्थानां' साधूनामित्यभिधानमेतत्, महान्तश्च ते ऋषयश्च महर्षयो यतय इत्यर्थः, अथवा महान्तं एषितुं शीलं येषां ते महैषिणस्तेषां, इह च पूर्वपूर्वभाव एव उत्तरो-त्तरभावो नियमितो हेतुहेतुमद्भावेन वेदितव्यः, यत एव संयमे सुस्थितात्मानोऽत एव विप्रमुक्ताः, संयमसुस्थितात्मनिबन्धनत्वाद्विप्रमुक्तेः, एवं शेषेष्वपि द्रष्टव्यमिति सूत्रार्थः॥

*मू.(१८) उद्देसियं कीयगडं, नियागमभिहडाणि य।*
*राइभत्ते सिणाणे य, गंधमल्ले य वीयणे॥*

वृ.साम्प्रतं यदनाचरितं तदाह-'उद्देसियं'ति उद्देशनं सध्ध्वाद्याश्रित्य दानारम्भस्येत्युद्देशः तत्र भवमौद्देशिकं ?, क्रयणं-क्रीतं, भावे निष्ठाप्रत्ययः, साध्वादिनिमित्तमिति गम्यते, तेन कृतं-निर्वतितं क्रीतकृतं २, 'नियाग' मित्यामत्रितस्य पिण्डस्य ग्रहणं नित्यं न त्वनामत्रि-तस्य ३, 'अभिहडाणि य'त्ति स्वग्रामादेः साधुनिमित्तमभिमुखमानीतमध्याहृतं, बहुवचनं स्वग्राम-परग्रामनिशीथादिभेदख्यापनार्थं ४, तथा 'रात्रिभक्तं' रात्रिभोजनं दिवसगृहीतदिवसभुक्तादि-चतुर्भङ्गलक्षणं५, 'स्नानं च' देशसर्वभेदभिन्नं, देशस्नानमधिष्ठानशौचातिरेकेणाक्षिपक्ष्मप्रक्षालन-मपि, सर्वस्नानं तु प्रतीतं ६, तथा 'गन्धमाल्यव्यजनं च' गन्धग्रहणात्कोष्ठपुटादिपरिग्रहः माल्य-ग्रहणाच्च ग्रथितवेष्टितादेर्माल्यस्य वीजनं तालवृन्तादिना धर्म एव, इंदमानचरितं, दोषाश्चौद्देशिका-दिष्वारम्भप्रवर्तमानदयः स्वधियाऽवगन्तव्या इति सूत्रार्थः॥

*मू.(१९) संनिही गिहिमत्ते य, रायपिंडे किमिच्छए।*
*संवाहणा दंतपहोयणा य संपुच्छणा देहपलोयणा य॥*

वृ.इदं चानाचरितमित्याह-'सांनिहि'त्ति सूत्रम्, अस्य व्याख्या-संनिधीयतेऽनयाऽऽत्मा दुर्गताविति संनिधिः-धृतगुडादीनां संचयक्रिया १०, 'गृहिमात्रं' गृहस्थभाजनं च ११, तथा 'राजापिण्डो' नृपाहारः, कः किमिच्छतीत्येवं यो दीयते स किमिच्छकः, राजपिण्डोऽन्यो वा सामान्येन १२, तथा 'संबाधनम्' अस्थिमांसत्वग्रोमसुखतया चतुर्विधं मर्दनं १३, 'दन्तप्रधावनं' चाङ्गुल्यादिना क्षालनं १४, तथा 'संप्रश्नः' सावद्यो गृहस्थविषयः, राढार्थं कीदृशो वाऽहमित्यादिरूपः १५, 'देहप्रलोकनं च' आदर्शादावनाचरितम् १६, दोषाश्च संनिधिप्रभृतिषु परिग्रहप्राणातिपातादयः, स्वधियैव वाच्या इति सूत्रार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.( २० ) *अट्ठावए य नालीए, छत्तस्स य धारणट्ठाए।*
*तेगिच्छं पाहणा पाए, समारंभं च जोइणो॥*

वृ.किंच-'अट्ठावए य' सूत्रम्, अस्य व्याख्या-अष्टापदं चेति, 'अष्टापदं' द्यूतम्, अर्थपदं वा-गृहस्थमधिकृत्य नीत्यादिविषयमनाचरितं १७, तथा 'नालिका चे'ति द्यूतविशेषलक्षणा, यत्र मा भूत्कलयाऽन्यथा पाशकपातनमिति नलिकया पात्यन्त इति, इयं चानाचरिता १८, अष्टापदेन सामान्यतो द्यूतग्रहणे सत्यप्यभिनिवेशनिबन्धनत्वेन नालिकायाः प्राधान्यख्यापनार्थं भेदेन उपादानम्, अर्थपदमेवोक्तार्थं तदित्यन्ये अभिदधति, अस्मिन् पक्षे सकलद्यूतोपलक्षणार्थं नालिकाग्रहणम्, अष्टापदद्यूतविशेषपक्षे चोभयोरिति। तथा 'छत्रस्य च' लोकप्रसिद्धस्य धारण-मात्मानं परं वा प्रत्यनर्थायेति, आगढग्लानाद्यालम्बनं मुक्त्वाऽनाचरितं, प्राकृतशैल्या चात्रानुस्वार-लोपोऽकारनकारलोपौ च द्रष्टव्यौ, तथाश्रुतिप्रामाण्यादिति १९, तथा 'तेगिच्छं'त्ति, चिकित्साया भावश्चैकित्स्यं-व्याधिप्रतिक्रियारूपमनाचरितं २०, तथोपनहौपादयोरनाचरिते, पादयोरिति साभिप्रायकं, न त्वापत्कल्पपरिहार्थमुपग्रहधारणेन २१, तथा 'समारम्भश्च' समारम्भणं च 'ज्योतिषः' अग्नेस्तदनाचरितमिति २२, दोषा अष्टापदादीनाक्क्षुण्णा एवेति सूत्रार्थः।

मू.( २१ ) *सिज्जायरपिंडं च, आसंदीपलियंकए।*
*गिहंतरनिसिज्जा य, गायस्सुव्वट्टणाणि य॥*

वृ.किंच-'सज्जायर' सूत्रम्, अस्य व्याख्या-शय्यातरपिण्डश्चानाचरितः, शय्यावसतिस्तया तरति संसारमीति शय्यातरः-साधुवसतिदाता, तत्पिण्डः २३, तथा आसन्कदकपर्यङ्कौ अना-चरितौ, एतौ च लोकप्रसिद्धावेव-२४-२५, तथा गृहान्तरनिषद्या अनाचरिता, गृहमेव गृहान्तरं गृहयोर्वा अपान्तरालं तत्रोपवेशनम्, चशब्दात्पाटकादिपरिग्रहः २६, तथा गात्रस्यकायस्तोद्वर्त-नानि चानाचरितानि, उद्वर्तनानि-पङ्कापनयनलक्षणानि, चशब्दादन्यसंस्कारपरिग्रहः २७, इति सूत्रार्थः॥

मू.( २२ ) *गिहिणो वेआवडियं, जा य आजीववत्तिया।*
*तत्तानिव्वुडभोइत्तं, आउरस्सरणाणि य॥*

वृ.तथा-'गिहिणो'त्ति सूत्रम्, अस्य व्याख्या-'गुहिणो' गृहस्थस्य 'वैयावृत्त्यं' व्यावृत्तभावो-वैयावृत्त्यं, गृहस्थं प्रत्यन्नादिसंपादनमित्यर्थः, एतदनाचारितमिति २८, तथा च 'आजीववृत्तिता' जातिकुलगणकर्मशिल्पानामाजीवनम् आजीवस्तेन वृत्तिस्तद्भाव आजीववृत्तिता-जात्याद्याजीवनेनात्मपालनेत्यर्थः, इयं चानाचरिता २९, तथा 'तप्तानिर्वृतभोजित्वम्' तप्तं च तदनिर्वृतं च-अत्रिदण्डोद्वृत्तं चेति विग्रहः, उदकमिति विशेषणान्यथानुपपत्त्या गम्यते, तद्भोजित्वं-मिश्रसचित्तोदकभोजित्वम् इत्यर्थः, इदं चानाचरितम् ३०, तथा 'आतुरस्मरणानि च' क्षुधाद्यातु-राणां पूर्वोपभुक्तस्मरणानि च अनाचरितानि, आतुरशरणानि वा-दोषातुराश्रयदानानि ३१, इति सूत्रार्थः॥

मू.( २३ ) *मूलए सिंगबेरे य, अच्छुखंडे अनिव्वुडे।*
*कंदे मूले य सच्चित्ते, फले बीए य आमए॥*

वृ.किंच-'मूलए'त्ति सूत्रम्, अस्य व्याख्या-'मूलको' लोकप्रीततः, 'शृङ्गबेरं च' आर्द्रकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च तथा 'इक्षुखण्डं च' लोकप्रतीतम्, अनिर्वृतग्रहणं सर्वत्राभिसंबध्यते, अनिर्वृत्तम-अपरिणतमनाचरितमिति, इक्षुखण्डं चापरिणतं द्विपर्वान्तं यद्वर्तते ३२-३३-३४, तथा 'कन्दो' वज्रकन्दादिः ३५, 'मूलं च' सट्टामूलादि, सचित्तमनाचरितम् ३६, तथा 'फलं' त्रपुष्यादि ३७, 'बीजं च' तिलादि ३८, 'आमकं' सचित्तमनाचरितमिति सूत्रार्थः ॥

मू.( २४ ) *सोवच्चले सिंघवे लोणे, रोमालोणे य आमए।*
*सामुद्दे पंसुखाये य, कालालोणे य आमए॥*

वृ.किंच-'सोवच्चले'त्ति सूत्रम्, अस्य व्याख्या-सौवर्चलं ३९, सैन्धवं ४०, 'लवणं च' सांभरिलवणं ४१, रुमालवणं च ४२, आमकमिति सचित्तमनाचरितम्, सामुद्रं-समुद्रलवणमेव ४३, 'पांशुक्षारश्च' उषरलवणं ४४, 'कृष्णलवणं च' सैन्धवलवणपर्वतैक-देशजम् ४५, आमकमनाचरितमिति सूत्रार्थः ॥

मू.( २५ ) *धुवणे त्ति वमणे य, वत्थीकम्म विरेयणे।*
*अंजणे दंतवणे य, गायाब्भंगविभूसणे॥*

वृ.किं च-'धूवणे'ति सूत्रम्, अस्य व्याख्या-धूपनमित्यात्मवस्त्रादेरनाचरितम्, प्राकृतशैल्या अनागतव्याधिनिवृत्तये धूमपानमित्यन्ते व्याचक्षते ४६, वमनं मदनफलादिना ४७, वस्तिकर्म पुटकेनाधिष्ठाने स्नेहदानं ४८, विरेचनं दन्त्यादिना ४९, तथा अञ्जनं रसाञ्जनादिना -५०, दन्तकाष्ठं च प्रतीतं ५१, तथा गात्राभ्यङ्गस्तैलादिना ५२, विभूषणं गात्राणामेव ५३, इति।

मू.( २६ ) *सव्वमेयमणाइन्नं, निग्गंथाण महेसिणं।*
*संजमंमि अ जुत्ताणं, लहुभूयविहारिणं॥*

वृ.क्रियासूत्रमाह-'सव्वमेयं'ति सूत्रम्, अस्य व्याख्या-सर्वमेतद्-औद्देशिकादि यदनन्त-मुक्तमिदमनाचरितं, केषामित्याह-निर्ग्रन्थानां महर्षीणां साधूनामित्यर्थः, त एव विशेष्यन्ते-संयमे, चशब्दात्तपसि, युक्तानाम्-अभियुक्तानां 'लघुभूतविहारिणां' लघुभूतो-वायुः, ततश्च वायु-भूतोऽप्रतिबद्धतया विहारो येषां ते लघुभूतविहारिणस्तेषां, निगमनक्रियापदमेतदिति सूत्रार्थः।

किमित्यनाचरितं ?, यतस्त एवंभूता भवन्तीत्याह-

मू.( २७ ) *पंचासवपरिण्णाया, तिगुत्ता छसु संजया।*
*पंचनिग्गहणा धीरा, निग्गंथा उज्जुदंसिणो॥*

वृ.'पञ्चाश्रवा' हिंसादयः 'परिज्ञाता' द्विविधया परिज्ञया-ज्ञपरिज्ञया प्रत्याख्यान-परिज्ञया च परि-समन्ताज्ज्ञाता यैस्ते पञ्चाश्रवपरिज्ञाताः, आहिताग्नयादेराकृतिगणत्वान्न निष्ठायाः पूर्वनिपात इति समासो युक्त एव, परिज्ञातपञ्चाश्रवा इति वा, यत एव चैवंभूता अत एव 'त्रिगुप्ता' मनोवाक्कायगुप्तिभिः गुप्ता। 'षट्सु संयताः' षट्सु जीवनिकायेषु पृथिव्यादिषु सामस्त्येन यताः, 'पञ्चनिग्रहणा' इति निगृह्णन्तीति निग्रहणाः कर्तरिल्युट् पञ्चानां निग्रहणाः पञ्चनिग्रहणाः, पञ्चानामितीन्द्रियाणां, 'धीरा' बुद्धिमन्तः स्थिरा वा, 'निर्ग्रन्थाः' साधवः, 'ऋजुदर्शिन' इति ऋजुर्मोक्षं प्रति ऋजुत्वात्स्यमस्तं पश्यन्त्युपादेयतयेति ऋजुदर्शिनः-संयमप्रतिबद्धाः इति सूत्रार्थः ॥

मू.( २८ ) *आयावयंति गिम्हेसु, हेमंतेसु अवाउडा।*
*वासासु पडिसंलीणा संजया सुसमाहिया॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.ते च ऋजुदर्शिनः कालमधिकृत्य यथाशक्त्यैतत्कुर्वन्ति-'आयावयंति' त्ति सूत्रम्, अस्य व्याख्या-'आतापयन्ति-ऊर्ध्वस्थानादिना आतापनां कुर्वन्ति 'ग्रीष्मेषु' उष्णकालेषु, तथा 'हेमन्तेषु' शीतकालेषु 'अप्रावृता' इति प्रावरणरहितास्तिष्ठन्ति, तथा 'वर्षासु' वर्षाकालेषु 'संलीना' इत्येकाश्रयस्था भवन्ति 'संयताः' साधवः 'सुसमाहिता' ज्ञानादिषु यत्नपराः, ग्रीष्मादिषु बहुवचनं प्रतिवर्षकरणज्ञापनार्थमिति सूत्रार्थः ॥

*मू.(२९) परीसहरिऊदंता, धूअमोहा जिइंदिया।*
*सव्वदुक्खप्पहीणट्ठा, पक्कमंति महेसिणो।*

वृ.'परिसह' त्ति सूत्रम्, अस्य व्याख्या-मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः क्षुत्पिपासादयः त एव रिपवस्तत्तुल्यधर्मत्वात्परीषहरिपवस्ते दान्ता-उपशमं नीता यैस्ते परीषहरिपुदान्ताः, समासः पूर्ववत्, न प्राकृते पूर्वापरपदनियमव्यवस्था 'नाणविमलजोण्हाग' मिति यथा, तथा 'धुतमोहा' विक्षिप्तमोहा इत्यर्थः, मोहः-अज्ञानं, तथा 'जितेन्द्रियाः' शब्दादिषु रागद्वेषरहिता इत्यर्थः, त एवंभूताः 'सर्वदुःखपक्षयार्थं' शारीरमानसशेषदुःखप्रक्षयनिमित्तं 'प्रकामन्ति' प्रवर्तन्ते, किंभूताः ?-'महर्षयः' साधव इति सूत्रार्थः ॥

*मू.(३०) दुक्कराइं करित्ताणं, दुस्सहाइं सहेत्तु य।*
*केइत्थ देवलोएसु, केइ सिज्झंति नीरया॥*

वृ.इदानीमेतेषां फलमाह-'दुक्कराइं' त्ति सूत्रम्, अस्य व्याख्या-एवं दुष्कारिणि कृत्वौद्देशिकादित्यागादीनि तथा दुःसहानि सहित्वाऽऽतापनादीनि केचन तत्र 'देवलोकेषु' सौधर्मादिषु, गच्छन्तीति वाक्यशेषः। तथा केचन सिद्धयन्ति, तेनैव भवेन सिद्धिं प्राप्नुवन्ति। वर्तमाननिर्देशः. सूत्रस्य त्रिकालविषयत्वज्ञापनार्थः। 'निरजस्का' इत्यष्टविधकर्मविप्रमुक्ताः, न त्वेकेन्द्रिया इव कर्मयुक्ता एवेति सूत्रार्थः ॥

*मू.(३१) खवित्ता पुव्वकम्माइं, संजमेण तवेण य।*
*सिद्धिमग्गमणुप्पत्ता, ताइणो परिणिव्वुड॥ त्ति बेमि।*

वृ.येऽपि चैवंविधानुष्ठानतो देवलोकेषु गच्छन्ति तेऽपि ततश्च्युता आर्यदेशेषु सुकुले जन्मावाप्य शीघ्रं सिद्धयन्त्येतदाह-'खवित्त' त्ति सूत्रम्, अस्य व्याख्या-ते देवलोकच्युताः क्षपयित्वा पूर्वकर्माणि सावशेषाणि, केनेत्याह-'संयमेन' उक्तलक्षणेन तपसा च, एव प्रवाहेण 'सिद्धिमार्गं' सम्यग्दर्शनादिलक्षणमनुप्राप्ताः सन्तस्त्रातार आत्मादीनां 'परिनिर्वान्ति' सर्वथा सिद्धिं प्राप्नुवन्ति, अन्ये तु पठन्ति-'परिनिव्वुड' त्ति, तत्रापि प्राकृतशैल्या छान्दसत्वाच्चायमेव पाठो ज्यायान्, इति ब्रवीमीति पूर्ववदिति सूत्रार्थः। उक्तोऽनुगमः, साम्प्रतं नयाः ते च पूर्ववद्द्रष्टव्याः।

अध्ययन-३ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिक सुत्रे द्वितीयअध्ययस्य । भद्रबाहुस्वामिविरचिता निर्युक्ति एवं हरिभद्रसूरि विरचिता टीका परि समाप्ता ।**

## अध्ययन-४ षड्जीवनिकाया

*मू.(३२/१) सुअं मे आउसंतेणं भगवआ एवमक्खायं इह खलु छज्जीवणियानामज्झयणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समणेणं भगवया महावीरेणं कासवेणं पवेइया सुअक्खाया सुपन्नत्ता सेअं मे अहिज्जिउं अज्झयणं धम्मपन्नत्ती ॥*

**वृ.**व्याख्यातं क्षुल्लिकाचारकथाध्ययनमिदानीं षड्जीवनिकायाख्यमाध्यते, अस्य चायम- भिसंबन्धः-इहानन्तराध्ययने 'साधुना धृतिराचारे कार्या न त्वनाचार, अयमेव चात्मसंयमो- पाय' इत्युक्तम्, इह पुनः स आचारः षड्जीवनिकायगोचरः प्राय इत्येतदुच्यते, उक्तं च -

"छसु जीवनिकाएसु, जे वुहे संजए सया।
से चेव होइ विन्नेए, परमत्थेण संजए॥"

इत्यनेनाभिसंबन्धेनायातमिदमध्ययनम्, आह च भाष्यकारः -

**भा.[५]** जीवाहारो भण्णइ आयारो तेणिमं तु आयामं,।
छज्जीवणियज्झयणं तस्सऽहिगारा इमे होंति॥

**वृ**-जीवाधारो भण्यत आचारः, तत्परिज्ञानपालनद्वारेणेति भावः, येनैतदेवं तेनेदम् 'आयातम्' अवसरप्राप्तं, किं तदित्याह-षड्जीवनिकाध्ययनम्, अत्रान्तरे अनुयोगद्वारोपन्यासावसरः, तथा चाह-'तस्य' षड्जीवनिकाध्ययनस्यर्थाधिकाराः 'एते भवन्ति' वक्ष्यमाणलक्षणा इति गाथार्थः।

**नि.[२१७]** जीवाजीवाहिगमो चरित्तधम्मो तहेव जयणा य।
उवएसो धम्मफलं छज्जीवणियाइ अहिगारा॥

**वृ.**'जीवाजीवाभिगमो' जीवाजीवस्वरूपमभिगम्यतेऽस्मिन्नित्यभिगम इतिकृत्वा, स्वरूपे च सत्यभिगम्यत इति भावः, तथा 'चारित्रधर्मः' प्राणातिपातादिनिवृत्तिरूपः, तथैव 'यतना च' पृथिव्यादिष्वारम्भपरिहारयत्नरूपा, तथा 'उपदेशः' यथाऽऽत्मा न बध्यत इत्यादिविषयः, तथा 'धर्मफलम्' अनुत्तरज्ञानादि, एते षड्जीवनिकाया अधिकारा इति गाथार्थः।

अत्रान्तरे गत उपक्रमः, निक्षेपमधिकृत्याह-

**नि.[२१८]** छज्जीवणियाए खलु निक्खेवो होइ नामनिप्फन्नो।
एएसिं तिण्हंपि उ पत्तेयपरूवणं वोच्छं॥

**वृ.**'षड्जीवनिकायायाः' प्रक्रान्तायाः खल्विति पूरणार्थो निपातः, निक्षेपो भवति नाम- निष्पन्नः, षड्जीवनिकायित्ययमेव, यतश्चैवमत एतेषां 'त्रयाणामपि' षड्जीवनिकायपदानां 'प्रत्येक'मिति एकमेकं प्रति प्ररूपणां सूत्रानुसारेण 'वक्ष्ये' अभिधास्य इति गाथार्थः॥

तत्रै-कस्याभावे षण्णामभाव इत्येकप्ररूपणामाह-

**नि.[२१९]** नामं ठवणा दविए माउगपयसंगहेक्कए चेव।
पज्जवभावे य तहा सत्तेए एक्कगा होंति॥

**नि.[२२०]** नामं ठवणा दविए खेत्ते काले तहेव भावे अ।
एसो उ छक्कगस्सा निक्खेवो छव्विहो होइ॥

**वृ.** इयं द्रुमपुष्पिकायां व्याख्यातेति नेह व्याख्यायते, संग्रहैककेन चात्राधिकारः॥ साम्प्रतं द्वयादीन् विहाय षट्प्ररूपणामाह-तत्र नामस्थापने क्षुण्णे, द्रव्यषट्कं-षड्द्रव्याणि सचित्ताचित्त- मिश्राणि पुरुषकार्षापणालङ्कृतपुरुषलक्षणानि, क्षेत्रषट्कं-षडाकाशप्रदेशाः, यद्वा भरतादीनि, कालषट्कं-षट् समयाः षड् ऋतवः, तथैव 'भावे चे'ति भावषट्कं-षड् भावा औदयिकादयः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र च सचितद्रव्यषट्केनाधिकारा इति गाथार्थ :॥ आह-अत्र द्वयाद्यनभिधानं किमर्थम् ?, उच्यते, एकषडभिधानतः आद्यन्तग्रहणेन तद्गतेरिति। व्याख्यातं षट्पदम्, अधुना जीवपदमाह-

नि.[२२१] जीवस्स उ निक्खेवो परूवणा लक्खणं च अत्थितं।
अन्नामुत्ततं निच्च कारगो देहवावित्तं॥

नि.[२२२] गुणिउड्ढगइत्ते या निम्मयसाफल्लता य परिमाणे।
जीवस्स तिविहकालम्मि परिक्खा होइ कायव्वा॥

वृ.एतद्वारगाथाद्वयम्, अस्य व्याख्या-जीवस्य तु 'निक्षेपो'नामादिः, 'प्ररूपणा' द्विविधाश्च भवन्ति जीवा इत्यादिरूपा लक्षणं च-आदानादि 'अस्तित्वं' सत्त्वं शुद्धपदवाच्यत्यादिना 'अन्यत्त्वं' देहात् 'अभूर्तत्वं' स्वतः 'नित्यत्वं' विकारानुपलम्भेन 'कर्तुत्वं' स्वकर्मफलभोगात् 'देहव्यापित्वं' तत्रेव तल्लिङ्गोपलब्ध्या 'गुणित्वं' योगादिना 'ऊर्ध्वगतित्वम्' अगुरुलघुभावेन 'निर्मा(र्म)यता' विकारस्रहितत्वेन, सफलता-च कर्मणः 'परिमाण' लोकाकाशमात्र इत्यादि एवं जीवस्य 'त्रिविधकाल' इति त्रिकालविषया, परीक्षा भवति कर्तव्या इति द्वारगाथाद्वय-समासार्थः॥ व्यासार्थस्तु भाष्यादवसेयः, तथा च निक्षेपमाह-

नि.[२२३] नामंठवणाजीवो दव्वजीवो य भावजीवो य।
ओह भवग्गहणंमि य तब्भवजीवे य भावम्मि॥

वृ.'नामस्थापनाजीव' इति जीवशब्दः प्रत्येकभिसंबध्यते, नामजीवः स्थापनाजीव इति, तथा द्रव्यजीवश्च 'भावजीवश्च' वक्ष्यमाणलक्षणः, तत्र 'ओघ' इति ओघजीवः, 'भवग्रहणे चे'ति भवजीवः, 'तद्भवजीवश्च' तद्भव एवोत्पन्नः, 'भावे' भावजीव इति गाथासमासार्थः॥

व्यासार्थं त्वाह-

भा.[६] नामंठवण गयाओ दव्वे गुणपज्जवेहि रहिउति।
तिविहो य होइ भावे ओहे भव तब्भवे चेव॥

वृ.नामस्थापने गते, क्षुण्णत्वादिति भावः, 'द्रव्य' इति द्रव्यजीवो 'गुणपर्यायाभ्यां' चैतन्य-मनुष्य-त्वादिलक्षणाभ्यां रहितः, बुद्धिपरिकल्पितो, न त्वसावित्थंविधः संभवतीति, त्रिविधश्च भवति भाव इति, भावजीवत्रैविध्यमाह-ओघजीवो भवजीवस्तद्भजीवश्चेति, प्राग्गाथोक्त-मप्येतदित्थंविधभाष्यकारशैलीप्रामाण्यतोऽदुष्टमेवेति। अन्ये तु पठन्ति-'भावे उ तिहा भणिओ, तं पुण संखेवओ वोच्छं' 'भाव' इति भावजीवः, 'त्रिधे'ति त्रिप्रकारो 'भणितो' निर्युक्तिकारेण ओघजीवादिः, तमपि च भावार्थमधिकृत्य संक्षेपतो वक्ष्य इति गाथार्थः॥ तत्रौघजीवमाह-

भा.[७] संते आउयकम्मे धरई तस्सेव जीवई उदए।
तस्सेव निज्जराए मओ त्ति सिद्धो नयमएणं॥

वृ.'सति' विद्यमान आयुष्यककर्मणि सामान्यरूपे ध्रियते सामान्येनैव तिष्ठति भवोदधौ, कथमित्थमवस्थानमात्राज्जीवत्वमस्येत्याङ्कयात्रैवान्वर्थयोजनामाह-'तस्यैव' ओघायुष्ककर्णणो 'जीवत्युदये' उदये सति जीवत्यासंसारं प्राणान् धारयति, अतो जीवना-ज्जीव इति, तस्यैवौघायुष्ककर्मणो 'निर्जरया' क्षयेण, मृत इति, सर्वथा जीवनाभावात्, स च सिद्धो मृतो, नान्यः, विग्रहगतावपि तथाजीवनसद्भावात्, 'नयमतेने'ति सर्वनयमतेनैव मृत इति गाथार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्त ओघजीवितविशिष्टो ओघजीवः, साम्प्रतं भवजीवं तद्भवजीवं चाह-

भा.[८] जेण य धरइ भवगओ जीवो जेण य भवाउ संकमई।
जाणाहि तं भवाउं भउव्विहं तब्भवे दुविहं॥ निक्खेवो त्ति गयं॥

वृ.'येन च' नारकाद्यायुष्केण 'ध्रियते' तिष्ठति 'भवगतो' नारकादिभवस्थितो जीवः, तथा 'येन च' मनुष्याद्यायुष्केण 'भवात्' नारकादिलक्षणात् 'संक्रामिति' याति, मनुष्या-दिभवान्तरमिति सामर्थ्याद्गम्यते, 'जानीहि' विद्धि, तदित्थंभूतं 'भवायुः' भवजीवितं, चतुर्विधं नारकतिर्यङ्मनुष्या-मरभेदेन, तथा 'तद्भवे' तद्भवविषयम्, आयुरिति वर्तते, तच्च द्विविधं-तिर्यक्तद्भवायुर्मनुष्य-तद्भवायुश्च, यस्मात्तवेव मृतौ सन्तौ भूयस्तस्मिन्नेव भव उत्पद्येते, नान्ये, तद्भवजीवितं च तस्मान्मृतस्य तस्मिन्नेवोत्पन्नस्य यत्तदुच्यत इति। अत्रापि च भावजीवाधिकारात्तद्भवजीवित-विशिष्टश्च जीव एव ग्राह्यः, जीवितं तु तद्विशेषणत्वादुक्तमिति गाथार्थः॥

उक्तो निक्षेपः, इदानीं प्ररूपणामाह-

भा.[९] दुविहा य हुंति जीवा सुहुमा तह बायरा य लोगम्मि।
सुहुमा य सव्वलोए दो चेव य बायरविहाणे॥

वृ.'द्विविधाश्च' द्विप्रकाराश्च, चशब्दान्नवविधाश्च पृथिव्यादिद्विन्द्रियादिभेदेन भवन्ति जीवाः, द्वैविध्यमाह-सूक्ष्मास्तथा बादराश्च, तत्र सूक्ष्मनामकर्मोदयात्सूक्ष्मा बादरनामकर्मोदयाश्च बादरा इति, 'लोक' इति लोकग्रहणमलोके जीवभवनव्यवच्छेदार्थं, तत्र सूक्ष्माश्च सर्वलोक इति, चशब्दस्यावधारणार्थत्वात्सूक्ष्मा एव सर्वलोकेषु, न बादराः, कचित्तेषामसंभवात्, 'द्वे एव च' पर्याप्तकापर्याप्तकलक्षणे 'बादरविधाने' बादरविधी, चशब्दात्सूक्ष्मविधाने च, तेषामपि पर्याप्त-कापर्याप्तकरूपत्वादिति गाथार्थः॥ एतदेव स्पष्टयन्नाह-

भा.[१०] सुहुमा य सव्वलोए परियावन्ना भवंति नायव्वा।
दो चेव बायराणं पज्जत्तियरे अ नायव्वा॥ परूवणादारं गयं ति॥

वृ.सूक्ष्मा एव पृथिव्यादयः 'सर्वलोके' चतुर्दशरज्ज्वात्मके 'पर्यायापन्ना भवन्ति ज्ञातव्याः' 'पर्यायापन्ना' इति तमेव सूक्ष्मपर्यायमापन्नाः भावसूक्ष्मा न तु भूतभाविनो द्रव्यसूक्ष्मा इति भावः। तथा द्वौ भेदौ बादराणां पृथिव्यादीनां, चशब्दात् सूक्ष्माणां च, 'पर्याप्तकेतरौ ज्ञातव्यौ' पर्याप्त-कापर्याप्तकाविति गाथार्थः॥ उक्ता प्ररूपणा, अधुना लक्षणमुच्यते, तथा चाह भाष्यकारः-

भा.[११] लक्खणमियाणि दारं चिंधं हेऊ अ कारणं लिंगं।
लक्खणमिइ जीवस्स उ आयाणाई इमं तं च॥

वृ. लक्षणमिदानीं द्वारमवसरप्राप्तम्, अस्य च प्रतिपत्त्यङ्गतया प्रधानत्वात्सामान्यतस्ता-वत्तत्स्वरूपमेवाह 'चिह्नं हेतुश्च कारणं लिङ्गं लक्षणमिति। तत्र चिह्नम्-उपलक्षणं, यथा पताका देवकुलस्य, हेतुः-निमित्तलक्षणं यथा कुम्भकारनैपुण्यं घटसौन्दर्यस्य, कारणमुपादानलक्षणं, यथा मृन्मसृणत्वं घटबलीयस्त्वस्य, लिङ्गं-कार्यलक्षणं यथा धूमोऽग्नेः, पर्यायशब्दा वा एत इति। लक्षणमित्येतल्लक्षणं लक्ष्यतेऽनेन परोक्षं वस्त्विवतिकृत्वा, जीवस्य पुनरादानादि लक्षणमनेकप्रकारमिदं, तच्च वक्ष्यमाणामिति गाथार्थः॥

नि.[२२४] आयाणे परिभोगे जोगुवओगे कसायलेसा य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आणापाणू इंदिय बंधोदयनिज्जरा चेव।

नि.[२२५] चित्तं चेयण सन्ना विन्नाणं धारणा य बुद्धी अ।

ईहामईवियक्का जीवस्स उ लक्खणा एए॥

वृ.एतत्प्रतिद्वारगाथाद्वयम्, अस्य व्याख्या-आदानं परिभोगस्तथा योगोपयोगौ कषायलेश्याश्च तथाऽऽनापानौ इन्द्रियाणि बन्धोदयनिर्जराश्चैव, तथा चित्तं चेतना संज्ञा विज्ञानं धारणा च बुद्धिश्च तथा ईहामतिवितर्का जीवस्य तु लक्षणान्येतानि, तुशब्दस्यावधारणार्थत्वाज्जीवस्यैव नाजीवस्य इति प्रतिद्वारगाथाद्वयसमासार्थः॥ व्यासार्थस्तु भाषयादवसेयः, तच्चेदम्-

भा.[१२] लक्खिज्जइत्ति नज्जइ पच्चक्खियरो व जेण जो अत्थो।

तं तस्स लक्खणं खलु धूमुण्हाइ व्व अग्गिस्स॥

वृ.लक्ष्यत इति ज्ञायते कोऽसावित्याह-'प्रत्यक्षः' अक्षगोचरापन्नः 'इतरो वा' परोक्षः 'येन' उष्णत्वादिना 'योऽर्थः' अग्नयादिस्तत्तस्य लक्षणं खल्विति, तदेव स्पष्टयतिधूमौष्ण्यादिव-दग्नेरिति, स ह्यौषण्येन प्रत्यक्षो लक्ष्यते, परोक्षो धूमनेति गाथार्थः॥ तत्रादानादीनां दृष्टान्तानाह-

भा.[१३] अयगार कूर परसू अग्गि सुवण्णे अ खीरनखासी।

आहारो दिट्ठंता आयाणाईण जहसंखं॥

वृ.अयस्कारः कूरस्तथा परशुरग्निः सुवर्ण क्षीरनखास्यः तथा आहारो दृष्टान्ता 'आदाना-दीनां' प्रक्रान्तानां यथासंख्यं, प्रतिज्ञाद्युल्लङ्घनेन चैतदभिधानं परोक्षार्थप्रतिपत्ति प्रतिप्रायः प्रधानाङ्गताख्यापनार्थमिति गाथार्थः॥ साम्प्रतं प्रयोगानाह-

भा.[१४] देहिंदियाइरित्तो आया खलु गज्झगाहगपओगा।

संडासा अयपिंडो अययाराइव्व विन्नेओ॥

वृ.देहेन्द्रियातिरिक्त आत्मा, खलुशब्दो विशेषणार्थः, कथंचित्त, न सर्वथाऽतिरिक्त एव, तदसंवेदनादिप्रसङ्गादिति, अनेन प्रतिज्ञार्थमाह, प्रतिज्ञा पुनः-अर्थेन्द्रियाणि आदेयादानानि विद्यमानादातृकाणि, कुत इत्याह-ग्राह्यग्राहकप्रयोगात्, ग्राह्या-रूपादयः ग्राहकाणि-इन्द्रियाणि तेषां प्रयोगः-स्वफलसाधनव्यापारस्तस्मात्, न ह्यमीषां कर्मकरणभावः कर्तारमन्तरेण स्वकार्य-साधनप्रयोगः संभवति, अनेनापि हेत्वर्थमाह, हेतुश्चादेयादानरूपत्वादिति। दृष्टान्तमाह-संदंशाद् आदानात् अयस्पिण्डाद् आदेयात् 'अयस्कारादिवत्' लोहकारवद्विज्ञेयः अतिरिक्तो विद्यमान आदातेत्यनेनापि दृष्टान्तार्थमाह, दृष्टान्तस्तु संदंशकायस्पिण्डवत्, यस्तु तदनतिरिक्तः न ततो ग्राह्यग्राहकप्रयोगः, यथा देहादिभ्य एवेति व्यतिरेकार्थः, व्यतिरेकस्तु यानि विद्यमानादातृकाणि न भवन्ति तान्यादानादेयरूपाण्यपि न भवन्ति, यथा मृतकद्रव्येन्द्रियादीनीति गाथार्थः॥

उक्तमादान-द्वारम्, अधुना परिभोगद्वारमाह-

भा.[१५] देहो सभोत्तिओ खलु भोज्जता ओयणाइथालं व।

अन्नप्पउत्तिगा खलु जोगा परसुव्व करणत्ता॥

वृ.देहः सभोक्तृकः खल्विति प्रतिज्ञा, भोग्यत्वादिति हेतुः, ओदनादिस्थालवत्स्थाल-स्थितौदनवदिति दृष्टान्तः, भोग्यत्वं च देहस्य जीवेन तथा निवसतोपभुज्यमानत्वादिति। उक्तं परिभोगद्वारम्, अधुना योगद्वारमाह-अन्यप्रयोक्तृकाः खलु योगाः, योगाः-साधनानि मनःप्रभृतीनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणानीति प्रतिज्ञार्थः, करणत्वादिति हेतुः, परशुवदिति दृष्टान्तः । भवति च विशेषे पक्षीकृते सामान्यं हेतुः-यथा अनित्यो वर्णात्मकः शब्दः, शब्दत्वात्, मेघशब्दवदिति गाथार्थः ॥ उक्तं योगद्वारं, साम्प्रतमुपयोगद्वारमाह-

**भा.[१६]** उवओगा नाभावो अग्गिव्व सलक्खणापरिच्चागा।
सकसाया नाभावो पज्जगमणा सुवण्णं व॥

**वृ.**'उपयोगात्' साकारानाकारभेदभिन्नान्नाभावो, जीव इति गम्यते, कुत इत्याह-'स्वलक्षणापरित्यागाद्' उपयोगलक्षणासाधारणात्मीयलक्षणापरित्यागात्, अग्निवद्, यथाऽग्निरौष्ण्यादिखलक्षणापरित्यागान्नाभावः तथा जीवोऽपीति प्रयोगार्थः, प्रयोगस्तु-सन्नात्मा, स्वलक्षणापरित्यागाद्, अग्निवदिति। उक्तमुपयोगद्वारम्, अधुना कषायद्वारमाह-सकषायत्वाद्-अचेतनविलक्षणक्रोधादिपरिणामोपेतत्त्वादित्यर्थः, नाभावो जीवः, कुत इत्याह-पर्यायगमनात्-क्रोधमानादिपर्यायप्राप्तेः, सुवर्णवत्, कटकादिपर्यायगमनोपेतसुवर्णवदिति प्रयोगार्थः, प्रयोगस्तु-सन्नात्मा, पर्यायगमनात्, सुवर्णवदिति गाथार्थः ॥ उक्तं कषायद्वारम्, इदानीं लेश्याद्वारमाह-

**भा.[१७]** लेसाओ नाभावो परिणमणसभावओ य खीरं व।
उस्सासा नाभावो समसब्भावा खउव्व नरो॥

**वृ.**'लेश्यातो' लेश्यासद्भावेन नाभावो जीवः, किंतु भाव इति, कुत इत्याह-परिणमनस्वभावत्वात्कृष्णादिद्रव्यसाचिव्येन जम्बूखादकादिदृष्टान्तसिद्धतथाविधपरिणामधर्मत्वात्, क्षीरवदिति प्रयोगार्थः, प्रयोगस्तु-सन्नात्मा, परिणामित्वात्, क्षीरवदिति। गतं लेश्याद्वारम्, प्राणापानद्वारमाह-उच्छ्वासादिति, अचेतनधर्मविलक्षणप्राणापानसद्भावान्नाभावो जीवः, किंतु भाव एवेति, श्रमसद्भावेन परिस्पन्दोपेतपुरुषवदिति प्रयोगार्थः, प्रयोगस्तु पुनरत्र व्यतिरेकी द्रष्टव्यः, सात्मकं जीवच्छरीरं, प्राणादिमत्त्वाद्, यत्तु सात्मकं न भवति तत्प्राणादिमदपि न भवति, यथाऽऽकाशमिति गाथार्थः ॥ उक्तं प्राणापानद्वारम्, अधुना इन्द्रियद्वारमुच्यते-

**भा.[१८]** अक्खाणेयाणि परत्थगाणि वासाइवेह करणत्ता।
गहवेयगनिज्जरओ कम्मस्सऽन्नो जहाहारो ॥

**वृ.**'अक्षाणि' इन्द्रियाणि 'एतानी'ति लोकप्रसिद्धानि देहाश्रयाणि 'परार्थानि' आत्मप्रयोजनानि, वास्यादिवदिह करणत्वात् इहलोके वास्यादिवदिति प्रयोगार्थः । आह-आदानान्येवेन्द्रियाणि तत् किमर्थं भेदोपन्यासः ?, उच्यते, निर्वृत्त्युपकरणद्वारेण द्वैविध्यख्यापनार्थं, ततश्च तत्रोपकरणस्य ग्रहणमिह तु निर्वृत्तेरिति, प्रयोगस्तु-परार्थाश्चक्षुरादयः, संघातत्वात्, शयनासनादिवत्, न चायं विशेषविरुद्धः, कर्मसंबद्धस्यात्मनः संघातरूपत्वाभ्युपगमात् । गतमिन्द्रियद्वारम्, अधुना बन्धादिद्वाराण्याह-ग्रहणवेदकनिर्जरकः कर्मणोऽन्यो, यथाऽऽहार इति, तत्र ग्रहणं-कर्मणो बन्धः वेदनम्-उदयः निर्जरा-क्षयः, यथाऽऽहारे इति-आहारविषयाणि ग्रहणादीनि न कर्त्रादिव्यतिरेकेण तथा कर्मणोऽपीति प्रयोगार्थः, प्रयोगस्तु-विद्यमानभोक्तृकमिदं कर्म, ग्रहणवेदननिर्जरणसदभावाद्, आहारवदिति गाथार्थः ॥ उक्तानि बन्धादिद्वाराणि, व्याख्याता च प्रथमा प्रतिद्वारगाथा, साम्प्रतं द्वितीयामधिकृत्य चित्तादिस्वरूपव्याचिख्यासयाऽऽह-

**भा.[१९]** चित्तं तिकालविसयं चेयण पच्चक्ख सन्नमनुसरणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विन्नाणऽनेगभेयं कालमसंखेयरं धरणा॥

वृ.चित्तं त्रिकालविषयम्-ओघतोऽतीतानागतवर्तमानग्राहि, चेतनं चेतना-सा प्रत्यक्षवर्तमानार्थग्राहिणी, संज्ञानं संज्ञा-सा अनुस्मरणमिदं तदिति ज्ञानं, विविधं ज्ञानं विज्ञानम् अनेकभेदम्-अनेकप्रकारम्, अनेकधर्मिणी वस्तुनि तथा तथाऽध्यवसाय इत्यर्थः, 'कालम-संख्येयेतरम्' असंख्येयं संख्येयं वा, धारणाअविच्युतिस्मृतिवासनारूपा, तत्र वासनारूपा असंख्येयवर्षायुषामसंख्येयं संख्येयवर्षायुषां च संख्येयमिति गाथार्थः॥

भा.[२०] अत्थस्स ऊह बुद्धी ईहा चेट्ठत्थअवगमो उ मई।
संभावणत्थतक्का गुणपच्चक्खा घडोव्वऽत्थि॥

वृ.अर्थस्योहा बुद्धिः संज्ञिनः परनिरपेक्षोऽर्थपरिच्छेद इति भावः, ईहा-चेष्टा किमयं स्थाणुः किंवा पुरुष? इति सदर्थपर्यालोचनरूपा, 'अर्थावगमस्तु' अर्थपरिच्छेदस्तु शिरःकण्डूयनादि-धर्मोपपत्तेः पुरुष एवायमित्येवंरूपा मतिः, 'संभावणत्थतक्क'त्ति प्राकृतशैल्या अर्थसंभावना-एवमेद चायमर्थ उपपद्यत इत्यादिरूपा तर्का। इत्थं द्वाराणि व्याख्याय सर्व एते चित्तादयो गुणा वर्तन्त इति जीवाख्यगुणिप्रतिपादकेन प्रयोगार्थेनोपसंहरन्नाह-गुणप्रत्य-क्षत्वाद्धेतोर्घटवदस्ति जीव इति गम्यते, एष गाथार्थः। एतदेव स्पष्टयति-

भा.[२१] जम्हा चित्ताईया जीवस्स गुणा हवंति पच्चक्खा।
गुणपच्चक्खत्तणओ घडुव्व जीवो अओ अत्थि॥

वृ.यस्मात् 'चित्तादयः' अनन्तरोक्ताः जीवस्य गुणाः, नाजीवस्य, शरीरादिगुणविधर्मत्वात्, एते च भवन्ति प्रत्यक्षाः, स्वसंवेद्यत्वात्, यतश्चैवं गुणप्रत्यक्षत्वाद्धेतोर्घटवज्जीवः अतोऽस्तीति प्रयोगार्थः, प्रयोगस्तु-सन्नात्मा, गुणप्रत्यक्षत्वात्, घटवत्, नायं घटवदात्मनोऽचेतनत्वापादनेन विरुद्धः, 'विरुद्धोऽसति बाधने' इतिवचनात्, एतचैतन्यं प्रत्यक्षेणैव बाधनमिति गाथार्थः॥ व्याख्यातं मूलद्वारगाथाद्वये प्रतिद्वारगाथाद्वयेन लक्षणद्वारम्, इदानीमस्तित्वद्वारवसरः, तथा चाह भाष्यकारः-

भा.[२२] अत्थित्ति दारमहुणा जीवस्सइ अत्थि विज्जए नियमा।
लोआययमयधायत्थमुच्चए तत्थिमो हेऊ॥

वृ.अस्तीति द्वारमधुना-साम्प्रतमवसरप्राप्तं, तत्रेतदुच्यते-जीवः सन्, पृथिव्यादिविकार-देहमात्ररूपः सन्निति सिद्धसाध्यता न तु ततोऽन्योऽस्तीत्याशङ्कापनोदायाह-अस्त्यन्यश्चैतन्यरूपः, तदपि मातृचैतन्योपादानं भविष्यति परलोकयायी तु न विद्यते इति मोहापोहायाहविद्यते 'नियमात्' नियमेन, तथा चाह-'लोकायतमतघातार्थं' नास्तिकाभिप्रायनिराकरणार्थमुच्यत एतत्, तस्य चानन्तरोदित एवाभिप्राय इति सफलानि विशेषणानि, 'तत्र' लोकायतमतविघाते कर्तव्ये 'अयं' वक्ष्यमाणलक्षणो 'हेतुः' अन्यथानुपपत्तिरूपो युक्तिमार्ग इति गाथार्थः॥

भा.[२३] जो चिंतेइ सरीरे नत्थि अहं स एव होइ जीवो त्ति।
न हु जीवंमि असंते संसयउप्पायओ अन्नो॥

वृ.यश्चिन्तयति 'शरीरे' अत्र लोकप्रतीते नास्त्यहं 'स एव' चिन्तयिता भवति जीव इति। कथमेतदेवमित्याह-न यस्माज्जीवेऽसति मृतदेहादौ संशयोत्पादकः 'अन्यः' प्राणादिः, चैतन्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपत्वात्संशयस्येति गाथार्थः ॥ एतदेव भावयति-

**भा.[२४]** जीवस्स एस धम्मो जा ईहा अत्थि नत्थि वा जीवो।
खाणुमनुस्साणुगया जह ईहा देवदत्तस्स॥

**वृ.** जीवस्यैष स्वभावः-एष धर्मः या 'ईहा' सदर्थपर्यालोचनात्मिका, किंविशिष्टेत्याह-अस्ति नास्ति वा जीव इति, लोकप्रसिद्धं निदर्शनमाह-'स्थाणुमनुष्यानुगता' किमयं स्थाणुः किं वा पुरुष इत्येवंरूपा येहा देवदत्तस्य जीवतो धर्म इति गाथार्थः ॥ प्रकारान्तरेणैतदेवाह-

**भा.[२५]** सिद्धं जीवस्स अत्थित्तं, सद्दादेवानुमीयए।
नासओ भुवि भावस्स, सद्दो हवइ केवलो॥

**वृ.** 'सिद्धं' प्रतिष्ठितं 'जीवस्य' उपयोगलक्षणस्यास्तित्वं, कुत इत्याह-'शब्दादेव' जीव इत्यस्मादनुमीयते, कथमेतदेवमित्याह-'नासत' इति न असतः-अविद्यमानस्य 'भुवि' पृथिव्यां 'भावस्य' पदार्थस्य शब्दो भवति वाचक इति, खरविषाणादिशब्दैर्व्यभिचारमाशङ्कयाह-'केवलः' शुद्धः अन्यपदासंसृष्टः स्वरादिपदसंसृष्टाश्च विषाणादिशब्दा इति गाथार्थः ॥

एतद्विवरणायैवाह भाष्यकारः-

**भा.[२६]** अत्थित्ति निव्विगप्पो जीवो नियमाउ सद्दओ सिद्धी।
कम्हा ? सुद्धपयत्ता घडखरसिंगाणुमाणाओ॥

**वृ.** अस्तीति निर्विकल्पो जीवः, 'निर्विकल्प' इति निःसंदिग्धः, 'नियमात्' नियमेनैव, प्रतिपत्रपेक्षया 'शब्दतः सिद्धिः' वाचकाद्वाच्यप्रतीतेः, एतदेव प्रश्नद्वारेणाह-'कस्मात्' कुत एतदेवमिति ?, आह-'शुद्धपदत्वात्' केवलपदत्वाज्जीवशब्दस्य, घटखरशृङ्गानुमानाद्, अनुमानशब्दो दृष्टान्तवचनः घटस्वरशृङ्गदृष्टान्तादिति प्रयोगार्थः, प्रयोगस्तु-मुख्येनार्थेनार्थवान्, जीवशब्दः, शुद्धपदत्वाद्, घटशब्दवत्, यस्तु मुख्येनार्थेनार्थवान् न भवति स शुद्धपदमपि न भवति, यथा खरशृङ्गशब्द इति गाथार्थः ॥ पराभिप्रायमाशङ्कय परिहरन्नाह-

**भा.[२७]** चोगय-सुद्धपयत्ता सिद्धी जइ एवं सुण्णसिद्धि अम्हं पि।
तं न भवइ संतेणं जं सुन्नं सुन्नगेहं व॥

**वृ.** उक्तवच्छुद्धपदत्वात्सिद्धिर्यदि जीवस्य एवं तर्हि शून्यसिद्धिरस्माकमपि, शून्यनष्टशब्द-स्यापि शुद्धपदत्वादित्यभिप्रायः, अत्रोत्तरमाह-तन्न भवति यदुक्तं परेण, कुत इत्याह'सता' विद्यमानेन पदार्थेन 'यद्' यस्माच्छून्यं शून्यमुच्यते, किंवदित्याह-शून्यगृहमिव, तथाहिदेवदत्तेन रहितं शून्यगृहमुच्यते, निवृत्तो घटो नष्ट इति, नत्वनयोर्जीवशब्दस्य जीववदय(वि)शिष्टं वाच्य-मस्तीति गाथार्थः ॥ प्रकारान्तरेणास्तित्वपक्षमेव समर्थयन्नाह-

**भा.[२८]** मिच्छा भवेउ सव्वत्था, जे केई पारलोइया।
कत्ता चेवोपभोत्ता य, जइ जीवो न विज्जइ॥

**वृ.** 'मिथ्या भवेयुः' अनृताः स्युः, सर्वेऽर्था ये केचन पारलौकिका-दानादयः, यदिकिम्-इत्याह-कर्ता चैव कर्मणः, उपभोक्ता च तत्फलस्य, यदि जीवो न विद्यते, परलोकयायीति गाथार्थः ॥ एतदेवाव्युत्पन्नशिष्यानुग्रहार्थं स्पष्टतरमाह-

**भा.[२९]** पाणिदयातवनियमा बंभं दिक्खा य इंदियनिरोहो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वं निरत्थयमेयं जइ जीवो न विज्जई ।।

वृ. 'प्राणिदयातपोनियमाः' करुणोपवासहिंसाविरत्यादिरूपाः, तथा 'ब्रह्म' ब्रह्मचर्यं 'दीक्षा च' यागलक्षणा 'इन्द्रियनिरोधः' प्रव्रज्याप्रतिपत्तिरूपः, सर्वं 'निरर्थकं' निष्फलमेतत्, यदि जीवो न विद्यते परलोकयायीति गाथार्थः ।।

किंच-'शिष्टाचरितो मार्गः, शिष्टैरनुगन्तव्य' इति, तन्मार्गख्यापनायाह-

भा.[३०] लोइया वेइया चेव, तहा सामाइया विऊ।

निच्चो जीवो पिहो देहा, इह सव्वे ववत्थिया ।।

वृ. लोके भवा लोके वा विदिता इति लौकिका-इतिहासादिकर्तारः, एवं वैदिकाश्चैव-त्रैविद्यवृद्धाः, तथा सामायिकाः-त्रिपिटकादिसमयवृत्तयो 'विद्वांसः' पण्डिताः, नित्यो जीवो, नानित्यः, एवं पृथग् 'देहात्' शरीरादित्येवं सर्वे व्यवस्थिताः, नान्यथेति गाथार्थः ।।

एतदेव व्याचष्टे -

भा.[३१] लोगे अच्छेज्जभेज्जो वेए सुपरीसदड्ढगसियालो।

समएज्जमासि गओ तिविहो दिव्वाईसंसारो ।।

वृ. लोकेऽच्छेद्योऽभेद्य आत्मा पठ्यते, यथोक्तं गीतासु-

"अच्छेद्योऽयमभेद्योऽयमविकार्योऽयमुच्यते।

नित्यः संततगः स्थानुरचलोऽयं सनातनः ।।" इत्यादि

तथा वेदे सपुरीषो दग्धः शृगालः पठ्यत इति, यथोक्तम् -"शृगालो वै एष जायते यः सपुरीषो दह्यते, अथापुरीषो दह्यते आक्षोधुका अस्य प्रजाः प्रादुर्भवन्ति" इत्यादि। तथा समये "अहमासीद्गजः" इति पठ्यते, तथा च बुद्धवचनम्-

"अहमासं भिक्षवो हस्ती षड्दन्तः शङ्खसंनिभः।

शुकः पञ्जरवासी च, शकुन्तो जीवजीवकः ।।" इत्यादि।

तथा त्रिविधो दिव्यादिसंसारः कैश्चिदिष्यते, देवमानुषतिर्यग्भेदेन, आदिशब्दाच्चतुर्विधः कैश्चिन्नारकाधिक्येनेति गाथार्थः ।। अत्रैव प्रकारान्तरेण तदस्तित्वमाह-

भा.[३२] अत्थि सरीरविहाया पइनियायागारयाइ भावाओ।

कुंभस्स जह कुलालो सो मुत्तो कम्मजोगाओ ।।

वृ. अस्ति शरीरस्य-औदारिकादेर्विधाता, विधातेति कर्ता, कुत इत्याह-'प्रतिनियताकारादिसद्भावात्' आदिमत्यप्रतिनियताकारत्वादित्यर्थः, दृष्टान्तमाह-कुम्भस्य यथा कुलालो विधाता। कुलालवदेवमसावपि मूर्तः प्राप्नोतीति विरुद्धमाशङ्क्य परिहरन्नाह-'स' आत्मा यः शरीरविधाता असौ मूर्तः 'कर्मयोगा'दिति मूर्तकर्मसंबन्धादिति गाथार्थः ।।

अत्रैव शिष्यव्युत्पत्तयेऽन्यथा तदग्रहणविधिमाह-

भा.[३३] फरिसेण जहा वाऊ, गिज्झई कायसंसिओ।

नाणाईहिं तहा जीवो, गिज्झई कायसंसिओ ।।

वृ. 'स्पर्शेन' शीतादिना यथा वायुर्गृह्यते 'कायसंसृतो' देहसंगतः अदृष्टोऽपि, तथा 'ज्ञाना-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिभिः' ज्ञानदर्शनेच्छादिभिर्जीवो गृह्यते 'कायसंसृतो' देहसंगत इति गाथार्थः ॥ असकृद-नुमानादस्तित्वमुक्तं जीवस्य, अनुमानं च प्रत्यक्षपूर्वकं, न चैनं केचन पश्यन्तीति, ततश्चाशोभन-मेतदित्याशङ्कयाह-

भा.[३४] अनिंदियगुणं जीवं, दुन्नेयं मंसचक्खुणा।
सिद्धा पासंति सव्वन्नू, नाणसिद्धा य साहुणो॥

वृ.'अनिन्द्रियगुणम्' अविद्यमानरूपादीन्द्रियग्राह्यगुणं 'जीवम्' अमूर्तत्वादिधर्मकं 'दुर्ज्ञेयं' दुर्लक्षं 'मांसचक्षुषा' छद्मस्थेन, पश्यन्ति सिद्धाः सर्वज्ञाः, अञ्जनसिद्धादिव्यवच्छेदार्थं सर्वज्ञग्रहणं, ततश्च ऋषभादय इत्यर्थः, ज्ञानसिद्धाश्च साधवो-भवस्थकेवलिन इति गाथार्थः॥

साम्प्रतमागमादस्तिस्तमाह-

भा.[३५] अत्तवयणं तु सत्थं दिट्ठा य तओ अइंदियाणंपी।
सिद्धी गहणाईणं तहेव जीवस्स विन्नेया॥

वृ.आप्तवचनं तु शास्त्रम्, आप्तो-रागादिरहितः, तुशब्दोऽवधारणे, आप्तवचनमेव, अनेना-पौरुषेयव्यवच्छेदमाह, तस्यासंभवादिति। 'दृष्टा च तत' इति उपलब्धा च ततः-आप्तवचन-शास्त्रात् 'अतीन्द्रियाणामपि' इन्द्रियगोचरातिक्रान्तानामपि, 'सिद्धिः ग्रहणादीना'मिति उपलब्धि-श्चन्द्रोपरागादीनामित्यर्थः, तथैव जीवस्य विज्ञेयेति, अतीन्द्रियस्वाप्याप्तवचनप्रामाण्यादिति गाथार्थः॥ मूलद्वारगाथायां व्याख्यातमस्तित्वद्वारम्, अधुनाऽन्यत्वादिद्वारत्रयव्याचिख्यासुराह-

भा.[३६] अन्नत्तममुत्तत्तं निच्चत्तं चेव भण्णए समयं।
कारणअविभागईहेऊहिं इमाहिं गाहाहिं॥

वृ.अन्यत्वं देहाद् अमूर्तत्वं स्वरूपेण नित्यत्वं चैव-परिणामिनित्यत्वं भण्यते 'समकम्' एकैकेन हेतुना त्रितयमपि युगपदिति-एककालमित्यर्थः, 'कारणाविभागादिभिः' वक्ष्यमाण-लक्षणैर्हेतुभिः 'इमाभिः' तिसृभिर्निर्युक्तिगाथाभिरेवेति गाथार्थः॥

नि.[२२५] कारणविभागकारणविनासबंधस्स पच्चयाभावा।
विरुद्धस्स य अत्थस्सापाउब्भावाविनासा य॥

वृ.'कारणविभागकारणविनाशबन्धस्य प्रत्ययाभावा'दिति अत्राभावशब्दः प्रत्येकभिसंबध्यते, कारणविभागाभावात् न खलु जीवस्य पटादेरिव तन्त्वादिकारणविभागोऽस्ति, कारणाभावादेव। एवं कारणविनाशाभावेऽपि योज्यं, तथा बन्धस्य-ज्ञानावरणादिपुद्गलयोगलक्षणस्य प्रत्ययाभावात्-हेतुत्वानुपपत्तेः, बन्धस्येति बध्यमानव्यतिरिक्तबन्धज्ञापनार्थमसमासः, व्यतिरेकी चायमन्वय-व्यतिरेकावर्थसाधकाविति दर्शनार्थमिति, तथा विरुद्धस्य चार्थस्य पटादिनाशे भस्मादेरिव 'अप्रादुर्भावादविनाशाच्च' अप्रादुर्भावेऽनुत्पत्तौ सत्यामविनाशाच्च हेतोः जीवस्य नित्यत्वं, नित्यत्वादमूर्तत्वम्, अमूर्तत्वाच्च देहादन्यत्वमिति प्रतिपत्त्यानुगुण्यतो व्यत्ययेन साध्यनिर्देशः। वक्ष्यति च निर्युक्तिकारः-'जीवस्य सिद्धमेवं, निच्चत्तममुत्तमन्नतं' इति गाथासमासार्थः। व्या-सार्थस्तु भाष्यादवसेयः, तत्राव्युत्पन्नविनेयासंमोहनिमित्तं यथोपन्यासं तावद्द्वाराणि व्याख्याय पश्चान्नि-र्युक्तिकाराभिप्रायेण मीलयिष्यतीत्यत आह-

भा.[३७] अन्नत्ति दारमहुणा अन्नो देहा गिहाउ पुरिसो व्व।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तज्जीवतस्सरियमयधायत्थं इमं भणियं।

वृ.अन्यो देहादिति द्वारमधुना, तदेतद्व्याख्याते-अन्यो देहात्, जीव इति गम्यते, गृहादिगत-पुरुषवदिति दृष्टान्तः, तद्भावेऽपि तत्रानियमतो भावादिति हेतुरप्यूह्यः, न चासिद्धोऽयं, मृत-देहेऽदर्शनात्, प्रयोगफलमाह-तज्जीवतच्छरीवादिमतविघातार्थम् 'इदं' प्रयोगरूपं भणितमिति गाथार्थः ॥ प्रयोगान्तरमाह-

भा.[३८]        देहिंदियाइरित्तो आया खलु तदुवलद्धअत्थाणं।
तव्विगमेऽवि सरणओ गेहगवक्खेहिं पुरिसो व्व ॥

वृ. खलुशब्दः विशेषणार्थत्वात्कथञ्चिद्देहेन्द्रियातिरिक्त आत्मेति प्रतिज्ञार्थः, 'तदुप-लब्धानार्थाना'मिति संभवतः परामर्शत्वात् इन्द्रियोपलब्धार्थानां 'तद्विगमेऽपि' इन्द्रियविगमेऽपि स्मरणादिति हेत्वर्थः, स्मरन्ति चान्धबधिरादयः पूर्वानुभूतं रूपादीति, गेहगवाक्षैः, पुरुषवदिति दृष्टान्तः। प्रयोगस्तु-कथञ्चिद्देहेन्द्रियातिरिक्त आत्मा, तद्विगमेऽपि तदुपलब्धार्थानुस्मरणात्, पञ्चवातायनोपलब्धार्थानुस्मर्तृदेवदत्तवदिति गाथार्थः ॥

इन्द्रियोपलब्धिमत्त्वाशङ्कापोहायाह-

भा.[३९]        न उ इंदियाइं उवलद्धिमंति विगएसु विसयसंभरणा।
जह गेहगवक्खेहिं जो अनुसरिया य उवलद्धा ॥

वृ.न पुनरिन्द्रियाण्येवोपलब्धिमन्ति-द्रष्टृणि, कुत इत्याह-विगतेष्विन्द्रियेषु विषयसंस्म-रणात्-तद्गृहीतरूपाद्यनुस्मृतेरन्धबधिरादीनामिति, निदर्शनमाह-यथा गेहगवाक्षैः करणभूतैः दृष्टानर्थाननुस्मरन् योऽनुस्मर्ता स उपलब्धा, न तु गवाक्षाः, एवमत्रापीति गाथार्थः ॥

उक्तमेकेन प्रकारेणान्यत्वद्वारम्, अधुना अमूर्तद्वारावसर इत्याह भाष्यकारः-

भा.[४०]        संपयममुत्तदारं अइंदियत्ता अछेयभेयत्ता।
रूवाइविरहओ वा अणाइपरिणामभावाओ ॥

वृ.साम्प्रतममूर्तद्वारं, तद्व्याख्यायाते, अमूर्तो जीवः, 'अतीन्द्रियत्वात्' द्रव्येन्द्रियाग्राह्यत्वात्, अच्छेद्याभेद्यत्वात्-खड्गशूलादिना, रूपादिविरहतश्च-अरूपत्वादित्यर्थः। तथा 'अनादि-परिणामभावा'दिति स्वभावतोऽनाद्यमूर्तपरिणामत्वादिति गाथार्थः ॥

भा.[४१]        छउमत्थाणुवलंभा तहेव सव्वन्नुवयणओ चेव।
लोयाइपसिद्धिओ जीवोऽमुत्तो त्ति नायव्वो ॥

वृ.छद्मस्थानुपलम्भाद्' अवधिज्ञानिप्रभृतिभिरपि साक्षादगृह्यमाणत्वात्, तथैव 'सर्वज्ञवचना-च्चैव' सत्यवक्तृवीतरागवचनादित्यर्थः, 'लोकादिप्रसिद्धः' लोकादावमूर्तत्वेन प्रसिद्धत्वात्, आदिशब्दाद्वेदसमयपरिग्रहः, अमूर्तो जीव इति ज्ञातव्यः, सर्वत्रैवेयं प्रतिज्ञेति गाथार्थः ॥ उक्तममूर्तद्वारम्, अधुना नित्यत्वद्वारप्रस्तावः, तथा चाह भाष्यकारः-

भा.[४१]        निच्चेत्ति दारमहुणा निच्चो अविनासि सासओ जीवो।
भावत्ते सइ जम्माभावाउ नहं व विन्नेओ ॥

वृ.'नित्य' इति नित्यद्वारमधुनाऽवसरप्राप्तं, तद्व्याचिख्यासयाऽऽह-नित्यो जीव इति, एता-वत्युच्यमाने परैरपि संतानस्य नित्यत्वाभ्युपगमात्सिद्धसाध्यतेति तन्निराकरणायाहअविनाशी-

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

क्षणापेक्षयाऽपि न निरन्वयनाशधर्मा, एवमपि परिमितकालावस्थायी कैश्चिदिष्यते'कप्पट्ठाई पुढवी भिक्खू वे'ति वचनात्तदपोहायाह-'शाश्वत' इति सर्वकालावस्थायी, कुत इत्याह-'भावत्वे सति' वस्तुत्वे सतीत्यर्थः, 'जन्माभावात्' अनुत्पत्तेः 'नभोवद्' आकाशवद्विज्ञेयः, भावत्वे सतीति विशेषणं खरविषाणादिव्यवच्छेदार्थमिति गाथार्थः ॥ हेत्वन्तराण्याह-

**भा.[४३]** संसाराओ आलोयणाउ तह पच्चभिन्नभावाओ।
खणभंगविघायत्थं भणिअं तेलोक्कदंसीहिं॥

**वृ.** 'संसारा'दिति संसरणं संसारस्तस्मात्, स एव नारकः स एव तिर्यगादिरिति नित्यः, 'आलोचना'दिति आलोचनं-करोम्यहं कृतवानहं करिष्येऽहमित्यादिरूपं त्रिकालविषयमिति नित्यः, तथा 'प्रत्यभिज्ञाभावात्' स एष इति प्रत्यभिज्ञाप्रत्यय आविद्वदङ्गनादिसिद्धः तदभेदग्राहीति नित्य इति, उक्ताभिधानफलमाह-'क्षणभङ्गविधातार्थं' निरन्वयक्षणिकवस्त-ुवादविधातार्थं भणितं 'त्रैलोक्यदर्शिभिः' तीर्थकरैः एतदनन्तरोदितं, न पुनरेष एव परमार्थ इति गाथार्थः ॥

एतदेव दर्शयति-

**भा.[४४]** लोगे वेए समए निच्चो जीवो विभासओ अम्हं।
इहरा संसाराई सव्वंपि न जुज्जए तस्स॥

**वृ.**'नैनं छिन्दन्ति शस्त्राणी'त्यादिवचनप्रामाण्यात्, वेदे 'स एष अक्षयोऽज' इत्यादिश्रुति-प्रामाण्यात् समये 'न प्रकृतिर्न विकृतिः पुरुष' इति वचनप्रामाण्यात्, किमित्याहनित्यो जीवः-अप्रच्युतानुत्पन्नस्थिरैकस्वभावः, एकान्तनित्य एव, न चैतन्याय्यम्, एकस्वभाव-तया संसरणा-दिव्यवहारोच्छेदप्रसङ्गादिति वक्ष्यति, अत आह-'विभाषयाऽस्माकं' विकल्पेन-भजनया स्यान्नित्य इत्यादिरूपया द्रव्यार्थादेशान्नित्यः पर्यायार्थादेशादनित्य इत्यर्थः, 'इतरथा' यद्येवं नाभ्युपगम्यते ततः 'संसारादि' संसारालोचनादि सर्वमेव न युज्यते 'तस्य' आत्मनः, स्वभावान्तरा-नापत्त्या एकस्वभावतया वार्तमानिकभावातिरेकेण भावान्तरानापत्तेः, एवममूर्तत्वान्यत्वयोरपि विभाषा वेदितव्या, अन्यथा व्यवहाराभावप्रसङ्गात्, एकान्तामूर्तस्यैकान्तदेहभिन्नस्य चातिपाता-द्यसंभवादित्यत्र बहु वक्तव्यं तत्तु नोच्यते, अक्षरगमनिकामात्रत्वात्प्रारम्भस्येति गाथार्थः ॥

एवमन्य-त्वादिद्वारत्रयं व्याख्यायाधिकृतनिर्युक्तिगाथां व्याचिख्यासुराह-

**भा.[४५]** कारणअविभागाओ कारणअविनासओ य जीवस्स।
निच्चत्तं विन्नेयं आगासपडाणुमाणाओ॥

**वृ.**'कारणाविभागात्' पटादेस्तन्त्वादेरिव कारणविभागाभावादित्यर्थः, 'कारणाविनाशतश्च' कारणाविनाशश्च कारणनामेवाभावात्, किमित्याह-'जीवस्य' आत्मनो नित्यत्वं विज्ञेयम्, कुत इत्याह-'आकाशपटानुमानात्' अत्रानुमानशब्दो दृष्टान्तवचनः, आकाशपटदृष्टान्तात्। ततश्चैवं प्रयोगः-नित्य आत्मा, स्वकारणविभागाभावाद्, आकाशवत्, तथा कारणविनाशाभावाद्, आकाशवदेव, यस्त्वनित्यस्तस्य कारणविभागभावः कारणविनाशभावो वा यथा पटस्येति व्यतिरेकः, पटाद्धि तन्तवो विभज्यन्ते विनश्यन्ति चेति नित्यत्वसिद्धिः। नित्यत्वादमूर्तः, अमूर्तत्वाद्देहादन्य इति गाथार्थः ॥ निर्युक्तिगाथायां कारणविभागाभावात्कारणविनाशाभावा-च्चेति द्वारद्वयं व्याख्याय साम्प्रतं बन्धस्य प्रत्ययाभावादिति व्याचिख्यासुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[४६] हेउप्पभवो बंधो जम्मानंतरहयस्स नो जुत्तो।
तज्जोगविरहओ खलु चोराइघडानुमाणाओ॥

वृ. 'हेतुप्रभवो' हेतुजन्मा 'बन्धो' ज्ञानावरणादिपुद्गलयोगलक्षणः, 'जन्मानन्तरहतस्य' उत्पत्त्यनन्तरविनष्टस्य 'न युक्तो' न घटमानः 'तद्योगविरहत' इति तैः-बन्धहेतुभिर्मिथ्यादर्शना-विरतिप्रमादकषाययोगलक्षणैर्यो योगः-संबन्धस्तद्विरहतः-तदभावादेव, खलुशब्दस्यावधार-णार्थत्वात्, 'चौरादिघटानुमाना' दित्यनुमानशब्दो दृष्टान्तवचनः, चौरादिघटादिदृष्टान्तात्, न हि उत्पत्त्यनन्तरविनाशी चौरश्चौर्यक्रियाभावेन बध्यते, स्थायी हि घटो जलादिना संयुज्यते इति व्यतिरेकार्थः, प्रयोगश्चात्र-न क्षणिक आत्मा, बन्धप्रत्ययत्वाच्चौरवत्, नित्यत्वामूर्तत्वदेहान्यत्व-योजना पूर्ववदिति गाथार्थः ॥ निर्युक्तिगाथायां बन्धस्य प्रत्ययाभावादिति व्याख्यातम्,

अधुना 'विरुद्धस्य चार्थस्याप्रादुर्भावविनाशाच्चे'ति व्याख्यायते-

भा.[४७] अविनासी खलु जीवो विगारनुवलंभओ जहागासं।
उवलब्भंति विगारा कुंभाइविनासिदव्वाणं॥

वृ.अविनाशी खलु जीवो, नित्य इत्यर्थः, कुत इत्याह 'विकारानुपलम्भात्' घटादिविनाशे कपालादिवद्विशेषादर्शनाद्, यथाऽऽकाशम्-आकाशवदित्यर्थः, एतदेव स्पष्टयति-'उपलभ्यन्ते विकारा' दृश्यन्ते कपालादयः कुम्भादिविनाशिद्रव्याणां, न चैवमत्रेत्यभिप्रायः, नित्यत्वामूर्तत्व-देहान्यत्वयोजना पूर्ववत्, इति गाथार्थः। प्रकृतसंबद्धामेव निर्युक्तिगाथामाह-

नि.[२२६] निरामयामयभावा बालकयाणुसरणादुवत्थाणा।
सुत्ताईहिं अगणहा जाईसरणा थणभिलासा॥

वृ.'निरामयामयभावात्' निरामयस्य-नीरोगस्याऽऽमयभावाद्, रोगोत्पत्तेः, उपलक्षणं चैतत् सामयनिरामयभावस्य, तथा चैवं वक्तार उपलभ्यन्ते-पूर्वं निरामयोऽहमासं सम्प्रति सामयो जातः सामयो वा निरामय इति, न चैतन्निरन्वयलक्षणविनाशिन्यात्मन्युपपद्यते, उत्पत्त्यनन्तराभावा-दिति प्रयोगार्थः, प्रयोगस्तु-अवस्थित आत्मा, अनेकावस्थानुभवनात्, बालकुमाराद्यवस्थानु-भवितृदेवदत्तवत्, नित्यत्वादमूर्तः, अमूर्तत्वाद्देहादन्य इति योजना सर्वत्र कार्या। तथा 'बालकृतानु-स्मरणात्' कृतशब्दोऽत्रानुभूतवचनः, ततश्च बालानुभूतानुस्मरणात्, तथा च बालेनानुभूतं वृद्धोऽप्यनु-स्मरन् दृश्यते, न च अन्येनानुभूतमन्यः स्मरति अतिप्रसङ्गात् न चेदमनुस्मरणं भ्रान्तं, बाधाऽसिद्धेः, न च हेतुफलभावनिबन्धनमेतत्, नीरन्वयक्षणविनाशपक्षे तस्यैवासिद्धेः, हेतोरनन्तर-क्षणेऽभावापत्तेः, असतश्च सद्भावविरोधादिति प्रयोगार्थः, प्रयोगस्तु-अवस्थित आत्मा, पूर्वानु-भूतार्थानुस्मरणात्, तदन्यैवंविधपुरुषवत्। उपस्थानादिति कर्मफलोपस्थानमत्र गृह्यते, यद्येनोपात्तं कर्म स एव तत्फलमुपभुङ्क्ते, अन्यश्च क्रियाकालोऽन्यश्च फलकालः, एकाधिकरणं चैतद्वयम्, अन्यथा स्वकृतवेदनासिद्धेः, अन्यकृतान्योपभोगस्य निरुपपत्तिकत्वात्, कृत-नाशाकृतभ्यागम-प्रसङ्गात्, संतानपक्षेऽपि कर्तृभोक्तृसंतानिनोर्नानात्वाविशेषात्, शक्ति भेदात्, तस्यैव तथाभावाभ्युपगमे नित्यत्वापत्तेरिति प्रयोगार्थः, प्रयोगश्च-अवस्थित आत्मा, स्वकृत-कर्मफलवेदनात्, कृषीवलादिवत्।

श्रोत्रादिभिरग्रहणात्-श्रोत्रादिभिरिन्द्रियैरपरिच्छित्तेः, न च श्रोत्रादिभिरपरिच्छिद्यमानस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असत्त्वम्, अवग्रहादीनां स्वसंवेदनसिद्धत्वात्, बौद्धैरप्यतीन्द्रियज्ञानाभ्युपगमात्, ज्ञानस्य च गुणत्वात्, गुणस्य च गुणिनभन्तरेणाभावात्, प्राक्तनज्ञानस्यैव गुणित्वानुपपत्तेः, तस्यापि गुणत्वादिति प्रयोगार्थः, प्रयोगश्च–नित्य आत्मा, गुणित्वे सत्यतीन्द्रियत्वात्, आकाशवत्। तथा जातिस्मरणादिति, जातेरतिक्रान्तायाः स्मरणात्, न चेदमनुसमरणमननुभूतस्यान्यानुभूतस्य च भवति, अतिप्रसङ्गात्, दृश्यते च कचिदिदं, न चासौ प्रतारकः, तत्कथितार्थसंवादनात्, अनुभवाविशेषे सर्वेषामेव कस्मान्न भवतीति चेद्, उच्यते, कर्मप्रतिबन्धाद् दृढानुभवाभावाद्, इह लोकेऽपि सर्वेषां सर्वत्रानुस्मरणादर्शनात्, न खलु इह लोके सर्वत्रानुस्मरणदर्शनं, तद्वदिहापि, क्वचिज्जातौ सर्वेषामस्त्विति चेन्न, नष्टचेतसां सर्वत्रानुस्मरणशून्येन व्यभिचारादिति प्रयोगार्थः, प्रयोगश्च बालकृतानुस्मरणवद्रष्टव्य इति।

तथा स्तनाभिलाषादिति, तदहर्जाबालकस्यापि स्तनाभिलाषदर्शनात्, न चान्यकालाननुभूतस्तनपानस्यायमुपपद्यते, प्रयोगश्च–तदहर्जातबालकस्याऽऽद्यस्तनाभिलाषोऽभिलाषान्तरपूर्वकः, अभिलाषत्वाद्, तदन्यस्तनाभिलाषवत्, तद्वदप्रथमत्वसाधनाद् विरुद्धो हेतुरिति चेन्न, प्रथमत्वानुभवेन बाधनात्, 'असति च बाधने विरुद्ध' इति न्यायाद्, अन्यथा हेतूच्छेदप्रसङ्गादित्यत्र बहु वक्तव्यं तत्तु नोच्यते, अक्षरगमनिकामात्रस्य प्रस्तुतत्वादिति। नित्यादिक्रियायोजना पूर्ववदिति निर्युक्तिगाथार्थः॥ एतामेव निर्युक्तिगाथां लेशतो व्याचिख्यासुराह भाष्यकारः–

**भा.[४८]** रोगस्सामयसन्ना बालकयं जं जुवाऽनुसंभरइ।
जं कयमन्नंमि भवे तस्सेवन्नत्थुवत्थाणा॥

**वृ.**रोगस्यामय इति संज्ञा, बालकृतं किमपि वस्तु 'यद्' यस्माद्युवाऽनुस्मरति, तथा यत्कृतमन्यस्मिन् भवे–कुशलाकुशलं कर्म तस्यैव–कर्मणोऽन्यत्र–भवान्तरे उपस्थानात्, सर्वत्र भावार्थयोजना कृतैवेति गाथार्थः॥

**भा.[४९]** निच्चो अनिंदियत्ता खणिओ नवि होइ जाइसंभरणा।
थणअभिलासा य तहा अमओ नउ मिम्मउव्व घडो॥

**वृ.**नित्य इति, सर्वत्र क्रियाभिसंबध्यते, अतीन्द्रियत्वात्–श्रोत्रादिभिरग्रहणादित्यर्थः, 'विज्ञेयो' ज्ञातव्यः। तथा च जातिस्मरणात्, पाठान्तरं वा 'क्षणिको न भवति जाति–स्मरणा'दिति, एतदप्यदुष्टमेव, विधिप्रतिषेधाभ्यां साध्यार्थाभिधानात्, स्तनाभिलाषाच्च, तथा अमयोऽयमात्मा, नतु मृन्मय इव घटः, ततश्चाकारण इत्यर्थः। एतदपि नित्यत्वादिप्रसाधकमिति निर्युक्तिगाथायामनुपन्यस्तमप्युक्तं सूक्ष्मधिया भाष्यकारेणेति गाथार्थः॥ तृतीयां निर्युक्तिगाथामाह–

**नि.[२२७]** सव्वन्नुवदिट्ठत्ता सकम्मफलभोयणा अमुत्तत्ता।
जीवस्स सिद्धमेवं निच्चत्तममुत्तमन्नत्तं॥

**वृ.** 'सर्वज्ञोपदिष्टत्वा'दिति नित्यो जीव इति सर्वज्ञोक्तत्वात्, अवितथं च सर्वज्ञ–वचनं, तस्य रागादिरहितत्वादिति। तथा 'स्वकर्मफलभोजना'दिति स्वोपात्तकर्मफलभोगादित्यर्थः, उपस्थानदेतन्न भिद्यत इति चेन्न, अभिप्रायापरिज्ञानात्, तत्र हि येन कृतं तस्मिन्नेव कर्तरि कर्मोपतिष्ठत इत्युक्तं तच्चैकस्मिन्नपि जन्मनि संभवति, इदं त्वन्यजन्मान्तरापेक्षयाऽपि गृह्यत इति न दोषः। तथा 'अमूर्तत्वा'दिति मूर्तिरहितत्वाद्, एतदपि श्रोत्रादिभिरग्रहणादित्यस्मान्न भिद्यत इति चेन्न, तत्र हि श्रोत्रादिभिर्न गृह्यते इत्येतदुक्तम्, इह तु तत्स्वरूपमेव नियम्यते इति, मूर्ताणूनामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रोत्रादिभिरग्रहणादिति। द्वारत्रयमप्युपसंहरन्नाह-जीवस्य सिद्धमेवं नित्यत्वममूर्तत्वमन्यत्वमिति गाथार्थः ॥ मूलद्वारगाथाद्वये व्याख्यातमन्यत्वादिद्वारत्रयम्, इदानीं कर्तृद्वारावसरः, तथा चाह-

भा.[५०] कत्तत्ति दारमहुणा सकम्मफलभोइणो जओ जीवा।
वाणियकिसोवला इव कविलमयनिसेहणं एयं।

वृ.कर्तेति द्वारमधुना-तदेशद्वयाख्यायते, स्वकर्मफलभोगिनो यतो जीवास्ततः कर्तार इति, वणिक्कृषीवलायदय इव, न ह्यमी अकृतमुपभुञ्जते इति प्रयोगार्थः, प्रयोगस्तुकर्ताऽऽत्मा, स्वकर्मफलभोक्तृत्वात्, कर्षकादिवत्। ऐदम्पर्यमाह-'कपिलमतनिषेधनमेतत्' संख्यमतनिराकरणमेतत्, तत्रकर्तृवादप्रसिद्धेरिति गाथार्थ :॥ मूलद्वारागाथाद्वये व्याख्यातं कर्तृद्वारम्, इदानीं देहव्यापित्वद्वारावसर इत्याह भाष्यकारः -

भा.[ ५१ ] वावित्ति दारमहुणा देहव्वावी मओऽग्गिउण्हं व।
जीवो नउ सव्वगओ देहे लिंगोवलंभाओ ॥

वृ.व्यापीति द्वारमधुना-तदेतद्वयाख्यायते, 'देहव्यापी' शरीरमात्रं व्याप्तुं शीलमस्येति तथा 'मत' इष्टः प्रवचनज्ञैः जीवो, नतु सर्वग इति योगः, तुशब्दस्यावधारणार्थत्वान्न चाण्वादिमात्रः, कुत इत्याह-'देहे लिङ्गोपलम्भात्' शरीर एव सुखादितोलिङ्गोपलब्धेः, अग्न्यौष्ण्यत्, उष्णत्वं ह्यग्निलिङ्गं नान्यत्राग्नेः न च नाग्राविति(गाथा)प्रयोगार्थः। प्रयोगस्तु-शरीरनियतदेश आत्मा, परिमितदेशे लिङ्गोपलब्धेः, अग्न्यौष्ण्यवत् इति गाथार्थः ॥ व्याख्याता प्रथमा मूलद्वारगाथा, साम्प्रतं द्वितिया व्याख्यायते-तत्र प्रथमं गुणीत्वाद्यद्वारं, तद्वयाचिख्यासयाऽऽह भाष्यकारः-

भा.[५२] अहुणा गुणित्ति दारं होइ गुणेहिं गुणित्ति वित्रेओ।
ते भोगजोगउवओगमाइ रूवाइ व घडस्स॥

वृ.अधुना गुणीति द्वारं-तदेतद्वयाख्यायते, भवति गुणैर्हि गुणी न तद्वयतिरेकेण 'इति' एवं वज्ञेयः, अनेन गुणगुणिनोर्भेदाभेदमाह, ते भोगोयोगोपयोगादयो गुणा इति, आदि-शब्दादमूर्तत्वादिपरिग्रहः, निदर्शनमाह-रूपादय इव घटस्य गुणा इति गाथार्थः ॥ व्याख्यातं मूलद्वारगाथायां गुणिद्वारम्, अधुनोर्ध्वगतिद्वारावसर इत्याह भाष्यकारः -

भा.[५३] उड्ढंगइत्ति अहुणा अगुरुलहुत्ता सभावउड्ढगई।
दिट्ठंतलाउएणं एरंडफलाइएहिं च ॥

वृ.ऊद्ध्र्वगतिरित्यधुना द्वारं-तदेतद्वयाख्यायते, अगुरुलघुत्वाकारणात्स्वभावातः कर्मविप्रमुक्तः सन्नूर्ध्वगतिः, जीव इति गम्यते, यद्येवं तर्हि कथमधो गच्छति?, अत्राह-दृष्टान्तः 'अलावुना' तुम्बकेन, यथा तत्स्वभावत ऊर्ध्वगमनरूपमपि मृल्लेपाज्जऽधो गच्छति तदपग-मादूर्ध्वमा जलान्ताद्, एवमात्माऽपि कर्मलेपादधो गच्छति तदपगमादूर्ध्वमा लोमकान्तादिति। एरण्डफलादिभिश्च दृष्टान्त इति, अनेन दृष्टान्तबाहुल्यं दर्शयति, यथा चैरण्डफलमपि बन्धनपरिभ्रष्टमूध्र्व गच्छति, आदिशब्दादग्न्यादिपरिग्रह इति गाथार्थः ॥ व्याख्यातं द्वितीयमूलद्वारगाथायामूर्ध्वगतिद्वारं, साम्प्रतं निर्मयद्वारव्याचिख्यासयाऽऽह-

भा.[५४] अमओ ये होइ जीवो कारणविरहा जहेव आगासं।
समयं च होअनिच्चं मिम्मयघडतंतुमाईयं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.अभयश्च भवति जीवः, न किम्मयोऽपीत्यर्थः, कुत इत्याह-'कारणविरहात्' अकारणत्वात्, यथैवाकाशम्-आकाशवदित्यर्थः, समयं च वस्तु भवत्यनित्यम् एतदेव दर्शयतिमृन्मय-घटन्त्वादि, यथा मृन्मयो घटस्तन्तुमयः पट इत्यादि, न पुनरात्मा, नित्य इति दर्शितम्। आह-अस्मिन् द्वारे सति 'अमयो ननु मृन्मय एव घट' इति प्राक्किमर्थमुक्तमिति, उच्यते, अत एव द्वारादनुग्रहार्थमुक्तमिति लक्ष्यते, भवति चासकृच्छ्रवणादकृच्छ्रेण परिज्ञानमित्यनुग्रहः, अतिगम्भीरत्वाद्भाष्यकाराभिप्रायस्य न(वा) वयमभिप्रायं विद्म इति। अन्ये त्वभिदधि-अन्य-कर्तृकैवासौ गाथेति गाथार्थः ॥ व्याख्यातं द्वितीयमूलद्वारगाथायां निर्मयद्वारम्, अधुना साफल्य-द्वारावसरः, तथा चाह भाष्यकारः-

भा.[५५] साफल्लदारमहुणा निच्चनिच्चपरिणामिजीवम्मि।
होइ तयं कम्माणं इहरेगसभावओऽजुत्तं॥

वृ.साफल्यद्वारमधुना-तदेतद्व्याख्याते, नित्यानित्य एव परिणामिनि जीव इति योगः, भवति तत् साफल्यं कालान्तरफलप्रदानलक्षणम्, केषामित्याह-कर्मणां-कुशलाकुशलानां, कालभेदेन कर्तृभोक्तृपरिणामभेदे सत्यात्मनस्तदुभयोपपत्तेः कर्मणां कालान्तरफलप्रदानमिति, 'इतरथा' पुनर्यद्येवं नाभ्युपगम्यते तत एकस्वभावत्वतः कारणादयुक्तं 'तत्' कर्मणां साफल्यमिति, एतदुक्तं भवति-यदि नित्य आत्मा कर्तृस्वभाव एव कृतोऽस्य भोगः?, भोक्तृस्वभावत्वे चाकर्तृत्त्वं, क्षणिकस्य तु कालद्वयाभावदेवैतदुभयमनुपपन्नम्, उभये च सति कालान्तर-फलप्रदानेन कर्म सफलमिति गाथार्थः ॥ द्वितीयमूलद्वारगाथायां व्याख्यातं साफल्यद्वारम्, अधुना परिणामद्वारमह-

भा.[५६] जीवस्स उ परिमाणं वित्थरओ जाव लोगमेत्तं तुं।
ओगाहणा य सुहुमा तस्स पएसा असंखेज्जा॥

वृ.जीवस्य तु परिमाणं विततस्य 'विस्तरतो' विस्तरेण यावल्लोकमात्रमेव, एतच्च केवलि-समुद्घातचतुर्थसमये भवति, तत्रावगाहना च 'सूक्ष्मा' वितततैकेकप्रदेशरूपा भवति, 'तस्य' जीवस्य प्रदेशाश्चासंख्येयाः सर्व एव लोकाकाशप्रदेशतुल्या इति गाथार्थः ॥

अनेकेषां जीवानां गणनापरिमाणमाह-

भा.[५७] पत्थेण व कुलएण व जह कोइ मिणेज्ज सव्वधन्नाइं।
एवं मविज्जमाणा हवंति लोगा अनंता उ॥

वृ.'प्रस्थेन वा' चतुःकुडवमानेन 'कुडवेन वा' चतुःसेतिकामानेन यथा कश्चित्प्रमाता मिनुयात् 'सर्वधान्यानि' व्रीह्यादीनि एवं मीयमाना असद्भावस्थापनया भवन्ति लोका अनन्तास्तु, जीवभृता इति भावः। आह-यद्येवं कथमेकस्मिन्नेव ते लोके माता इति ?, उच्यते, सूक्ष्मावगाहनया, यत्रैकस्तत्रान्ता व्यवस्थिताः, इह तु प्रत्येकावगाहनया चिन्त्यन्ते इति न दोषः, दृष्टं च बादरद्रव्याणा-मपि प्रदीपप्रभापरमाण्वादीनां तथा परिणामतो भूयसामेकत्रैवावस्थानमिति गाथार्थः ॥ व्याख्यातं द्वितीयमूलद्वारगाथायां परिमाणद्वारं, तद्व्याख्यानाच्च द्वितीया मूलद्वारगाथा जीवपदं चेति।

साम्प्रतं निकायपदं व्याचिख्यासुराह-

भा.[५८] नामं ठवणसरीरे गई निकायत्थिकाय दविए य।
माउगपज्जवसंगहभारे तह भावकाए य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.नामस्थापने क्षुण्णे, शरीकायः-शरीरमेव, तत्प्रायोग्याणुसंघातात्मकत्वात्, गतिकायो-यो भवान्तरगतौ, स च तैजसकार्मणलक्षणः, निकायकायः-षड्जीवनिकायः, अस्तिकायो-धर्मास्तिकायादिः, द्रव्यकायश्च-त्र्यादिघटादिद्रव्यसमुदायः, मातृकाकायः त्र्यादीनि मातृकाक्षराणि, पर्यायकायो द्वेधा-जीवाजीवभेदेन, जीवपर्यायकायो-ज्ञानादिसमुदायः, अजीवपर्यायकायो-रूपादिसमुदायः, संग्रहकायः-संग्रहैकशब्दवाच्यास्त्रिकटुकादिवत्, भारकायः कापोती, वृद्धास्तु व्याचक्षते-

"एगो काओ दुहा जाओ, एगो चिट्ठइ भगो मारिओ।
जीवंतो मएण मारिओ, तल्लव माणव! केण हेउणा ?॥"

उदाहरणम्-एगो काहरो तलाए दो घडा पाणियस्स भरेऊण कावोडीए वहइ, सो एगो आउक्कायकायो दोसु घडेसु दुहा कओ, तओ सो काहरो गच्छंतो पक्खलिओ, एगो घडो भग्गो, तम्मि जो आउक्काओ सो मओ, इयरम्मि जीवइ, तस्स अभावे सोऽवि भग्गो, ताहे सो तेन पुव्वमएण मारिओ त्ति भण्णइ। अहवा-एगो घडो आउक्कायभरिओ, ताहे तमाउकायं दुहा काऊण अद्धो ताविओ, सो मओ, अताविओ जीवइ, ताहे सोऽवि तत्थेव पक्खित्तो, तेन मएण जीवंतो मारिओ त्ति। एस भारकाओ गओ। भावकायश्चौदायिकादिसमुदायः, इह च निकायः काय इत्यनर्थान्तरमितिकृत्वा कायनिक्षेप इत्यदुष्ट एवेति गाथार्थः॥

**नि.[२३०]** इत्थं पुण अहिगारो निकायकाएण होइ सुत्तंमि।
उच्चारिअत्थसदिसाण कित्तणं सेसगाणंपि।

वृ.अत्र पुनः सूत्र इति योगः, (सूत्र इत्यधिकृताध्ययने) किमित्याह-अधिकारो निकायकायेन भवति, अधिकारः-प्रयोजनं, शेषाणामुपन्यासवैयर्थ्यमाशङ्क्याह-उच्चरितार्थसद्दशानां-उच्चरितो निकायः तदर्थतुल्यानां कीर्तनं-संशब्दनं शेषाणामपि-नामादिकायानां व्युत्पत्तिहेतुत्वात्प्रदेशान्तरोपयोगित्वाच्चेति गाथार्थः॥ व्याख्यातं निकायपदम्, उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यवासर इत्यादि चर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

*मू. ( ३२/२ )सुयं मे आउसंतेण भगवया एवमक्खायं-इह खलु छज्जीवणिया नामज्झयणं, समणेणं भगवया महावीरेणं कासवेणं पवेइया सुअक्खाया सुपन्नता सेयं मे अहिज्जिउं अज्झयणं धम्मपन्नत्ती। कयरा खलु सा छज्जीवणियानामज्झणं समणेणं भवयवा महावीरेणं कासवेणं पवेइया सुअ-क्खाया सुपन्नत्ता सेयं मे अहिज्जिउं अज्झयणं धम्मपन्नत्ती ?।*

*इमा खलु सा छज्जीवणिया नामज्झयणं समणेणं भगवआ महावीरेणं कासवेण पवेइया सुखक्खाया सुपन्नत्ता सेयं मे अहिज्जउं अजझयणं धम्मपन्नत्ती॥ तंजहा-*

*पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सइकाइया तसकाइया। पुढवी चित्तमंतमक्खाया अनेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं, आऊ चित्तमंतमक्खाया अनेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं, वणस्सई चित्तमंतमक्खाया अनेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं, तंजहाअग्गबीया मूलबीया पोरबीया खंधबीया बीयरुहा संमुच्छिमा तणलया, वण-स्सइकाइया सबीया चित्तमंतमक्खाया अनेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से जे पुण इमे अनेगे बहवे तसा पाणा, तंजहा-अंडया पोयया जराउया रसया संसेइमा संमुच्छिमा उब्भिया उववाइया। जेसिं केसिंचि पाणाणं अभिक्कंतं पडिक्कंतं संकुचियं पसारियं रुयं भंतं तसियं पलाइयं आगइगइविन्नया जे य कीडपयंगा जा य कुंथपिपीलिया सव्वे बेइंदिया सव्वे तेइंदिया सव्वे चउरिंदिया सव्वे पंचिंदिया सव्वे तिरिक्खजोणिया सव्वे नेरइया सव्वे मणुआ सव्वे देवा सव्वे पाणा परमाहम्मिआ। एसो खलु छट्ठो जीवनिकाओ तसकाउ त्ति पवुच्चइ॥*

वृ. श्रूयते तदिति श्रुतम्-प्रतिविशिष्टार्थप्रतिपादनफ वाग्योगमात्रं भगवता निसृष्टिमात्मीय-श्रवणकोटरप्रविष्टं क्षायोपशमिकभावपरिणामाविर्भावकारणं श्रुतमित्युच्यते, श्रुतमवधृतमवगृही-तमिति पर्यायाः, 'मये' त्वात्मपरामर्शः, आयुरस्यास्तीत्यायुष्मान् तस्यामन्त्रणं हे आयुष्यमन्!, कः कमेवमाह ?-सुधर्मस्वामी जम्बूस्वामिनमिति, 'तेने'ति भुवनभर्तुः परामर्शः, भगः-समग्रैश्वर्यादिलक्षण इति, उक्तं च-

"ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतोङ्गना॥"

सोऽस्यास्तीति भगवांस्तेन भगवता-वर्धमानस्वामिनेत्यर्थः, 'एव'मिति प्रकारवचनःशब्दः, 'आख्यात'मिति केवलज्ञानेनोपलभ्यावेदितं, किमत आह-इह खलु षड्जीवनिकायनाध्ययनम्, अस्तीति वाक्यशेषः, 'इहे'ति लोके प्रवचने वा, खलुशब्दादन्यतीर्थकृत्प्रवचनेषु च, 'षड्जीवनि-काये'ति पूर्ववत्, 'नामे'त्यभिधानम्, 'अध्ययन'मिति पूर्ववदेव। इह च 'श्रुतं मये' त्यनेनात्म-परामर्शेनैकान्तक्षणभङ्गापोहमाह, तत्रेत्थंभूतार्थानुपपत्तेरिति, उक्तं च,-

"एगंतखणियपक्खे गहणं चिअ सव्वहा न अत्थाणं।
अनुसरणसासणाइं कुओ उ तेलोगसिद्धाइं?॥"

तथा 'आयुष्म'न्निति च प्रधानगुणनिष्पन्नेनामन्त्रणवचसा गुणवते शिष्यायागमरहस्यं देयं नागुणवत इत्याह, तदनुकम्पाप्रवृत्तेरिति, उक्तं च -

"आमे घडे निहत्तं जहा जलं तं घडं विनासेइ।
इअ सिद्धंतरहस्सं अप्पाहारं विनासेइ॥"

आयुश्च प्रधानो गुणः, सति तस्मिन्नव्यवच्छित्तिभावात्, तथा 'तेन भगवता एवमाख्यात' मित्यनेन स्वमनीषिकानिरासाच्छास्त्रपारतन्त्र्यप्रदर्शनेन न ह्यसर्वज्ञेन अनात्मवता अन्यतस्था-भूतात्सम्यगनिश्चित्य परलोकदेशना कर्येत्येतदाह, विपर्ययसंभवाद्, उक्तं च-

"किं इत्तो पावयरं? संमं अणहिगयधम्मसब्भावो।
अन्नं कुदेसणाए कट्ठयरागंमि पाडेइ॥"

अथवाऽन्यथा व्याख्यायते सूत्रैकदेशः-'आउसंतेण'ति भगवत एव विशेषणम्, आयुष्मता भगवता-चिरजीविनेत्यर्थः, मङ्गलवचनं चैतद्, अथवा जीवता साक्षादेव, अनेन च गणधर-परम्परागमस्य जीवनविमुक्तानदिशुद्धवक्तुश्चापोहमाह, देहाद्यभावेन तथाविधप्रयत्नाभावात्,

"वयणं न कायजोगाभावे न य सो अणादिसुद्धस्स।
गहणंमि य नो हेऊ सत्थं अत्तागमो कह नु॥"

अथवा 'आवसंतेणं'ति गुरुमूलमावसता, अनेन च शिष्येण गुरुचरणसेविना सदा भाव्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्येतदाह, ज्ञानादिवृद्धिसद्भावाद्, उक्तं च-

"नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य।
धन्नाआवकहाए गुरुकुलवासं न मुंचंति॥"

अथवा 'आमुसंतेणं' आमृशता भगवत्पादारविन्दयुगलमुत्तमाङ्गेन, अनेन च विनयप्रतिपत्तेर्गरीयस्त्वमाह, विनयस्य मोक्षमूलत्वात्, उक्तं च-

"मूलं संसारस्सा होंति कसाया अनंतपत्तस्स।
विनओ ठाणपउत्तो दुक्खविमुक्खस्स मोक्खस्स॥"

कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः-तत्र इह खलु षड्जीवनिकायिकानामाध्ययनमस्तीत्युक्तम्, अत्राह-एषा षड्जीवनिकायिका केन प्रवेदिता प्ररूपिता वेति?, अत्रोच्यते, तेनैव भगवता, यत आह-'समणेणं भगवया महावीरेणं कासवेणं पवेइया सुअक्खाया सुपन्नत्ते'ति, सा च तेन 'श्रमणेन' महातपस्विना 'भगवता' समग्रैश्वर्यादियुक्तेन 'महावीरेण' 'शूर वीर विक्रान्ता'विति कषायादिशत्रुजयान्महाविक्रान्तो महावीरः, उक्तं च-

"विदारयति यत्कर्म, तपसा च विराजते।
तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः॥"

महांश्चासौ वीरश्च महावीरः तेन महावीरेण, 'काश्यपेने'ति काश्यपसगोत्रेण, 'प्रवेदिता' नान्यतः कुतश्चिदाकर्ण्य ज्ञाता किं तर्हि?, स्वयमेव केवलालोकेन प्रकर्षेण वेदिता प्रवेदिता-विज्ञातेत्यर्थः, तथा 'स्वाख्याते'ति सदेवमनुष्यासुरायां पर्षदि सुष्ठु आख्यात् स्वाख्याता, तथा 'सुप्रज्ञप्ते'ति सुष्ठु प्रज्ञप्ता यथैवख्याता तथैव सुष्ठु-सूक्ष्मपरिहारासेवनेन प्रकर्षेण सम्यगासेवितेत्यर्थः, अनेकार्थत्वाद्धातूनां ज्ञपिरासेवनार्थः, तां चैवंभूतां षड्जीवनिकायिकां 'श्रेयो मेऽध्येतुं' श्रेयः-पथ्यं हितं, ममेत्यात्मनिर्देशः, छान्दसत्वात्सामान्येन ममेत्वामनिर्देश इत्यन्ते, ततश्च श्रेय आत्मनोऽवेतुम्, 'अध्येतु'मिति पठितुं श्रोतुं भावचितुं, कृत इत्याह-'अध्ययनं धर्मप्रज्ञप्तिः' निमित्तकारणहेतुषु सर्वासां प्रायो दर्शन'मिति वचनात् हेतौ प्रथमा, अध्ययनत्वाद्-अध्यात्मानयनाच्चेतसो विशुद्ध्यापादनादित्यर्थः, एतदेव कृत इत्याह-'धर्मप्रज्ञप्तेः' प्रज्ञपनं प्रज्ञप्तिः धर्मस्य प्रज्ञप्तिः धर्मप्रज्ञप्तिः ततो धर्मप्रज्ञप्तेः कारणाच्चेतसो विशुद्धयापादनाश्च श्रेय आत्मनोऽध्येतुमिति। अन्ये तु व्याचक्षते-अध्ययनं धर्मप्रज्ञप्तिरिति पूर्वोपन्यस्ताध्ययनस्यैवोपादेयतयाऽनुवादमात्रमेतदिति॥

शिष्यः पृच्छत्ति-'कतरा खल्वि'त्यादि, सूत्रमुक्तार्थमेव, अनेनैतद्दर्शयति-विहायाभिमानं संविग्नेन शिष्येण सर्वकार्येष्वेव गुरुः प्रष्टव्य इति, आचार्य आह-'इमा खल्वि'त्यादि सूत्रमुक्तार्थमेव, अनेनाप्येतद्दर्शयति-गुणवते शिष्याय गुरुणाऽप्युपदेशो दातव्य एवेति।

'तंजहा-पुढविकाइया' इत्यादि, अत्र 'तद्यथे'त्युदाहरणोपन्यासार्थः, पृथिवी-काठिन्यादिलक्षणा प्रतीता सैव कायः-शरीरं येषां ते पृथिवीकायाः पृथिवीकाया एव पृथिवीकायिकाः स्वार्थिकष्ठक, आपो-द्रवाः प्रतीता एव ता एव कायः-शरीरं येषां तेऽप्कायाः अप्काया एव अप्कायिकाः। तेज-उष्णलक्षणं प्रतीतं तदेव कायः-शरीरं येषां ते तेजःकायाः तेजःकाया एव तेजःकायिकाः। वायुः-चलनधर्मा प्रतीत एव स एव कायः-शरीरं येषां ते वायुकायाः वायुकाया एव वायुकायिकाः। वनस्पतिः-लतादिरूपः प्रतीतः, स एव कायः- शरीरं येषां ते वनस्पतिकायाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनस्पतिकाया एव वनस्पतिकायिकाः। एवं त्रसनशीलास्त्रसाः-प्रतीता एव, त्रसा, कायाः-शरीराणि येषां ते त्रसकायाः, त्रसकाया एव त्रसकायिकाः।

इह च सर्वभूताधारत्वात् पृथिव्याः प्रथमं पृथिवीकायिकानामभिधानं, तदनन्तरं तत्प्रतिष्ठितत्वादप्कायिकानामपि, तदनन्तरं तत्प्रतिपक्षत्वात्तेजस्कायिनां, तदनन्तरं तेजस उपष्टम्भकत्वाद्वायुकायिकानां, तदनन्तरं वायोः शाखाप्रचलनादिगम्यत्वाद्वनस्पतिकायिकानां, तदनन्तरं वनस्पतेस्त्रसोपग्राहकत्वात्त्रसकायिकानामिति। विप्रतिपत्तिनिरासार्थं पुनराह- 'पुढवी चित्तमंतमक्खाया' 'पृथिवी' उक्तलक्षणा 'चित्तवती'ति चित्तं-जीवलक्षणं तदस्याम अस्तीति चित्तवती-सजीवेत्यर्थः, पाठान्तरं वा 'पुढवी' चित्तमत्तमक्खाया' अत्र मात्रशब्दः स्तोकवाची, यथा सर्षपत्रिभागमात्रमिति, ततश्च चित्तमात्रा-स्तोकचित्तेत्यर्थः, तथा च प्रबलमोहोदयात्सर्वजघन्यं चैतन्यमेकेन्द्रियाणां, तदभ्यधिकं द्वीन्द्रियादीनामिति, 'आख्याता' सर्वज्ञेन कथिता, इयं च 'अनेकजीवा' अनेके जीवा यस्यां साऽनेकजीवा, न पुनरेकजीवा, यथा वैदिकानां 'पृथिवी देवते' त्येवमादिवचनप्रामाण्यादिति। अनेकजीवाऽपि कैश्चिदेकभूतात्मापेक्षयेष्यत एव, यथाहुरेके-

"एक एव हि भूतात्मा, भूते भूते व्यवस्थितः।
एकधा बहुधा चैव, दृश्यते जलचन्द्रवत्॥" अत आह-

'पृथक्सत्त्वा' पृथग्भूताः सत्त्वा-आत्मानो यस्यां सा पृथक्सत्त्वा, अङ्गुलासंख्येयभागमात्रावगाहनया पारमार्थिक्याऽनेकजीवसमाश्रितेति भावः। आह-यद्येवं जीवपिण्डरूपा पृथिवी ततस्तस्यामुच्चारादिकरणे नियमतस्तदतिपातादहिंसकत्वानुपपत्तिरित्यसंभवी साधुधर्म इत्यत्राह- 'अन्यत्र शस्त्रपरिणतायाः' शस्त्ररिणतां पृथिवीं विहाय-परित्यज्यान्या चित्तवत्याख्यातेत्यर्थः। अथ किमिदं पृथिव्याः शस्त्रमिति शस्त्रप्रस्तावात्सामान्यत एवेदं द्रव्यभावभेदभिन्नं शस्त्रमभिधित्सुराह-

**नि.[२३१]** दव्वं सत्थग्गिविसंनेहंबिल खारलोणमाईयं।
भावो उ दुप्पउत्तो वाया काओ अविरई अ॥

**वृ.** 'द्रव्य'मिति द्वारपरामर्शः, तत्र द्रव्यशस्त्र खड्गादि, अग्निविषस्नेहाम्लानि प्रसिद्धानि, 'क्षारलवणादीनि' अत्र तु क्षारः-करीरादिप्रभवः, लवणं-प्रतीतम्, आदिशब्दात्करीषादिपरिग्रहः। उक्तं द्रव्यशास्त्रम्, अधुना भावशस्त्रमाह-भावस्तु दुष्प्रयुक्तौ वाक्कायौ अविरतिश्च भावशस्त्रमिति, तत्र भावो दुष्प्रयुक्त इत्यनेन द्रोहाभिमानेर्ष्यादिलक्षणो गृह्यते, वागदुष्प्रयोगस्तु हिंस्रपुरुषादिवचनलक्षणः, कायदुष्प्रयोगस्तु धावनवल्गनादिः, अविरतिस्त्वविशिष्टा प्राणातिपातादिपापस्थानकप्रवृत्तिः, एतानि स्वपरव्यापादकत्वात्कर्मबन्धनिमित्तत्वाद्भावशस्त्रमिति गाथार्थः॥ इह न भावशस्त्रेणाधिकारः, अपितु द्रव्यशस्त्रेण, तच्च त्रिप्रकारं भवतीत्याह-

**नि.[२३२]** किंची सकायसत्थं किंची परकाय तदुभयं किंची।
एयं तु दव्वसत्थं भावे अस्संजमो सत्थं॥

**वृ.** किंचित्स्वकायशस्त्र, यथा कृष्णा मृद् नीलादिमृदः शस्त्रम्, एवं गन्धरसस्पर्शभेदेऽपि शस्त्रयोजनाकार्या, तथा 'किञ्चित्परकाये'ति परकायशस्त्रं, यथा पृथिवी अप्तेजःप्रभृतीनाम् अप्तेजःप्रभृतयो वा पृथिव्याः, 'तदुभयं किञ्चि'दिति किञ्चित्तदुभयशस्त्रं भवति, यथा कृष्णा

Jain Education International - For Private & Personal Use Only www.jainelibrary.org

मृद् उदकस्य स्पर्शरसगन्धादिभिः पाण्डुमुदश्च यदा कृष्णमृदा कलुषितमृदकं भवति तदाऽसौ कृष्णमृद् उदकस्य पाण्डुमृदश्च शस्त्रं भवति, एवं(तत)-तु द्रव्यशस्त्रं, तुशब्दोऽनेकप्रकार-विशेषणार्थः, एतदनेकप्रकारं द्रव्यशस्त्रम्, 'भाव' इति द्वारपरामर्शः, असंयमः शस्त्रं चरणस्येति गाथार्थः ॥ एवं च परिणतायां पृथ्व्यामुच्चारादिकरणोऽपि नास्ति तदतिपात इत्यहिंसक-त्वोपपत्तेः संभवी साधुधर्म इति। एष तावदागमः, अनुमानमप्यत्र विद्यते-सात्मका विद्रुमल-वणोपलादयः पृथिवीविकाराः, समानजातीयाङ्कुरोत्पत्त्युपलम्भात्, देवदत्तमांसाङ्कुरवत्, एव-मागमोपपत्तिभ्यां व्यवस्थितं पृथिवीकायिकानां जीवत्वम्, उक्तं च -

"आगमश्चोपपत्तिश्च, संपूर्णं दृष्टिलक्षणम्।
अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये॥१॥
आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः।
वीतरागोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसंभवात्॥२॥"

इत्यलं प्रसङ्गेन। एवमापश्चित्तवत्य आख्याताः, तेजश्चित्तवदाख्यातं, वायुश्चित्तवानाख्यातः, वनस्पतिश्चित्तवानाख्यातः, इत्याद्यपि द्रष्टव्यम्। विशेषस्त्वभिधीयते-सात्मकं जलं, भूमि-खातस्वाभाविकसंभवात्, दुर्दरवत्। सात्मकोऽग्निः, आहारेण वृद्धिदर्शनात्, बालकवत्। सात्मकः पवनः, अपरप्रेरिततिर्यग्गितनियमितदिग्गमनाद्, गोवत्। सचेतनस्तरवः, सर्वत्वगपहरणे मरणाद्, गर्दभवत्। वनस्पतिजीवविशेषप्रतिपादनायाह-

'तंजहा अग्गबीया' इत्यादि, तद्यथेत्युपन्यासार्थः, अग्रबीजा इति- अग्रं बीजं येषां ते अग्र-बीजाः-कोरण्टकादयः, एवं मूलं बीजं येषां ते मूलबीजा-उत्पलकन्दादयः, पर्व बीजं येषां ते पर्वबीजा-इक्ष्वादयः, स्कन्धो बीजं येषां ते स्कन्धबीजाः-शल्लक्यादयः, तथा बीजाद्रोहन्तीति बीजरुहाः-शाल्यादयः संमूर्च्छन्तीति संमूर्च्छिमाः-प्रसिद्धबीजाभावेन पृथिवीवर्षादिसमुद्भवा-स्तथाविधास्तृणादयः, न चैते न संभवन्ति, दग्धभूमावपि संभवात्, तथा तृणलतावनस्पतिकायिका इति, अत्र तृणलताग्रहणं स्वगतानेकभेदसंदर्शनार्थं, वनस्पतिकायिकग्रहणं सूक्ष्मबादराद्यशेष-वनस्पतिभेदसंग्रहार्थम्, एतेन पृथिव्यादीनामपि स्वगताः भेदाः पृथिवीशर्करादयः तथाऽव-श्यायमिहिकादयः तथा अङ्गारज्वालादयः, तथा झञ्झामण्डलिकादयो (भेदाः) सूचिता इति। 'सबीजाश्चित्तवन्त आख्याता' इति, एते ह्यनन्तरोदिता वनस्पतिविशेषाः सबीजाः-स्वस्वनिबन्धनाश्चित्तवन्तः-आत्मवन्त आख्याताः-कथिताः। एते च अनेकजीवा इत्यादि ध्रुव-गण्डिका पूर्ववत्। सबीजाश्चित्तवन्त आख्याता इत्युक्तम्, अत्र च भवत्याशङ्का-किं बीजजीव एव मूलादिजीवो भवत्युतान्यस्तस्मिन्नुत्क्रान्ते उत्पद्यते इति?, अस्य व्यपोहायाह-

**नि.[२३३]** बीए जोणिब्भूए जीवो वुक्कमइ सो य अन्नो वा।
जोऽवि य मूले जीवो सोऽवि य पत्ते पढमयाए।

**वृ.**बीजे योनिभूते इति, बीजं हि द्विविधं भवति-योनिभूतमयोनिभूतं च, अविध्वस्तयोनि विध्वस्तयोनि च, प्ररोहसमर्थं तदसमर्थं चेत्यर्थः। तत्र योनिभूतं सचेतनमचेतनं च, अयोनिभूतं तु नियमादचेतनमिति। तत्र बीजे योनिभूते इत्यनेनायोनिभूतस्य व्यवच्छेदमाह, तत्रोत्पत्त्यसंभवाद्, अबीजत्वादित्यर्थः। योनिभूते तु-योन्यवस्थे बीजे, योनिपरिणाममत्यजतीयुक्तं भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमित्याह-जीवो व्युत्क्रामिति-उत्पद्यते, स एव-पूर्वको बीजजीवः, बीजनामगोत्रे कर्मणी वेदयित्वा मूलादिनामगोत्रे चोपनिबद्धय, अन्यो वा पृथिवीकायिदिजीव एवमेव, 'योऽपि च मूले जीव' इति य एव मूलतया परिणमते जीवः सोऽपि च पत्रे प्रथमतयेति-स एव प्रथम-पत्रतयाऽपि परिणमत इत्येकजीवकर्तृके मूलप्रथमपत्रे इति। आह-यद्येवं 'सव्वोऽवि वकि-सलओ खलु उग्गममाणो अनंतओ भणिओ' इत्यादि कथं न विरुध्यते इति ?, उच्यते, इह बीजजीवोऽयो वा बीजमूलत्वेनोत्पद्य तदुच्छूनावस्थां करोति, ततस्तदनन्तरभाविनीं किसल-यावस्थां नियमेनानन्तजीवाः कुर्वन्ति, पुनश्च तेषु स्थितिक्षयात्परिणतेष्वसावेव मूलजीवोऽनन्त-जीवतनुं परिणम्य(मय्य)स्वशरीरतया तावद्वर्धते यावत्प्रथमपत्रमिति न विरोधः। अन्ये तु व्याचक्षते-प्रथमपत्रकमिह याऽसौ बीजस्य समुच्छूनावस्था, नियमप्रदर्शनपरमेतत्, शेषं किसलयादि सकलं नावश्यं मूलजीवपरिणामविर्भावितमिति मन्तव्यं, ततश्च 'सव्वोऽवि किसलओ खलु उग्गमाणो अनंतओ होइ' इत्याद्यप्यविरुद्धं, मूलपत्रनिर्वर्तनारम्भकाले किलसयत्वाभावादिति गाथार्थः ॥

एतदेवाह भाष्यकारः-

**भा.[५८]** विद्धत्थाविद्धत्था जोणी जीवाण होइ नायव्वा।
तत्थ अविद्धत्थाए वुक्कमई सो य अन्नो वा॥

**वृ.**विध्वस्ताऽविध्वस्ता-अप्ररोहप्ररोहसमर्था योनिर्जीवानां भवति ज्ञातव्या, तत्राविध्वस्तायां योनौ व्युत्क्रामति स चान्यो वा, जीव इति गम्यत इति गाथार्थः ॥

**भा.[५९]** जो पुण मूले जीवो सो निव्वत्तेइ जा पढमपत्तं।
कंदाइ जाव बीयं सेसं अन्ने पकुव्वंति॥

**वृ.** यः पुनर्मूले जीवो बीजगतोऽन्यो वा स निर्वर्तयति यावत् प्रथमपत्रं तावदेक एवेति, अत्रापि भावार्थः पूर्ववदेव। कन्दादि यावद्बीजं शेषमन्ये प्रकुर्वन्ति, वनस्पतिजीवा एव, व्याख्याद्वयपक्षेऽप्येतदविरोधि, एकतः समुच्छूनावस्थाया एव प्रथमपत्रतया विवक्षितत्वात्त-दनु कन्दादिभावतः अन्यत्र कन्दादेर्वनस्पतिभेदत्वात्तस्य च प्रथमपत्रोत्तरकालमेव भावादिति गाथार्थः ॥ अतिदेशमाह-

**भा.[६०]** सेसं सुत्तप्फासं काए काए अहक्कमं बूया।
अज्झयणत्था पंच य पगरणपयवंजणविसुद्धा॥

**वृ.** शेषं सूत्रस्पर्शं उक्तलक्षणं 'काये काये' पृथिव्यादौ 'यथाक्रमं' यथापरिपाटी ब्रूयात् अनुयोगधरएव, न केवलं सूत्रस्पर्शमेव, किं तु अध्ययनार्थान्, पञ्च च-प्रागुपन्यस्तान् जीवाजीवा-भिगमादीन् प्रकरणपदव्यञ्जनविशुद्धान् ब्रूयात्, सूत्र एव जीवाभिगमः काये काये इत्यनेनैव लब्ध इति पञ्चग्रहणम्, अन्यथा षडिहार्थाधिकारा इति। प्रक्रियन्तेऽर्था अस्मिन्निति प्रकरणम्-अनेकार्थाधिकारवत्कायप्रकरणादि, पदं सुबन्तादि, कादीनि व्यञ्जनानि, एभिर्वि-शुद्धान ब्रूयादिति गाथार्थः ॥ इदानी त्रसाधिकार एतदाह-'से जे पुण इमे' इति, सेशब्दोऽथशब्दार्थः, असावप्युपन्यासार्थः, 'अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेष्वि'ति वचनात्, अथ ये पुनरमी-बालादीनामपि प्रसिद्धा अनेके-द्वीन्द्रयादिभेदेन बहवः एकेकस्यां जातौ त्रसाः प्राणिनः-त्रस्यन्तीति त्रसाः प्राणा-उच्छ्वासादय एषां विद्यन्त इति प्राणिनः, तद्यथा-

अण्डजा इत्यादि, एष खलु षष्ठो जीवनिकायः त्रसकाय प्रोच्यत इति योगः, तत्राण्डाज्जाता अण्डजाः-पक्षिगृहकोकिलादयः, पोता एव जायन्त इति पोतजाः, "अन्येष्वपि दश्यते" ऽप्रत्ययो जनेरिति वचनात्।

ते च हस्तिवल्गुलीचर्मजलौकाप्रभुतयः, जरायुवेष्टिता जायन्त इति जरायुजा-गोमहिष्य-जाविकमनुष्यादयः, अत्रापि पूर्ववड्डुप्रत्ययः, रसाज्जाता रसजाः-तक्रारनालदधितीमनादिषु पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाता इति संस्वेदजा-मत्कुणयूकाशतपदीकादयः, संमूर्च्छनाज्जाताः संमूर्च्छनजाः-शलभपिपीलिकामक्षिकाशालूकादयः, उद्भेवाज्जन्म येषां ते उद्भेदाः, अथवा उद्भेदनमुद्भित् उद्भिज्जन्म येषां ते उद्भेदा-पतङ्गखञ्जरीटपारिल्ववादयः, उप-पाताज्जाता उपपातजाः अथवा उपपाते भवा औपपातिका-देवा नारकाश्च। एतेषामेव लक्षणमाह-येषां केषाञ्चित्सामान्येनैव प्राणिनां-जीवानामभिक्रान्तं भवतीति वाक्यशेषः, अभिक्रमणमभिक्रान्तं, भावे निष्ठाप्रत्ययः, प्रज्ञापकं प्रत्यभिमुखं क्रमणमित्यर्थः, एवं प्रतिक्रमणं प्रतिक्रान्तं-प्रज्ञापकात्प्रतीपं क्रमणमिति भावः, संकुचनं संकुचितं-गात्रसंकोचकरणं, प्रसारणं प्रसारितं-गात्रविततकरणं, रवणं रुतं-शब्दकरणं, भ्रमणं भ्रान्तम्-इतश्चेतश्च गमनं, त्रसनं त्रस्तं-दुःखादुद्वेजनं, पलायनं पलायितं-कुतश्चिन्नाशनं, तथाऽऽगतेः-कुतश्चित्क्वचित्, गतेश्च-कुतश्चित्क्वचिदेव, 'विन्नाया' विज्ञातारः।

आह-अभिक्रान्तप्रतिक्रान्ताभ्यां नागतिगत्योः कश्चिद्भेद इति किमर्थं भेदेनाभिधानम्?, उच्यते, विज्ञानविशेषख्यापनार्थम्, एतदुक्तं भवति-य एव विजानन्ति यथा वयमभिक्रमामः प्रतिक्रमामो वा त एव त्रसाः, न तु वृत्ति प्रत्यभिक्रमणवन्तोऽपि वल्लयादय इति। आह-एवमपि द्वीन्द्रियादीनामत्रसत्वप्रसङ्गः, अभिक्रमणप्रतिक्रमणभावेऽप्येवंविज्ञानाभावात्, नैतदेवं हेतु-संज्ञाया अवगतेः, बुद्धिपूर्वकमिव छायात उष्णमुष्णाद्वा छायां प्रति तेषामभिक्रमणादिभावात्, न चैवं वल्लयादीनामाभिक्रमणादि, ओघसंज्ञया प्रवृत्तेरिति कृतं प्रसङ्गेन। अधिकृतत्रसभेदानाह-'जे ये' इत्यादि, ये च कीटपतङ्गा इत्यत्र कीटाः-कृमयः, 'एकग्रहणे तज्जातीयग्रहण'मिति द्वीन्द्रियाः शङ्खादयोऽपि गृह्यन्ते, पतङ्गा-शलभा, अत्रापि पूर्ववच्चतुरिन्द्रिया भ्रमरादयोऽपि गृह्यन्त इति, तथा याश्च कुन्थुपिपीलिका इत्यनेन त्रीन्द्रियाः सर्व एव गृह्यन्ते, अत एवाह-सर्वे द्वीन्द्रियाः-कृम्यादयः सर्वे त्रीन्द्रियाः-कुन्थ्वादयः, सर्वे चतुरिन्द्रियाः-पतङ्गादयः। आह-ये च कीटपतङ्गा इत्यादावुद्देशव्यत्ययः किमर्थम्?, उच्यते, 'विचित्रा सूत्रगतिरतन्त्रः क्रम' इति ज्ञापनार्थम् सर्वे पञ्चेन्द्रियाः सामान्यतो, विशेषतः पुनः सर्वे तिर्यग्योनयो-गवादयः, सर्वे नारका-रत्नप्रभानारकादिभेदभिन्नाः, सर्वे मनुजाः-कर्मभूमिजादयः, सर्वे देवा-भवन-वास्यादयः, सर्व-शब्दश्चात्र परिशेषभेदानां त्रसत्वख्यापनार्थः, सर्व एवैते त्रसाः न त्वेकेन्द्रिया इव त्रसाः स्थावराश्चेति, उक्तं च-"पृथिव्यम्बुवनस्पतयः स्थावराः" "तेजोवायू द्वीन्द्रियादयश्च त्रसाः" इति।

'सर्वे प्राणिनः परमधर्माण' इति सर्व एते प्राणिनो-द्वीन्द्रियादश्च पृथिव्यादयश्च परमधर्माण इति-अत्र परमं-सुखं तद्धर्माणः सुखधर्माणः-सुखाभिलाषिण इत्यर्थः, यतश्चैवमित्यतो दुःखो-त्पादपरिजिहीर्षया एतेषां षण्णां जीवनिकायानां नैव स्वयं दण्डं समारभेतेति योगः। षष्ठं जीवनि-कायं निगमयन्नाह-एष खलु-अनन्तरोदितः कीटादिः 'षष्ठो जीवनिकायः' पृथिव्या-दिपञ्चकापेक्षया षष्ठत्वमस्य, त्रसकाय इति 'प्रोच्यते' प्रकर्षेणोच्यते सर्वैरेवतीर्थकरगणधरैरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयोगार्थः ॥ प्रयोगश्च-विद्यमानकर्तृकमिदं शरीरम्, आदिमत्प्रतिनियताकारत्वात्, घटवत्। आह-इदं त्रसकायनिगमनमनभिधाय अस्थाने 'सर्वे प्राणिनः परमधर्माण' इत्यनन्तरसूत्रसंबन्धि-सूत्राभिधानं किमर्थम्?, उच्यते, निगमनसूत्रव्यवधानवदर्थान्तरेण व्यवधानख्यापनार्थम्, तथाहि-त्रसकायनिगमनसूत्रावसानो जीवाभिगमः, अत्रान्तरे अजीवाभिगमाधिकारः, तदर्थमभिधाय चारित्रधर्मो वक्तव्यः, तथा च वृद्धव्याख्या-एसो खलु छट्ठो जीवनिकाओ तसकाउत्ति पवुच्चइ, एस ते जीवाभिगमो भणिओ, इयाणिं अजीवाभिगमो भण्णइ-अजीवा दुविहा, तंजहा-पुग्गला य नोपोग्गला य, पोग्गला छव्विहा, तंजहा-सुहुमसुहुमा सुहुमा सुहुमबायरा बायरसुहुमा बायरा बायरबायरा। सुहुमसुहुमा परमाणुपोग्गला, सुहुमा दुपएसियाओ आढत्तो जाव सुहुमपरिणओ अनंतपएसिओ खंधो, सुहुमबायरा गंधपोग्गला, बायरसुहुमा वाउक्कायसरीरा, बादरा आउक्काय-सरीरा उस्सादीणं, बायरबायरा तेउवणस्सइपुढवितससरीराणि।

अहवा चउव्विहा पोग्गला, तंजहा-खंधा खंधदेसा खंधपएसा परमाणुपोग्गला, एस पोग्गल-त्थिकाओ गहणलक्खणो, नोपोग्गलत्थिकाओ तिविहो, तंजहा-धम्मत्थिकाओ अधम्मत्थि-काओ आगासत्थिकाओ, तत्थ धम्मत्थिकाओ गइलक्खणो, अधम्मत्थिकाओ ठिइलक्खणो, आगासत्थिकाओ अवगाहलक्खणो, तथा चैतत्संवाद्यार्षम्-

"दुविहा हुंति अजीवा पोग्गलनोपोग्गला य छ त्तिविहा
परमाणुमादि पोग्गल नोपोग्गल धम्म-मादिया॥१॥
सुहुमसुहुमा या सुहुमा तह चेव य सुहुमबायरा नेया।
बायरसुहुमा बायर तह बायरबायरा चेव॥२॥
परमाणु दुप्पएसादिगा उ तह गंधपोग्गला होन्ति।
वाऊ आउसरीरा तेऊमादीण चरिमा उ॥३॥
धम्माधम्माऽऽगासा लोए नोपोग्गला तिहा होंति।
जीवाईण गईट्ठिइअवगाहनिमित्तगा नेया॥४॥"

*मू. (३३) इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभिज्जा नेवन्नेहिं दंडं समारंभाविज्जा दंडं समारंभंतेऽवि अन्ने न समणुजाणामि जावज्जीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि।*

**वृ.** उक्तो जीवाभिगमः, साम्प्रतं चारित्रधर्मः, तत्रोक्तसंबन्धमेवेदं सूत्रम्-'इच्चेसिं' इत्यादि, सर्वे प्राणिनः परमधर्माण इत्युनेन हेतुना 'एतेषां षण्णां जीवनिकायाना'मिति, सुपां सुपो भवन्तीति सप्तम्यर्थे षष्ठी, एतेषु षट्सु जीवनिकायेषु-अनन्तरोदितस्वरूपेषु नैव 'स्वयम्' आत्मना 'दण्डं' संघट्टनपरितापनादिलक्षणं 'समारभेत' प्रवर्तयेत्, तथा नैव 'अन्यैः' प्रेष्यादिभिः' 'दण्डम्' उक्त-लक्षणं 'समारंभयेत्' कारयेदित्यर्थः, दण्डं समारभमाणानप्यन्यान् प्राणिनो 'न समनुजानीयात्' नानुमोदयेदिति विधायकं भगवद्वचनम्। यतश्चैवमतो 'यावज्जीव'मित्यादि यावद् व्युत्सृजामि, एवमिदं सम्यक् प्रतिपद्येतेत्यैदम्पर्य, पदार्थस्तु-जीवनं जीवा यावज्जीवा 'यावज्जीवम्-आप्राणो-परमादित्यर्थः, किमित्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'त्रिविधं त्रिविधेने'ति तिस्रो विधा-विधानानि कृतादिरूपा अस्येति त्रिविधः, दण्ड इति गम्यते, तं त्रिविधेन-करणेन, एतदुपन्यस्यति-मनसा वाचा कायेन, एतेषां स्वरूपं प्रसिद्धमेव, अस्य च करणस्य कर्म उक्तलक्षणो दण्डः तं वस्तुतो निराकार्यतया सूत्रेणैवोपन्यस्यन्नाह-'न करोमि स्वयं, न कारयाम्यन्यैः, कुर्वन्तमप्यन्यं न समनुजानामी'ति,

'तस्य भदन्त! प्रतिक्रमामी'ति तस्येत्यधिकृतो दण्डः संबध्यते, संबन्धलक्षणा अवयवलक्षणा या षष्ठी योऽसौ त्रिकालविषयो दण्डस्तस्य संबन्धिनमतीतमवयवं प्रतिक्रामामि, न वर्तमानगमनागतं वा, अतीतस्यैव प्रतिक्रमणात्, प्रत्युत्पन्नस्य संवरणादनागतस्य प्रत्याख्यानादिति, भदन्तेति गुरोरामन्त्रणम्, भदन्त भवान्त भयान्त इति साधारणा श्रुतिः, एतच्च गुरुसाक्षिक्येव व्रतप्रतिपत्तिः साध्वीति ज्ञापनार्थं, प्रतिक्रामामीति भूताद्दण्डान्निवर्तेऽहमित्युक्तं भवति, तस्माच्च निवृत्तिर्यत्तदनुमतेर्विरमणमिति, तथा 'निन्दामि गर्हामी'ति, अत्रात्मसाक्षिकी निन्दा परसाक्षिकी गर्हा-जुगुप्सोच्यते, 'आत्मानम्' अतीतदण्डकारिणमश्लाध्यं 'व्युत्सृजामि'ति विविधार्थो विशेषार्थो वा विशब्दः उच्छब्दो भृशार्थः सृजामिति-त्यजामि, ततश्च विविधं विशेषेणा वा भृशं त्यजामि व्युत्सृजामीति।

आह-यद्येवमतीतदण्डप्रतिक्रमणमात्रस्यैदम्पर्यं न प्रत्युत्पन्नसंवरणमनागतप्रत्याख्यानं चेति, नैतदेवं, न करोमीत्यादिना तदुभयसिद्धेरिति॥

*मू.( ३४ )पढमे भंते! महव्वए पाणाइवायाओ वेरमणं, सव्वं भंते! पाणाइवायं पच्चक्खामि, से सुहुमं वा बायरं वा तसं वा थावरं वा, नेव सयं पाणे अइवाइज्जा नेवऽन्नेहिं पाणे अइवायाविज्जा पाणे अइवायंतेऽवि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। पढमे भंते! महव्वए उवट्ठिओमि सव्वाओ पाणाइवायाओ वेरमणं॥*

**वृ**-अयं चात्मप्रतिपत्त्यर्हो दण्डनिक्षेपः सामान्यविशेषरूप इति, सामान्येतोक्तलक्षण एव, स तु विशेषतः पञ्चमहाव्रतरूपतयाऽप्यङ्गीकर्तव्य इति महाव्रतान्याह-'पढमे भंते' इत्यादि, सूत्र-क्रमप्रामाण्यात् प्राणातिपातविरमाणं प्रथमं तस्मिन्, भदन्तेति गुरोरामत्रणं, 'महाव्रत' इति महच्च तद्व्रतं च महाव्रतं, महत्त्वं चास्य श्रावकसंबन्ध्यणुव्रतापेक्षयेति। अत्रान्तरे सप्तचत्वारिंश-दधिकप्रत्याख्यानभङ्गकशताधिकारः, तत्रेयं गाथा 'सीयालं भंगसयं पच्चक्खाणंमि जस्स उव-लद्धं। सो पच्चखाणकुसलो सेसा सव्वे अकुसला उ॥१॥"

एनां चासंमोहार्थमुपरिष्टाद्व्याख्यास्यामः। तस्मिन् महाव्रते 'प्राणातिपाताद्विरमण'मिति प्राणा-इन्द्रियादयः तेषामतिपातः प्राणातिपातः-जीवस्य महादुःखोत्पादनं, न तु जीवातिपात एव, तस्मात्-प्राणातिपाताद्विरमणं, विरमणं नाम सम्यग्ज्ञानश्रद्धानपूर्वकं सर्वथा निवर्तनं, भगवतोक्त-मिति वाक्यशेषः, यतश्चैवमत उपादेयमेतदिति विनिश्चित्य 'सर्वं भदन्त! प्राणातिपातं प्रत्या-ख्यामी'ति सर्वमिति-निरवशेषं, न तु परिस्थूरमेव, भदन्तेति गुर्वामत्रणं, प्राणातिपातमिति पूर्ववत्, प्रत्याख्यामीति प्रतिशब्दः प्रतिषेधे आङाभिमुख्ये ख्या प्रकथने, प्रतीपमभिमुखं ख्यापनं प्राणा-तिपातस्य करोमि प्रत्याख्यामीति, अथवा प्रत्याचक्षे-संवृतात्मा साम्प्रतमनागतप्रतिषेधस्य आद-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेणाभिधानां करोमीत्यर्थः, अनेन व्रतार्थपरिज्ञानादिगुणयुक्त उपस्थानार्ह इत्येतदाह, उक्तं च-

"पढिए य कहिय अहिगय परिहरउवठावणाइ जोगोत्ति।
छक्कं तीहिं विसुद्धं परिहर नवएण भेदेण ॥१॥
पडपासाउरमादी दिट्ठंता होंति वयसमारुहणे।
जह मलिणाइसु दोसा सुद्धाइसु नेवमिहइंपि ॥२॥ इत्यादि,

एतेसिं लेसुद्देसण सीसहियट्ठयाए अत्थो भण्णइ-पढियाए सत्थपरिण्णाए दसकालिए छज्जीवनिकाए वा, कहियाए अत्थओ, अभिगयाए संमं परिक्खिऊण-परिहरइ छज्जीवणियाए मणवयणकाएहिं कयकारावियानुमइभेदेण, तओ ठाविज्जइ, न अन्नहा। इमे य इत्थ पडादी दिट्ठंता-मइलो पडो न रंगिज्जइ सोहिओ रंगिज्जइ, असोहिए मूलपाए पासाओ न किज्जइ सोहिए किज्जइ, वमणाईहिं असोहिए आउरे ओसहं न दिज्जइ सोहिए दिज्जइ, असंठविए रयणे पडिबंधो न किज्जइ संठविए किज्जइ, एवं पढियकहियाईहिं असेहिए सीसे न वयारोवणं किज्जई सोहिए किज्जइ, असोहिए य करणे गुरुणो दोसा, सोहियापालणे सिस्सस्स दोसो त्ति कयं पसंगेण।

यदुक्तम्-'सर्वं भदन्त! प्राणातिपातं प्रत्यास्वामी'ति तदेतद्विशेषण अभिधित्सुराह-'से सुहुमं वे'त्यादि सेशब्दो मागधदेशीप्रसिद्धः अथशब्दार्थः, स चोपन्यासे, तद्यथा-'सूक्ष्मंवा बादरं वा त्रसं वा स्थावरं वा' अत्र सूक्ष्मोऽल्पः परिगृह्यते न तु सूक्ष्मनामकर्मोदयात्सूक्ष्मः, तस्य कायेन व्यापादनासंभवात्, तदेतद्विशेषतोऽभिधित्सुराह-'बादरोऽपि' स्थूरः, स चैकैको द्विधा-त्रसः स्थावरश्च, सूक्ष्मत्रसः कुन्थ्वादिः स्थावरो वनस्पत्यादिः, बादरस्त्रसो गवादिः स्थावरः पृथिव्यादिः, एतान्, 'नेव सयं पाणे अइवाएज्ज'त्ति प्राकृतशैल्या छान्दसत्वात्, 'तिङां तिङो भवन्ती'ति न्यायात् नैव स्वयं प्राणिनः अतिपातयामि, नैवान्यैः प्राणिनोऽतिपातायामि, प्राणिनोऽतिपातयतोऽप्यन्यान्न समनुजानामि, यावज्जीवमित्यादि पूर्ववत्। इह च 'सूक्ष्मं वा बादरंवे'त्यादिनोपलक्षित 'एकग्रहणे तज्जातीग्रहण'मिति चतुर्विधः प्राणातिपातो द्रष्टव्यः, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्चेति, तत्र द्रव्यतः षट्सु जीवनिकायेषु सूक्ष्मादिभेदभिन्नेषु, क्षेत्रतो लोके तिर्यग्लोकादिभेदभिन्ने, कालतोऽतीतादौ रात्र्यादौ वा, भवतो रागेण वा द्वेषेण वा, मांसादिरागशत्रुद्वेषाभ्यां तदुपपत्तेरिति। चतुर्भङ्गिका चात्र-दव्वओ नामेगे पाणाइवाए न भावओ इत्यादिरूप यथा द्रुमपुष्पिकायां तथा द्रष्टव्येति।

व्रतप्रतिपत्तिं निगमयन्नाह-प्रथमे भदन्त! महाव्रते 'उपस्थितोऽस्मि'उप-सामीप्येन तत्परिणामापत्त्या स्थितः इत आरभ्य मम सर्वस्मात्प्राणातिपाताद्विरमणमिति। 'भदन्त' इत्यनेन चादिमध्यावसनेषु गुरुमनापृच्छय न किंचित्कर्तव्यं कृतं च तस्मै निवेदनीयमेवं तदाराधितं भवतीत्येवमाह॥ उक्तं प्रथमं महाव्रतम्॥

*मू. ( ३५ ) अहावरे दुच्चे भंते! महव्वए मुसावायाओ वेरमणं, सव्वं भंते! मुसावायं पच्चक्खामि, से कोहा वा लोहा वा भया वा हासा वा, नेव सयं मुसं वइज्जा नेवऽन्नेहिं मुसं वायाविज्जा मुसं वयंतेऽवि अन्ने न समणुजाणामि जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। दुच्चे भंते! महव्वए उवट्ठिओमि सव्वाओ मुसावायाओ वेरमणं॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. इदानीं द्वितीयमाह-'अहावरे' इत्यादि, 'अथापरस्मिन् द्वितीये भदन्त! महाव्रते मृषावादाद्विरमणं, सर्वं भदन्त! मृषावादं प्रत्याख्यामीति पूर्ववत्, तद्यथा-'क्रोधाद्वा लोभाद्वे'त्यनेनाद्यन्तग्रहणान्मानमायापरिग्रहः, 'भयाद्वः हास्याद्वा' इत्यनेन तु प्रेमद्वेषकलहाभ्याख्यानादिपरिग्रहः' 'नेव सयं मुसं वएज्ज'त्ति नैव स्वयं मृषा वदामि नैवान्यैर्मृषा वादयामि मृषा वदतोऽप्यान् न समनुजानामि इत्येतत् 'यावज्जीव'मित्यादि च भावार्थमधिकृत्य पूर्ववत्।

विशेषस्त्वयम्-मृषावादश्चतुर्विधः, तद्यथा-सद्भावप्रतिषेधः असद्भावोद्भावनं अर्थान्तरं गर्हा च, तत्र सद्भावप्रतिषेधो यथा-नास्त्यात्मा नास्ति पुण्यं पापं चेत्यादि, असद्भावोद्भावनं यथा-अस्त्यात्मा सर्वगतः श्यामाकतन्दुलमात्रो वेत्यादि, अर्थान्तरं गामश्वमभिदधत इत्यादि, गर्हा काणं काणमभिदधत इत्यादिः, पुनरयं क्रोधादिभावोपलक्षितश्चतुर्विधः, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, द्रव्यतः सर्वद्रव्येष्वन्यथाप्ररूपणात् क्षेत्रतो लोकालोकयोः कालतो रात्र्यादौ भावतः क्रोधादिभिः इति। द्रव्यादिचतुर्भङ्गी पुनरियम्-दव्वओ नामेगे मुसावाए नो भावओ भावओ नामेगे नो दव्वओ एगे दव्वओऽवि भावओऽवि एगे नो दव्वओ नो भावओ। तत्थ कोइ कहिंचि हिंसुज्जओ भणइ-इओ तए पसुमिणा(गा)इणो दिट्ठत्ति ?, सो दयाए दिट्ठावि भणइ-न दिट्ठत्ति, एस दव्वओ मुसावाओ नो भावओ, अवरो मुसं भणीहामित्तिपरिणओ सहसा सच्चं भणइ एस भावओ नो दव्वओ, अवरो मुसं भणीहामित्तिपरिणओ मुसं चेव भणइ, एस दव्वओऽवि भावओऽवि, चरमभंगो पुण सुण्णो॥

*मू. ( ३६ )अहावरे तच्चे भंते ! महव्वए अदिन्नादाणाओ वेरमणं, सव्वं भंते ! अदिन्नादाणं पच्चक्खामि, से गामे वा नगरे वा रन्ने वा अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचितमंतं वा नेव सयं अदिन्नं गिण्हिज्जा नेवऽन्नेहिं अदिन्नं गिण्हविज्जा अदिन्नं गिण्हंते वि अन्ने न समणुजाणामि जावँज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समनुजाणामि। तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। तच्चे भंते! महव्वए उवट्ठिओमि सव्वाओ अदिन्नादाणाओ वेरमणं॥*

वृ- उक्तं द्वितीयं महाव्रतम्, अधुना तृतीयमाह-'अहावरे' इत्यादि, अथापरस्मिंतस्तृतीये भदन्त! महाव्रते अदत्तादानाद्विरमणं, सर्वं भदन्त! अदत्तादानं प्रत्याख्यामीति पूर्ववत्, तद्यथा-'ग्रामे वा नगरे वा अरण्ये वा' इति, अनेन क्षेत्रपरिग्रहः, तत्र ग्रसति वृद्ध्यादीन् गुणानिति ग्रामः तस्मिन्, नास्मिन् करो विद्यत इति नकरम्, अरण्यं-काननादि। तथा 'अल्पं वा बहु वा अणु वा स्थूलं वा चित्तवद्वा अचित्तवद्वा इति, अनेन तु द्रव्यपरिग्रहः, तत्राल्पं-मूल्यत एरण्डकाष्ठादि बहु-वज्रादि अणु-प्रमाणतो वज्रादि स्थूलम्-एरण्डकाष्ठादि, एतच्च चित्तवद्वा अचित्तवद्वेति-चेतनाचेतनमित्यर्थः।

'नेव सयमदिन्नं गेण्हिज्ज'त्ति नैव स्वयमदत्तं गृह्णामि नैवान्यैरदत्तं ग्राहयामि अदत्तं गृह्णतोऽप्यन्यान् न समनुजानामीत्येतद्यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत्, विशेषस्त्वयम्-अदत्तादानं चतुर्विधं-द्रव्यतः क्षेत्रतः कालतो भावतश्च, द्रव्यतोऽल्पादौ क्षेत्रतो ग्रामादौ कालतो रात्र्यादौ भावतो रागद्वेषाभ्याम्। द्रव्यादिचतुर्भङ्गी पुनरियम्-दव्वओ नामेगे अदिन्नादाणे नो भावओ भावओ नामेगे नो दव्वओ एगे दव्वओऽवि भावओऽवि एगे नो दव्वओ नो भावओ। तत्थ अरत्तदुट्ठस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहुणो कहिंचि अणणुण्णवेऊण तणाइ गेण्हओ दव्वओ अदिन्नादानं नो भावओ, हरामीति अब्भुज्जयस्स तदसंपत्तीए भावओ नो दव्वओ, एवं चेव संपत्तीए दव्वओमि भावओमि, चरिमभंगो पुण सुन्नो ॥

*मू. ( ३७ )अहावरे चउत्थे भंते! महव्वए मेहुणाओ वेरमणं, सव्वं भंते! मेहुणं पच्चक्खामि, से दिव्वं वा माणुसं वा तिरिक्खजोणियं वा, नेव सयं मेहुणं सेविज्जा नेवऽन्नेहिं मेहुणं सेवाविज्जा मेहुणं सेवंतेऽवि अन्ने न समणुजाणामि जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। चउत्थे भंते! महव्वए उवट्ठिओमि सव्वाओ मेहुणाओ वेरमणं ॥*

वृ- उक्तं तृतीयं महाव्रतम्, इदानीं चतुर्थमाह- 'अहावरे' इत्यादि, अथापरस्मिंश्चतुर्थे भदन्त! महाव्रते मैथुनाद्विरमणं, सर्वं भदन्त! मैथुनं प्रत्याख्यामीति पूर्ववत्, तद्यथा-दैवं वा मानुषं वा तैर्यग्योनं वा, अनेन द्रव्यपरिग्रहः, देवीनामिदं दैवम्, अप्सरोऽमरसंबन्धीतिभावः, एतच्च रूपेषु वा रूपसहगतेषु वा द्रव्येषु भवति, तत्र रूपाणि-निर्जीवानि प्रतिमारूपाण्युच्यन्ते, रूपसहगतानि तु सजीवानि, भूषणविकलानि वा रूपाणि भूषणसहितानि तु रूपसहगतानि, एवं मानुषं तैर्यग्योनं च वेदितव्यमिति, 'नेव सयं मेहुणं सेविज्जा' नैव स्वयं मैथुनं सेवे, नैवान्यैर्मैथुनं सेवयामि, मैथुनं सेवमानानप्यन्यान्न समनुजानामि इत्येतद्यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत्।

विशेषस्त्वयम्-मैथुनं चतुर्विधं द्रव्यतः क्षेत्रतः कालतो भावतश्च, द्रव्यतो दिव्यादौ क्षेत्रतस्त्रिषु लोकेषु कालतो रात्र्यादौ भावतो रागद्वेषाभ्याम्। दोसेणमिभीए वयं भंजेमित्ति दोसुब्भवं, रागेण होइ। द्रव्यादिचतुर्भङ्गी त्वियम्-दव्वओ नामेगे मेहुणे नो भावओ १ भावओ नामेगे नो दव्वओ २ एगे दव्वओऽवि भावओऽवि ३ एगे नो दव्वओ नो भावओ ४, तत्थ अरत्तदुट्ठाए इत्थियाए बला परिभुंजमाणीए दव्वओ मेहुणं नो भावओ, मेहुणसण्णापरिण्यस्स तदसंपत्तीए भावओ नो दव्वओ, एवं चेव संपत्तीए दव्वओऽवि भावओऽवि, चरमभंगो पुण सुन्नो ॥

*मू. ( ३८ )अहावरे पंचमे भंते! महव्वए परिग्गहाओ वेरमणं, सव्वं भंते! परिग्गहं पच्चक्खामि, से अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा नेव सयं परिग्गहं परिगिण्हिज्जा नेवऽन्नेहिं परिग्गहं परिगिण्हाविज्जा परिग्गहं परिगिण्हंतेऽवि अन्ने न समणुजाणिज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। पंचमे भंते! महव्वए उवट्ठिओमि सव्वाओ परिग्गाहाओ वेरमणं ॥*

वृ. उक्तं चतुर्थं महाव्रतं, साम्प्रतं पञ्चममाह- 'अहावरे' इत्यादि, अथापरस्मिन् पञ्चमे भदन्त! महाव्रते परिग्रहाद्विरमणं, सर्वं भदन्त! परिग्रहं प्रत्याख्यामीति पूर्ववत्। तद्यथा-अल्पं वेत्याद्यवयवव्याख्यापि पूर्ववदेव, नैव स्वयं परिग्रहं परिगृह्णामि नैवान्यैः, परिग्रहं परिग्राहयामि परिग्रहं परिगृह्णतोऽप्यन्यान्न समनुजानामीत्येतद्यावज्जीवमित्यादि च भावार्थमधिकृत्य पूर्ववत्, विशेषस्त्वयम्-परिग्रहश्चतुर्विधः, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, द्रव्यतः सर्वद्रव्येषु क्षेत्रतो लोके कालतो रात्र्यादौ भावतो १ भावओ नामेगे नो दव्वओ २ एगे दव्वओऽवि भावओऽवि ३ एगे नो दव्वओ नो भावओ ८। तत्थ अरत्तदुट्ठस्स धम्मोवगरणं दव्वओ परिग्गहो नो भावओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुच्छियस्स तदसंपत्तीए भावओ न दव्वओ, एवं चेव संपत्तीए दव्वओऽवि भावओऽवि, चरम-भंगो उण सुन्नो ॥

*मू.(३९) अहावरे छट्ठे भंते! वए राईभोयणाओ वेरमणं, सव्वं भंते! राईभोयणं पच्चक्खामि, से असनं वा पानं वा खाइमं वा साइमं वा, नेव सयं राइं भुंजेज्जा नेवऽन्नेहिं राइं भुंजाविज्जा राइं भुंजेतेऽवि अन्ने न समणुजाणिज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसि-रामि। छट्ठे भंते! वए उवट्ठिओमि सव्वाओ राईभोयणाओ वेरमणं॥*

वृ- उक्तं पञ्चमं महाव्रतं, अधुना षष्ठं व्रतमाह-'अहावरे' इत्यादि, अथापरस्मिन् छट्ठे भदन्त! व्रते रात्रिभोजनाद्विरमणं, सर्वं भदन्त! रात्रिभोजनं प्रत्याख्यामीति पूर्ववत्। तद्यथा-अशनं वा पानं वा खाद्यं वा स्वाद्यं वा, अश्यत इत्यशनम्-ओदनादि, पीयत इति पानं-मृद्वीकापानादि खाद्यत इति खाद्यं-खर्जूरादि स्वाद्यत इति स्वाद्यं-ताम्बूलादि, 'नेव सयं राइं भुंजेज्जा' नैव स्वयं रात्रौ भुञ्जे नैवान्यैः, रात्रौ भोजयामि रात्रौ भुञ्जानानप्यन्यान्नैव समनुजानामी इत्येतद्यावज्जीव-मित्यादि च भावार्थमधिकृत्य पूर्ववत्।

विशेषस्त्वयम्-रात्रिभोजनं चतुर्विधं, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, द्रव्यतस्त्वश-नादौ क्षेत्रतोऽर्धतृतीयेषु द्वीपसमुद्रेषु कालतो रात्र्यादौ भावतो रागद्वेषाभ्यामिति। स्वरूपतोऽप्यस्य चातुर्विध्यं, तद्यथा-रात्रौ गृह्णाति रात्रौ भुङ्क्ते १ रात्रौ गृह्णाति दिवा भुङ्क्ते २ दिवा गृह्णाति रात्रौ भुङ्क्ते ३ दिवा गृह्णाति दिवा भुङ्क्ते ४ संनिधिपरिभोगे, द्रव्यादिचतुर्भङ्गी पुनरियम्-दव्वओ नामेगे राइं भुंजइ नो भावओ १ भावओ नामेगे नो दव्वओ २ एगे दव्वओऽवि भावओऽवि ३ एगे नो दव्वओ नो भावओ ४, तत्थ अणुग्गए सूरिए उग्गओत्ति अत्थमिए वा अनत्थमिओत्ति अरत्तदुट्ठस्स कारणेत्ति रयणीए वा भुंजमाणस्स दव्वओ राईभोअणं नो भावओ, रयणीए भुंजामि मुच्छियस्स तदसंपत्तीए भावओ नो दव्वओ, एवं चेव संपत्तीए दव्वओऽवि भावओऽवि, चउत्थभंगो उण सुन्नो। एतच्च रात्रिभोजनं प्रथमचरमतीर्थकरतीर्थयोः ऋजुजडवक्रजडपुरुषापेक्षया मूलगुणत्वख्यापनार्थं महाव्रतोपरि पठितं, मध्यतीर्थकरतीर्थेषु पुनः ऋजुप्रज्ञपुरुषापेक्षयोत्तरगुणवर्ग इति॥

*मू.(४०) इच्चेयाइं पंच महव्वयाइं राइभोयणवेरमणछट्ठाइं,*
*अत्तहियट्ठयाए उवसंपज्जित्ता नं विहरामि॥*

वृ- समस्तव्रताभ्युपगमख्यापनायाह-'इच्चेयाइं' इत्यादि, 'इत्येतानि' अनन्तरोदितानि पञ्च महाव्रतानि रात्रिभोजनविरमणषष्ठानि, किमित्याह-'आत्महिताय' आत्महितो-मोक्षस्तदर्थम्, अनेनान्यार्थं तत्त्वतो व्रताभावमाह, तदभिलाषानुमत्या हिंसादावनुमत्यादिभावात्, 'उपसंपद्य' सामीप्येनाङ्गीकृत्य व्रतानि 'विहरामि' सुसाधुविहारेण, तदभावे वाङ्गीकृतानामपि व्रतानाम-भावात्, दोषाश्च हिंसादिकर्तृणामल्पायुर्जिह्वाच्छेददारिद्रयपण्डकदुःखितत्वादयो वाच्या इति।

साम्प्रतं प्रागुपन्यस्तगाथा व्याख्यात-'सप्तचत्वारिंशदधिकभङ्गशतं' वक्ष्यमाणलक्षणं 'प्रत्या-ख्याने' प्रत्याख्यानविषयं, यस्योपलब्धं भवति 'स' इत्थंभूतः प्रत्याख्याने कुशलो-निपुणः, शेषाः सर्वे 'अकुशलाः' तदनभिज्ञा इति गाथासमासार्थः। अवयवार्थस्तु भङ्गकयोजनाप्रधानः, स चैवं द्रष्टव्यः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"तिन्नि तिया तिन्नि दुया तिन्निक्केक्का य होंति जोएसु।
तिदुएक्कं तिदुएक्कं तिदुएक्कं चेव करणाइं॥"

त्रयस्त्रिकाः (३३३) त्रयो द्विकाः (२२२) त्रयश्चैककाः (१११) भवन्ति योगेषु। कायवाङ्मनोव्यापारलक्षणेषु, त्रीणि द्वयमेकं त्रीणि द्वयमेकं त्रीणि द्वयमेकं चैव करणानि-मनोवाक्कायलक्षणानि इति पदघटना।

काऽत्र भावना?, न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, मणेणं वायाए काएणं एक्को भेओ। इयाणिं बिइओ-ण करेइ न कारवेइ करंतंपि अन्नं न समणुजाणइ मणेणं वायाए इक्को भंगो तहा मणेणं काएणं बिइओ भंगो तहा वायाए काएण य तइओ भंगो, बिइओ मूलभेओ गओ।

इदानिं तइओ-न करेइ न कारवेइ करंतंपि अन्नं न समणुजाणइ मणेणं एक्को वायाए बिइयो काएणं तइओ, गओ तइओ मूलभेओ।

इदानिं चउत्थो-न करेइ न कारवेइ मणेणं वायाए काएणं इक्को न करेइ करंतं नानुजाणइ बिइओ न कारवेइ करंतं नानुजाणइ तइओ, गओ चउत्थो मूलभेओ।

इदानिं पंचमो-न करेइ न कारवेइ मणेणं वायाए एक्को न करेइ करंतं नानुजाणइ बिइओ न कारवेइ करंतं नानुजाणइ तइओ, एए तिन्नि भंगा मणेणं वायाए लद्धा, अन्नेऽवि तिन्नि मणेणं काएण य लब्भंति, तहावरेऽवि वायाए काएण य लब्भंति तिन्नि, एवमेव सव्वे एए नव, पंचमोऽप्युक्तो मूलभेदः।

इदानीं षष्ठः-न करेइ न कारवेइ मणेणं इक्को, तहा न करेइ करंतं नानुजाणइ मणेणं बिइओ, न कारवेइ करंतं नानुजाणइ मनसैव तृतीयः, एवं वायाए काएणवि तिन्नि तिन्नि भंगा लब्भंति, एएऽवि सव्वे नव, उक्तः षष्ठो मूलभेदः।

सप्तमोऽभिधीयते-ण करेइ मणेणं वायाए काएणं एक्को, एवं न कारवेइ मनादीहिं बिइओ, करंतं नानुजाणइ तइओ, सप्तमोऽप्युक्तो मूलभेदः।

इदानीमष्टमः-ण करेइ मणेणं वायाए एक्को, मणेणं काएण य बिइओ, तहा वायाए काएण य तइओ, एवं न कारवेइ एत्थंपि तिन्नि भंगा, एवमेव करंतं नानुजाणइ एत्थंपि तिन्नि भंगा, एए सव्वे नव, उक्तोऽष्टमः।

इदानीं नवमः-न करेइ मणेणं एक्को, न कारवेइ बिइओ, करंतं नानुजाणइ तइओ, एवं वायाए बिइयं कायेणवि होइ तइयं, एवमेते सव्वेऽवि मिलिया नव, नवमोऽप्युक्तः। आगत-गुणनमिदानीं क्रियते-

'लद्धफलमाणमेयं भंगा उ हवंति अउणपन्नासं।
तीयाणागयसंपतिगुणियं कालेण होइ इमं॥१॥
सीयालं भंगसयं, कह? कालतिएण होंति गुणणा उ।
तीतस्स पडिक्कमणं पच्चुप्पन्नस्स संवरणं॥२॥
पच्चक्खाणं च तहा होइ य एसस्स एस गुणणा उ।
कालतिएणं भणियं जिनगणधरवायएहिं च॥३॥

इति गाथार्थः॥ उक्तश्चारित्रधर्मः, साम्प्रतं यतनाया अवसरः, तथा चाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ४१ )से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से पुढविं वा भित्तिं वा सिलं वा लेलुं वा ससरक्खं वा कायं ससरक्खं वा वत्थं हत्थेण वा पाएण वा कट्ठेण वा किलिंचेण वा अंगुलियाए वा सिलागाए वा सिलागहत्थेण वा न आलिहिज्जा न विलिहिज्जा न घट्टिज्जा न भिंदिज्जा अन्नं न आलिहाविज्जा न विलिहाविज्जा न घट्टाविज्जा न भिंदाविज्जा अन्नं आलिहंतं वा विलिहंतं वा घट्टंतं वा भिंदंतं वा न समणुजाणेज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ॥*

वृ- 'से' इति निर्देशे स योऽसौ महाव्रतयुक्तो, भिक्षुर्वा भिक्षुकी वा-आरम्भपरित्यागाद्धर्म-कायपालनाय भिक्षणशीलो भिक्षुः, एवं भिक्षुक्यपि, पुरुषोत्तमो धर्म इति भिक्षुर्विशेष्यते, तद्विशेषणानि च भिक्षुक्या अपि द्रष्टव्यानीति, आह-'संयतविरतप्रतिहतप्रत्याख्यातपापकर्मा' तत्र सामस्त्येन यतः संयतः-सप्तदशप्रकारसंयमोपेतः, विविधम्-अनेकधा द्वादशविधे तपसि रतो विरतः, प्रतिहतप्रत्याख्यातपापकर्मेति-प्रतिहतंस्थितह्रासतो ग्रन्थिभेदेन प्रत्याख्यातं-हेत्वभावतः पुनर्वृद्ध्यभावेन पापं कर्म-ज्ञानावरणीयादि येन स तथाविधः, 'दिवा वा रात्रौ वा एको वा परिषद्गतो वा सुप्तो वा जाग्रद्वा' रात्रौ सुप्तो दिवा जाग्रत, कारणीक एकः, शेषकालं परि-षद्गतः, इदं च वक्ष्यमाणं न कुर्यात्।

'से पुढविं वा' इत्यादि, तद्यथा-पृथिवीं वा भित्तिं वा शिलां वा लोष्टं वा, तत्र पृथिवी-लोष्टादि-रहिता भित्तिः-नदीतटी शिला-विशालः पाषाणः लोष्टः-प्रसिद्धः, तथा सह रजसा-आरण्यपांशु-लक्षणेन वर्तत इति सरजस्कस्तं सरजस्कं वा 'कायम्' कायमिति देहं तथा सरजस्कं वा वस्त्रं-चोलपट्टकादि 'एकग्रहणे तज्जातीयग्रहणं'मिति पात्रादिपरिग्रहः, एतत् किमित्याहहस्तेन वा पादेन वा काष्ठेन वा कलिञ्जेन वा-क्षुद्रकाष्ठरूपेण अङ्गुल्या वा शलाकया वा-अयःशलाकादिरूपया वा-शलाकासंघातरूपेण 'णालिहिज्ज'त्ति नालिखेत न विलिखेत् न घट्टयेत् न भिन्द्यात्, तत्र ईषत्सकृद्वाऽऽलेखनं, नितरामनेकशो वा विलेखनं, घट्टनं चालनं, भेदो विदारणम्, एतत् स्वयं न कुर्यात्, तथा अन्यमन्येन वा नालेखयेत्, न विलेखयेत् न घट्टयेत् न भेदयेत्, तथाऽन्यं खत एव आलिखन्तं वा विलिखन्तं वा घट्टयन्तं वा भिन्दन्तं वा न समनुजानीयादित्यादि पूर्ववत्॥

*मू. ( ४२ ) से भिक्खु वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से उदगं वा ओसं वा हिमं वा महियं वा करगं वा हरतणुगं वा सुद्धोदगं वा उदउल्लं वा कायं उदउल्लं वा वत्थं ससिणिद्धं वा कायं ससिणिद्ध वा वत्थ न आमुसिज्जा न संफुसिज्जा न आवीलिज्जा न पवीलिज्जा न अक्खोडिज्जा न पक्खोडिज्जा न आयाविज्जा न पयाविज्जा अन्नं न आमुसाविज्जा न संफुसाविज्जा न आवीलाविज्जा न पवी-लाविज्जा न अक्खोडाविज्जा न पक्खोडाविज्जा न आयाविज्जा न पयाविज्जा अन्नं आमुसंतं वा संफुसंतं वा आवीलंतं वा पविलंतं वा अक्खोडंतं वा पक्खोडंतं वा आयावंतं वा पयावंतं वा न समणुजाणेज्जा जावज्जीवाए तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि॥*

वृ- तथा 'से भिक्खू वा इत्यादि यावज्जागरमाणे व'त्ति पूर्ववदेव! 'से उदगं वे'त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा-उदकं वा अवश्यायं वा हिमं वा महिकां वा करकं वा हरतनु वा शुद्धोदकं वा, तत्रोदकं-शिराःपानीयम् अवश्यायः-त्रेहः हिमं-स्त्यानोदकम् महिका-धूमिका करकः-कठिनोदकरूपः हरतनुः-भुवमुद्भिद्य तृणाग्रादिषु भवति, शुद्धोदकम्-अन्तरिक्षोदकं, तथा उदकार्द्रं वा कायं उदकार्द्रं वा वस्त्रं, उदकार्द्रता चेह गलद्विन्दुतुषाराद्यनन्तरोदितोदकभेदसंमिश्रता, तथा सस्निग्धं वा कायं सस्निग्धं वा वस्त्रम्, अत्र स्नेहनं स्निग्धमिति भावे निष्ठाप्रत्ययः, सह स्निग्धेन वर्तत इति सस्निग्धः, सस्निग्धता चेह बिन्दुरहितानन्तरोदितोदकभेदसंमिश्रता, एतत् किमित्याह-

'नामुसेज्ज'त्ति नामृषेन्न संस्पृशेत् नापीडयेन्न पप्रीडयेत् नास्फोटयेत् न प्रस्फोटयेत् नातापयत् न प्रतापयेत् तत्र सकृदीषद्वा स्पर्शनमामर्षणम् अतोऽन्यत्संस्पर्शनम्, एवं सकृदीषद्वा पीडनमापीडनमतोऽन्यत्प्रपीडनम्, एवं सकृदीषद्वा स्फोटनमास्फोटनमतोऽन्यत्प्रस्फोटनम्, एवं सकृदीषद्वा तापनमातापनं विपरीतं प्रतापनम्, एतत्स्वयं न कुर्यात्तथाऽन्यमन्येन वा नामर्षयेन्न संस्पर्शयेत् नापीडयेत् न प्रपीडयेत् नास्फोटयेत् न प्रस्फोटयेत् नातापयेत् न प्रतापयेत, तथाऽन्यं स्वत एव आमृषन्तं वा संस्पृशन्तं वा आपीडयन्तं वा प्रपीडयन्तं वा आस्फोटयन्तं वा प्रस्फोटयन्तं वा आतापयन्तं वा प्रतापयन्तं वा न समनुजानीयादित्यादि पूर्ववत्॥

*__मू. ( ४३ )__ से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से अगनिं वा इंगालं वा मुम्मुरं वा अच्चिं वा जालं वा अलायं वा सुद्धागनिं वा उक्कं वा न उंजेज्जा न घट्टेज्जा न उज्जालेज्जा न निव्वावेज्जा अन्नं न उंजावेज्जा न घट्टावेज्जा न उज्जालावेज्जा न निव्वावेज्जा अन्न उंजंतं वा घट्टंतं वा उज्जालंतं वा निव्वावंतं वा न समणुजाणेज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि॥*

**वृ-** 'से भिक्खू वा इत्यादि जाव जागरमाणे व'त्ति पूर्ववदेव, 'से अगणिं वे'त्यादि, तद्यथा-अग्निं वा अङ्गारं वा मुर्मुरं वाऽर्चिर्वा ज्वालां वा अलातं वा शुद्धाग्निं वा उल्कां वा, इह अयस्पिण्डानुगतोऽग्निः, ज्वालाहितोऽङ्गारः, विरलाग्निकणं भस्म मुर्मुरः, मूलाग्निविच्छिन्ना ज्वाला अर्चिः, प्रतिबद्धा ज्वाला, अलातमुल्मुकं, निरिन्धनः-शुद्धोऽग्निः उल्का-गगनाग्निः, एतत् किमित्याह-'न उंजेज्जा' नोत्सिचेत् 'न घट्टेज्जा' न घट्टयेत् न उज्ज्वालयेत् न निर्वापयेत्, तत्रोञ्जनमुत्सेचनं, घट्टनं-सजातीयादिना चालनम्, उज्ज्वालनं-व्यजनादिभिर्वृद्धयापादनं, निर्वापणं-विध्यापनम्, एतत्स्वयं न कुर्यात्, तथाऽन्यमन्येन वा नोत्सेचयेन्न घट्टयेन्नोज्ज्वालयेन्न निर्वापयेत्, तथाऽन्यं स्वत एव उत्सिञ्चयन्तं वा घट्टयन्तं वा उज्ज्वालयन्तं वा निर्वापयन्तं वा न समनुजानीयादित्यादि पूर्ववत्।

*__मू. ( ४४ )__ से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ आ राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से सिएग वा विहुणेण वा तालिअंटेण वा पत्तेण वा पत्तभंगेण वा साहाए वा साहाभंगेण वा पिहुणेण वा पिहुणहत्थेण वा चेलेण वा चेलकण्णेण वा हत्थेण वा मुहेण वा अप्पणो वा कायं बाहिरं वावि पुग्गलं न फुमेज्जा न वीएज्जा अन्नं न फुमावेज्जा न वीआवेज्जा अन्न फुमंतं वा वअंतं वा न समणुजाणेज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि॥*

वृ- 'से भिक्खू वा इत्यादि जाव जागरमाणे व'त्ति पूर्ववदेव, 'से सिएण वे'त्यादि, तद्यथा- सितेन वा विधवनेन वा तालवृन्तेन वा पत्रेण वा शाखया वा शाखाभङ्गेन वा पेहुणेन वा पेहुणहस्तेन वा चेलेन वा चेलकर्णेन वा हस्तेन वा मुखेन वा, इह सितं-चामरं विधवनं-व्यजनं तालवृन्तं- तदेव मध्यग्रहणच्छिद्रं द्विपुटं पत्रं-पद्मिनीपत्रादि शाखा-वृक्षडालं शाखाभङ्ग-तदेकदेशः पेहुणं- मयूरादिपिच्छं पेहुणहस्तः-तत्समूहः चेलं-वस्त्रं चेलकर्णः-तदेकदेशः हस्तमुखे-प्रतीते, एभिः किमित्याह-आत्मनो वा कायं-स्वदेहमित्यर्थः, बाह्यं वा पुद्गलम्-उष्णौदनादि, एतत् किमित्याह- 'न फुमेज्जा' इत्यादि, न फूत्कुर्यात् न व्यजेत्, तत्र फूत्करणं मुखेन धमनं व्यजनं चमरादिना वायुकरणम्, एतत्स्वयं न कुर्यात्, तथाऽन्यमन्येन वा न फूत्कारयेन्न व्याजयेत्, तथाऽन्यं स्वत एव फूत्कर्वन्तं व्यजन्तं वा न समनुजानीयादित्यादि पूर्ववदेव॥

*मू. (४५) से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ आ राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से बीएसु वा बीयपइट्ठेसु वा रूढेसु वा रूढपइट्ठेसु वा जाएसु वा जायपइट्ठेसु वा हरिएसु वा हरियपइट्ठेसु वा छिन्नेसु वा छिन्नपइट्ठेसु वा सचित्तेसु वा सचित्तकोलपडिनिस्सिएसु वा न गच्छेज्जा न चिट्ठेज्जा न निसीइज्जा न तुअट्टेज्जा अन्नं न गच्छावेज्जा न चिट्ठावेज्जा न निसीयावेज्जा न तुअट्टाविज्जा अन्नं गच्छंतं वा चिट्ठंतं वा निसीयंतं वा तुयट्टंतं वा न समणुजाणेज्जा जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि॥*

वृ- 'से भिक्खू वा इत्यादि जाव जागरमाणे व'त्ति पूर्ववदेव, 'से बीएसु वे'त्यादि, तद्यथा- बीजेषु बा बीजप्रतिष्ठितेषु वा रूढेषु वा रूढप्रतिष्ठितेषु वा जातेषु वा जातप्रतिष्ठितेषु वा हरितेषु वा हरितप्रतिष्ठितेषु वा छिन्नेषु वा छिन्नप्रतिष्ठितेषु वा सचित्तेषु वा सचित्तकोलप्रतिनिश्रितेषु वा, इह बीजं-शाल्यादि तत्प्रतिष्ठितम्-आहारशयनादि गह्यते, एवं सर्वत्र वेदितव्यं, रूढानि- स्फुटितबीजानि जातानि-स्तम्बीभूतानि हरितानिदूर्वादीनि छिन्नानि-परश्वादिभिर्वृक्षात् पृथक् स्थापितान्यार्द्राणि अपरिणतानि तदङ्गानि गृह्यन्ते सचित्तानिअण्डकादिनि कोलो-घुणस्तत्प्रति- निश्रितानि-तदुपरिवर्तीनी दार्वादीनि गृह्यन्ते, एतेषु किमित्याह-'न गच्छेज्जा' न गच्छतं न तिष्ठेत् न निषीदेत् न त्वग्वर्तेत, तत्र गमनम्-अन्यतोऽन्यत्र स्थानम्-एकत्रैव निषीदनम्-उपवेशनं त्वग्वर्तनं-स्वपनम्, एतत्स्वयं न कुर्यात, तथाऽन्यमेतेषु न गमयेत् न स्थापयेत् न निषीदयेत् न स्वापयेत् तथाऽन्यं स्वत एव गच्छन्तं वा तिष्ठन्तं वा निषीदन्तं वा स्वपन्तं वा न समनुजानीया- दित्यादि पूर्ववत्॥

*मू. (४६) से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिआ वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से कीडं वा पयंगं वा कुंथुं वा पिपीलियं वा हत्थंसि वा पायंसि वा बाहुंसि वा ऊरुंसि वा उदरंसि वा सीसंसि वा वत्थंसि वा पडिग्गहंसि वा कंबलंसि वा पायपुंछणंसि वा रयहरणंसि वा गोच्छगंसि वा उंडगंसि वा दंडगंसि वा पीढगंसि वा फलगंसि वा सेज्जंसि वा संथारगंसि वा अन्नयरंसि वा तहप्पगारे उवगरणजाए तओ संजयामेव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पडिलेहिअ पडिलेहिअ पमज्जिअ पमज्जिअ एगंतमवणेज्जा नो नं संघायमावज्जेज्जा॥*

**वृ**- 'से भिक्खू वा इत्यादि यावज्जागरमाणे व'त्ति पूर्ववत्, 'से कीडं वा' इत्याद, तद्यथा-कीटं वा पतङ्गं वा कुन्थुं वा पिपीलिकां वा, किमित्याह-हस्ते वा पादे वा बाहौ वा ऊरुणि वा उदरे वा वस्त्रे वा रजोहरणे वा गुच्छे वा उन्दके वा दण्डके वा पीठे वा फलके वा शय्यायां वा संस्तारके वा अन्यतरस्मिन् वा तथा प्रकारे साधुक्रियोपयोगिनि उपकरणजाते कीटादिरूपं त्रसं कथञ्चिदापतितं सन्तं संयत एव सन् प्रयत्येन वा प्रत्युपेक्ष्य प्रत्यपेक्ष्य-पौनःपुन्येन सम्यक्, प्रमृज्य प्रमृज्य-पौनःपुन्येनैव सम्यक्, किमित्याह-'एकान्ते' तस्यानुपधातके स्थाने 'अपनयेत्' परित्यजेत्' 'नैनं त्रसं संघातमापादयेत्' नैनं त्रसं संघातं-परस्परगात्रसंस्पर्शपीडारूपमापादयेत्-प्रापयेत्, अनेन परितापनादिप्रतिषेध उक्तो वेदितव्यः, 'एकग्रहणे तज्जातीयग्रहणाद्' अन्यकारणानुमतिप्रतिषेधश्च, शेषमत्र प्रकटार्थमेव, नवरमुन्दकं-स्थण्डिलं, शय्या-संस्तारिका वसतिर्वा। इत्युक्ता यतना, गतश्चतुर्थोऽर्थाधिकारः॥

*मू.(४७) अजयं चरमाणो अ(उ), पाणभूयाइं हिंसइ।*
*बंधई पावयं कम्मं, तं से होइ कडुअं फलं॥*

**वृ**.साम्प्रतमुपदेशाख्यः पञ्चम उच्यते-'अजय'मित्यादि, 'अयतं चरन्' अयतम् अनुपदेशेना-सूत्राज्ञया इति, क्रियाविशेषमेतत्, चरन्-गच्छन्, तुरेवकारार्थः, अयतमेव चरन्, ईर्यासमिति-मुल्लङ्घ्य, न त्वन्यथा, किमित्याह-'प्राणिभूतानि हिनस्ती' प्राणिनो-द्वीन्द्रियादयः भूतानि-एकेन्द्रियास्ता हिनस्ति-प्रमादानाभोगाभ्यां व्यापादयतीति भावः, तानि च हिंसन् 'बन्धाति पापं कर्म' अकुशलपरिणामादादत्ते क्लिष्टं ज्ञानावरणीयादि, 'तत् से भवति कटुकफलं' तत्-पापं कर्म से -तस्यायतचारिणो भवति, कटुकफलमित्यनुस्वारोऽलाक्षणिकः अशुभफलं भवति, मोहादिहेतुतया विपाकदारुणमित्यर्थः,

*मू.(४८) अजयं चिट्ठमाणो अ, पाणभूयाइं हिंसइ।*
*बंधई पावयं कम्मं, तं से होइ कडुअं फलं॥*

**वृ**.एवमयतं तिष्ठन् ऊर्ध्वस्थानेनासमाहितो हस्तपादादि विक्षिपन्, शेषं पूर्ववत्॥

*मू.(४९) अजयं आसमणो अ, पाणभूयाइ हिंसइ।*
*बंधई पावयं कम्मं तं से होइ कडुअं फलं॥*

**वृ**. एवमयतमासीनो-निषण्णतया अनुपयुक्त आकुञ्चनादिभावेन, शेषं पूर्ववत्।

*मू.(५०) अजयं सयमाणो अ, पाणभूया इं हिंसइ।*
*बंधई पावयं कम्मं, तं जे होई कडुअ फलं॥*

**वृ**.एवमयतं स्वपन्-असमाहितो दिवा प्रकामशय्यादिना(वा), शेषं पूर्ववत्

*मू.(५१) अजयं भुंजमाणो अ, पाणभूयाइ हिंसइ।*
*बंधई पावयं कम्मं तं से होइ कडुअं फलं॥*

**वृ**.एवमयतं भुञ्जानो-निष्प्रयोजनं प्रणीतं काकश‍ृगालभक्षितादिना(वा), शेषं पूर्व-वत्॥

*मू.(५२) अजयं भासमाणो अ, पाणभूयाइ हिंसइ।*
*बंधई पावयं कम्मं तं से होइ कडुअं फलं॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.एवमयतं भाषमाणोगृहस्थभाषया निष्ठुरमन्तर भाषादिना(वा), शेषं पूर्ववत्॥

मू.(५३) *कहं चरे कहं चिट्ठे, कहमासे कहं सए।*
*कहं भुंजंतो भासंतो, पावं कम्मं न बंधइ?॥*

वृ. अत्राह-यद्येवं पापकर्मबन्धस्ततः 'कहं चरे' इत्यादि, 'कथं' केन प्रकारेण चरेत्, कथं तिष्ठेत्, कथमासीत, कथं स्वपेत्, कथं भुञ्जानो भाषमाणः पापं कर्म न बन्धातीति?॥

मू.(५४) *जयं चरे जयं चिट्ठे, जय मासे जयं सए।*
*जयं भुंजंतो भासंतो, पावं कम्मं न बंधइ।*

वृ.आचार्य आह-'जयं चरे' इत्यादि, यतं चरेत्-सूत्रोपदेशेनेर्यासमितः, यतं तिष्ठेतसमाहितो हस्तपादाद्यविक्षेपेण, यतमासीत-उपयुक्त आकुञ्चनाद्यकरणेनन, यतं स्वपेत्-समाहितो रात्रो प्रकामशय्यादिपरिहारेण, यतं भुञ्जानः-सप्रयोजनमप्रणीतं प्रतरसिंहभक्षितादिना, एवं यतं भाषमाणः-साधुभाषया मृदुकालप्रासं च 'पापं कर्म' क्लिष्टमकुशलानुबन्धि ज्ञानावरणीयादि 'न बध्नाति' नादत्ते, निराश्रवत्वात् विहितानुष्ठानपरत्वादिति॥

मू.(५५) *सव्वभूयप्पभूअस्स, सम्मं भूयाइं पासओ।*
*पिहिआसवस्स दंतस्स, पावं कम्मं न बंधइ॥*

वृ.किंच-'सव्वभूय' इत्यादि, सर्वभूतेष्वात्मभूतः सर्वभूतात्मभूतो, य आत्मवत् सर्वभूतानि पश्यतीत्यर्थः, तस्यैवं सम्यग्-वीतरागोक्तेन विधिना भूतानि-पृथिव्यादीनि पश्यतः सतः 'पिहिताश्रवस्य' स्थगितप्राणातिपाताद्याश्रवस्य 'दान्तस्य' इन्द्रियनोइन्द्रियदमेन 'पापं कर्म न बध्यते' तस्य पापकर्म बन्धो न भवतीत्यर्थः॥

एवं सति सर्वभूतदयावतः पापकर्मकन्धो न भवतीति, ततश्च सर्वात्मना दयायामेव यतितव्यम्, अलं ज्ञानाभ्यासेनापि(नेति) मा भूदव्युत्पन्नविनेयमतिविभ्रम इति तदपोहायाह-

मू.(५६) *पढमं नाणं तउ दया, एवं चिट्ठइ सव्वसंजए।*
*अन्नाणी किं काही, किंवा नाही छेअपावगं?*

वृ.'पढमं नाणं' मित्यादि, प्रथमम्-आदौ ज्ञानं-जीवस्वरूपसंरक्षणोपायफल-विषयं 'ततः' तथाविधज्ञानसमनन्तरं 'दया' संयमस्तदेकान्तोपादेयतया भावतस्तत्प्रवृत्तेः, 'एवम्' अनेन प्रकारेण ज्ञानपूर्वकक्रियाप्रतिपत्तिरूपेण 'तिष्ठति' आस्ते 'सर्वसंयतः' सर्वः प्रव्रजितः, यः पुनः 'अज्ञानी साध्योपायफलपरिज्ञानविकलः स किं करिष्यति?, सर्वत्रान्धतुल्यत्वात्प्रवृत्तिनिवृत्तिनिमित्ताभावात्, किं वा कुर्वन् ज्ञास्यति 'छेकं' निपुणं हितं कालोचितं 'पापकं वा' अतो विपरीतमिति, ततश्च तत्करणं भावतोऽकरणमेव, समग्रनिमित्ताभावात्, अन्धप्रदीप्तपलायन-धुणाक्षरकरणवत्, अत एवान्यत्राप्युक्तम्-'गीअत्थो अ विहारो बीओ गीअत्थमीसिओ भणिओ' इत्यादि, अतो ज्ञानाभ्यासः कार्यः॥

मू.(५७) *सोच्चा जाणइ कल्लाणं, सोच्चा जाणइ पावगं।*
*उभयंपि जाणए सोच्चा, जं छेयं तं समायरे॥*

वृ.तथा चाह-'सोच्चा' इत्यादि, 'श्रुत्वा' आकर्ण्य ससाधनस्वरूपविपाकं 'जानाति' बुद्धयते 'कल्याणं' कल्यो-मोक्षस्तमणती-प्रापयतीति कल्याणं-दयाख्यं संयमस्वरूपं, तथा श्रुत्वा जानाति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापकम्-असंयमस्वरूपम्, 'उभयमपि' संयमासंयमस्वरूपं श्रावकोपयोगि जानाति श्रुत्वा, नाश्रुत्वा, यतश्चैवमत इत्थं विज्ञाय यत् छेकं-निपुणं हितं कालोचित्तं तत्समाचरेत्कुर्यादित्यर्थः ॥

मू.(५८) *जो जीवेवि न याणेइ, अजीवेवि न याणेइ।*
*जीवाजीवे अयाणंतो, कह सो नाहीइ संजमं?*

वृ.उक्तमेवार्थं स्पष्टयन्नाह- 'जो जीवेऽपि' इत्यादि, यो 'जीवानपि' पृथिवीकायिकादि-भेदभिन्नान् न जानाति 'अजीवानपि' संयमोपघातिनो मद्यहिरण्यादीन्न जानाति, जीवाजीवान-जानन्कथमसौ ज्ञास्यति 'संयमं?' तद्विषयं, तद्विषयाज्ञानादिति भावः ॥

मू.(५९) *जो जीवेवि वियाणेइ, अजीवेवि वियाणेइ।*
*जीवाजीवे वियाणंतो, सो हु नाहीइ संजमं॥*

वृ. ततश्च यो जीवानपि जानात्यजीवानपि जानाति जीवाजीवान् विजानन् स एव ज्ञास्यति संयममिति। प्रतिपादितः पञ्चम उपदेशार्थाधिकारः ॥

मू.(६०) *जया जीवमजीवे अ, दोऽवि एए वियाणइ।*
*तया गइं बहुविहं, सव्वजीवाण जाणइ॥*

वृ. साम्प्रतं षष्ठेऽधिकारे धर्मफलमाह-'जया' इत्यादि, 'यदा' यस्मिन् काले जीवान-जीवांश्च द्वावप्येतौ विजानाति-विविधं जानाति 'तदा' तस्मिन् काले 'गतिं' नरकगत्यादिरूपां 'बहुविधां' स्वपरमतभेदेनानेकप्रकारां सर्वजीवानां जानाति, यथाऽवस्थितजीवाजीव-परिज्ञानमन्तरेण गतिपरिज्ञानाभावात् ॥

मू.(६१) *जया गइं बहुविहं, सव्वजीवाण जाणइ।*
*तया पुण्णं च पावं च, बंधं मुक्खं च जाणइ।*

वृ.उत्तरोत्तरां फलवृद्धिमाह- 'जया' इत्यादि, यदा गतिं बहुविधां सर्वजीवानां जानाति तदा पुण्यं च पापं च-बहुविधगतिनिबन्धनं(च) तथा 'बन्धं' जीवकर्मयोगदुःखलक्षणं 'मोक्षं च' तद्वियोगसुखलक्षणं जानाति ॥

मू.(६२) *जया पुण्णं च पावं च, बंधं मुक्खं च जाणइ।*
*तया निव्विदए भोए, जे दिव्वे जे अ मानुसे॥*

वृ.'जया' इत्यादि, यदा पुण्यं च पापं च बन्धं मोक्षं च जानाति तदा निर्विन्ते-मोहा-भावात् सम्यग्विचारयत्यसारदुःखरूपतया 'भोगान्' शब्दादीन् यान् दिव्यान् यांश्च मानुषान्, शेषास्तु वस्तुतो भोगा एव न भवन्ति ॥

मू.(६३) *जया निव्विदए भोगे, जे दिव्वे जे अ मानुसे।*
*तया चयइ संजोगं, सब्भिंतरबाहिरं॥*

वृ.'जया' इत्यादि, यदा निर्विन्ते भोगान् यान् दिव्यान्, यांश्च मानुषान् तदा त्यजति 'संयोगं' संबन्धं द्रव्यतो भावतः 'साभ्यन्तरबाह्यं' क्रोधादिहिरण्यादिसंबन्धमित्यर्थः ॥

मू.(६४) *जया चयइ संजोगं, सब्भिंतरबाहिरं।*
*तया मुंडे भवित्ता नं, पव्वइए अनगारिअं॥*

वृ. 'जया' इत्यादि, यदा त्यजति संयोगं साभ्यन्तरबाह्यं तदा मुण्डो भूत्वा द्रव्यतो भावतश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'प्रव्रजति' प्रकर्षेण व्रजत्यपवर्गं प्रत्यनगारं, द्रव्यतो भावतश्चाविद्यमानागारमिति भावः ॥

*मू. ( ६५ ) जया मुंडे भवित्ता नं, पव्वइए अनगारिअं।*
*तया संवरमुक्किट्ठं, धम्मं फासे अनुत्तरं॥*

वृ. 'जया' इत्यादि, यदा मुण्डो भूत्वा प्रव्रजत्यनगारं तदा 'संवरमुक्किट्ठं'ति प्राकृतशैल्या उत्कृष्टसंवरं धर्म-सर्वप्राणातिपातादिविनिवृत्तिरूपं, चारित्रधर्ममित्यर्थः, स्पृशत्यनुत्तरं-सम्यगासेवत इत्यर्थः ॥

*मू. ( ६६ ) जया संवरमुक्किट्ठं, धम्मं फासे अनुत्तरं।*
*तया धुणइ कम्मरयं, अबोहिकलुसकडं॥*

वृ. 'जया' इत्यादि, यदोत्कृष्टसंवरं धर्मं स्पृशत्यनुत्तरं तदा धुनोति-अनेकार्थत्वात्पातयति 'कर्मरजः' कर्मैव आत्मरञ्जनाद्रज इव रजः, किंविशिष्टमित्याह-'अबोधिकलुषकृतम्' अबोधिकलुषेणमिथ्यादृष्टिनोपात्तमित्यर्थः ॥

*मू. ( ६७ ) जया धुणइ कम्मरयं, अबोहिकलुसंकडं।*
*तया सव्वत्तगं नाणं, दंसणं चाभिगच्छइ॥*

वृ. 'जया' इत्यादि, यदा धुनोति कर्मरजः अबोधिकलुषकृतं तदा 'सर्वत्रगं ज्ञानम्' अशेषज्ञेयविषयं 'दर्शनं च' अशेषदृश्यविषयम् 'अधिगच्छति' आवरणाभावादाधिक्येन प्राप्नोतित्यर्थः ॥

*मू. ( ६८ ) जया सव्वत्तग नाणं, दंसणं चाभिगच्छइ।*
*तया लोगमलोगं च, जिनो जाणइ केवली॥*

वृ. 'जया' इत्यादि, यदा सर्वत्रगं ज्ञानं दर्शनं चाधिगच्छति तदा 'लोकं' चतुर्दशरज्ज्वात्मकम् 'अलोकं च' अनन्तं जिनो जानाति केवली, लोकालोकौ च सर्वं नान्यतरमेवेत्यर्थः ।

*मू. ( ६९ ) जया लोगमलोगं च, जिनो जाणइ केवली।*
*तया जोगे निरुंभिता, सेलेसिं पडिवज्जइ॥*

वृ. 'जया' इत्यादि, यदा लोकमलोकं च जिनो जानाति केवली तदोचितसमयेन योगान्निरुद्धय मनोयोगादीम् शैलेशीं प्रतिपद्यते, भवोपग्राहकर्मांशक्षयाय॥

*मू. ( ७० ) जया जोगे निरुंभित्ता, सेलेसिं पडिवज्जइ।*
*तया कम्मं खवित्ता नं, सिद्धिं गच्छइ नीरओ॥*

वृ. 'जया' इत्यादि, यदा योगान्निरुदध्य शैलेशीं प्रतिपद्यते तदा कर्म क्षपयित्वा भवोपग्राह्यपि 'सिद्धिं गच्छति' लोकान्तक्षेत्ररूपां 'नीरजाः' सकलकर्मरजोविनिर्मुक्तः ॥

*मू. ( ७१ ) जया कम्मं खवित्ता नं, सिद्धिं गच्छइ नीरओ।*
*तया लोगमत्थयत्थो, सिद्धो हवइ सासओ।*

वृ. 'जया' इत्यादि, यदा कर्म क्षपयित्वा सिद्धिं गच्छति नीरजाः तदा 'लोकमस्तकस्थः' त्रैलोक्योपरिवर्ती सिद्धो भवति 'शाश्वतः' कर्मबीजाभावादनुत्पत्तिधर्मेति भावः। उक्तो धर्मफलाख्यः षष्ठोऽधिकारः ॥

*मू. ( ७२ ) सुहसायगस्स समणस्स, सायाउलगस्स निगामसाइस्स।*
*उच्छोलणापहोअस्स, दुलहा सुगई तारिसगस्स।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** साम्प्रतमिदं धर्मफलं यस्य दुर्लभं तमभिधित्सुराह-'सुहे'ति, सुखास्वादकस्य-अभिष्वङ्गेण प्राप्तसुखभोक्तुः 'श्रमणस्य' द्रव्यप्रव्रजितस्य 'साताकुलस्य' भाविसुखार्थं व्याक्षिप्तस्य 'निकामशायिनः' सूत्रार्थवेलामप्युल्लङ्घ्य शयानस्य 'उत्सोलनाप्रधाविनः' उत्सोलनया-उदकायतनया प्रकर्षेण धावति-पादादिशुद्धिं करोति यः स तथा तस्य, किमित्याह--'दुर्लभा' दुष्प्रापा 'सुगतिः' सिद्धिपर्यवसाना 'तादृशस्य' भगवतदाज्ञालोपकारिण इति गाथार्थः ॥

**मू.( ७३ )** *तवोगुणपहाणस्स उज्जुमइ खंतिसंजमरयस्स।*
*परीसहे जिणंतस्स सुलहा सुगई तारिसगस्स ॥*

**वृ.** इदानीमिदं धर्मफलं यस्य सुलभं तमाह-'तवोगुणे'त्यादि, 'तपोगुणप्रधानस्य' षष्ठाष्टमादितपोधनवतः 'ऋजुमतेः' मार्गप्रवृत्तबुद्धेः 'क्षान्तिसंयमरतस्य' क्षान्तिप्रधानसंयमा-सेविन इत्यर्थः 'परीषहान्' क्षुत्पिपासादीन् 'जयतः' अभिभवतः सुलभा 'सुगतिः' उक्तलक्षणा 'तादृशस्य' भगवदाज्ञाकारिण इति गाथार्थः ॥

**मू.( ७४ )** *पच्छावि ते पयाया, खिप्पं गच्छंति अमरभवणाइं।*
*जेसिं पिओ तवो संजमो अ खंती अ बंभचेरं च।* [प्र]

**मू.( ७५ )** *इच्चेअं छज्जीवणिअं सम्मद्दिट्ठी सया जए।*
*दुल्लहं लहित्तु सामण्णं, कम्मुणा न विराज्जासि ॥ त्तिबेमि ॥*

**वृ.** महार्था षड्जीवनिकायिकेति विधिनोपसंहरन्नाह- 'इच्चेय' मित्यादि, 'इत्येतां षड्जीवनिकायिकाम्' अधिकृताध्ययनप्रतिपादितार्थरूपां, न विराधयेदितियोगः, 'सम्यग्दृष्टिः' जीव-स्तत्त्वश्रद्धावान् सदा यतः' सर्वकालं प्रयत्नपरः सन्, किमित्याह-'दुर्लभं लब्ध्या श्रामण्यं' दुष्प्रापं प्राप्य श्रमणभावं-षड्जीवनिकायसंरक्षणैकरूपं 'कर्मणा' मनोवाक्कायक्रियया प्रमादेन 'न विराधयेत्' न खण्डयेत्, अप्रमत्तस्य तु द्रव्यविराधना यद्यपि कथञ्चिद् भवति तथाऽप्यसाव-विराधननैवेत्यर्थः।

एतेन 'जले जीवाः स्थले जीवा, आकाशे जीवमालिनि।
जीवामालाकुले लोके, कथं भिक्षुरहिंसकः ॥'

इत्येतत्प्रत्युक्तं, तथा सूक्ष्माणां विराधनाभावाच्च। ब्रवीमीति पूर्ववत्। अधिकृताध्ययन-पर्यायशब्दप्रतिपादनायाह निर्युक्तिकारः-

**नि.[२३४]** जीवाजीवाभिगमो आयारो चेव धम्मपन्नत्ती।
तत्तो चरित्तधम्मो चरणे धम्मे अ एगट्ठा ॥

**वृ.** 'जीवाजीवाभिगमः' सम्यग्जीवाभिगमहेतुत्वात् एवम् 'आचारश्चैव' आचारोपदेशत्वात 'धर्मप्रज्ञप्तिः' यथावस्थितधर्मप्रज्ञापनात् ततः 'चारित्रधर्मः' तन्निमित्तत्वात् 'चरणं' चरणविषयत्वात् 'धर्मश्च' श्रुतधर्मस्तत्सारभूतत्वात्, एकार्थिका एते शब्दा इति गाथार्थः ॥ अन्ये त्विदं गाथासूत्रमनन्तरोदितसूत्रस्याधो व्याख्यानयन्ति, तत्राप्यविरुद्धमेव।

उक्तोऽनुगमः, साम्प्रतं नयास्ते च पूर्ववदेव।

अध्ययन नं-४ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधितं सम्पादितं दशवैकालिक सूत्रे**
**चतुर्थ अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अध्ययनं-५ पिण्डैषणा

वृ. अधुना पिण्डैषणाख्यमारभ्यते, अस्य चायमभिसंबन्धः-इहानन्तराध्ययने 'साधोराचारः षड्जीवनिकायगोचरः प्राय' इत्येतदुक्तम्, इह तु धर्मकाये सत्यसौ स्वस्थे सम्यक् पाल्यते, स चाहारमन्तरेण प्रायः स्वस्थो न भवति, स च सावद्येतरभेद इत्यनवद्यो ग्राह्य इत्येतदुच्यते, उक्तं च -

"से संजए समक्खाए, निरवज्जाहारि जे विऊ।
धम्मकायट्ठिए सम्मं, सुहजोगाण साहए॥"

इत्यनेनाभिसंबन्धेनायातमिदमध्ययनं, भङ्ग्यन्तरेणैतदेवाह भाष्यकारः -

भा.[६१] मूलगुणा वक्खाया उत्तरगुणअवसरेण आयायं।
पिंडज्झयणमियाणिं निक्खेवे नामनिप्फन्ने॥

वृ. 'मूलगुणाः' प्राणातिपातनिवृत्यादयः 'व्याख्याताः' सम्यक् प्रतिपादिता अनन्तराध्ययने, ततश्च 'उत्तरगुणावसरेण' उत्तरगुणप्रस्तावेनायामिदमध्ययनम्--इदानीं यत्प्रस्तुतम्। इह चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्नो निक्षेपः, तथा चाह-निक्षेपे नामनिष्पन्ने, किमित्याह-

नि.[२३५] पिंडो अ एसणा य दुपयं नामं तु तस्स नायव्वं।
चउचउनिक्खेवेहिं परूवणा तस्स कायव्वा॥

नि.[२३६] नामंठवणापिंडो दव्वे भावे अ होइ नायव्वो।
गुडओयणाइ दव्वे भावे कोहाइया चउरो॥

नि.[२३७] पिंडि संघाए जम्हा ते उइया संघया य संसारे।
संघाययंति जीवं कम्मेणट्ठप्पगारे॥

नि.[२३८] दव्वेसणा उ तिविहा सचित्ताचित्तमीसदव्वाणं।
दुपयचउप्पयअपया नरगयकरिसावणदुमाणं॥

नि.[२३९] भावेसणा उ दुविहा पसत्थ अपसत्थगा य नायव्वा।
नाणाईण पसत्था अपसत्था कोहमाईणं॥

नि.[२४०] भावस्सुवगारित्ता एत्थं दव्वेसणाइ अहिगारो।
तीइ पुण अत्थजुत्ती वत्तव्वा पिंडनिज्जुत्ती॥

नि.[२४१] पिण्डेसणा य सव्वा संखेवेणोयरइ नवसु कोडीसु।
न हणइ न पयइ न किणइ कारावणअनुमईहिं नव॥

नि.[२४२] सा नवहा दुह कीरइ उग्गमकोडी विसोहीकोडी अ।
छसु पढमा ओयरइ कीयतियम्मी विसोही उ॥

नि.[६२] कोडीकरणं दुविहं उग्गमकोडी विसोहीकोडी अ।
उग्गमकोडी छक्कं विसोहीकोडी अनेगविहा॥

नि.[२४३] कम्मुद्देसिअचरिमतिग पूइयं मीसचरिमपाहुडिआ।
अज्झोयर अविसोही विसोहिकोडी भवे सेसा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[२४४] नव चेवट्ठारसगा सत्तावीसा तहेव चउपन्ना।
नउई दो चेव सया सत्तरिआ हुंति कोडीणं॥

नि.[२४५] रागाई मिच्छाई रागाई समणधम्म नाणाई।
नव नव सत्तावीसा नव नउईए य गुणगारा॥

वृ.पिण्डश्चैषणा च 'द्विपदं नाम तु' द्विपदमेव विशेषभिधानं 'तस्य' उक्तसंबन्धस्याध्ययनस्य ज्ञातव्यं, चतुश्चतुर्निक्षेपाभ्यां नामादिलक्षणाभ्यां प्ररूपणां 'तस्य' पदद्वयस्य कर्तव्येति गाथार्थः॥ अधिकृतप्ररूपणामाह-नामस्थापनापिण्डो द्रव्ये भावे च भवति ज्ञातव्यः, पिण्डशब्दः प्रत्येकमभिसंबध्यते, नामस्थापने क्षुण्णे, द्रव्यपिण्डं त्वाह-गुडौदनादिः 'द्रव्य' मिति द्रव्यपिण्डः, भावे क्रोधादयश्चत्वारः पिण्डा इति गाथार्थः॥ अत्रैवान्वर्थमाह-'पिडि संघाते' धातुरिति शब्दवित्समयः, यस्मात्ते क्रोधादय उदिताः सन्तो विपाकप्रदेशादयाभ्यां संहता एव संसारिणं संघातयन्ति-जीवं योजयन्तीत्यर्थः, केनेत्याह-कर्मणाऽष्टप्रकारेण-ज्ञानवरणीयादिना, अतः क्रोधादयः पिण्ड इति गाथार्थः॥ प्ररूपितः पिण्डः, साम्प्रतमेषणाऽवसरः

तत्र क्षुण्णात्वान्नामस्थापने अनादृत्य द्रव्यैषणामहाद्रव्यैषणा तु त्रिविधा भवति, सचित्ताचित्तमिश्रद्रव्याणामेषणा द्रव्यैषणा, सचित्तानां द्विपदचतुष्पदापदानां यथासंख्यं नरगजद्रुमाणामिति, कार्षापणग्रहणचित्तद्रव्यैषणा अलङ्कृतद्विपदादिगोचरमिश्रद्रव्यैषणा च द्रष्टव्येति गाथार्थ :॥ भावैषणामाह-भावैषणा तु पुनर्द्विविधा, प्रशस्ता अप्रशस्ता च ज्ञातव्या, एतदेवाह-'ज्ञानादीना'मिति ज्ञानादीनामेषणा प्रशस्ता क्रोधादीनामप्रशस्तैषणेति गाथार्थः॥

प्रकृतयोजनामाह-'भावस्य' ज्ञानादेरुपकारित्याद् 'अत्र' प्रक्रमे द्रव्यैषणयाऽधिकारः, 'तस्याः' पुनर्द्रव्यैषणायाः 'अर्थयुक्तिः' हेयेतररूपा अर्थयोजना वक्तव्या पिण्डनिर्युक्तिरिति गाथार्थः॥ सा च पृथक्स्थापनतो मया व्याख्यातैवेति नेह व्याख्याते। अधुना प्रकृताध्ययनावतारप्रपञ्चमाह-पिण्डैषणा च 'सर्वा' उद्गमादिभेदभिन्ना संक्षेपेणावतरति नवसु कोटीषु, ताश्चेमाः-न हन्ति न पचति न क्रीणाति स्वयं, तथा न घातयति न पाचयति न क्रापयत्यन्येन, तथा घ्नन्तं वा पचन्तं वा क्रीणन्तं वा न समनुजानात्यन्यमिति नव। एतदेवाह-कारणानुमतिभ्यां नवेति गाथार्थः। सा नवधा स्थिता पिण्डैषणा द्विविधा क्रियते-उद्गमकोटी विशोधिकोटी च, तत्र षट्सु हननघातनानुमोदनपचनपाचनानुमोदनेषु प्रथमा-उद्गमकोटी अविशोधिकोट्यवतरति, क्रीतत्रितये क्रयणक्रापणानुमतिरूपे विशोधिस्तु-विशोधकोटी द्वितीयेति गाथार्थः॥

एतदेव व्याचिख्यासुराह भाष्यकारः-'कोटीकरण'मिति कोट्येव कोटीकरणं, कोटी(कणं) द्विविधम्-उद्गमकोटी विशोधिकोटी च, उद्गमकोटी षट्कं-हननादिनिष्पन्नमाधाकर्मादि, विशोधिकोटी-क्रीतत्रीतयनिष्पन्ना अनेकधा ओघौद्देशिकादिभेदेनेति गाथार्थः॥

षट्कोट्याह-कर्म-संपूर्णमेव औद्देशिकचरमत्रित्यं-कर्मौद्देशिकस्य पाखण्डश्रमणनिर्ग्रन्थविषयं, पूति-भक्तपानपूत्येव मिश्रग्रहणात्पाखण्डश्रमणनिर्ग्रन्थमिश्रजातं चरमप्राभृतिका बादरेत्यर्थः, अध्यवपूरक इत्यविशोधिरित्येतत्षटं। विशोधिकोटी भवति शेषा-ओघौद्देशिकादिभेदभिन्नाऽनेकविधेति गाथार्थः॥ इहैव रागादियोजनया कोटीसंख्यामाह-नव चैव कोट्यः तथाऽष्टादशकं कोटीनां तथा सप्तविंशतिः कोटीनां तथैव चतुष्पञ्चाशत्कोटीनां तथा नवतिः कोटीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वे एव च शते सप्तत्यधिके कोटीनामिति गाथाक्षरार्थः ।। भावार्थस्तु वृद्धसंप्रदायादवसेयः, स चायम् -नव कोडीओ दोहिं रागद्दोसेहिं गुणियाओ अट्ठारस हवंति, ताओ चेव नव तिहिं मिच्छत्तात्राणअविरतीहिं गुणिताओ सत्तावीसं हवंति, सत्तावीसा रागदोसेहिं गुणिया चउपन्ना हवंति, ताओ चेव नव दसविहेण समणधम्मेण गुणिआओ विसुद्धाओ नउती भवंति, सा नउती तिहिं नाणदंसणचरित्तेहिं गुणिया दो सया सत्तरा भवंतीति गाथार्थः ।।

उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादिचर्चः पूर्ववत्ता-वद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

**-: अध्ययनं -५ उद्देशकः -१ :-**

मू.( ७६ ) *संपत्ते भिक्खकालंमि, असंभंतो अमुच्छिओ।*
*इमेण कमजोगेण, भत्तपानं गवेसए।*

**वृ.** 'संप्राप्ते' शोधनेन प्रकारेण स्वाध्यायकरणादिना प्राप्ते 'भिक्षाकाले' भिक्षासमये, अनेना-संप्राप्ते भक्तपानैषणाप्रतिषेमाह, अलाभाज्ञाखण्डनाभ्यां दृष्टादृष्टविरोधादिति, 'असंभ्रान्तः' अनाकुलो यथावदुपयोगादि कृत्वा, नान्येत्यर्थः, 'अमूर्च्छितः' पिण्डे शब्दादिषु वा अगृद्धो, विहितानुष्ठान-मितिकृत्वा, न तु पिण्डादावेवासक्त इति, 'अनेन' वक्ष्यमाणलक्षणेन 'क्रमयोगने' परिपाटीव्यापारेण 'भक्तपानं' यतियोग्यमोदनारलादि 'गवेषयेद्' अन्वेषयेदिति सूत्रार्थः ।।

मू.( ७७ ) *से गामे वा नगरे वा, गोअरग्गगओ मुनी।*
*चरे मंदमनुव्विग्गओ, अव्वक्खित्तेण चेअसा ।।*

**वृ.** यत्र यथा गवेषयेत्तदाह- 'से' इत्यादि सूत्रं, व्याख्या- 'से' इत्यसंभ्रान्तोऽमूर्च्छितः ग्रामे वा नगरे वा, उपलक्षणत्वादस्य कर्बटादौ वा, 'गोचराग्रगत' इति गोरिव चरणं गोचरः उत्तमा-धममध्यमकुलेषवरक्तद्विष्टस्य भिक्षाटनम् अग्रः- प्रधानोऽभ्याहृताधाकर्मादिपरित्यागेन तद्गतः-तद्वर्ती मुनिः- भावसाधुः चरेत्- गच्छेत् 'मन्दं' शनैः शनैर्न द्रुतमित्यर्थः, 'अनुद्विग्नः' प्रशान्तः परीषहादिभ्योऽबिभ्यत् 'अव्याक्षिप्तेन चेतसा' वत्सवणिग्जायादृष्टान्तात् शब्दादिष्व-गतेन 'चेतसा' अन्तः-करणेन एषणोपयुक्तेनेति सूत्रार्थः ।।

मू.( ७८ ) *पुरओ जुगमायाए, पेहमाणो महिं चरे।*
*वज्जंतो बीअहरियाइं, पाणे अ दगमट्टिअं।*

**वृ.** यथा चरेत्तथैवाह- 'पुरतो' इति सूत्रं, व्याख्या- 'पुरतः' अग्रतो 'युगमात्रया' शरीरप्रमाणया शकटोर्द्धिसंस्थितया, दृष्ट्वेति वाक्यशेषः, 'प्रेक्षमाणः' प्रकर्षेण पश्यन् 'महीं' भुवं 'चरेत्' यायात्, केचित्रेति योजयन्ति, न शेषदिगुपयोगेनेति गम्येत, न पेक्षमाण एव अपि तु 'वर्जयन्' परिहरन् बीजहरितानीति, अनेनानेकभेदस्य वनस्पतेः परिहारमाह, तथा 'प्राणिनो' द्वीन्द्रियादीन् तथा 'उदकम्' अप्कायं 'मृत्तिकां च' पृथिवीकायं, चशब्दात्तेजोवायुपरिग्रहः । दृष्टिमानं त्वत्र लघुतर-योपलब्धावपि प्रवृत्तितो रक्षणायोगात् महत्तरया तु देशविप्रकर्षेणा-नुपलब्धेरिति सूत्रार्थः ।।

मू.( ७९ ) *ओवायं विसमं खाणुं, विज्जलं परिवज्जए।*
*संकमेण न गच्छिज्जा, विज्जमाणे परक्कमे।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** उक्तः संयमविराधनापरिहारः, अधुना त्वात्मसंयमविराधनापरिहारमाह-'ओवाय'मिति सूत्रं, व्याख्या-'अवपातं' गर्तादिरूपं 'विषमं' निम्नोन्नतं 'स्थाणुम्' ऊर्ध्वकाष्ठं 'वीजलं' विगतजलं कर्दमं 'परिवर्जयेत्' एतत्सर्वं परिहरेत्, तथा 'संक्रमेण' जलगर्तापरिहाराय पाषाणकाष्ठरचितेन न गच्छेत्, आत्मसंयमविराधनासंभवात्, अपवादमाह-विद्यमाने पराक्रमे-अन्यमार्ग इत्यर्थः, असति तु तस्मिन् प्रयोजनमाश्रित्य यतनया गच्छेदिति सूत्रार्थः ॥

*मू.(८०) पवडंते व से तत्थ, पक्खलंते व संजए।*
*हिंसेज्ज पाणभूयाइं, तसे अदुव थावरे।*

**वृ.** अवपातादौ दोषमाह-'पवडंते'त्ति सूत्रं, व्याख्या-प्रपतन्वाऽसौ 'तत्र' अवपातादौ प्रस्खलन्वा 'संयतः' साधुः 'हिंस्याद्' व्यापादयेत् 'प्राणिभूतानि' प्राणिनो-द्वीन्द्रिया-दयः भूतानि-एकेन्द्रियाः एतदेवाह-त्रसानथवा स्थावरान्, प्रपातेनात्मानं चेत्येवमुभयविराधनेति सूत्रार्थः ॥

*मू.(८१) तम्हा तेन न गच्छिज्जा, संजए सुसमाहिए।*
*सइ अन्नेण मग्गेण, जयमेव परक्कमे।*

**वृ.** यतश्चैवं 'तम्हा' सूत्रं, व्याख्या-तस्मात्तेन-अवपातादिमार्गेण न गच्छेत् संयतः सुसमाहितो, भगवदाज्ञावर्तीत्यर्थः, 'सत्यन्येने'ति अन्यस्मिन् समादौ 'मार्गेणे'ति मार्गे, छान्द-सत्वात्सप्तम्यर्थे तृतीया, असति त्वन्यस्मिन्मार्गे तेनैवावपातादिना 'यतमेव पराक्रमेत' यतमिति क्रियाविशेषणं, यतमात्मसंयमविराधनापरिहारेण यायादिति सूत्रार्थः ॥

*मू.(८२) इंगालं छारियं रासिं, तुसरासिं च गोमयं।*
*ससरक्खेहिं पाएहिं, संजओ तं नइक्कमे॥*

**वृ.** अत्रैव विशेषतः पृथिवीकाययतनामाह-'इंगाल'मिति सूत्रम्, आङ्गारमिति अङ्गाराणामय-माङ्गारस्तमाङ्गारं राशिम्, एवं क्षारराशिं, तुषराशिं च गोमयराशिं च, राशिशब्दः प्रत्येकमभिसंबध्यते 'सरजस्काभ्यां पद्मयां' सचित्तपृथिवीरजोगुण्डिताभ्यां पादाभ्यां 'संयतः' साधुः 'तम्' अनन्त-रोदितं राशिं नाक्रामेत्, मा भूत्पृथिवीरजोविराधनेति सूत्रार्थः ॥

*मू.(८३) न चरेज्ज वासे वासंते, महियाए वा पडंतिए।*
*महावाए व वायंते, तिरिच्छसंपाइमेसु वा॥*

**वृ.** अत्रैवाप्कायादियतनामाह-'न चरेज्ज'त्ति सूत्रं, न चरेद्वर्षे वर्षति, भिक्षार्थं प्रविष्टो वर्षणे तु प्रच्छन्ने तिष्ठेत्, तथा महिकायां वा पतन्त्यां, सा च प्रायो गर्भमासेषु पतति, महावाते वा वाति सति, तदुत्खातरजोविराधनादोषात्, तिर्यक्संपतन्तीति तिर्यक्संपाताः-पतङ्गादयः तेषु वा सत्सु क्वचिदशनिरूपेण न चरेदिति सूत्रार्थः ॥

*मू.(८४) न चरेज्ज वेससामंते, बंभचेरवसाणुए।*
*बंभयारिस्स दंतस्स, हुज्जा तत्थ विसुत्तिआ।*

**वृ.** उक्ता प्रथमव्रतयतना, साम्प्रतं चतुर्थव्रतयतनोच्यते-'न चरेज्ज'त्ति सूत्रं, 'न चरद्वेश्या-सामन्ते' न गच्छेद्गणिकागृहसमीपे, किंविशिष्ट इत्याह-'ब्रह्मचर्यवशानयने(नये)' ब्रह्मचर्य-मैथुनविरतिरूपं वशमानयति-आत्मायत्तं करोति दर्शनाक्षेपादिनेति ब्रह्मचर्यवशानयनं तस्मिन्, दोषमाह-'ब्रह्मचारिणः' साधोः 'दान्तस्य' इन्द्रियनोइन्द्रियदमाभ्यां भवेत् 'तत्र' वेश्यासामन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'विस्रोतसिका' तद्रूपसंदर्शनस्मरणापध्यानकचवरनिरोधतः ज्ञानश्रद्धाजलोज्झनेन संयमस(श)-स्यशोषफला चित्तविक्रियेति सूत्रार्थः ॥

मू.(८५) अनायणे चरंतस्स, संसग्गीए अभिक्खणं।
*हुज्ज वयाणं पीला, सामन्नमि अ संसओ।*

**वृ**. एष सकृच्चरणदोषो वेश्यासामन्तसंगत उक्तः साम्प्रतमिहान्यत्र चासकृच्चरणदोषमाह-'अनायणे'त्ति सूत्रम्, अनायतने-अस्थाने वेश्यासामान्तादौ 'चरतो' गच्छतः 'संसर्गेण' संबन्धेन 'अभीक्ष्णं' पुनः पुनः, किमित्याह-भवेत 'व्रतानां' प्राणातिपातविरत्यादीनां पीडा, तदाक्षिप्तचेतसो भावविराधना, 'श्रामण्ये च' श्रमणभावे च द्रव्यतो रजोहरणादिधारणरूपे भूयो भावव्रतप्रधानहेतौ संशयः, कदाचिदुन्निष्क्रामत्येवेत्यर्थः, तथा च वृद्धव्याख्या-वेसादिगयभावस्स मेहुणं पीडिज्जइ, अनुवओगेणं एसणाकरणे हिंसा, पडुप्पायणे अन्नपुच्छण-अवलणाऽसच्चवयणं, अणणुण्णायवेसाइदसंणे अदत्तादाणं, ममत्तकरणे परिग्गहो, एवं सव्ववय-पीडा, दव्वसामन्ने पुण संसयो उन्निक्खमणेण त्ति सूत्रार्थः ॥

*मू.(८६) तम्हा एअं विआणित्ता, दोसं दुग्गइवड्ढणं।*
*वज्जए वेससामंतं, मुनी एगंतमस्सिए॥*

**वृ**. निगमयन्नाह-'तम्हा' इति सूत्रम्, यस्मादेवं तस्मादेतत् विज्ञाय 'दोषम्' अनन्तरोदितं दुर्गतिविर्धनं वर्जयद्वेश्यासामन्तं मुनि 'एकान्तं' मोक्षमाश्रित इति सूत्रार्थः ॥

आह-प्रथमव्रतविराधनानन्तरं चतुर्थव्रतविराधनोपन्यासः किमर्थम्?, उच्यते, प्राधान्यख्यापनार्थम्, अन्यव्रतविराधनाहेतुत्वेन प्राधान्यम्, तच्च लेशतो दर्शितमेवेति। अत्रैव विशेष-

*मू.(८७) साणं सूइअं गाविं, दित्तं गोणं हयं गयं।*
*संडिम्भं कलहं जुद्धं, दूरओ परिवज्जए॥*

**वृ**. 'साणं'ति सूत्रं, 'श्वानं' लोकप्रतीतम्, 'सूतां गाम्' अभिनवप्रसूतामित्यर्थः 'दृप्तं' च दर्पितं, किमित्याह-गावं हयं गजं, गौः-बलीवर्दो हयः-अश्वो गजो-हस्ती। तथा 'संडिम्भं' बालक्रीडास्थानं 'कलहं' वाक्प्रतिबद्धं 'युद्धं' खड्गादिभिः, एतत् 'दूरतो' दूरेण परि-वर्जयेत्, आत्मसंयमविराधनासंभवात्, श्वसूतगोप्रभृतिभ्य आत्मविराधना, डिम्भस्थाने वन्दनाद्यागमनपतनभण्डनप्रलुठनादिना संयमविराधना, सर्वत्र चात्मपात्रभेदादिनोभयविराधनेति सूत्रार्थः ॥

*मू.(८८) अणुन्नए नावणए, अप्पहिट्ठे अनाउले।*
*इंदिआणि जहाभागं, दमइत्ता मुनी चरे॥*

**वृ**. अत्रैव विधिमाह-'अणुन्नए'त्ति सूत्रम्, 'अनुन्नतो' द्रव्यतो भावतश्च, द्रव्यतो नाकाशदर्शी भावतो न जात्याद्यभिमानवान्, 'नावनतो' द्रव्यभावाभ्यामेव, द्रव्यानवनतोऽनीचकायः भावानवनतः अलब्ध्यादिनाऽदीनः 'अप्रहृष्टः' अहसन् 'अनाकुलः' क्रोधादिरहितः 'इन्द्रियाणि' स्पर्शनादीनि 'यथाभागं' यथाविषयं 'दमयित्वा' इष्टानिष्टेषुस्पर्शादिषु रागद्वेषरहितो 'मुनिः' साधुः 'चरेद्' गच्छेत्, विपर्यये प्रभूतदोषप्रसङ्गात्, तथाहि-द्रव्योन्नतो लोकहास्यः भावोन्नत ईर्यां न रक्षति द्रव्यावनतः बक इति संभाव्यते भावावनतः क्षुद्रसत्त्व इति, प्रहृष्टो योषिद्दर्शनाद्रक्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति लक्ष्यते, आकुल एवमेव, अदान्तः प्रव्रज्यानर्ह इति सूत्रार्थः ॥

मू.(८९) *दवदवस्स न गच्छेज्जा, भासमाणो अ गोअरे।*
*हसंतो नाभिगच्छिज्जा, कुलं उच्चावयं सया।*

वृ. किं च -'दवदवस्स' त्ति सूत्रं, 'द्रुतं द्रुतं' त्वरितमित्यर्थः, न गच्छेत् भाषमाणो वा न गोचरे गच्छेत्, तथा हसन्नाभिगच्छेत्, कुलमुच्चावचं सदा, उच्चं-द्रव्यभावभेदाद्दिधा-द्रव्योच्चं धवलगृहवासि भावोच्चं जात्यादियुक्तम्, एवमवचमपि द्रव्यतः कुटीरकवासि भावतो जात्यादिहीनमिति। दोषा उभयविराधनालोकोपधातादय इति सूत्रार्थः ॥

मू.(९०) *आलोअं थिग्गलं दारं, संधिं दगभवणाणि अ।*
*चरंतो न विनिज्झाए, संकट्ठाणं विवज्जए।*

वृ.अत्रैव विधिमाह-'आलोअं थिग्गलं' ति सूत्रम्, 'अवलोकं' निर्यूहकादिरूपं 'थिग्गलं' चित्तं द्वारादि, संधिः-चित्तं क्षत्रम्, 'उदकभवनानि' पानीयगृहाणि चरन् भिक्षार्थं न 'विनिध्यायेत्' विशेषेण पश्येत्, शङ्कास्थानमेतदवलोकादि अतो विवर्जयेत, तथा च नष्टादौ तत्राशङ्कोपजायत इति सूत्रार्थः ॥

मू.(९१) *रन्नो गिहवईणं च, रहस्सारक्खियाण य।*
*संकिलेसकरं ठाणं, दूरओ परिवज्जए।*

वृ.किंच-'रन्नो' त्ति सूत्रं, राज्ञः-चक्रवर्त्यादेः 'गृहपतीनां' श्रेष्ठिप्रभृतीनां रहसाठणामिति योगः, 'आरक्षकाणां च' दण्डनायकादीनां 'रहःस्थानं' गुह्यापवरकमत्रगृहादि 'संक्लेश-करम्' असदिच्छाप्रवृत्त्या मत्रभेदे वा कर्षणादिनेति, दूरतः परिवर्ज्जयेदिति सूत्रार्थः ॥

मू.(९२) *पडिकुट्ठकुलं न पविसे, मामगं परिवज्जए।*
*अचिअत्तकुलं न पविसे, चिअत्तं पविसे कुलं ॥*

वृ. किंच-'पडिकुट्ठ' त्ति सूत्रं, प्रतिकृष्टकुलं द्विविधम्-इत्वरं यावत्कथिकं च, इत्वरं सूतकयुक्तं, यावत्कथिकम्-अभोज्यम्, एतन्न प्रविशेत् शासनलघुत्वप्रसङ्गात्, 'मामकं' यत्राऽऽह गृहपतिः-मा मम कश्चिद्गृहमागच्छेत्, एतत् वर्जयेत, भण्डनादिप्रसङ्गात्, 'अचि-अत्तकुलम्' अप्रीतिकुलं यत्र प्रविशद्भिः साधुभिरप्रीतिरुत्पद्यते, न च निवारयन्ति, कुतश्चि-न्निमित्तान्तरात्, एतदपि न प्रविशत्, तत्संक्लेशनिमित्तत्वप्रसङ्गात्, 'चिअत्तम्' अचिअत्तविपरीतं प्रविशोत्कुलं, तदनुग्रहप्रसङ्गादिति सूत्रार्थः ॥

मू.(९३) *साणीपावारपिहिअं, अप्पणा नावपंगुरे।*
*कवाडं नो पणुल्लिज्जा, उग्गहंसि अजाइआ ॥*

वृ.किं च -'साणि' त्ति सूत्रं, 'शाणीप्रावारपिहित' मिति शाणीअतसीवल्कजा पटी, प्रावारः-प्रतीतः कम्बल्याद्युपलक्षणमेतत्, एवमादिभिः पिहितं-स्थगितं, गृहमिति वाक्य-शेषः। 'आत्मना' नापवृणुयात्' नोद्घाटयेदित्यर्थः, अलौकिकत्वेन तदन्तर्गतभुजिक्रियादि-कारिणां प्रद्वेषप्रसङ्गात्, तथा 'कपाटं' द्वारस्थगनं 'न प्रेरयेत्' नोद्घाटयेत्, पूर्वोक्तदोषप्रसङ्गात्, किमविशेषण?, नेत्याह -'अवग्रहमयाचित्वा' आगाढप्रयोजनेऽननुज्ञाप्यावग्रहं-विधिना धर्मलाभमकृत्वेति सूत्रार्थः ॥

मू.(९४) *गोअरग्गपविट्ठो अ, वच्चनमुत्तं न धारए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ओगासं फासुअं नच्चा, अणुन्नविअ वोसिरे।*

**वृ.** विधिशेषमाह-'गोयरग्ग'त्ति सूत्रं, गोचराग्रप्रविष्टस्तु वर्चो मूत्रं वा न धारयेत्, अवकाशं प्रासुकं ज्ञात्वाऽनुज्ञाप्य व्युत्सृजेदिति। अस्य विषयो वृद्धसंप्रदायादवसेयः, स चायम्-पुव्वमेव साहुणा सन्नाकाइओवयोगं काऊण गोअरे पविसिअव्वं, कहिंवि न कओ कए वा पुणो होज्जा ताहे वच्चमुत्तं न धारेअव्वं, जओ मुत्तनिरोह चक्खुवघाओ भवति, वच्चनिरोहे जीविओवघाओ, असोहणा अ आयविराधना, जओ भणिअं -'सव्वत्थ संजम' मित्यादि। वित्थरओ जहा ओहनिज्जुत्तीए। इति सूत्रार्थः॥

*मू.( १५ ) नीअदुवारं तमसं, कुट्ठगं परिवज्जए।*
*अचक्खुविसओ जत्थ, पाणा दुप्पडिलेहगा*

**वृ.** तथा 'नीयदुवार'न्ति सूत्रं, 'नीचद्वारं' नीचनिर्गमप्रवेश 'तमस'मिति तमोवन्तं 'कोष्ठकम्' अपरकं परिर्ज्जयेत् न तत्र भिक्षां गृह्णीयात्, सामान्यपेक्षया सर्व एवंविधो भवत्यत आह- 'अचक्षुर्विषयो यत्र' न चक्षुर्व्यापारो यत्रेत्यर्थः, अत्र दोषमाह-प्राणिनो दुष्प्रत्युपेक्षणीया भवन्ति, ईर्याशुद्धिर्न भवतीति सूत्रार्थः॥

*मू.( १६ ) जत्थ पुप्फाइं बीआइं, विप्पन्नाइं कुट्ठए।*
*अहुणोवलित्तं उल्लं, दट्ठूणं परिविज्जए*

**वृ.** किंच-'जत्थ'त्ति सूत्रं, यत्र 'पुष्पाणि' जातिपुष्पादीनि 'बीजानि' शालिबीजादिनी 'विप्रकीर्णानि' अनेकधा विक्षिप्तानि, परिहर्तुमशक्यानीत्यर्थः, कोष्ठके कोष्ठकद्वारे वा, तथा 'अधुनोपलिप्तं' साम्प्रतोपलिप्तम् 'आर्द्रम्' अशुष्कं कोष्ठकमन्यद्वा दष्टवा परिवर्ज्जयेदूरत एव, न तु तत्र धर्मलाभं कुर्यात्, संयमात्मविराधनापत्तेरिति सूत्रार्थः॥

*मू.( १७ ) एलगं दारगं साणं, वच्छगं वावि कुट्ठए।*
*उल्लंघिआ न पविसे, विउहित्ताण व संजए॥*

**वृ.** किं च -'एलगं'ति सूत्रम्, 'एडकं' मेषं 'दारकं' बालं 'श्वानं' मण्डलं 'वत्सकंवापि' क्षुद्रवृषभलक्षणं कोष्टके उल्लङ्घय पद्भ्यां न प्रविशेत्, 'व्यूह्य वा' प्रेर्य वेत्यर्थः, 'संयतः' साधुः आत्मसंयमविराधनादोषाल्लाघवाच्चेति सूत्रार्थः॥

*मू.( १८ ) असंसत्तं पलोइज्जा, नाइदूरा वलोअए।*
*उप्फुल्लं न विनिज्झाए, निअट्टिज्ज अयंपिरो॥*

**वृ.** इहैव विशेषमाह- 'असंसत्तं' ति सूत्रम् 'असंसक्तं प्रलोकयेत्', न योषिद्दृष्टेर्द्दष्टिं मेलये-दित्यर्थः, रागोत्पत्तिलोकोपघातदोषप्रसङ्गात्, तथा 'नातिदूरं प्रलोकयेत्' दायकस्या-गमनमात्रदेशं प्रलोकयेत्, परतश्चौरादिशङ्कादोषः, तथा 'उत्फुल्लं' विकसितलोचनं 'न विणिज्जझाए' त्ति न निरीक्षेत गृहपरिच्छदमपि, अदृष्टकल्याण इति लाघवोत्पत्तेः, तथा निवर्त्तेत गृहादलब्धेऽपि सति अजल्पन्-दीनवचनमनुच्चारयन्निति।

*मू.( १९ ) अइभूमिं न गच्छेज्जा, गोअरग्गओ मुनी।*
*कुलस्स भूमिं जाणित्ता, मिअं भूमिं परक्कमे॥*

**वृ.** तथा-'अइभूमिं न गच्छिज्जा' इति सूत्रम्, अतिभूमिं न गच्छेद्-अननुज्ञातां गृहस्थैः, यत्रान्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्षाचारा न यान्तीत्यर्थः, गोचराग्रगतो मुनिः, अनेनात्यदा तद्गमनासंभवमाह, किं तर्हि?, कुलस्य भूमिम्-उत्तमादिरूपामवस्थां ज्ञात्वा 'मितां भूमिं' तैरनुज्ञातां पराक्रमेत्, यत्रेषामप्रीतिर्नोपजायत इति सूत्रार्थः ॥

*मू.(१००) तत्थेव पडिलेहिज्जा, भूमिआगं विअक्खणो।*
*सिणाणस्स य वच्चस्स, संलोगं परिवज्जए॥*

**वृ.** विधिशेषमाह-'तत्थेव'त्ति सूत्रं, 'तत्रैव' तस्यामेव मितायां भूमौ प्रत्युपेक्षेत सूत्रोक्तेन विधिना 'भूमिभागम्' उचितं भूमिदेशं 'विचक्षणो' विद्वान, अनेन केवलागीतार्थस्य भिक्षाटनप्रतिषेधमाह, तत्र च तिष्ठन् स्नानस्य तथा 'वर्चसो' विष्ठायाः संलोकं परिवर्जयेत्, एतदुक्तं भवति-स्नानभूमिकायिकादिभूमिसंदर्शनं परिहरेत्, प्रवचनलाघवप्रसङ्गात्, अप्रावृतस्त्रीदर्शनाच्च रागादिभावादिति सूत्रार्थः ॥

*मू.(१०१) दगमट्टिअआयाणे, बीआणि हरिआणि अ।*
*परिवज्जंतो चिट्ठिज्जा, सव्विंदिअसमाहिए॥*

**वृ.** किंच-'दग'त्ति सूत्रम्, 'उदकमृत्तिकादानम्' आदीयतेऽनेनेत्यादानो-मार्गः, उदकमृतिकानयनमार्गमित्यर्थः, 'बीजानि' शाल्यादीनि 'हरितानि च' दूर्वादीनि, चशब्दादन्यानि च सचेतनानि परिवर्जयंस्तिष्ठेदनन्तरोदिते देशे 'सर्वेन्द्रियसमाहितः' शब्दादिभिरनाक्षिप्तचित्त इति सूत्रार्थः ॥

*मू.(१०२) तत्थ से चिट्ठमाणस्स, आहरे पानभोअणं।*
*अकप्पिअं न गेण्हिज्जा, पडिगाहिज्ज कप्पिअं॥*

**वृ.** 'तत्थ'त्ति सूत्रं, 'तत्र' कुलोचितभूमौ 'से' तस्य साधोस्तिष्ठतः सतः 'आहरेद्' नयेत्पानभोजनं, गृहीति गम्यते, तत्रायं विधिः-'अकल्पिकम्' अनेषणीयं न गृह्णीयात्, प्रतिगृह्णी-यात् 'कल्पिकम्' एषणीयम्, एतच्चार्थापन्नमपि कल्पिकग्रहणं द्रव्यतः शोभनमशोभनमप्येतद-विशेषेण ग्राह्यमिति दर्शनार्थं साक्षादुक्तमिति सूत्रार्थः ॥

*मू.(१०३) आहरंती सिआ तत्थ, परिसाडिज्ज भोअणं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

**वृ.** 'आहरंति'त्ति सूत्रम्, 'आहरन्ती' आनयन्ती भिक्षामगारीति गम्येत 'स्यात्' कदाचित् 'तत्र' देशे 'परिशाटयेद्' इतश्चेतश्च विक्षिपेद् भोजनं वा पानं वा, ततः किमित्याह-ददतीं 'प्रत्याचक्षीत' प्रतिषधयेत्तामगारीं, स्त्र्येय प्रायो भिक्षां ददातीति स्त्रीग्रहणं, कथं प्रत्याचक्षीतेत्यत आह-न मम-कल्पते तादृशं-परिशाटनावत्, समयोक्तोदोषप्रसङ्गात्, दोषांश्च भावं ज्ञात्वा कथयेद् मधुबिन्दूदाहरणादिनेति सूत्रार्थः ॥

*मू.(१०४) संमद्दमाणी पाणाणि, बीआणी हरिआणी अ।*
*असंजमकरिं नच्चा, तारिसिं परिवज्जए॥*

**वृ.** किंच-'संमद्द'त्ति सूत्रं, 'संमर्दयन्ती' पद्भ्यां समाक्रामन्ती, कानित्याह-'प्राणनो' द्वीन्द्रियादीन् 'बीजानि' शालिबीजादीनि 'हरितानि' दूर्वादीनि 'असंयमकरी' साधुनिमित्तमसंयम-करणशीलां ज्ञात्वा तादृशीं परिवर्जयेत्, ददतीं प्रत्याचक्षीत इती सूत्रार्थः ॥

*मू.(१०५) साहट्टु निक्खिवित्ता नं, सचित्त घट्टियाणि य।*

*तहेव समणट्ठाए, उदगं संपणुल्लिया॥*

**वृ.** तथा 'साहट्टु'त्ति सूत्रं, संहत्यान्यस्मिन् भाजने ददाति, 'तं फासुगमवि वज्जए, तत्थ फासुए फासुयं साहरइ फासुए अफासुअं साहरइ अफासुए फासुयं साहरइ अफासुए अफासुअं साहरइ, तत्थ जं फासुअं फासुए साहरइ तत्थवि थेवे थेवं साहरइ थेवे बहुअं साहरइ बहुए थेवं साहरइ बहुए बहुअं साहरइ। एवमादि यथा पिण्डनिर्युक्तौ। तथा निक्षिप्य भाजनगतमदेयं षट्सु जीवनिकायेषु ददाति, 'सचित्तम्' अलातपुष्पादि 'घट्टयित्वा' संचाल्य च ददाति तथैव 'श्रमणार्थं' प्रव्रजितनिमित्तमुदकं 'संप्रणुद्य' भाजनस्थं प्रेर्य ददातीति सूत्रार्थः॥

**मू. ( १०६ )** *ओगाहइत्ता चलइत्ता, आहरे पानभोअणं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

**वृ.** 'ओगाहइत्ता' सूत्रं, तथा च 'अवगाह्य' उदकमेवात्माभिमुखकाकृष्य ददाति तथा चालयित्वा उदकमेव ददाति, उदके नियमादनन्तवनस्पतिरिति प्राधान्यख्यापनार्थं सचित्तं घट्टयित्वेत्युक्तेऽपि भेदेनोपादानम्, अस्ति चायं न्यायो-यदुत सामान्यग्रहणेऽपि प्राधान्य-ख्यापनार्थं भेदेनोपादानं, यथा-ब्राह्मणा आयाता वशिष्ठोऽप्यायात इति, ततश्चोदकं चालयित्वा 'आहरेत्' आनीय दद्यादित्यर्थः, किं तदित्याह-'पानभोजनम्' ओदनारनालादि तदित्थंभूतां ददतीं 'प्रत्याचक्षीत' निराकुर्यात् न मम कल्पते तादृशमिति पूर्ववदेवेति सूत्रद्वयार्थः॥

**मू. ( १०७ )** *पुरेकम्मेण हत्थेण, दव्वीए भायणेन वा।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

**वृ.** 'पुरेकम्मे'त्ति सूत्रं, पुरःकर्मणा हस्तेन-साधुनिमित्तं प्राक्कृतजलोज्झनव्यापारेण, तथा 'दर्व्या डोवसदृशया 'भाजनेन वा' कांस्यभाजनादिना ददतीं 'प्रत्याचक्षीत' प्रतिषेधयेत्, न मम कल्पते तादृशमिति पूर्वदेवेति सूत्रार्थः॥

**मू. ( १०८ )** *एवं उदउल्ले ससिणिद्धे, ससरक्खे मट्टिआउसे।*
*हरिआले हिंगुलए, मनोसिला अंजने लोणे॥*

**वृ.** 'एवं'ति सूत्रम्, 'एवम्' उदकार्द्रेण 'हस्तेन' करेण, उदकार्द्रो नाम गलदुदकबिन्दुयुक्तः, एवं सस्निग्धेन हस्तेन, सस्निग्धो नाम ईषदुदकयुक्तः, एवं 'सरजस्केन हस्तेन' सरजस्को नाम-पृथिवीरजोगुण्डितः, एवं 'मृद्गतेन हस्तेन' मृद्गतो नाम-कर्दमयुक्तः, एवमूषादिष्वपि योजनीयम्, एतावन्ति एव एतानि सूत्राणि, नवरमूषः-पांशुक्षारः, हरितालहिङ्गकमनः-शिला-पार्थिवा वर्णकभेदाः, अञ्जनं-रसाञ्जनादि लवणं-सामुद्रादि॥

**मू. ( १०९ )** *गेरुअवन्निअसेढिअसोरट्ठिअपिट्ठ कुक्कुसकए य।*
*उक्किट्ठमसंसट्ठे, संसट्ठे चेव बोद्धव्वे॥*

**वृ.** तथा 'गेरुअ'त्ति सूत्रं, गैरिका-धातुः, वर्णिकापीतमृत्तिका, श्वेतिका-शुक्लमृत्तिका, सौराष्ट्रिका-तुवरिका, पिष्टम्-आमतण्डुलक्षोदः, कुक्कुसाः प्रतीताः, 'कृतेनेति' एभिः कृतेन, हस्तेनेति गम्यते, तथोत्कृष्ट इति उत्कृष्टशब्देन कालिङ्गालाबुत्रपुषफलादीनां शस्त्रकृतानि श्लक्ष्णखण्डानि भण्यन्ते, चिञ्चिणिकादिपत्रसमुदायो वा उद्खलकण्डित इति, तथा असंसृष्टोव्यञ्जनादिना अलिप्तः संसृष्टश्चैव व्यञ्जनादिलिप्तो बोद्धव्यो हस्त इति, विधिं पुनरत्रोर्द्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यति स्वयमेवेति सूत्रार्थ: ॥

*मू. ( ११० ) असंसट्टेण हत्थेण, दव्वीए भायणेन वा।*
*दिज्जमाणंन इच्छिज्जा, पच्छाकम्मं जहिं भवे ॥*

**वृ**. आह च-'असंसट्टेण' त्ति सूत्रम्, असंसृष्टेन हस्तेन-अन्नादिभिरलिप्तेन दर्व्या भाजनेन वा दीयमानं नेच्छेत्, किं सामान्येन ?, नेत्याह-पश्चात्कर्म भवति 'यत्र' दध्यादौ, शुष्कमण्डकादिवत् तदन्यदोषरहितं गृह्णीयादिति सूत्रार्थ: ॥

*मू. ( १११ ) संसट्टेण य हत्थेण, दव्वीए भायणेन वा।*
*दिज्जमाणं पडिच्छिज्जा, जं तत्थेसणियं भवे ॥*

**वृ**. 'संसट्टेण' त्ति सूत्रं, संसृष्टेन हस्तेन-अन्नादिलिप्तेन, तथा दर्व्या भाजनेन दा दीयमानं 'प्रतीच्छेद्' गृह्णीयात्, किं सामान्येन ? नेत्याह-यत्तत्रैषणीयं भवति, तदन्यदोषरहित-मित्यर्थ:, इह च वृद्धसंप्रदाय:-संसट्ठे हत्थे संसट्ठे मत्ते सावसेसे दव्वे, संसट्ठे हत्थे संसट्ठे मत्ते णिरवसेसे दव्वे, एवं अट्ठ भंगा, एत्थ पढमभंगो सव्वुत्तमो, अन्नेऽवि जत्थ सावसेसं दव्वं तत्थ धिप्पइ, न इयरेसु, पच्छाकम्मदोसाउ त्ति सूत्रार्थ: ॥ किंच

*मू. ( ११२ ) दुण्हं तु भुंजमाणाणं, एगो तत्थ निमंतए।*
*दिज्जमाणं न इच्छिज्जा, छंदं से पडिलेहए।*

**वृ**. 'दुण्हं'ति सूत्रं, 'द्वयोर्भुञ्जतो:' पालनां कुर्वतो:, एकस्य वस्तुन: स्वामिनोरित्यर्थ:, एकस्तत्र 'निमत्रयेत्' तद्दानं प्रत्यामत्रयेत्, तद्दीयमानं नेच्छेदुत्सर्गत:, अपितु 'छन्दम्' अभिप्रायं 'से' तस्य द्वितीयस्य प्रत्युपेक्षेत नेत्रवक्रादिविकारै:, किमस्येदमिष्टं दीयमानं नवेति, इष्टं चेद्गृह्णीयान्न चेन्नैवेति, एवं भुञ्जानयो:-अभ्यवहारायोद्यतयोरपि योजनीयं, यतो भुजि: पालनेऽभ्यवहारे च वर्तत इति सूत्रार्थ : ॥

*मू. ( ११३ ) दुण्हं तु भुंजमाणाणं, दोऽवि तत्थ निमंतए।*
*दिज्जमाणं पडिच्छिज्जा जं तत्थेसणियं भवे ॥*

**वृ**.ततो 'दुण्हं'ति सूत्रं द्वयोस्तु पूर्ववत् भुञ्जतोर्भुञ्जानयोर्वा द्वावपि तत्रातिप्रसादेन निमत्रयेयातां, तत्रायं विधि:-दीयमानं 'प्रतीच्छेद' गृह्णीयात् यत्ततैषणीयं भवेत्, तदन्यदोषरहितमिति सूत्रार्थ : ॥

*मू. ( ११४ ) गुव्विणीए उवन्नत्थं, विविहं पानभोअणं।*
*भुंजमाणं विविज्जिज्जा, भुत्तसेसं पडिच्छए ॥*

**वृ**. विशेषमाह-'गुव्विणीए' त्ति सूत्रं, 'गुर्विण्या' गर्भवत्या 'उपन्यस्तम्' उपकल्पितं, किं तदित्याह-'विविधम्' अनेकप्रकारं 'पानभोजनं' द्राक्षापानखण्डस्वाद्यकादि, तत्र भुज्यमानं तया विवर्ज्यं, मा भूत्तस्या अल्पत्वेनाभिलाषानिवृत्त्या गर्भपतनादिदोष इति, 'भुक्तशेषं' भुक्तोद्धरितं प्रतीच्छेत्, यत्र तस्या निवृत्तोऽभिलाष इति सूत्रार्थ :॥

*मू. ( ११५ ) सिआ य समणट्ठाए, गुव्विणी कालमासिणी।*
*उट्ठिआ वा निसीइज्जा, निसन्ना वा पुणुट्ठए।*

**वृ**. किंच-'सिआ य' त्ति सूत्रं, 'स्याच्च' कदाचिच्च 'श्रमणार्थं' साधुनिमित्तं 'गुर्विणी'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्ता 'कालमासवती' गर्भाधानान्नवममासवतीत्यर्थः, उत्थिता वा यथाकथञ्चिन्निषिदेद् निषण्णा ददामीति साधुनिमित्तं, निषण्णा वा स्वव्यापारेण पुनरुत्तिष्ठेद् ददामीति साधुनिमित्तमेवेति सूत्रार्थः ॥

*मू. ( ११६ ) तं भवे भत्तपानं तु, संजयाण अकप्पिअं ।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तं भवे' त्ति सूत्रं, तद्भवेद्भक्तपानं तु तथा निषीदनोत्थानाभ्यां दीयमानं संयतानामकल्पिकम्, इह च स्थविरकल्पिकानामनिषीदनोत्थानाभ्यां यथावस्थितया दीयमानं कल्पिकं, जिनकल्पिकानां त्वापन्नसत्त्वया प्रथमदिवसादारभ्य सर्वथा दीयमानमकल्पिकमेवेति सम्प्रदायः, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमित्येतत्पूर्ववदेवेति सूत्रार्थः ॥

*मू. ( ११७ ) थणगं पिज्जेमाणी, दारगं वा कुमारिअं ।*
*तं निक्खिवित्तु रोअंतं, आहरे पानभोअणं ॥*

वृ. किं च-'थणगं'ति सूत्रं, स्तनं(न्यं) पाययन्ती, किमित्याह-दारकं वा कुमारिकां, वाशब्दस्य व्यवहितः संबन्धः, अत एव नपुंसकं वा, तद्दारकादि निक्षिप्य रुदद्भूम्यादौ आहरेत्पानभोजनम्, अत्रायं वृद्धसंप्रदायः गच्छवासी जइ थणजीवी पिअंतो निक्खित्तो तो न गिण्हंति, रोवउ वा मा वा, अह अन्नंपि आहारेइ तो जति ज रोवइ तो गिण्हंति, अह रोवइ तो न गिण्हंति, अह अपिअंतो निक्खित्तो थणजीवी रोवइ तओ न गिण्हंति, अह न रोवइ तो गिण्हंति, गच्छणिग्गया पुण जाव थणजीवी ताव रोवउ वा मा वा पिबंतओ(वा) अपिबंतओ वा न गिण्हंति, जाहे अन्नंपि आहारेउं आढत्तो भवति ताहे जइ पिबंतओ तो रोवउ वा मा वा न गेण्हंति, अह अपिबंतओ तो जइ रोवइ तो परिहरंति, अरोविए गेण्हंति, सीसो आह-को तत्थ दोसोऽत्थि ?, आयरिओ भणइतस्स णिक्खिप्पमाणस्स खरेहिं हत्थेहिं धिप्पमाणस्स अथिरत्तणेण परितावणादोसा मज्जारादि वा अवहरेज्ज त्ति सूत्रार्थ : ॥

*मू. ( ११८ ) तं भवे भत्तपानं तु, संजयाण अकप्पिअं ।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तं भवे' त्ति सूत्रं, तद्भवेद्भक्तपान त्वनन्तरोदितं संयतानामकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः ॥

*मू. ( ११९ ) जं भवे भत्तपानं तु, कप्पाकप्पंमि संकिअं ।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. किं बहुनेति, उपदेशसर्वस्वमाह-'जं भवे'त्ति सूत्रं, यद्भवेद्भक्तपानं तु 'कल्पाकल्पयोः' कल्पनीयाकल्पनीयधर्मविषय इत्यर्थः, किम् ?-'शङ्कितं' न विद्मः किमिदमुद्गमादिदोषयुक्तं किंवा नेत्याशङ्कास्पदीभूतं, तदित्थंभूतमसति कल्पनीयनिश्चये ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः ॥

*मू. ( १२० ) दगवारेण पिहिअं, नीसाए पीढएण वा*
*लोढेण वावि लेवेण, सिलेसेणवि केणइ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. किं च -'दगवारेण'त्ति सूत्रं, 'दकवारेण' उदककुम्भेन 'पिहितं' भाजनस्यं सन्तं स्थगितं, तथा 'नीसाए'त्ति पेषण्या, 'पीठकेन वा' काष्ठापीठादिना, 'लोढेन वापि' शिला-पुत्रकेण, तथा 'लेपेन' मृल्लेपनादिना 'श्लेपेण वा' केनचिज्जतुसिक्थादिनेति सूत्रार्थः।

*मू. (१११) तं च उब्भिदिआ दिज्जा, समणट्ठाए व दावए।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

वृ. 'तं च' त्ति सूत्रं, 'तच्च' स्थगितं लिप्तं वा सत् उद्‌भिद्य दद्याच्छ्रमणार्थं दायकः, नात्माद्यर्थं, तदित्थंभूतं ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः॥

*मू. (१२२) असनं पानगं वावि, खाइमं साइमं तहा।*
*जं जाणिज्ज सुणिज्जा वा, दाणट्ठा पगडं इमं॥*

*मू. (१२३) तारिसं भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

वृ. किं च-'असनं'ति सूत्रं, अशनं पानकं वापि खाद्यं स्वाद्यम्, 'अशनम्' ओदनादि 'पानकं' च आरनालादि, 'खाद्यं' लड्डुकादि, 'स्वाद्यं' हरीनक्यादि, यज्जानीयादामन्त्र-णादिना, शृणुयाद्वा अन्यतः, यथा दानार्थं प्रकृतमिदं, दानार्थं प्रकृतं नाम-साधुवादनिमित्तं यो ददात्यव्यापारपाखण्डिभ्यो देशान्तरोदेरागतो वणिक्प्रभृतिरिति सूत्रार्थः॥

*मू. (१२४) असनं पानगं वावि, खाइमं साइमं तहा।*
*जं जाणिज्ज सुणिज्जा वा, पुण्णट्ठा पगडं इमं॥*

वृ.'तारिसं'ति सूत्रं, तादृशं भक्तपानं दानार्थं प्रवृत्तव्यापारं संयतानामकलिपकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः॥

*मू. (१२५) तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

वृ.'असणं'ति सूत्रम्, एवं पुण्यार्थं, पुण्यार्थं प्रकृतं नाम-साधुवादानङ्गीकरणेन यत्पुण्यार्थं कृतमिति। अत्राह-पुण्यार्थप्रकृतपरित्यागे शिष्यकुलेषु वस्तुतो भिक्षाया अग्रहणमेव, शिष्टानां पुण्यार्थमेव पाकप्रवृत्तेः, तथाहि-न पितृकर्मादिव्यपोहेनात्मार्थमेव क्षुद्रसत्त्ववत्प्रवर्तन्ते शिष्टा इति, नैतदेवम्, अभिप्रायापरिज्ञानात्, स्वभोग्यातिरिक्तस्य देवस्यैव पुण्यार्थकृतस्य निषेधात्, स्वभृत्यभोगस्य पुनरुचितप्रमाणस्येत्वरयदृच्छादेयस्य कुशलप्रणिधानकृतस्याप्यनिषेधादिति, एतेनाऽदेयदानाभावः प्रत्युक्तः, देयस्वैव यदृच्छादानानुपपत्तेः, कदाचिदपि वा दाने यदृच्छा-दानोपपत्तेः, तथा व्यवहारदर्शनात्, अनीदृशस्यैव प्रतिषेधात्, तदारम्भदोषेण योगात्, यदृच्छादाने तु तदभावेऽप्यारम्भप्रवृत्तेः नासौ तदर्थ इत्यारम्भदोषायोगात्, दृश्यते च कदाचित्सूतकादाविव सर्वेभ्य एव प्रदानविकला शिष्टभिमतानामपि पाकप्रवृत्तिरिति, विहितानुष्ठानत्वाच्च तथा-विधग्रहणान्न दोष इत्यलं प्रसङ्गेन, अक्षरगमनिकामात्रफलत्वात्प्रयासस्येति॥

*मू. (१२६) असनं पानगं वावि, खाइमं, साइमं तहा।*
*जं जाणिज्ज सुणिज्जा वा, वणिमट्ठा पगडं इमं॥*

वृ. 'तं भवे' त्ति सूत्रं, प्रतिषेधः पूर्ववत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( १२७ ) *तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआक्खे, न मे कप्पइ तारिसं॥*

वृ. 'असनं'ति सूत्रं, एवं वनीपकार्थं वनीपकाः-कृपणाः॥

मू. ( १२८ ) *असनं पानगं वावि, खाइमं साइमं तहा।*
*जं जाणिज्ज सुणिज्जा वा, समणट्ठा पगडं इम॥*

वृ. 'तं भवे'त्ति सूत्रं, प्रतिषेधः पूर्ववत्॥

मू. ( १२९ ) *तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

वृ. 'असनं'ति सूत्रं, एवं श्रमणार्थं, श्रमणा-निर्ग्रन्थाः शाक्यादयः
'तं भवे'त्ति सूत्रं, प्रतिषेधः पूर्ववत्॥

मू. ( १३० ) *उद्देसिअं कीअगडं, पूइकम्मं च आहडं।*
*अज्झोअर पामिच्चं, मीसजायं विवज्जए॥*

वृ. किंच- 'उद्देसिअं'ति सूत्रं, उद्दिश्य कृतमौद्देशिकम्-उद्दिष्टकृतकर्मादिभेदं, क्रीतकृतं-द्रव्य-भावक्रयक्रीतभेदं पूतिकर्म-संभाव्यमानाधाकर्मावयसंमिश्रलक्षमण्, आहृतं-स्वग्रामाहृतादि, तथा अध्यवपूरकं-स्वार्थमूलाद्दहणप्रक्षेपरूपं, प्रामित्यं-साध्वर्थमुच्छिद्य दानलक्षणं, मिश्रजातं च-आदित एव गृहिसंयतमिश्रोपस्कृतरूपं, वर्जयेदिति सूत्रार्थः॥

मू. ( १३१ ) *उग्गमं से अ पुच्छिज्जा, कस्सट्ठा केन वा कडं?।*
*सुच्चा निस्संकिअं सुद्धं, पडिगाहिज्ज संजए॥*

वृ. संशयव्यपोहायोपायमाह- 'उग्गमं' ति सूत्रं, 'उद्गमं' तत्प्रसूतिरूपम् 'से' तस्य शङ्कित-स्याशनादेः 'पृच्छेत्' तत्स्वामिनं कर्मकरं वा, यथा-कस्यार्थमेतत् केन वा कृतमिति, श्रुत्वा तद्वचो न भवदर्थं किं त्वन्यार्थमित्येवंभूतं निःशङ्कितं 'शुद्धं' सद्दजुत्वादिभावगत्या प्रतिगृह्णीयात्संयतो, विपर्ययग्रहणे दोषादिति सूत्रार्थः॥

मू. ( १३२ ) *असनं पानगं वावि, खाइमं साइमं तहा।*
*पुप्फेसु हुज्ज उम्मीसं, बीएसु हरिएसु वा॥*

वृ. तथा 'असनं'ति सूत्रं, अशनं पानकं वापि खाद्यं खाद्यं तथा 'पुष्पैः' जातिपाटलादिभिः भवेदुन्मिश्रं, बीजैर्हरितैर्वेति सूत्रार्थः॥

मू. ( १३३ ) *तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

वृ. 'तारिसं'ति सूत्रं, तादृशं भक्तपानं तु संयतानमकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः॥

मू. ( १३४ ) *असनं पानगं वावि, खाइमं साइमं तहा।*
*उदगंमि हुज्ज निक्खित्तं, उत्तिगपणगेसु वा॥*

वृ. तथा 'असनं'ति सूत्रं, अशनं पानकं वापि खाद्यं स्वाद्यं तथा, उदके भवेन्निक्षिप्तमुत्तिं-गपनकेषु वा कीटिकानगरोल्लीषु वेत्यर्थः, उदयनिक्खित्तं दुविहंअनंतरं परंपरं च, अनंतरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवनीतपोग्गलियमादि, परोप्परं जलघडोवरिभायणत्थं दधिमादि, एवं उत्तिगपणएसु भावनीयमिति सूत्रार्थः ॥

*मू. ( १३५ ) तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तं भवे'त्ति सूत्रं, तद्भवेतद्भक्तपान तु संयतानामकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते ताद्दशमिति सूत्रार्थः ॥

*मू. ( १३६ ) असनं पानगं वावि, खाइमं साइमं तहा।*
*तेउम्मि हुज्ज निक्खित्तं, तं च संघट्टिआ दए ॥*

वृ. तथा 'असनं'ति सूत्रं, अशनं पानकं वापि खाद्यं स्वाद्यं तथा, तेजसि भवेन्निक्षिप्तं, 'तेजसि भवेन्निक्षिप्तं, 'तेजसि' इत्यग्नौ तेजस्काय इत्यर्थः, तच्च संघट्टय, यावद्भिक्षां ददामि तावत्तापातिशयेन मा भूदुद्वर्तिष्यत इत्याघट्टय दद्यादिति सूत्रार्थः ॥

*मू. ( १३७ ) तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तं भवे'त्ति सूत्रं, तद्भवेद्भक्तपान तु संयतानामकल्पिकमतो ददतीं प्रत्याचक्षीत न मम कल्पते ताद्दशमिति सूत्रार्थः ॥

*मू. ( १३८ ) एवं उस्सक्किया, ओसक्किया, उज्जवालिया, पज्जालिआ,*
*निव्वाविया, उस्सिंचिया, निस्सिंचिया, उववत्तिया, ओयारिया दए।*

वृ. एवं 'उस्सक्किय'त्ति यावद्भिक्षां ददामि तावन्मा भूद्विध्यास्यतीत्युत्सिच्य दद्याद्, एवं 'ओसक्किया' अवसर्प्य अतिदाहभयादुल्मुकान्युत्सार्येत्यर्थः, एवं 'उज्जालिया पज्जालिया' 'उज्जवाल्य' अर्धविध्यातं सकृदिन्धनप्रक्षेपेण, 'प्रज्वाल्य' पुनः पुनः। एवं 'निव्वाविया' निर्वाप्य दाहभयादेवेति भावः, एवं उस्सिचिया निस्सिचिया, 'उत्सिच्य' अति-भृतादुज्झनभयेत ततो वा दानार्थं तीमनादीनि, 'निषिच्य' तद्भाजनाद्रहितं द्रव्यमन्यत्र भाजने तेन दद्यात्, उद्वर्तनभयेन वाऽऽद्रहितमुदकेन निषिच्य, एवं 'ओवत्तिया ओयारिया', 'अपवर्त्य' तेनैवाग्निनिक्षिप्तेन भाजनेनान्येन वा दद्यात्, तथा 'अवतार्य' दाहभयाद्दानार्थं वा दद्यात्, अत्र तदन्यश्च साधुनिमित्तयोगे न कल्पते ॥

*मू. ( १३९ ) तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तं भवे' त्ति सूत्रं पूर्ववत् ॥

*मू. ( १४० ) हुज्ज कट्ठं सिलं वावि, इट्टालं वावि एगया।*
*ठविअं संकमट्ठाए, तं च होज्ज चलाचलं ॥*

वृ. गोचराधिकारा एव गोचरप्रविष्टस्य 'होज्ज'त्ति सूत्रं, भवेत् काष्ठं शिला वापि इट्टालं वाऽपि 'एकदा' एकस्मिन् काले प्रावृडादौ स्थापितं संक्रमार्थं, तच्च भवेत्, 'चलाचलम्' अप्रतिष्ठितं, न तु स्थिरमेवेति सूत्रार्थः ॥

*मू. ( १४१ ) न तेन भिक्खू गच्छिज्जा, दिट्ठो तत्थ असंजमो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गंभीरं झुसिरं चेव, सव्विंदिअसमाहिए ॥*

वृ. 'न तेन'त्ति सूत्रं, न 'तेन' काष्ठादिना भिक्षुर्गच्छेत्, किमिति ?, अत्राहदृष्टस्तत्रासंयमः, तच्चलने प्राण्युपमर्दसंभवात्, तथा 'गम्भीरम्' अप्रकाशं 'शषीरं चैव' अन्तःसाररहितम्, 'सर्वेन्द्रियसमाहितः' शब्दादिषु रागद्वेषावगच्छन्, परिहरेदिति सूत्रार्थः ॥

*मू. ( १४२ ) निस्सेणिं फलगं पीढं, उस्सवित्ता नमारुहे ।*
*मंचं कीलं च पासायं, समणट्ठा एव दावए ॥*

वृ. किं च -'निस्सेणिं' ति सूत्रं, निश्रेणिं फलकं पीठम् 'उस्सवित्ता' उत्सृत्य ऊध्र्वं कृत्वा इत्यर्थः, आरोहेन्मञ्चं कीलकं च उत्सृत्य कमारोहेदित्याह-प्रासादं, 'श्रमणार्थं' साधुनिमित्तं दायको' दाता आरोहेत्, एतदप्यग्राह्यमिति सूत्रार्थः ॥

*मू. ( १४३ ) दुरूहमाणी पवडिज्जा, हत्थं पायं व लूसए ।*
*पुढविजीवे विहिंसिज्जा, जे अ तन्निस्सिया जगे ॥*

वृ. अत्रैव दोषमाह-'दुरूहमाणि'त्ति सूत्रं, आरोहन्ती प्रपेतत्, प्रपतन्ती च हस्तं पादं वा 'लूषयेत्' स्वकं स्वत एव खण्डयेत्, तथा पृथ्वीजीवान् विहिंस्यात्, कथंचित्तत्रस्थान्, तथा यानि च तन्निश्रितानि 'जगन्ति' प्राणिनस्तांश्च हिंस्यादिति सूत्रार्थः ॥

*मू. ( १४४ ) एआरिसे महादोसे, जाणिऊण महेसिणो ।*
*तम्हा मालोहडं भिक्खं, न पडिगिण्हंति संजया ॥*

वृ. 'एआरिसे'त्ति सूत्रं, 'ईदृशान्' अनन्तरोदितरूपान्महादोषान् ज्ञात्वा 'महर्षयः' साधवः । 'हंदि मालोहडं' ति, हन्दीत्युपप्रदर्शन इति सूत्रार्थः ॥

*मू. ( १४५ ) कंदं मूलं पलंबं वा, आमं छिन्नं व सन्निरं ।*
*तुंबागं सिंगबेरं च, आमगं परिवज्जए ॥*

वृ. प्रतिषेधाधिकार एवाह-'कंदं मूलं'ति सूत्रं, 'कन्दं' सूरणादिलक्षणम् 'मूलं' विदारिकारूपम् 'प्रलम्ब वा' तालफलादि, आमं छिन्न वा 'सन्निरम्' सन्निरमिति पत्रशाकम्, 'तुम्बाकं' त्वग्मिजान्तर्वर्ति आर्द्रां वा तुलसीमित्यन्ये, 'शृङ्गबेरं' चार्द्रकम्, आमं परिवर्जयेदिति सूत्रार्थः ॥

*मू. ( १४६ ) तहेव सत्तुचुन्नाइं, कोलचुन्नाइं आवणे ।*
*सक्कुलिं फाणिअं पूअं, अन्न वावि तहाविहं ॥*

वृ. 'तहेव' त्ति सूत्रं, तथैव 'सक्तुचूर्णान्' सक्तून् 'कोलचूर्णान्' बदरसक्तून् 'आपणे' वीथ्यां, तथा 'शुष्कुलीं' तिलपर्पटिकां 'फाणितं' द्रवगुडं 'पूयं' कणिकादिमयम्, अन्यद्वा तथाविधं मोदकादि ॥

*मू. ( १४७ ) विक्कायमाणं पसढं, रएणं परिफासिअं ।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. किमित्याह-'विक्कायमाणं' ति सूत्रं, विक्रीयमाणमापणे इति वर्तते, 'प्रसह्य' अनेकदिवसस्थापनेन प्रकट्म, अत एव 'रजसा' पार्थिवेन 'परिस्पृष्टं' व्याप्तं, तदित्थम्भूतं तत्र ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रद्वयार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (१४८) बहुअट्ठियं पुग्गलं, अनिमित्त वा बहुकंटयं।*
*अच्छियं तिंदुयं बिल्लं, उच्छुखंडं व सिंबलिं॥*

**वृ.** किंच-'बहुअट्ठियं'ति सूत्रं, बह्वस्थि 'पुद्गलं' मांसम् 'अनिमिषं वा' मत्स्यं वा बहुकण्टकम्, अयं किल कालाद्यपेक्षया ग्रहणे प्रतिषेधः, अन्ये त्वभिदधति-वनस्पत्यधिकारात्तथाविधफलाभिधाने एते इति, तथा चाह-'अत्थिकं' अस्थिकवृक्षफलम्, 'तेंदुकं' तेंदुरुकीफलम्, बिल्वम् इक्षुखण्डमिति च प्रतीते, 'शाल्मलिं वा' वल्लादिफलिं वा, वाशब्दस्य व्यवहितः संबन्ध इति सूत्रार्थः॥

*मू. (१४९) अप्पे सिआ भोअणज्जाए, बहुउज्झियधम्मियं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं॥*

**वृ.** अत्रैव दोषमाह-'अप्पे'त्ति सूत्रं, अल्पंस्याद्भोजनजातमत्र, अपि तु बहूज्झनधर्मकमेतत्, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः॥

*मू. (१५०) तहेवुच्चावयं पानं, अदुवा वारधोअणं।*
*संसेइमं चाउलोदगं, अहुणाधोयं विवज्जए॥*

**वृ.** उक्तोऽशनविधिः, साम्प्रतं पानविधिमाह-'तहेव'त्ति सूत्रं, तथैव यथाशनमुच्चावचं तथा पानम् 'उच्चं' वर्णाद्युपेतं द्राक्षापानादि 'अवचं' वर्णादिहीनं पूत्यारनालादि अथवा 'वारकधावनं' गुडघटधावनमित्यर्थः, 'संस्वेदजं' पिष्टोदकादि, एतदशनवदुत्सर्गापवादाभ्यां गृह्णीयादिति वाक्यशेषः, 'तन्दुलोदकम्' अट्टिकरकं 'अधुनाधौतम्' अपरिणतं विवर्जयेदिति सूत्रार्थः॥

*मू. (१५१) जं जाणेज्ज चिराधोयं, मईए दंसणेन वा।*
*पडिपुच्छिऊण सुच्चा वा, जं च निस्संकिअं भवे॥*

**वृ.** अत्रैव विधिमाह-'जं जाणिज्ज'त्ति सूत्रं, यत्तन्दुलोदकं 'जानीयात्' विद्याच्चिरधौतम्, कथं जानीयादित्यत आह-मत्वा दर्शनेन वा, 'मत्या' तद्ग्रहणादिकर्मजया 'दर्शनेन वा' वर्णादिपरिणतसूत्रानुसारेण च, वा चशब्दार्थः, तदप्येवंभूतं कियती वेलाऽस्य धौतस्येति पृष्ट्वा गृहस्थं, 'श्रुत्वा वा' महती वेलेति श्रुत्वा च प्रतिवचनं 'यच्चे'ति यदेव निःशङ्कितं भवति निरवयवप्रशान्ततया तन्दुलोदकं तत्प्रतिगृह्णीयादिति, विशेषः पिण्डनिर्युक्तावुक्त इति सूत्रार्थः॥

*मू. (१५२) अजीवं परिणयं नच्चा, पडिगाहिज्ज संजए।*
*अह संकियं भविज्जा, आसाइत्ताण रोअए॥*

**वृ.** उष्णोदकादिविधिमाह-'अजीवं'ति सूत्रं, उष्णोदकमजीवं परिणतं 'ज्ञात्वा' त्रिदण्डपरिवर्तनादिरूपं मत्या दर्शनेन वेत्यादि वर्तते, तदित्थंभूतं प्रतिगृह्णीयात्संयतः, चतुर्थरसमपूत्यादि देहोपकारकं मत्यादिना ज्ञात्वेत्यर्थः, अथ शङ्कितं भवेत् तत आस्वाद्य 'रोचयेद्' विनिश्चयं कुर्यादिति सूत्रार्थः॥

*मू. (१५३) थोवमासायणट्ठाए, हत्थगंमि दलाहि मे।*
*मा मे अच्चंबिलं पूअं, नालं तण्हं विनित्तए॥*

**वृ.** तच्चैवं-'थोवं'ति सूत्रं, स्तोकमास्वादनार्थं प्रथमं तावत् हस्ते देहि मे, यदि साधुप्रायोग्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो ग्रहीष्ये, मा मे अत्यम्लं पूति नालं तृडपनोदाय। ततः किमनेनानुपयोगिनेति सूत्रार्थः ॥

*मू. ( १५४ ) तं च अच्चंबिलं पूयं, नालं तण्ह विनित्ताए।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

**वृ.** 'तं चं'त्ति सूत्रं, 'तच्च' अत्यम्लादि भवेद् 'अकामेन' उपरोधशीलतया 'वीमनस्केन' अन्यचित्तेन 'प्रतीप्सितं' गृहतीम् तदात्मना कायापकारकमित्यनाभोगधर्म-श्रद्धया न पिबेत् नाप्यन्येभ्यो दापयेत्, रत्नाधिकेनापि स्वयं दानस्य प्रतिषेधज्ञापनार्थं दापनग्रहणम्, इह च 'सव्वत्थ संजमं संजमाओ अप्पानमेवे'त्यादि भावनयेति सूत्रार्थः ॥

*मू. ( १५५ ) तं च होज्ज अकामेण, विमणेणं पडिच्छिअं।*
*तं अप्पणा न पिबे, नोवि अन्नस्स दावए ॥*

**वृ.** अस्यैव विधिमाह-'एगंतं'ति सूत्रं, एकान्तम् 'अवक्रम्य' गत्वा 'अचित्तं' दग्धदेशादि प्रत्युपेक्ष्य चक्षुषा प्रमृज्य रजोहरणेन स्थण्डिलमिति गम्यते 'यतम्' अत्वरितंप्रतिष्ठापयेद्विधिना त्रिर्वाक्यपूर्वं व्युत्सृजेत्। प्रतिष्ठाप्य वसतिमागतः प्रतिक्रामेदीर्यापथिकाम्। एतच्च बहिरागतनियमकरणसिद्धं प्रतिक्रमणबहिरपि प्रतिष्ठाप्य प्रतिक्रमणनियमज्ञापनार्थम् सूत्रार्थः ॥

*मू. ( १५६ ) एगंतमवक्कमित्ता, अचित्तं पडिलेहिया।*
*जयं परिट्ठविज्जा, परिट्ठप्प पडिक्कमे ॥*

*मू. ( १५७ ) सिआ अ गोयरग्गगओ, इच्छिज्जा परिभुत्तुअं(भुंजिउं)।*
*कुट्ठगं भित्तिमूलं वा, पडिलेहित्ताण फासुअं ॥*

**वृ.** एवमत्रापानग्रहणविधिमभिधाय भोजनविधिमाह-'सिआ अ'त्ति सूत्रं, 'स्यात्' कदाचिद् 'गोचराग्रगतो' ग्रामान्तरं भिक्षां प्रविष्ट इच्छेत्परिभक्तु पानादि पिपासाद्यभिभूतः सन्, तत्र साधुवसत्यभावे 'कोष्टकं' शून्यचट्टमठादि 'भित्तिमूलं वा' कुड्यैकदेशादि, प्रत्युपेक्ष्य चक्षुषा प्रमृज्य च रजोहरणेन 'प्रासुकं' बीजादिरहितं चेति सूत्रार्थः ॥

*मू. ( १५८ ) अणुन्नवित्तु मेहावी, पडिच्छन्नंमि संवुडे।*
*हत्थगं संपमज्जिता, तत्थ भुंजिज्ज संजए ॥*

**वृ.** तत्र 'अणुन्नवि'त्ति सूत्रं, 'अनुज्ञाप्य' सागारिकपरिहारतो विश्रमणव्याजेन तत्स्वामिनमवग्रह 'मेधावी' साधुः 'प्रतिच्छन्ने' तत्र कोष्ठकादौ 'संवृत्त' उपयुक्तः साधुरीर्याप्रतिक्रमणं कृत्वा तदनु 'हस्तकं' मुखवस्त्रिकारूपम्, आदायेति वाक्यशेषः, संप्रमृज्य विधिना तेन कायं तत्र भुञ्जीत 'संयतो' रागद्वेषावपाकृत्येति सूत्रार्थः ॥

*मू. ( १५९ ) तत्थ से भुंजमाणस्स, अट्ठिअं कंटओ सिआ।*
*तणकट्ठसक्करं वावि, अन्नं वावि तहाविहं ॥*

**वृ.** 'तत्थ'त्ति सूत्रं, 'तत्र' कोष्ठकादौ 'से' तस्य साधोर्भुञ्जानस्य अस्थि कण्टको वा स्यात्, कथंद्गृचिद्गृहिणां प्रमाददोषात्, कारणगृहीते पुद्गल एवेत्यन्ये, तृणकाष्ठशर्करादि चापि स्यात्, उचितभोजनेऽन्यद्वापि तथाविधं बदरकर्कटकादीति सूत्रार्थः ॥

*मू. ( १६० ) तं उक्खिवित्तु न निक्खवे, आसएण न छड्डए।*
*हत्थेण तं गहेऊण, एगंतमवक्कमे ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'तं उक्खिवित्तु' इति सूत्रं, 'तद्' अस्थ्यादि उत्क्षिप्य हस्तेन यत्र क्वचिन्न निक्षिपेत्, तथा 'आस्येन' मुखेन नोज्झेत्, मा भूद्विराधनेति, अपितु हस्तेन गृहीत्वा 'तद्' अस्थ्यादि एकान्तमवक्रामेदिति सूत्रार्थः ॥

**मू. (१६१)** *एगंतमवक्कमित्ता, अचित्तं पडिलेहिआ।*
*जयं परिट्ठविज्जा, परिट्ठप्प पडिक्कमे ॥*

**वृ.** 'एगंत'त्ति सूत्रं, एकान्तमवक्रम्य अचित्तं प्रत्युपेक्ष्य यतं प्रतिष्ठापयेत्, प्रतिष्ठाप्य प्रतिक्रामेदिति, भावार्थः पूर्ववदेवेति सूत्रार्थः ॥

**मू. (१६२)** *सिआ य भिक्खू इच्छिज्जा, सिज्जमागम्म भुत्तुअं।*
*सपिंडपायमागम्म, उंडुअं पडिलेहिआ ॥*

**वृ.** वसतिमधिकृत्य भोजनविधिमाह-'सिआ य'त्ति सूत्रं, 'स्यात्' कदाचित् तदन्यकारणभावे सति भिक्षुरिच्छेत् 'शय्यां' वसतिमागम्य परिभोक्तुं, तत्रायं विधिः-सह पिण्डपातेन-विशुद्धसमुदानेनागम्य, वसतिमिति गम्यते, तत्र बहिरेवोन्दुकं-स्थानं प्रत्युपेक्ष्य विधिना तत्रस्थः पिण्डपातं विशोधयेदिति सूत्रार्थः ॥

**मू. (१६३)** *विनएणं पविसित्ता, सगासे गुरुणो मुनी।*
*इरियावहियमायाव, आगओ अ पडिक्कमे ॥*

**वृ.** तत ऊर्ध्वं 'विनएण'त्ति सूत्रं, विशोध्य पिण्डं बहिः 'विनयेन' नैषधिकीनमःक्षमा-श्रमणेभ्योऽञ्जलिकरणलक्षणेन प्रविश्य, वसतिमिति गम्यते, सकाशे गुरोः मुनिः, गुरुसमीप इत्यर्थः, 'ईर्यापथिकामादाय' "इच्छामी पडिक्कमिउं इरियावहियाए" इत्यादि पठित्वा सूत्रं, आगतश्च गुरुसमीपं प्रतिक्रामेत्-कायोत्सर्गं कुर्यादिति सूत्रार्थः ॥

**मू. (१६४)** *आभोइत्ताण नीसेसं, अईआरं जहक्कमं।*
*गमनागमने चेव, भत्तपाने व संजए।*

**वृ.** 'आभोइत्ताण'त्ति सूत्रं, तत्र कायोत्सर्गे 'आभोगयित्वा' ज्ञात्वा निःशेषमतिचारं 'यथाक्रमं' परिपाट्य, केत्याह-'गमनागमनयोश्चैव' गमने गच्छत आगमन आगच्छतो योऽतिचारः तथा 'भक्तपानयोश्च' भक्ते पाने च योऽतिचारः तं 'संयतः' साधुः कायोत्सर्गस्थो हृदये स्थाप-येदिति सूत्रार्थः ॥

**मू. (१६५)** *उज्जुप्पन्नो अनुव्विग्गो, अव्वक्खित्तेन चेअसा।*
*आलोए गुरुसगासे, जं जहा गहिअं भवे ॥*

**वृ.** विधिनोत्सारिते चैतसिमन् 'उज्जुप्पन्नं'त्ति सूत्रं, 'ऋजुप्रज्ञः' अकुटिलमतिः सर्वत्र 'अनुद्विग्नः' क्षुदादिजयात्प्रशान्तः अव्याक्षिप्तेन चेतसा, अन्यत्रोपयोगमगच्छतेत्यर्थः, आलोच-येद्गुरुसकाशे, गुरोर्निवेदयदिति भावः, 'यद्' अशनादि 'यथा' येन प्रकारेण हस्तदा(घाव) नादिना गृहीतं भवेदिति सूत्रार्थः ॥

**मू. (१६६)** *न सम्ममालोइअं हुज्जा, पुव्विं पच्छा व जं कडं।*
*पुणो पडिक्कमे तस्स, वोसट्ठो चिंतए इमं ॥*

**वृ.** तदनु च 'न संमं'ति सूत्रं, न सम्यगालोचित्तं भवेत् सूक्ष्मम् अज्ञानात्-अनाभोगेनानु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मरणाद्वा, पूर्वं पश्चाद्वा यत्कृतं, पुरःकर्म पश्चात्कर्म वेत्यर्थः, 'पुनः' आलोचनोत्तर-कालं प्रतिक्रामेत् 'तस्य' सूक्ष्मातिचारस्य 'इच्छामि पडिक्कमिउं गोअरचरिआए, इत्यादि सूत्रं पठित्वा 'व्युत्सृष्टः' कायोत्सर्गस्थश्चिन्तयेदिदं-वक्ष्यमाणलक्षणमिति सूत्रार्थः ॥

*मू. ( १६७ ) अहो जिनेहिं असावज्जा, वित्ती साहूण देसिआ ।*
*मुक्खसाहणहेउस्स, साहुदेहस्स धारणा ॥*

**वृ.** 'अहो जिनेहिं' सूत्रं, 'अहो' विस्मये 'जिनैः' तीर्थकरैः 'असावद्या' अपापा 'वृत्तिः' वर्त्तना साधूनां दर्शिता देशिता वा 'मोक्षसाधनहेतोः' सम्यग्दर्शनज्ञानचारित्रसाधनस्य साधुदेहस्य 'धारणय' संधारणार्थमिति सूत्रार्थः ॥

*मू. ( १६८ ) नमुक्कारेण पारित्ता, करित्ता जिनसंथवं ।*
*सज्झायं पट्ठवित्ता णं, वीसमेज्ज खणं मुनी ॥*

**वृ.** ततश्च-'नमोक्कारेण' त्ति सूत्रं, नमस्कारेण पारयित्वा 'नमो अरिहंताण' मित्यनेन, कृत्वा जिनसंस्तवं "लोगस्सुज्जोअगरे" इत्यादिरूपं, ततो न यदि पूर्वं प्रस्थापितस्ततः स्वाध्यायं प्रस्थाप्य मण्डल्युपजीवकस्तमेव कुर्यात् यावदन्य आगच्छन्ति, यः पुनस्तदन्यः क्षपकादिः सोऽपि प्रस्थाप्य विश्राम्येत् 'क्षणं' स्तोककालं मुनिरिति सूत्रार्थः ॥

*मू. ( १६९ ) वीसमंतो इमं चिंते, हियमट्ठं लाभमस्सिओ ।*
*जइ मे अनुग्गहं कुज्जा, साहू हुज्जामि तारिओ ॥*

**वृ.** 'वीसमंति' त्ति सूत्रं, विश्राम्यन्निदं चिन्तयेत् परिणतेन चेतसा, कल्याणप्रापकमर्थं-वक्ष्यमाणं, किंविशिष्टः सन्?-भावलाभेन-निर्जरादिनाऽर्थोऽस्येति लाभार्थिकः, यदि 'मे' मम अनुग्रहं कुर्युः साधवः प्रासुकपिण्डग्रहणेन ततः स्यामहं तारितो भवसमुद्रादिति सूत्रार्थः ॥

*मू. ( १७० ) साहवो तो चिअत्तेणं, निमंतिज्ज जहक्कमं ।*
*जइ तत्थ केइ इच्छिज्जा, तेहिं सद्धिं तु भुंजए ॥*

**वृ.** एवं संचिन्त्योचितवेलायामाचार्यमामन्त्रयेद्, यदि गृह्णाति शोभनं, तो चेद्वक्तव्योऽसौ भगवन्! देहि केभ्योऽप्यतो यद्दातव्यं, ततो यदि ददाति सुन्दरम्, अथ भणति त्वमेव प्रयच्छ, अत्रान्तरे-'साहवो' त्ति सूत्रं, साधूंस्ततो गुर्वनुज्ञातः सन् 'चिअत्तेणं' ति मनः-प्रणिधानेन निमन्त्र-येत् 'यथाक्रमं' यथारत्नाधिकतया, ग्रहणौचित्यापेक्षया बालादिक्रमेणेत्यन्ये, यदि तत्र 'केचन' धर्मबान्धवाः 'इच्छेयुः' अभ्युपगच्छेयुस्ततस्तैः सार्धं भुञ्जीत उचितसंविभाग-दानेनेति सूत्रार्थः॥

*मू. ( १७१ ) अह कोइ न इच्छिज्जा, तओ भुंजिज्ज एक्कओ ।*
*आलोए भायणे साहू, जयं अप्परिसाडियं ॥*

**वृ.** 'अह कोइ' त्ति सूत्रं, अथ कश्चिन्नेच्छेत् साधुस्ततो भुञ्जीत 'एकको' रागादिरहित इति, कथं भुञ्जीतेत्यत्राह-'आलोके भाजने' मक्षिकाद्यपोहाय प्रकाशप्रधाने भाजन इत्यर्थः 'साधुः' प्रव्रजितः 'यतं' प्रयत्नेन तत्रोपयुक्तः 'अपरिशाटं' हस्तमुखाभ्यामनुज्झन् इति सूत्रार्थः ॥

*मू. ( १७२ ) तित्तगं व कडुअं व कसायं, अंबिलं व महुरं लवणं वा ।*
*एअलद्धमन्नत्थ पउत्तं, महंघयं व भुंजिज्ज संजए ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. भोज्यमधिकृत्य विशेषमाह- 'तित्तगं व'त्ति सूत्रं, तिक्तकं वा एलुकवालुङ्कादि, कटुकं वा आर्द्रकतीमनादि, कषयां वल्लादि, अम्लं तक्रारनालादि, मधुरं क्षीरमध्वादि, लवणं वा प्रकृतिक्षारं तथाविधं शाकादि लवणोत्कटं वाऽन्यत्, एतत्तिक्तादि 'लब्धम्' आगमोक्तेन विधिना प्राप्तम् 'अन्यार्थम्' अक्षोपाङ्गन्यायेन परमार्थतो मोक्षार्थं प्रयुक्तं तत्साधकमितिकृत्वा मधुघृत-मिव च भुञ्जीत संयतः, न वर्णाद्यर्थम्, अथवा मधृघृतमिव 'नो वामाओ हणुआओ दाहिणं हणुअं संचारेज्ज'त्ति सूत्रार्थः ॥

*मू. ( १७३ ) अरसं विरसं वावि, सूइअं वा असूइअं।*
*उल्लं वा जइवा सुक्कं, मंथुकुम्मासभोअणं ॥*

वृ. किंच- 'अरसं'ति सूत्रं, अरसम्-असंप्राप्तरसं हिंग्वादिभिरसंस्कृतमित्यर्थः, 'विरसं वापि' विगतरसमतिपुराणौदनादि 'सूचितं' व्यञ्जनादियुक्तम् 'असूचितं वा' तद्रहितं वा, कथयित्वा अकथयित्वा वा दत्तमित्यन्ये, 'आर्द्रं' प्रचुरव्यञ्जनम्, यदिवा शुष्कं स्तोकव्यञ्जनं वा, किं तदित्याह- 'मन्थुकुल्मापभोजनं' मन्थु-बदरचूर्णादि कुल्माषाः-सिद्धमाषाः, यत्रमाषा इत्यन्ये इति सूत्रार्थः ॥

*मू. ( १७४ ) उप्पन्नं नाइहीलिज्जा, अप्पं वा बहु फासुअं।*
*मुहालद्धं मुहावीजी, भुंजिज्जा दोसवज्जिअं ॥*

वृ. एतद्भोजनं किमित्याह- 'उप्पन्नं'ति सूत्रं, 'उत्पन्नं' विधिना प्राप्तं 'नातिहीलयेत्' सर्वथा न निन्देत्, अल्पमेतन्न देहपूरकमिति किमनेन ?, बहु वा असारप्रायमिति, वाशब्दस्य व्यवहितः संबन्धः, किंविशिष्टं तदित्याह- 'प्रासुकं' प्रगतासु निर्जीवमत्यिर्थः, अन्ये तु व्याचक्षते- अल्पं वा, वाशब्दाद्विरसादि वा, बहुप्रासुकं-सर्वथा शुद्धं नातिहीलयेदिति, अपि त्वेवं भावयेत्-यदेवेह लोका ममानुपकारिणः प्रयच्छन्ति तदेव शोभनमिति। एवं 'मुधालब्धं' कोण्टलादिव्यतिरेकेण प्राप्तं 'मुधाजीवी' सर्वथा अनिदानजीवी, जात्याद्यनाजीवक इत्यन्ते, भुञ्जीत 'दोपवर्जितं' संयोजनादिरहितमिति सूत्रार्थः ॥

*मू. ( १७५ ) दुल्लहा उ मुहादाई, मुहाजीवीवि दुल्लहा।*
*मुहादाई मुहाजीवी, दोऽवि गच्छंति सुग्गइं ॥ त्ति बेमि।*

वृ. एतद्दुरापमिति दर्शयति- 'दुल्लह'त्ति, दुर्लभा एव मुधादातारः, तथाविधभागवतवत्, मुधाजीविनोऽपि दुर्लभाः, तथाविधचेल्लकवत्। अमीषां फलमाह-मुधादातारो मुधाजीवि-नश्च द्वावप्येतौ गच्छतः 'सुगतिं' सिद्धिगतिं कदाचिदनन्तरमेव कदाचिद्देवलोकसुमा-नुषप्रत्यागमनपरम्परया। ब्रवीमीति पूर्ववत्।

अत्र भागवतोदाहरणम्-जहा एगो परिव्वायगो सो एगं भागवयं उवट्ठिओ, अहं तव गिहे वरिसारत्तं करेमि, मम उदंतं वहाहि, तेन भणिओ-जइ मम उदंतं न वहसि, एवं हवउ त्ति। सो से भागवओ सेज्जभत्तपानादिणा उदंतं वहति। अन्नया य तस्स घोडओ चोरेहिं हिओ, अति-प्पभायंतिकाऊण जालीए बद्धो, सो अ परिव्वायगो तलाए ण्हायओ गओ, तेन सो घोडओ दिट्ठो, आगंतुं भणइ-मम पाणीयतडे पोत्ती विस्सरिया, गोहो विसज्जिओ, तेन घोडओ दिट्ठो, आगंतुं कहियं, तेन भागवएण नायं, जहा-परिव्वायगेण कहियं। तेन परिव्वायगो भण्णत्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाहि, नाहं तव निव्विट्ठं उदंतं वहामि, णिव्विट्ठं अप्पफलं भवति। एरिसो मुधादाई।

मुधाजीविंमी उदाहरणं-एक्को राया धम्मं परिक्खई, को धम्मो ?, जो अनिव्विट्ठं भुंजइ त्ति, तो तं परिक्खामित्ति काऊण मणुस्सा संदिट्ठा, राया मोदए देइ, तत्थ बहवे कप्पडियादयो आगया, पुच्छिज्जंति-तुम्हे केण भुंजह ?, अन्नो भणइ-अहं मुहेण भुंजामि, अन्नो-अहं पाएहिं, अन्नो-अहं हत्थेहिं, अन्नो-अहं लोगानुग्गहेण, चेल्लगो भणइ-अहं मुहियाए। रन्ना पुच्छिअं-कहं चिअ ?, एगेण कहिअं-अहं कहगो अओ मुहेण, अन्नेन भणिअं-अहं लेहवाहगो अओ पाएहिं, अन्नेन भणिअं-अहं लेहगो अओ हत्थेहिं, भिक्खुणा भणिअं-अहं पव्वओ अओ लोगाणुग्गहेण, चेल्लएण भणिअं-अहं संजायसंसाराविरागो अओ मुहियाए, ताहे सो राया एस धम्मोत्तिकाऊण आयरियसमीवं गओ, पडिबुद्धो पव्वइओ य। एसो मुहाजीवित्ति सूत्रार्थः ॥

अध्ययनं ५ उद्देशकः-१ समाप्तः

## अध्ययनं-५ उद्देशकः-२

*मू. ( १७६ ) पडिग्गहं संलिहित्ता नं, लेवमायाए संजए।*
*दुगंधं वा सुगंधं वा, सव्वं भुंजे न छड्डए ॥*

वृ. पिण्डैषणायाः प्रथमोद्दशके प्रक्रान्तोपयोगि यन्नोक्तं तदाह-'पडिग्गहं'ति सूत्रं, 'प्रतिग्रहं' भाजनं 'संलिख्य' प्रदेशिन्या निरवयवं कृत्वा, कथमित्याह-'लेपमर्यादया' अलेपं संलिह्य 'संयतः' साधुः दुर्गन्धि वा सुगन्धि वा भोजनजातं, गन्धग्रहणं रसाद्युपलक्षणं, 'सर्वं' निरवशेषं 'भुञ्जीत' अश्नीयात् 'नोज्झेत्' नोत्सृजेत् किञ्चिदपि, मा भूत्संयमविराधना। अस्यैवार्थस्य गरीयस्त्वख्यापनाय सूत्रार्थयोर्व्यत्ययोपन्यासः, प्रतिग्रहशब्दो माङ्गलिक इत्युद्देशादौ तदुपन्यासार्थं वा, अन्यथैवं स्यात्-दुर्गन्धि वा सुगन्धि वा, सर्वं भुञ्जीत नोज्झेत्। प्रतिग्रहं संलिह्य लेपमर्यादया संयतः। विचित्रा च सूत्रगतिरिति सूत्रार्थः ॥

*मू. ( १७७ ) सेज्जा निसीहियाए, समावन्नो अ गोअरे।*
*अयावयट्ठा भुच्चा नं जइ तेनं न संथरे।*

वृ. विधिविशेषमाह-'सेज्ज'त्ति सूत्रं, 'शय्यायां' वसतौ 'नैषेधिक्यां' स्वाध्यायभूमौ, शय्यैव वाऽसमञ्जसनिषेधान्नैषेधिकि तस्यां समापन्नो वा गोचरे, क्षपकादिः छन्नमठादौ आयावदर्थं भुक्त्वा न यावदर्थम्-अपरिसमाप्तमित्यर्थः, नमिति वाक्यालङ्कारे। यदि तेन भुक्तेन 'न संस्तरेत्' न यापयितुं समर्थः, क्षपको विषमवेलापत्तनस्थो ग्लानो वेति सूत्रार्थः ॥

*मू. ( १७८ ) तओ कारणमुप्पन्ने, भत्तपानं गवेसए।*
*विहिणा पुव्वउत्तेणं, इमेणं उत्तरेण य ॥*

वृ. तओ'ति सूत्रं ततः कारणे वेदनादावुत्पन्ने पुष्टालम्बनः सन् भक्तपानं 'गवेषयेद्' अन्विष्येत्, अन्यथा सकृद्भुक्तमेव यतीनामिति 'विधिना' पूर्वोक्तेन संप्राप्ते भिक्षाकाल इत्यादिना, अनेन च वक्ष्यमाणलक्षणेनोत्तरेण चेति सूत्रार्थः ॥

*मू. ( १७९ ) कालेण निक्खमे भिक्खू, कालेन य पडिक्कमे।*
*अकालं च विवज्जित्ता, काले कालं समायरे ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'कालेनं'ति सूत्रं, यो यस्मिन् ग्रामादावुचितो भिक्षाकालस्तेन करणभूतेन 'निष्क्रामेद्' भिक्षुर्वसतेर्भिक्षायै, कालेन चोचितेनैव यावता स्वाध्यायादि निष्पद्यते तावता 'प्रतिक्रामेत्' निवर्तेत। भणिअं च-खेत्तं कालो भायणं तिन्निवि पहुप्पहंति हिंडउत्ति अट्ठ भंगा। 'अकालं च वर्जयित्वा' येन स्वाध्यायादि न संभाव्यते स खल्वकालस्तमपास्य काले कालं समाचारेदिति सर्वयोगोपसंग्रहार्थं निगमनं, भिक्षावेलायां भिक्षां समाचारेत्, स्वाध्यायादिवेलायां स्वाध्याया-दीनीति, उक्त च-'जोगो जोगो जिनसासणंमी'त्यादि, इति सूत्रार्थः ॥

*मू. (१८०) अकाले चरसी भिक्खू, कालं न पडिलेहसि।*
*अप्पाणं च किलामेसि, संनिवेसं च गरिहसि ॥*

वृ. अकालचरणे दोषमाह-'अकाले'त्ति सूत्र, अकालचारी कश्चित् साधुरलब्धभैक्षः केनचित्त साधुना प्राप्ता भिक्षा नवेत्यभिहितः सन्नेवं ब्रूयात्-कुतोऽत्र स्थण्डिलसंनिवेशे भिक्षा ?, स तेनोच्यते-अकाले चरसि भिक्षो ! प्रमादात्स्वाध्यायलोभाद्वा, कालं न प्रत्युपेक्षसे, किमयं भिक्षाकालो नवेति, अकालचरणेनात्मानं च ग्लपयसि दीर्घाटनन्यूनोदरभावेन, संनिवेशं च गर्हसि भगवदाज्ञालोपते दैन्यं प्रतिपद्येति सूत्रार्थः ॥

*मू. (१८१) सइ काले चरे भिक्खू, कुज्जा पुरिसकारिअं।*
*अलाभुत्ति न सोइज्जा, तवुत्ति अहिआसए ॥*

वृ. यस्मादयं दोषः संभाव्यते तस्मादकालाटनं न कुर्यादिति। 'सति'त्ति सूत्रं, 'सति' विद्यमाने 'काले' भिक्षासमये चरेद्भिक्षुः, अन्ये तु व्याचक्षते-स्मृतिकाल एव भिक्षा-कालोऽभिधीयते, स्मर्यन्ते यत्र भिक्षाकाः स स्मृतिकालस्तस्मिन्, 'चरेद्भिक्षुः' भिक्षार्थं या-यात्, कुर्यात् पुरुषकारं, जङ्घाबले सति वीर्याचारं न लङ्घयेत्। तत्र चालाभेऽपि भिक्षाया अलाभ इति न शोचयेद्, वीर्याचाराराधनस्य निष्पन्नत्वात्, तदर्थं च भिक्षाटनं नाहारर्थमेवातो न शोचेत्, अपितु तप इत्यधिसहेत, अनशनन्यूदोरतालक्षणं तपो भविष्यतीति सम्यग्विचिन्तये-दिति सूत्रार्थः ॥

*मू. (१८२) तहेवुच्चावया पाणा, भत्तट्ठाए समागया।*
*तं उज्जुअं न गच्छिज्जा, जयमेव परक्कमे ॥*

वृ. उक्ता कालयतना, अधुना क्षेत्रयतनामाह-'तहेव'त्ति, तथैव 'उच्चावचाः' शोभना-शोमनभेदेन नानाप्रकाराः प्राणिनो भक्तार्थं समागता बलिप्राभुतिकादिष्वागता भवन्ति, 'तद्दजुकं' तेषामभिमुखं न गच्छेत् तत्संत्रासनेनान्तरायाधिकरणादिदोषात्, किंतु यतमेव पराक्रामेत्, तदुद्वेगमनुत्पादयन्निति सूत्रार्थः ॥

*मू. (१८३) गोअरग्गपविट्ठो अ, न निसीइज्ज कत्थई।*
*कहं च न पबंधिज्जा, चिट्ठित्ता न व संजए ॥*

वृ. किं च 'गोअरग्ग'त्ति सूत्रं, गोचराग्रप्रविष्टस्तु भिक्षार्थं प्रविष्ट इत्यर्थः 'न निषीदेत्' नोपविशेत् 'क्वचिद्' गृहदेवकुलादौ, संयमोपघातादिप्रसङ्गात्, 'कथां च' धर्मकथादिरूपां 'न प्रबन्धीयात्' प्रबन्धेन न कुर्यात्, अनेनैकव्याकरणैकज्ञातानुज्ञामाह, अत एवाहस्थित्वा कालपरिग्रहेण संयत इति, अनेषणाद्वेषादिदोषप्रसंगादिति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( १८४ ) *अग्गलं फलिहं दारं, कवाडं वावि संजए।*
*अवलंबिआ न चिट्ठिज्जा, गोअरग्गगओ मुनी ॥*

वृ. उक्ता क्षेत्रयतना, द्रव्ययतनामाह-'अग्गलं'ति सूत्रं, 'अर्गलं' गोपुरकपाटादिसंबन्धिनं 'परिघं' नगरद्धारादिसंबन्धिनं 'द्वारं' शाखामयं 'कपाटं' द्वारयन्त्रं वाऽपि संयतः अवलम्ब्य न तिष्ठेत्, लाघवविराधनादोषात्, 'गोचराग्रगतो' भिक्षाप्रविष्टः, मुनिः संयत इति पर्यायौ तदुपदेशाधिकाराददुष्टावेवेति सूत्रार्थः ॥

मू. ( १८५ ) *समणं माहणं वावि, किविणं वा वणीमगं।*
*उवसंकमंतं भत्तट्ठा, पानट्ठाए व संजए ॥*

वृ. उक्ता द्रव्ययतना, भावयतनामाह-'समणं'त्ति सूत्रं, 'श्रमणं' निर्ग्रन्थादिरूपं, 'ब्राह्मणं' धिग्वर्णं वापि 'कृपणं वा' पिण्डलोकं 'वनीयकं' पञ्चा(नां वनीपका)नामप्यन्यतमम् 'उपसंक्रामन्तं' सामीप्येन गच्छन्तं गतं वा भक्तार्थं पानार्थं वा 'संयतः' साधुरिति सूत्रार्थः ॥

मू. ( १८६ ) *तमइक्कमित्तु न पविसे, नवि चिट्ठे चक्खुगोअरे।*
*एगंतमवक्कमित्ता, तत्थ चिट्ठिज्ज संजए ॥*

वृ. 'ते'मिति सूत्रं, 'तं' श्रमणादिम् 'अतिक्रम्य' उल्लङ्घ्य न प्रविशेत्, दीयमाने च समुदाने तेभ्यो न तिष्ठेच्चक्षुर्गोचरे। कस्तत्र विधिरित्याह-एकान्तमवक्रम्य तत्र तिष्ठेत् संयत इति।

मू. ( १८७ ) *वणीमगस्स वा तस्स, दायगस्सुभयस्स वा।*
*अप्पत्तिअं सिआ हुज्जा, लहुत्तं पवयणस्स वा ॥*

वृ. अन्यथैते दोषा इत्याह-'वणीमगस्स'त्ति सूत्रं, 'वनीपकस्य वा तस्ये'त्येतच्छ्रमणाद्युपलक्षणं, दातुर्वा उभयोर्वा अप्रीतिः कदाचित् स्यात्-अहो अलोकज्ञतैतेषामिति, लघुत्वं प्रवचनस्य वाऽन्तरायदोषश्चेति सूत्रार्थः ॥

मू. ( १८८ ) *पडिसेहिए व दिन्ने वा, तओ तम्मि नियतिए।*
*उवसंकभिज्ज भत्तट्ठा, पानट्ठाए व संजए ॥*

वृ. तस्मान्नैवं कुर्यात्, किंतु-'पडिसेहिअ'त्ति सूत्रं, प्रतिषिद्धे वा दत्ते वा 'ततः' स्थानात् 'तस्मिन्' वनीपकादौ निवर्त्तिते सति उपसंक्राभेद्भक्तार्थं वापि संयत इति सूत्रार्थः ॥

मू. ( १८९ ) *उप्पलं पउमं वावि, कुमुअं वा मगदंतिअं।*
*अन्नं वा पुप्फसच्चित्तं, तं च संलुचिआ दए ॥*

वृ. परपीडाप्रतिषेधाधिकारादिदमाह-'उप्पलं'ति सूत्रं, 'उत्पलं' नीलोत्पलादि 'पद्मम्' अरविन्दं वापि 'कुमुदं वा' गर्द्दभकं वा 'मगदन्तिकां' मेत्तिकां, मल्लिकामित्यन्ये, तथाऽन्यद्वा पुष्पं सचित्तं-शाल्मलीपुष्पादि, तच्च 'संलुञ्च्य' अपनीय छित्त्वा दद्यादिति सूत्रार्थः ॥

मू. ( १९० ) *तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

वृ. 'तारिसं'त्ति सूत्रं, तादृशं भक्तपानं तु संयतानामकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत न मम कल्पते तादृशमिति सूत्रार्थः ॥

मू. ( १९१ ) *उप्पलं पउमं वावि, कुमुअं वा मगदंतिअं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अन्नं वा पुप्फसच्चित्तं, तं च संमद्दिआ दए ॥*

**मू. ( १९२ )** *तं भवे भत्तपानं तु, संजयाण अकप्पिअं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

**वृ.**एवं तच्च संमृद्य दद्यात्, संमर्दनं नाम पूर्वच्छिन्नानामेवापरिणतानां मर्दनं, शेषं सूत्रद्वयेऽपि तुल्यम्। आह-एतत्पूर्वमप्युक्तमेव-'संमद्दमाणी पाणाणि हरिआणि अ' इत्यत्र, उच्यते, उक्तं सामान्येन विशेषभिधानाददोषः ॥

**मू. ( १९३ )** *सालुअं वा विरालिअं, कुमुअं उप्पलनालिअं।*
*मुणालिअं सासवनालिअं, उच्छुखंडं अनिव्वुडं ॥*

**वृ.** तथा 'सालुअं'ति सूत्रं, 'शालूकं वा' उत्पलकन्दं 'विरालिकां' पलाशकन्दरूपां, पर्ववल्लिप्रतिपर्ववल्लिप्रतिपर्वकन्दमित्यन्ये, कुमुदोत्पलनालौ प्रतीतौ, तथा 'मृणालिकां' पद्मिनीकन्दोत्थां, 'सर्षपनालिकां' सिद्धार्थकमञ्जरीं तथा इक्षुखण्डम् 'अनिर्वृतं' सचित्तम्। एतच्चानिर्वृतग्रहणं सर्वत्राभिसंबध्यत इति सूत्रार्थः ॥

**मू. ( १९४ )** *तरुणगं वा पवालं, रुक्खस्स तणगस्स वा।*
*अन्नस्स वावि हरिअस्स, आमगं परिवज्जए।*

**वृ.**किंच-'तरुणयं'ति सूत्रं, तरुणं वा 'प्रवालं' पल्लवं 'वृक्षस्य' चिञ्चिणिकादेः 'तृणस्य वा' मधुरतृणादेः अन्यस्य वापि हरितस्य आर्यकादेः 'आमम्' अपरिणतं परिवर्जयेदिति।

**मू. ( १९५ )** *तरुणिअं वा छिवाडिं, आमिअं भज्जिअं सइं।*
*दिंतिअं पडिआइक्खे, न मे कप्पइ तारिसं ॥*

**वृ.**तथा-'तरुणिअं'ति सूत्रं, 'तरुणां वा' असंजातां 'छिवाडि'मिति मुद्गादिफलिम् 'आमाम्' असिद्धां सचेतनां, तथा भर्जितां 'सकृद्' एकवारं, ददतीं प्रत्याचक्षीत न मम कल्पते तादृशं भोजनमिति सूत्रार्थः ॥

**मू. ( १९६ )** *तहा कोलमणुस्सिन्नं, वेलुअं कासवनालिअं।*
*तिलपप्पडगं नीमं, आमगं परिवज्जए ॥*

**वृ.**'तहा कोलं'ति सूत्रं, तथा 'कोलं' बदरम् 'अस्विन्नं' वह्न्युदकयोगेनानापादितविकारान्तरं, 'वेणुकं' वंशकरिल्लं 'कासवनालिअं' श्रीपर्णीफलम्, अस्विन्नमिति सर्वत्र योज्यं, तथा 'तिलपर्पटं' पिष्टतिलमयम् 'नीमं' नीमफलमामं परिवर्जयेदिति सूत्रार्थः ॥

**मू. ( १९७ )** *तहेव चाउलं पिट्ठं, विअडं वा तत्तऽनिव्वुडं।*
*तिलपिट्ठपूइपिन्नागं, आमगं परिवज्जए।*

**वृ.**'तहेव'त्ति सूत्रं, तथैव तान्दुल पिष्टं, लोट्टमित्यर्थः, विकटं वा-शुद्धोदकं तथा तप्तनिर्वृतं कथितं सत् शीतीभूतम्, तप्तानिर्वृतं वा-अप्रवृत्तत्रिदण्डं, तिलपिष्टं-तिललोट्टं, 'पूतिपिण्याकं' सर्षपस्वलमामं परिवर्जयेदिति सूत्रार्थः ॥

**मू. ( १९८ )** *कविट्ठं माउलिंगं च, मूलगं मूलगत्तिअं।*
*आमं असत्थपरिणयं, मणसावि न पत्थए।*

**वृ.** 'कविट्ठं'ति सूत्रं, 'कपित्थं' कपित्थफलं, 'मातुलिङ्गं च' बीजपूरकं, 'मूलकं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सपत्रजालकं 'मूलवर्त्तिकां' मूलकन्दचक्कलिम् 'आमाम्' अपक्कामशस्त्रपरिणतां स्वकायशस्त्रादिनाऽविध्वस्ताम्, अनन्तकायत्वाद्गुरुत्वख्यापनार्थमुभयं, मनसापि न प्रार्थयेदिति सूत्रार्थः ॥

*मू. (१९९) तहेव फलमंथूणि, बीअमंथूणि जाणिआ।*
*बिहेलगं पियालं च, आमगं परिवज्जए ॥*

**वृ.** 'तहेव'त्ति सुत्रं, तथैव 'फलमन्थून्' बदरचूर्णान्, बीजमन्थून्' यवादिचूर्णान् ज्ञात्वा प्रवचनतो 'बीभीतकं' बिभीतकफलं 'प्रियालं वा' प्रियालफलं च 'आमम्' अपरिणतं परिवर्जयेदिति सूत्रार्थः ॥

*मू. (२००) समुआणं चरे भिक्खू, कुलमुच्चावयं सया।*
*नीयं कुलमइक्कम, ऊसढं नाभिधारए ॥*

**वृ.** विधिमाह-'समुआणं'ति सूत्रं, समुदानं भावभैक्ष्यमाश्रित्य चरेद्भिक्षुः, केत्याह-कुलमुच्चावचं सदा, अगर्हितत्वे सति विभवाक्षया प्रधानमप्रधानं च, यथापरिपाट्यव चरेत् 'सदा' सर्वकालं, नीचं कुलमतिक्रम्य विभवापेक्षया प्रभूततरलाभार्थम् 'उत्सृतम्' ऋद्धिमत्कुलं 'नाभिधारयेत्' न यायात्, अभिष्वङ्गलोकलाघवादिप्रसङ्गादिति सूत्रार्थः ॥

*मू. (२०१) अदीनो वित्तिमेसिज्जा, न विसीइज्ज पंडिए।*
*अमुच्छिओ भोअणंमि, मायण्णे एसनारए ॥*

**वृ.** किंच-'अदीन'त्ति सूत्रं, 'अदीनो' द्रव्यदैन्यमङ्गीकृत्याम्लानवदनः 'वृत्तिं' वर्तनम् 'एषयेद्' गवेषयेत्, 'न विषीदेद्' अलाभे सति विषादं न कुर्यात् 'पण्डितः' साधुः 'अमूर्च्छितः' अगृद्धो भोजने, लाभे सति मात्राज्ञ आहारमात्रां प्रति 'एषणारतः' उद्गमोत्पादनैषणापक्षपाती।

*मू. (२०२) बहुं परघरे अत्थि, विविहं खाइमसाइमं।*
*न तत्थ पंडिओ कुप्पे, इच्छा दिज्ज परो न वा ॥*

**वृ.** एवं च भावयेत्-'बहुं'ति सूत्रं, 'बहु' प्रमाणतः प्रभूतं 'परगृहे' असंयतादिगृहेऽस्ति 'विविधन्' अनेकप्रकारं खाद्यं स्वाद्यम्, एतच्चाशनाद्युपलक्षणं, 'न तत्र पण्डितः कुप्येत्' सदपि न ददानीति न रोषं कुर्यात्, किंतु-'इच्छया दद्यात् परो न वे'ति इच्छा परस्य, न तत्रान्यत् किञ्चिदपि चिन्तयेद्, सामायिकबाधनादिति सूत्रार्थः ॥

*मू. (२०३) सयनासनवत्थं वा, भत्तं पानं व संजए।*
*अदितस्स न कुप्पिज्जा, पच्चक्खेवि अ दीसओ ॥*

**वृ.** एतदेव विशेषेणाह-'सयण'त्ति सूत्रं, शयनासनवस्त्र चेत्येकवद्भावः भक्तं पानं वा संयतोऽददतो न कुप्येत् तत्स्वामिनः, प्रत्यक्षेऽपि च दृश्यमाने शयनासनादाविति सूत्रार्थः॥

*मू. (२०४) इत्थिअं पुरिसं वावि, डहरं वा महल्लगं।*
*वंदमाणं न जाइज्जाअ, नो अ नं फरुसं वए ॥*

**वृ.** 'इत्थिअं'ति सूत्रं, स्त्रियं वा पुरुषं वापि, अपिशब्दात्तथविधं नपुंसकं वा, 'डहरं' तरुणं 'महल्लकं वा' वृद्धं वा, वाशब्दान्मध्यमं वा, वन्दमानं सन्तं भद्रकोऽयमिति न याचेत, विपरिणामदोषात्, अत्राद्यभावेन याचितादाने न चैनं परुषं ब्रूयात्-वृथा ते वन्दनमित्यादि पाठान्तरं वा-वन्दमानो न याचेत लल्लिव्याकरणेन। शेषं पूर्ववदिति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( २०५ )* *जे न वंदे न से कुप्पे, वंदिओ न समुक्कसे ।*
*एवमन्नेसमाणस्स, सामन्नमनुचिट्ठइ ॥*

**वृ.** तथा-'जे न वंदि'त्ति सूत्रं, यो न वन्दते कश्चिद्गृहस्थादिः न तस्मै कुप्यैत् तथा वन्दितः केनचिन्नृपादिना न समृत्कर्षेत् । 'एवम्' उक्तेन प्रकारेण 'अन्वेषमाणस्य' भगवदाज्ञामनु-पालयतः श्रामण्यमनुतिष्ठत्यखण्डमिति सूत्रार्थः ॥

*मू. ( २०६ )* *सिआ एगइओ लद्धुं, लोभेन विनिगूहइ ।*
*मामेयं दाइयं संतं, दट्ठूणं सयमायए ॥*

**वृ.** स्वपक्षस्तेयप्रतिषेधमाह-'सिअ'त्ति सूत्रं, 'स्यात्' कदाचिद् 'एकः' कश्चिदत्यन्तज-घन्यो लब्ध्वोत्कृष्टमाहारं, 'लोभेन' अभिष्वङ्गेण 'विनिगूहते' अहमेव भोक्ष्य इत्यन्तप्रान्ता-दिनाऽऽच्छादयति-किमित्यत आह-मा मम 'इदं' भोजनजातं दर्शितं सद्दृष्ट्वाऽऽचार्यादिः ''स्वयमादद्याद्' आत्मनैव गृह्णीयादिति सूत्रार्थः ॥

*मू. ( २०७ )* *अत्तट्ठा गुरुओ लुद्धो, बहुं पावं पकुव्वइ ।*
*दुत्तोसओ अ सो होइ, निव्वाणं च न गच्छइ ।*

**वृ.** अस्य दोषमाह-'अत्तट्ठ'त्ति सूत्रं, आत्मार्थ एव जघन्यो-गुरुः पापप्रधानो यस्य स आत्मार्थगुरुर्लुब्धः सन् क्षुद्रभोजने 'बहु' प्रभूतं पापं करोति, मायया दारिद्रं कर्मेत्यर्थः, अयं परलोकदोषः, इहलोकदोषमाह-'दुस्तोषश्च भवति' येन केनचिदाहारेणास्य क्षुद्रसत्त्वस्य तुष्टिः कर्तुं न शक्यते, अत एव 'निर्वाणं च न गच्छति' इहलोक एव धृतिं न लभते, अनन्त-संसारिकत्वाद्वा मोक्षं न गच्छतीति सूत्रार्थः ॥

*मू. ( २०८ )* *सिआ एगइओ लद्धुं, विविहं पानभोअणं ।*
*भद्दगं भद्दगं भुच्चा, विवन्नं विरसमाहरे ॥*

**वृ.** एवं यः प्रत्यक्षमपहरति स उक्तः, अधुना यः परोक्षमपहरति स उच्यते-'सिअ'त्ति सूत्रं, स्यादेको लब्ध्वेति पूर्ववत्, 'विविधम्' अनेकप्रकारं पानभोजनं भिक्षाचर्यागत एव 'भद्रकं भद्रकं' घृतपूर्णादि भुक्त्वा 'विवर्णं' विगतवर्णमाम्लखलादि 'विरसं' विगतरसं-शीतौदनादि 'आहरेद्' आनयेदिति सूत्रार्थः ॥

*मू. ( २०९ )* *जाणंतु ता इमे समणा, आययट्ठी अयं मुनी ।*
*संतुट्ठो सेवए पंतं, सूहवित्ती सुतोसओ ॥*

**वृ.** स किमर्थमेवं कुर्यादित्यत आह-'जाणंतु'त्ति सूत्रं, जानन्तु तावन्मां शेषसाधवो यथा 'आयतार्थी' मोक्षार्थी अयं 'मुनिः' साधुः 'संतुष्टो' लाभालाभयोः समः सेवते 'प्रान्तम्' असारं 'रूक्षवृत्तिः' संयमवृत्तिः' 'संतोष्यः' येन केनचित्तोषं नीयत इति सूत्रार्थः ॥

*मू. ( २१० )* *पूअणट्ठा जसोकामी, मानसम्मानकामए ।*
*बहुं पसवई पावं, मायासल्लं च कुव्वइ ॥*

**वृ.** एतदपि किमर्थमेवं कुर्यात्तत्राह-'पूअणट्ठ'त्ति सूत्रं, 'पूजार्थम्' एवं कुर्वतः स्वपक्ष-परपक्षाभ्यां सामान्येन पूजा भविष्यतीति 'यशस्कामी' अहो अयमिति प्रवादार्थं वा, तथा मानसन्मानकाम एवं कुर्यात्, तत्र वन्दनाभ्युत्थानलाभनिमित्तो मानः-वस्त्रपात्रादिलाभनिमित्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्मानः, स चैवंभूतः 'बहु' अतिप्रचुरं प्रधानसंक्लेशयोगात् 'प्रसूते' निर्वर्त्तयति पापं तद्गुरुत्वादेव सम्यगनालोचयन् 'मायाशल्यं च' भावशल्यं च करोतीति सूत्रार्थः ॥

*मू. (२११) सुरं वा मेरगं वावि, अन्नं वा मज्जगं रसं।*
*ससक्खं न पिबे भिक्खू, जसं सारक्खमप्पणो ॥*

**वृ.** प्रतिषेधान्तरमाह-'सुरं व'त्ति सूत्रं-'सुरां वा' पिष्टादिनिष्पन्नां, 'मेरकं वापि' प्रसन्नाख्यां, सुराप्रायोग्यद्रव्यनिष्पन्नमन्यं वा 'माद्यं रसं' सीध्वादिरूपं 'ससाक्षिकं' सदापरित्याग-साक्षिकेवलिप्रतिषिद्धं न पिबेद्भिक्षुः, अनेनात्यन्तिक एव तत्प्रतिषेधः, सदासाक्षिभावात्। किमिति न पिबेदित्याह-यशः संरक्षन्नात्मनः, यशःशब्देन संयमोऽभिधीयते, अन्ये तु ग्लाना-पवादविषयमेतत्सूत्रं अल्पसागारिकविधानेन व्याचक्षत इति सूत्रार्थः ॥

*मू. (२१२) पियए एगओ तेनो, न मे कोइ विआणइ।*
*तस्स पस्सइ दोसाई, निअडिं च सुणेह मे ॥*

**वृ.** अत्रैव दोषमाह-'पियए'त्ति सूत्रं, पिबति 'एको' धर्मसहायविप्रमुक्तोऽल्पसागारिक-स्थितो वा 'स्तेनः' चौरोऽसौ भगवददत्तग्रहणात् अन्यापदेशयाचनाद्वा न मां कश्चिज्जानातीति भावयन्, तस्येत्थंभूतस्य पश्यत दोषानैहिकान् पारलौकिकांश्च 'निकृतिं च' मायारूपां शृणुत ममेति सूत्रार्थः ॥

*मू. (२१३) वड्डई सुंडिआ तस्स, मायामोसं च भिक्खुणो।*
*अयसो अ अनिव्वाणं, सययं च असाहुआ ॥*

**वृ.** 'वड्डइ'त्ति सूत्रं, वर्धते 'शौण्डिका' तदत्यन्ताभिष्वङ्गरूपा तस्य माया मृषावादं चेत्येकवद्भावः प्रत्युपलब्धापलापेन वर्धते तस्य भिक्षोः, इदं च भवपरम्पराहेतुः, अनुबन्ध-दोषात्, तथा अयशश्च स्वपक्षपरपक्षयोः, तथा अनिर्वाणं तदलाभे सततं चासाधुता लोके व्यव-हारतः चरणपरिणामबाधनेन परमार्थत इति सूत्रार्थः ॥

*मू. (२१४) निच्चुव्विग्गो जहा तेनो, अत्तकम्मेहिं दुम्मई।*
*तारिसो मरणंतेवि, न आराहेइ संवरं ॥*

**वृ.** किंच-'निच्चुव्विग्गो'त्ति सूत्रं, स इत्थंभूतो 'नित्योद्विग्नः' सदाऽप्रशान्तो यथा 'स्तेनः' चौरः 'आत्मकर्मभिः' स्वदुश्चरितैः दुर्मतिः-दुष्टबुद्धिः 'तादृशः' क्लिष्टसत्त्वो 'मरणान्तेऽपि' चरमकालेऽपि नाराधयति 'संवरं' चारित्रं, सदैवाकुशलबुद्ध्या तद्बीजाभावादिति सूत्रार्थः ॥

*मू. (२१५) आयरिए नाराहेइ, समणे आवि तारिसे।*
*गिहत्थावि न गरिहंति, जेन जाणंति तारिसं।*

**वृ.** तथा-'आयरिए'त्ति सूत्रं, आचार्यान्नाराधयति, अशुद्धभावत्वात्-श्रमणांश्चापि तादृशान्नाराधयत्यशुभभावत्वादेव, गृहस्था अप्येनं दुष्टशीलं 'गर्हन्ते' कुत्सन्ति, किमिति?-येन जानन्ति 'तादृशं' दुष्टशीलमिति सूत्रार्थः ॥

*मू. (२१६) एवं तु अगुणप्पेही, गुणाणं च विवज्जए।*
*तारिसो मरणंतेऽवि, न आराहेइ संवरं ॥*

**वृ.** 'एवं तु'त्ति सूत्रं, 'एवं तु' उक्तेन प्रकारेण 'अगुणप्रेक्षी' अगुणान्-प्रमादादीन् प्रेक्षते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्छीलश्च य इत्यर्थः, तथा 'गुणानां च' अप्रमादादीनां स्वगतानामनासेवनेन परगतानां च प्रद्वेषेण 'विवर्जकः' त्यागी 'तादृशः' क्लिष्टचित्तो मरणान्तेऽपि नाराधयति 'संवरं' चारित्रमिति।

*मू. ( २१७ ) तवं कुव्वइ मेहावी, पणीअं वज्जए रसं।*
*मज्जप्पमायविरओ, तवस्सी अइउक्कसो ॥*

**वृ.** यतश्चैवमत एतद्दोषपरिहारेण 'तवं'ति सूत्रं, तपः करोति 'मेधावी' मर्यादावर्ती 'प्रणीतं' स्निग्धं वर्जयति 'रसं' धृतादिकं, न केवलमेतत्करोति, अपितु मद्यप्रमादविरतो, नास्ति क्लिष्ट-सत्त्वानामकृत्यमित्येवं प्रतिषेधः, 'तपस्वी' साधुः 'अत्युत्कर्षः' अहं तपस्वीत्युत्कर्षरहित इति सूत्रार्थः ॥

*मू. ( २१८ ) तस्स पस्सह कल्लाणं, अनेगसाहुपूइअं।*
*विउलं अत्थसंजुत्तं, कित्तइस्सं सुणेह मे ॥*

**वृ.** 'तस्स'त्ति सूत्रं, 'तस्य' इत्थंभूतस्य पश्यत 'कल्याणं' गुणसंपद्रूपं संयमं, किंविशिष्ट-मित्याह-अनेकसाधुपूजितं, पूजितमिति-सेवितमाचरितं, 'विपुलं' विस्तीर्णं विपुलमोक्षावह-त्वात्, 'अर्थसंयुक्तं' तुच्छतादिपरिहारेण निरुपमसुखरूपमोक्षसाधनत्वात् कीर्तयिष्येऽहं शृणुत 'मे' ममेति सूत्रार्थः ॥

*मू. ( २१९ ) एवं तु सगुणप्पेही, अगुणाणं च विवज्जए।*
*तारिसो मरणंतेऽवि, आराहेइ संवरं ॥*

**वृ.** 'एवं तु' उक्तेन प्रकारेण 'स' साधुः 'गुणप्रेक्षी' गुणान्अप्रमादादीन् प्रेक्षते तत्छीलश्च य इत्यर्थः, तथा 'अगुणानां च' प्रमादादीनां स्वगतानामनासेवनेन परगतानां चाननुमत्वा 'विवर्जकः' त्यागी 'तादृशः' शुद्धवृत्तो 'मरणान्तेऽपि' चरमकालेऽप्याराधयति 'संवरं' चारित्रं, सदैव कुशलबुद्धया तद्बीजपोषणादिति सूत्रार्थः ॥

*मू. ( २२० ) आयरिए आराहेइ, समणे आवि तारिसे।*
*गिहत्थावि न पूयंति, जेण जाणंति तारिसं ॥*

**वृ.** तथा 'आयरिए'त्ति सूत्रं, आचार्यानाराधयति, शुद्धभावत्वात्, श्रमणांश्चपि तादृश आराधयति, शुद्धभावत्वादेव, गृहस्था अपि शुद्धवृत्तमेनं पूजयन्ति, किमिति ?, येन जानन्ति 'तादृशं' शुद्धवृत्तमिति सूत्रार्थः ॥

*मू. ( २२१ ) तवतेने वयतेने, रूवतेने अ जे नरे।*
*आयारभावतेने अ, कुव्वई देवकिव्विसं ॥*

**वृ.** स्तेनाधीकार एवेदमाह-'तव'त्ति सूत्रं, तपस्तेनो वाक्स्तेनो रूपस्तेनस्तु यो नरः कश्चित् आचारभावस्तेनश्च, पालयन्नपि क्रियां तथाभावदोषाद्देवकिल्विषं करोति-किल्बिषिकं कर्म निर्वर्त्तयतीत्यर्थः, तपस्तेनो नाम क्षपकरूपकल्पः कश्चित् केनचित् पृष्टस्त्वमसौ क्षपक इति, स पूजाद्यर्थमाह-अहम्, अथवा वक्ति-साधव एव क्षपकाः तृष्णीं वाऽऽस्ते, एवं वाक्स्तेनो धर्मकथकादितुल्यरूपः कश्चित्केनचित् पृष्ट इति, एवं रूपस्तेनो राजपुत्रादितुल्य-रूपः एवमाचारस्तेनो विशिष्टाचारवत्तुल्यरूप इति, भावस्तेनस्तु परोत्प्रेक्षितं कथञ्चित् किञ्चित् श्रुत्वा स्वयमनुत्प्रेक्षितमपि मयैतत्प्रपञ्चेन चर्चितमित्याहेति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (२२२) लद्धूणवि देवत्तं, उववन्नो देवकिव्विसे।*
*तत्थावि से न याणाइ, किं मे किच्चा इमं फलं ? ॥*

**वृ.** अयं चेत्थंभूतः 'लद्धूण'त्ति सूत्रं, लब्ध्वापि देवत्वं तथाविधक्रियापालनवशेन उपपन्नो 'देवकिल्बिषे' देवकिल्बिषिका ये, तत्राप्यसौ न जानात्यविशुद्धावधिना, किं मम कृत्वा 'इदं फलं' किल्बिषिकदेवत्वमिति सूत्रार्थः ॥

*मू. (२२३) तत्तोवि से चइत्ताणं लब्भिही एलमूअयं।*
*नरगं तिरिक्खजोणिं वा, बोही जत्थ सुदुल्लहा ॥*

**वृ.** अत्रैव दोषान्तरमाह-'तत्तोवि'त्ति सूत्रं, 'ततोऽपि' देवलोकादसौ च्युत्वा लप्स्यते 'एलमूकताम्' अजाभाषानुकारित्वं मानुषत्वे, तथा नरकं तिर्यग्योनिं वा पारम्पर्येण लप्स्यते, 'बोधिर्यत्र सुदुर्लभः' सकलसंपन्निबन्धना यत्र जिनधर्मप्राप्तिर्दुरापा। इह च प्राप्नोत्येलमूकता-मिति वाच्ये असकृद्भावप्राप्तिख्यापनाय लप्स्यत इति भविष्यत्कालनिर्देश इति सूत्रार्थः ॥

*मू. (२२४) एअं च दोसं दट्ठूणं, नायपुत्तेण भासिअं।*
*अनुमायंपि मेहावी, मायामोसं विवज्जए ॥*

**वृ.** प्रकृतमुपसंहरति-'एअं च' त्ति सूत्रं, एनं च दोषम्- अनन्तरोदितं सत्यपि श्रामण्ये किल्बिषिकत्वादिप्राप्तिरूपं दृष्ट्वा आगमतो 'ज्ञातपुत्रेण' भगवता वर्द्धमानेन 'भाषितम्' उक्तम् 'अनुमात्रमपि' स्तोकमात्रमपि किमुत प्रभूतं ? 'मेधावी' मर्यादावर्ती 'मायामृषावादम्' अनन्तरोदितं 'वर्जयेत्' परित्यजेदिति सूत्रार्थः ॥

अध्ययनं -५ उद्देशकः -२ समाप्तः

*मू. (२२५) सिक्खिऊण भिक्खेसणसोहिं, संजयाण बुद्धाण सगासे।*
*तत्थ भिक्खु सुप्पणिहिइंदिए, तिव्वलज्जगुणवं विहरिज्जासि ॥ त्तिबेमि*

**वृ.** अध्ययनार्थमुपसंहरन्नाह-'सिक्खिऊण'त्ति सूत्रं, 'शिक्षित्वा' अधीत्य 'भिक्षैषणाशुद्धिम्' पिण्डमार्गणाशुद्धिमुद्गमादिरूपां, केभ्यः सकाशादित्याह-'संयतेभ्यः' साधुभ्यो 'बुद्धेभ्यः' अवगततत्त्वेभ्यः गीतार्थेभ्यो न द्रव्यसाधुभ्यः सकाशात्, ततः किमित्याह-'तत्र' भिक्षैषणायां 'भिक्षुः' साधु 'सुप्रणिहितेन्द्रियः' श्रोत्रादिभिर्गाढं तदुपयुक्तः 'तीव्रलज्ज' उत्कृष्टसंयमः सन्, अनेन प्रकारेण गुणवान् विहरेत्-सामाचारीपालनं कुर्याद् इति ब्रवीमीति पूर्ववदिति सूत्रार्थः ॥ उक्तोऽनुगमः। साम्प्रतं नयाः ते च पूर्ववदेव। व्याख्यातं पिण्डैषणाध्ययनम् ॥

अध्ययनं - ५ समाप्तम्।

**मुनिदीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिकसूत्रे पंचम अध्ययनस्य भद्रबाहुस्वामीविरचिता निर्युक्तिः एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता।**

## अध्ययनं-६ महाचारकथा

**वृ.** अधुना महाचारकथाख्यमारभ्यते, अस्य चायमभिसंबन्धः-इहानन्तरध्ययने साधोर्भिक्षा-विशोधिरुक्ता, इह तु गोचरप्रविष्टेन सता स्वाचारं पृष्टेन तद्विदाऽपि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्य इति, अपि त्वालये गुरवो वा कथयन्तीति वक्तव्यमित्येतदुच्यते, उक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च-''गोअरग्गपविट्ठो उ, न निसीएज्ज चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्नो निक्षेपः, तत्र च महाचारकथेति नाम, एतच्च तत्त्वतः प्रागिनरूपितमेवेत्यतिदिशन्नाह-

नि. [२४६] जो पुव्विं उद्दिट्ठो आयारो सो अहीणमइरित्तो।
सच्चेव य होइ कहा आयारकहाए महईए॥

वृ. यः 'पूर्वं' क्षुल्लकाचारकथायां 'निर्दिष्ट' उक्तः 'आचारो' ज्ञानाचारादिः असावहीनातिरिक्तो वक्तव्यः, सैव च भवति 'कथा' आक्षेपण्यादिलक्षणा वक्तव्या, चशब्दात्तदेव क्षुल्लकप्रतिपक्षोक्तं महद्वक्तव्यम्, आचारकथायां महत्यां प्रस्तुतयामिति गाथार्थः॥ उक्तो नामनिष्पन्नो निक्षेप इत्यादिचर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

*मू. (२२६) नाणदंसणसंपन्नं, संजमे अ तवे रयं।*
*गणिमागमसंपन्नं, उज्जाणम्मि समोसढं॥*

वृ. 'ज्ञानदर्शनसंपन्नं' ज्ञानं-श्रुतज्ञानादि दर्शनं-क्षायोपशमिकादि ताभ्यां संपन्नं-युक्तं 'संयमे' पञ्चाश्रवविरमणादौ 'तपसि च' अनशनादौ 'रतम्' आसक्तं, गणोऽस्यास्तीति गणी तं गणिनम्-आचार्यम् 'आगमसंपन्नं' विशिष्टश्रुतधरं, बह्वागमत्वेन प्राधान्यख्यापनार्थमेतत्, 'उद्याने' कचित्साधुप्रायोग्ये 'समवसृतं' स्थितं धर्मदेशनार्थं वा प्रवृत्तमिति सूत्रार्थः॥

*मू. (२२७) रायाणो रायमच्चा य, माहणा अदुव खत्तिआ।*
*पुच्छंति निहुअप्पाणो, कहं भे आयारगोयरो?॥*

वृ.तत्किमित्याह-'रायाणो'त्ति सूत्रं, 'राजानो' नरपतयः 'राजामात्याश्च' मन्त्रिणः 'ब्राह्मणाः' प्रतीताः 'अदुव'त्ति तथा 'क्षत्रियाः' श्रेष्ठयादयः पृच्छन्ति 'निभृतात्मानः' असम्भ्रान्ता रचिताञ्जलयः कथं 'भे' भवताम् 'आचारगोचरः' क्रियाकलापः स्थित इति सूत्रार्थः॥

*मू. (२२८) तेसिं सो निहुओ दंतो, सव्वभूअसुहावहो।*
*सिक्खाए सुसमाउत्तो, आयक्खइ विअक्खणो॥*

वृ. 'तेसिं'ति सूत्रं, 'तेभ्यो' राजादिभ्यः 'असौ' गणी 'निभृतः' असंभ्रान्त उचितधर्मकायस्थित्या, दान्त इन्द्रियनोइन्द्रियाभ्यां, 'सर्वभूतसुखावहः' सर्वप्राणिहित इत्यर्थः, 'शिक्षया' ग्रहणासेवनरूपया 'सुसमायुक्तः' सुष्ठु-एकीभावेन युक्तः 'आख्याति' कथयति 'विचक्षणः' पण्डित इति सूत्रार्थः॥

*मू. (२२९) हंदि धम्मत्थकामाणं, निग्गंथाणं सुणेह मे।*
*आयारगोअरं भीमं, सयलं दुरहिट्ठिअं॥*

वृ. 'हंदि'त्ति सूत्रं, हन्दीत्युपप्रदर्शने, तमेनं 'धर्मार्थकामाना'मिति धर्मः-चारित्रधर्मादिस्तस्यार्थः-प्रयोजनं मोक्षस्तं कामयन्ति-इच्छन्तीति विशुद्धविहितानुष्ठानकरणेनेति धर्मार्थकामा-मुमुक्षवस्तेषां 'निर्ग्रन्थानां' बाह्याभ्यन्तरग्रन्थरहितानां श्रृणुत मम समीपाद् 'आचारगोचरं' क्रियाकलापं 'भीमं' कर्मशत्र्वपेक्षया रौद्रं 'सकलं' संपूर्णं 'दुरधिष्ठं' क्षुद्रसत्त्वैर्दुराश्रयमिति सूत्रार्थः। धर्मार्थकामानामित्युक्तं, तदेतत्सूत्रस्पर्शनिर्युक्ता निरूपयति-तत्र धर्म-निक्षेपो यथा प्रथमाध्ययने, नवरं लोकोत्तरमाह-.

नि. [२४७] धम्मो बावीसविहो अगारधम्मोऽनगारधम्मो अ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पढमो अ बारसविहो दसहा पुन बीयओ होइ ॥

वृ. धर्मो 'द्वाविंशतिविधः' सामान्येन द्वाविंशतिप्रकारः 'अगारधर्मो' गृहस्थधर्मः 'अनगारधर्मश्च' साधुधर्मः, 'प्रथमश्च' अगारधर्मो द्वादशविधः, दशधा पुनः 'द्वितीयः' अनगारधर्मोभवति इतिगाथासमासार्थः ॥ व्यासार्थं त्वाह-

नि. [२४८] पंच य अणुव्वयाइं गुणव्वयाइं च होंति तिन्नेव।
सिक्खावयाइं चउरो गिहिधम्मो बारसविहो अ ॥

वृ. पञ्चचाणुव्रतानि-स्थूलप्राणातिपातनिवृत्त्यादीनि, गुणव्रतानि च भवन्ति त्रीण्येव-दिग्व्रतादीनि शिक्षापदानि चत्वारि-सामायिकादीनि, गृहिधर्मो द्वादशविधस्तु एष एवाणुव्रतादि। अणुव्रतादिस्वरूपं चावश्यके चर्चितत्वान्नोक्तमिति गाथार्थः ॥ साधुधर्ममाह-

नि. [२४९] खंती अ मद्दवऽज्जव मुत्ती तवसंजमे अ बोद्धव्वे।
सच्चं सोचं आकिंचणं च बंभं च जइधम्मो ॥

वृ.क्षान्तिश्च मार्दम्, आर्जवं मुक्तिः तपःसंयमौ च बोद्धव्यौ सत्यं शौचमाकि-ञ्चन्यं ब्रह्मचर्यं च यतिधर्म इति गाथाक्षरार्थः। भावार्थः पुनर्यथा प्रथमाध्ययने ॥

नि. [२५०] धम्मो एसुवइट्ठो अत्थस्स चउव्विहो उ निक्खेवो।
ओहेण छव्विहऽथो चउसट्ठिविहो विभागेणं ॥

वृ. धर्म एष 'उपदिष्टो' व्याख्यातः, अधुना त्वर्थावसरः, तत्रेदमाह-अर्थस्य चतुर्विधस्तु निक्षेपो-नामादिभेदात्, तत्र 'ओघेन' सामान्यतः षडिवधोऽर्थ आगमनोआगम-व्यतिरिक्तो द्रव्यार्थः, चतुःषष्टिविधो 'विभागेन' विशेषेणेति गाथासमुदायार्थः ॥ अवयवार्थं त्वाह-

नि. [२५१] धन्नाणि रयण थवार दुपयचउप्पय तहेव कुविअं च।
ओहेण छव्विहत्थो एसो धीरेहिं पन्नत्तो ॥

वृ.'धान्यानि' यवादीनि, रत्नं-सुवर्णं स्थावरं-भूमिगृहादि द्विपदं-गन्त्र्यादि चतुष्पदं-गवादि तथैव कुप्यं च-ताम्रकलशाद्यनेकविधम्। ओघेन षड्विधोऽथ 'एषः' अनन्तरो-दितः 'धीरैः' तीर्थकरगणधरैः 'प्रज्ञप्तः' प्ररूपित इति गाथार्थः ॥ एनमेव विभागतोऽभिधित्सुराह-

नि. [२५२] चउवीसा चउवीसा तिगदुगदसहा अणेगविह एव।
सव्वेर्सिपि इमेसिं विभागमहयं पवक्खामि ॥

वृ.चतुर्विशतिः चतुर्विशतीति चतुर्विशतिविधो धान्यार्थो रत्नार्थश्च,'त्रिद्विदशधे'ति त्रिविधः स्थावरार्थः द्विविधो द्विपदार्थः दशविधश्चतुष्पदार्थ, 'अनेकविध एवे'त्यनेकविधः कुप्यार्थः सर्वेषामप्यमीषा चतुर्विशत्यादिसंख्याभिहितानां धान्यादीनां 'विभागं' विशेषम् 'अथ' अनन्तरं संप्रवक्ष्यामीत्यर्थः ॥

नि. [२५३] धन्नाइं चउव्वीसं जव १ गोहुम २ सालि ३ वीहि ४ सट्ठीआ ५।
कोद्दव ६ अणुया ७ कंगू ८ रालग ९ तिल १० मुग्ग ११ मासा १२ य ॥

नि. [२५४] अयसि १३ हरिमन्थ १४ तिउडग १५ निप्फाव १६ सिलिंद १७ रायमासा अ।
इक्खू १९ मसूर २० तुवरी २१ कुलत्थर २२ तहर २३ धन्नगकलाया २४ ॥

वृ.धान्यानि चतुर्विशतिः, यवगोधूमशालिव्रीहिषष्टिकाः कोद्रवाणुकाः कङ्गुरालगति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लमुद्गमापाश्च अतसीहरिमन्थत्रिपुटकनिष्पावसिलिन्दराजमाषाश्च इक्षुमसूरतुवर्यः कुलत्था धान्यककलायाश्चेति, एतानि प्रायो लौकिकसिद्धान्येव, नवरं षष्टिकाः-शालिभेदाः कङ्गुः-उदकङ्गः तद्भेदो रालकः हरिमन्थाः-कृष्णचणकाः निष्पावा-वल्लाः राजमाषाः-चवलकाः शिलिन्दा-मकुष्ठाः धान्यकं-कुस्तुम्भरी कलायका-वृत्तचणका इति गाथाद्वयार्थः ॥

उक्तो धान्यविभागः, अधुना रत्नविभागमाह-

**नि. [२५५]** रयणाणि चउव्वीसं सुवण्णतउतंबरययलोहाइं।
सीसगहरिण्णपासाणवइरमणिमोत्तिअपवालं ॥

**नि. [२५६]** संखो तिनिसागुरुचंदणानि वत्थामिलाणि कट्ठाणि।
तह चम्मदंतवाला गंधा दव्वोसहाइं च ॥

**वृ.** रत्नानि चतुर्विंशतिः, सुवर्णत्रपुताम्ररजतलोहानि सीसकहिरण्यपाषाणवज्रमणिमौक्तिकप्रवालानि। शङ्खतिनिशागरुचन्दनानि वस्त्रामिलानि काष्ठानि तथा चर्मदन्तवाला गन्धा द्रव्यौपधानि च। एतान्यपि प्रायो लौकिकसिद्धान्येव नवरं रजतं-रूप्यम् हरिण्यं-रूपकादि पाषाणा-विजातीयरत्नानि मणयोजात्यानि। तिनिशो-वृक्षविशेषः अमिलानि-ऊर्णावस्त्राणि काष्ठानि-श्रीपर्ण्यादिफलकादीनि चर्माणि सिंहादीनां दन्ता गजादीनां वालाः चमर्यादीनां द्रव्यौषधानि-पिप्पल्यादीनीति गाथाद्वयार्थः ॥ उक्तो रत्नविभागः, स्थावरादिविभागमाह-

**नि. [२५७]** भूमी धरा य तरुगण तिविहं पुण थावरं मुणेअव्वं।
चक्कारबद्धमानुस दुविहं पुण होइ दुपयं तु ॥

**वृ.** भूमिर्गृहाणि तरुगणाश्च, चशब्दस्य व्यवहित उपन्यासः, त्रिविधं पुनरोधतः स्थावरं मन्तव्यं, पुनःशब्दो विशेषणार्थः, किं विशिनष्टि ?, स्वगतान्, भेदान्, तद्यथा-भूमिःक्षेत्रं, तच्च त्रिधा-सेतु केतु सेतु केतु च गृहाणि प्रासादाः, तेऽपि त्रिविधाः-खातोत्छ्रितोभयरूपाः, तरुगणा नालिकेर्याद्यारामा इति, 'चक्रारबद्धमानुष'मिति चक्रारबद्धं-गन्त्र्यादि मानुषं-दासादि, एवं द्विपदं पुनर्भवति द्विविधमिति गाथार्थः ॥ उक्तं स्थावरादि, चतुष्पदमाह-

**नि. [२५८]** गावी महिसी उट्टा अयएलगआसआसतरगा अ।
घोडग गद्दह हत्थी चउप्पयं होइ दसहा उ ॥

**वृ.** गौर्महिषी उष्ट्री अजा एडका अश्वा अश्वतराश्च घोटका गर्दभा हस्तितश्चतुष्पदं भवति दशधा तु, एते गवादयः प्रतीता एव, नवरमश्वा-वाल्हीकादिदेशोत्पन्ना जात्याः अश्वतरावेगसराः अजात्या घोटका इति गाथार्थः ॥ उक्तं चतुष्पदं कुप्यमाह-

**नि. [२५९]** नानाविहोवगरणं नेगविहं कुप्पलक्खणं होइ।
एसो अत्थो भणिओ छव्विह चउसट्ठिभेओ उ ॥

**वृ.** 'नानाविधोपकरणं' ताम्रकलशकडिल्लादि जातितः अनेकविधं व्यक्तितः कुप्यलक्षणं भवति। 'एषः' अनन्तरोदितोऽर्थो 'भणित' उक्तः षड्विधः, चतुःषष्टिभेदस्तु ओघविभागाभ्यां प्रकृतोपयोगो द्रव्यार्थ इति गाथार्थः ॥ उक्तोऽर्थः, साम्प्रतं काममाह-

**नि. [२६०]** कामो चउवीसविहो संपत्तो खलु तहा असंपत्तो।
संपत्तो चउदसहा दसहा पुण होअसंपत्तो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.कामश्चतुर्विंशतिविधः ओघतः, संप्राप्तः खलु तथा असंप्राप्तो वक्ष्यमाणस्वरूपः संप्राप्तः 'चतुर्दशधा-चतुर्दशप्रकारः, दशधा पुनर्भवत्यसंप्राप्त इति गाथासमासार्थः ॥ व्यासार्थं त्वाह, तत्राप्यल्पतरवक्तव्यत्वादसंप्राप्तमाह-

**नि. [२६१]** तत्थ असंपत्तो अत्थो १ चिंता २ तह सद्ध ३ संसरणमेव ४।
विक्कवय ५ लज्जनासो ६ पमाय ७ उम्माय ८ तब्भावो ९ ॥

**वृ.** तत्रासंप्राप्तोऽयं कामः, 'अर्थे'ति अर्थनमर्थः अदृष्टेऽपि विलयादौ, श्रुत्वा तदभिप्रायमात्रमित्यर्थः, तत्रैवाहो रूपादिगुणा इत्यभिनिवेशन चिन्तनं चिन्ता, तथा श्रद्धातत्संगमाभिलाषः, संस्मरणमेव-संकल्पिकतद्रूपस्यालेख्यादिदर्शनं, वियोगतः पुनः पुनरतिविक्लवता-तच्छोकातिरेकेणाहारादिष्वपि निरपेक्षता, लज्जानाशो-गुर्वादिसमक्षपमि तद्गुणोत्कीर्तनं, प्रमादः-तदर्थमेव सर्वारम्भेष्वपि प्रवर्तनम्, उन्मादो-नष्टचित्ततया आलजालभाषणं, तद्भावनास्तम्भादीनामपि तद्बुद्धयाऽऽलिङ्गनादिचेष्टेति गाथार्थः ॥

**नि. [२६२]** मरणं १० च होइ दसमो संपत्तंपिअ समासओ वोच्छं।
दिट्ठीए संपाओ १ दिट्ठीसेवा य संभासो ३ ॥

**वृ.** मरणं च-शोकाद्यतिरेकेण क्रमेण भवति दशमः असंप्राप्तकामभेदः। संप्राप्तमपि च कामं समासतो वक्ष्य इति, तत्र दृष्टेः पुनः संपातः स्त्रीणां कुचाद्यवलोकनं दृष्टिसेवा चभावसारं तद्दृष्टेर्दृष्टिमेलनं, संभाषणम्-उचितकाले स्मरकथाभिर्जल्प इति गाथार्थः ॥

**नि. [२६३]** हसिअ ४ ललिअ ४ उवगूहिअ ५ दंत ६ नहनिवाय ७ चुंबनं ८ होइ।
आलिंगण ९ मायाणं १० कर ११ सेवण १२ संग १३ किड्डा १४ अ ॥

**वृ.** हसितं-वक्रोक्तिगर्भं प्रतीतं ललितं-पाशकादिक्रीडा उपगूहितं-परिष्वक्तं दन्तनिपातो-दशनच्छेद्यविधिः नखनिपातो-नखरदनजातिः चुम्बनं चैवेति-चुम्बनविकल्पः आलिङ्गनम्-ईषत्स्पर्शनम् आदानं-कुचादिग्रहणं 'करसेवणं'ति प्राकृतशैल्या करणासेवने, तत्र करणं नाम-नागरकादिप्रारम्भयन्त्रम् आसेवनं-मैथनक्रिया अनङ्गक्रीडा च-अस्यादावर्थक्रियेति गाथार्थः ॥ उक्तः कामः, साम्प्रतं धर्मादीनामेव सपत्नतासपत्नते अभिधित्सुराह-

**नि. [२६४]** धम्मो अत्थो कामो भिन्नो ते पिंडिया पडिसवत्ता।
जिनवयणं उत्तिन्ना असवत्ता होंति नायव्वा ॥

**वृ.** धर्मोऽर्थः कामः त्रय एते पिण्डिता युगपत्संपातेन 'प्रतिसपत्नाः' परस्परविरोधिनः लोके कुप्रवचनेषु च, यथोक्तम्-

"अर्थस्य मूलं निकृतिः क्षमा च, कामस्य वित्तं च वपुर्वयश्च।
धर्मस्य दानं च दया दमश्च, मोक्षस्य सर्वोपरमः क्रियाश्च ॥१॥ इत्यादि"

एते च परस्परविरोधिनोऽपि सन्तो जिनवचनमवतीर्णाः ततः कुशालाशययोगतो व्यवहारेण धर्मादितत्त्वस्वरूपतो वा निश्चयेन 'असपत्नाः' परस्पराविरोधिनो भवन्ति ज्ञातव्या इति गाथार्थः ॥ तत्र व्यवहारेणाविरोधमाह-

**नि. [२६५]** जिनवयणंमि परिणए अवत्थविहिआणुठाणओ धम्मो।
सच्छासयप्पयोगा अत्थो वीसंभओ कामो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.जिनवचने यथावत्परिणते सति अवस्थोचितविहितानुष्ठानात्-स्वयोग्यतामपेक्ष्य दर्शनादिश्रावकप्रतिमाङ्गीकरणे निरतिचारपालनाद्भवति धर्मः, स्वच्छाशयप्रयोगाद्विशिष्टलोकतः पुण्यबलाच्चार्थः, विश्रम्भत उचितकलत्राङ्गीकरणतापेक्षो विश्रम्भेण काम इति गाथार्थः ॥

अधुना निश्चयेनाविरोधमाह-

**नि. [२६६]** धम्मसस फलं मोक्खो सासयमउलं सिवं अणाबाहं।
तमभिप्पेया साहू तम्हा धम्मत्थकाम त्ति ॥

वृ. धर्मस्य निरतिचारस्य फलं 'मोक्षो' निर्वाणं, किंविशिष्टमित्याह-'शाश्वतं' नित्यम् 'अतुलम्' अनन्यतुलं 'शिवं' पवित्रम् 'अनाबाधं' बाधावर्जितमेतदेवार्थः 'तं' धर्मार्थं मोक्षम-भिप्रेताः-कायन्तः साधवो यस्मात्तस्माद्धर्मार्थकामा इति गाथार्थः ॥ एतदेव द्रढयन्नाह-

**नि. [२६७]** परलोगु मुत्तिमग्गो नत्थि हु मोक्खो त्ति बिंति अविहिन्नू।
सो अत्थि अवितहो जिनमयंमि पवरो न अन्नत्थ ॥

वृ.'परलोको' जन्मान्तरलक्षणो 'मुक्तिमार्गो' ज्ञानदर्शनचारित्राणि नास्त्येव 'मोक्षः' सर्वकर्मक्षय लक्षणः 'इति' एवं ब्रुवते 'अविधिज्ञा' न्यायमार्गाप्रवेदिनः, अन्नोत्तरं-'स' परलोकादिः अस्त्येव 'अवितथः' सत्यो 'जिनमते' वीतरागवचने, प्रवरः पूर्वापराविरोधेन, नान्यत्रैकान्तनित्यादौ, हिंसादिविरोधादिति गाथार्थः ॥

*मू. (२३०)* *नन्नत्थ एरिसं वुत्तं, जं लोए परमदुच्चरं।*
*विउलट्ठाणभाइस्स, न भूअं न भविस्सइ ॥*

वृ.काचित्सूत्रस्पर्शनिर्युक्तिः, अधुना सूत्रान्तरावसरः, अस्य चायमभिसंबन्धः-इहानन्तरसूत्रे निर्ग्रन्थानामाचारगोचरकथनोपन्यासः कृतः, साम्प्रतमस्यैवार्थतो गुरुतामाह-'नन्नत्थ' त्ति सूत्रं न 'अन्यत्र' कपिलादिमते 'ईद्दशम्' उक्तमाचारगोचरं वस्तु यत् 'लोके' प्राणिलोके 'परमदुश्चरम्' अत्यन्तदुतच्छीलश्च यस्तस्य, न भूतं न भविष्यति अन्यत्र जिनमतादिति सूत्रार्थः ॥

*मू. (२३१)* *सखुड्डगविअत्ताणं, वाहिआणं च जे गुणा।*
*अखंडफुडिआ कायव्वा, तं सुणेह जहा तहा ॥*

वृ.एतदेव संभावयन्नाह-'सखुड्ड' त्ति सूत्रं, सह क्षुल्लकैः-द्रव्यभावबालैर्ये वर्त्तन्ते ते व्यक्ता-द्रव्यभाववृद्धास्तेषां सुक्षुल्लकव्यक्तानां, सबालवृद्धानामित्यर्थः, व्याधिमतां चशब्दा-दव्याधिमतां च, सरुजानां नीरुजानां चेति भावः, ये 'गुणा' वक्ष्यमाणलक्षणास्तेऽखण्डास्फुटिताः कर्तव्याः, अखण्डा देशविराधनापरित्यागेन अस्फुटिताः सर्वविराधनापरित्यागेन, तत् शुणेत यथा कर्तव्यास्तथेति सूत्रार्थः ॥

*मू. (२३२)* *दस अट्ठ य ठाणाइं, जाइं बालोऽवरज्झइ।*
*तत्थ अन्नयरे ठाणे, निग्गंथत्ताउ भस्सइ ॥*

वृ.ते चारगुणपरिहारेणाखण्डास्फुटिता भवन्तीति अगुणास्तावदुच्यन्ते-'दस' त्ति सूत्रं, दशाष्टौ च 'स्थानानि' असंयमस्थानानि वक्ष्यमाणलक्षणानि 'यानि' आश्रित्य 'बालः' अज्ञः 'अपराध्यति' तत्सेवनयाऽपराधमाप्नोति, कथमपराध्यतीत्याह-तत्रान्यतरे स्थाने वर्तमानः प्रमादेन 'निर्ग्रन्थत्वात्' निर्ग्रन्थभावाद् 'भ्रश्यति' निश्चयनयेनापैति बाल इति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमुमेवार्थं सूत्रस्तर्शनिर्युक्ता स्पष्टयति-

नि. [२६७] अट्ठारस ठाणाइं आयारकहाए जाइं भणियाइं।
तेसिं अन्नतरागं सेवंतु न होइ सो समणो ॥

वृ. अष्टादशस्थानान्याचारकथायां प्रस्तुतायां यानि भणितानि तीर्थकरैः तेषामन्यतरस्थानक सेवमानो न भवत्यसौ श्रमण आसेवक इति गाथार्थः ॥ कानि पुनस्तानि स्थानानीत्याह -

नि. [२६८] वयछक्कं कायछक्कं, अकप्पो गिहिभायणं।
पलियंकनिसेज्जा य, सिणाणं सोहवज्जणं ॥

वृ. 'व्रतषट्कं' प्राणातिपातनिवृत्त्यादीनि रात्रिभोजनविरतिषष्ठानि षड् व्रतानि कायषट्कं- पृथिव्यादयः षड्जीवनिकायाः 'अकल्पः' शिक्षकस्थापनाकल्पादिर्वक्ष्यमाणः 'गृहिभाजनं' गृहस्थसंबन्धि कांस्यभाजनादि प्रतीतं 'पर्यङ्क' शयनविशेषः प्रतीतः। 'निषद्या च' गृहे एकानेकरूपा 'स्नानं' देशसर्वभेदभिन्नं 'शोभावर्जनं' विभूषापरित्यागः, वर्जनमिति च प्रत्येक- भिसंबध्यते, शोभावर्जनं स्नानवर्जनमित्यादीति गाथार्थः ॥

*मू. ( २३३ ) तत्थिमं पढमं ठाणं, महावीरेण देसिअं।*
*अहिंसा निउणा दिट्ठा, सव्वभूएसु संजमो ॥*

वृ. व्याख्याता सूत्रस्पर्शनिर्युक्तिः, अधुना सूत्रान्तरं व्याख्याते, अस्य चायमभिसंबन्धः - गुणा अष्टादशसु स्थानेषु अखण्डास्फुटिताः कर्तव्याः, तत्र विधिमाह-'तत्थिमं'ति सूत्रं। 'तत्र' अष्टादशविधे स्थानगणे व्रतषट्के वा अनासेवनाद्वारेण 'इदं' वक्ष्यमाणलक्षणं प्रथमं स्थानं 'महावीरेण' भगवता अपश्चिमतीर्थकरेण 'देशितं' कथितं यदुताहिंसेति। इयं च सामान्यतः प्रभूतैर्देशितेत्यत आह-'निपुणा' आधाकर्माद्यपरिभोगतः कृतकारितादिपरिहारेण सूक्ष्मा, न आगमद्वारेण देशिता अपितु 'दृष्टा' साक्षाद्धर्मसाधकत्वेनोपलब्धा, किमितीययमेव निपुणेत्यत आह-यतोऽस्यामेव महावीरदेशितायां 'सर्वभूतेषु' सर्वभूतविषयः संयमो, नान्यत्र, उद्दिश्यकृता- दिभोगविधानादिति सूत्रार्थः ॥

*मू. ( २३४ ) जावंति लोए पाणा, तसा अदुव थावरा।*
*ते जाणमजाणं वा, न हणे नोवि धायए ॥*

वृ. एतदेव स्पष्टयन्नाह-'जावंति' सूत्रं, यतो हि भागवत्याज्ञा यावन्तः केचन लोके प्राणिनस्त्रसा-द्वीन्द्रियादयः अथवा स्थावराः-पृथिव्यादयः तान् जानन् रागाद्यभिभूतो व्यापादनबुद्धया अजानन्वा प्रमादपारतन्त्र्येण न हन्यात् स्वयं नापि घातयेदन्यैः, 'एकग्रहणे तज्जातीयग्रहणाद्' घ्नतोऽप्यन्यान्न समनुजानीयाद्, अतो निपुणा दृष्टेति सूत्रार्थः ॥

*मू. ( २३५ ) सव्वे जीवावि इच्छंति, जीविउं न मरिज्जिउं।*
*तम्हा पाणवहं घोरं, निग्गंथा वज्जयंति नं ॥*

वृ. अहिंसैव कथं साध्वीत्येतदेवाह-'सव्वे'त्ति सूत्रं, सर्वे जीवा अपि दुःखितादिभेदभिन्ना इच्छन्ति जीवितुं न मर्तुं प्राणवल्लभत्वात्, यस्मादेवं तस्मात्प्राणवधं 'घोरं' रौद्रं दुःखहेतुत्वाद् 'निर्ग्रन्थाः' साधवो वर्जयन्ति भावतः। नमिति वाक्यालङ्कार इति सूत्रार्थः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२३६) *अप्पणट्ठा परट्ठा वा, कोहा वा जइ वा भया।*
*हिंसगं न मुसं बूआ, नोवि अन्नं वयावए॥*

वृ. उक्तः प्रथमस्थानविधिः, अधुना द्वितीयस्थानविधिमाह-'अप्पणट्ठ'त्ति सूत्रं, 'आत्मर्थम्' आत्मनिमित्तमग्लान एव ग्लानोऽहं ममानेन कार्यमित्यादि 'परार्थं वा' परनिमित्तं वा एवमेव, तथा क्रोधाद्वा त्वं दास इत्यादि, 'एकग्रहणे तज्जातीयग्रहण'मिति मानाद्वा अबहुश्रुत एवाहं बहुश्रुत इत्यादि मायातो भिक्षाटनपरिजिहीर्षया पादपीडा ममेत्यादि लोभाच्छोभनतरान्नलाभे सति प्रान्तस्यैषणीयत्वेऽप्यनेषणीयमिदमित्यादि, यदिवा 'भवात्' किञ्चिद्वितथं कृत्वा प्रायश्चित्तभयान्न कृतमित्यादि, एवं हास्यादिष्वपि वाच्यम्, अत एवाह-'हिंसक' परपीडाकारि सर्वमेव न मृषा ब्रूयात् स्वयं नाप्यन्यं वादयेत्, 'एकग्रहणे तज्जातीयग्रहणात्' ब्रुवतोऽप्य-न्यान्न समनुजानीयादिति सूत्रार्थः॥

मू. (२३७) *मुसावाओ उ लोगम्मि, सव्वसाहूहिं गरिहिओ।*
*अविस्साओ अ भूआणं, तम्हा मोसं विवज्जए॥*

वृ. किमित्येतदेवमित्याह-'मुसाविउ'त्ति सूत्रं, मृषावादो हि लोके सर्वस्मिन्नेव सर्वसाधुभिः 'गर्हितो' निन्दितः, सर्वव्रतापकारित्वात् प्रतिज्ञातापालनात्, 'अविश्वासश्च' अविश्वसनीयश्च भूतानां मृषावादी भवति, यस्मादेवं तस्मान्मृषावादं विवर्जयेदिति सूत्रार्थः॥

मू. (२३८) *चित्तमंतमचित्तं वा, अप्पं वा जइवा बहुं।*
*दंतसोहणमित्तंपि, उग्गहंसि अजाइया॥*

वृ. उक्तो द्वितीयस्थानविधिः, साम्प्रतं तृतीयस्थानविधिमाह-'चित्तमंत'त्ति सूत्रं, 'चित्तवद्' द्विपदादि वा 'अचित्तवद्वा' हिरण्यादि, अल्पं वा मूल्यतः प्रमाणतश्च, यदिवा बहु मूल्यप्रमाणाभ्यामेव, किं बहुना?-'दन्तशोधनमात्रमपि' तथाविधं तृणादि अवग्रहे यस्य तत्त-मयाचित्वा न गृह्णन्ति साधवः कदाचनेति सूत्रार्थः॥

मू. (२३९) *तं अप्पाणा न गिण्हति नोऽवि गिण्हावए परं।*
*अन्नं वा गिण्हमाणंपि, नानुजाणंति संजया॥*

वृ. एतदेवाह-'तं'त्ति सूत्रं, 'तत्' चित्तवदादि आत्मना न गृह्णन्ति विरतत्वात्, नापि ग्राहयन्ति परं विरतत्वादेव, तथाऽन्यं वा गृह्णन्तमपि स्वयमेव 'नानुजानन्ति' नानुमन्यन्ते संयता इति सूत्रार्थः॥

मू. (२४०) *अबंभचरिअं घोरं, पमायं दुरहिट्ठिअं।*
*नायरंति मुनी लोए, भेआययणवज्जिओ॥*

वृ. उक्तस्तृतीयस्थानविधिः, चतुर्थस्थानविधिमाह-'अबंभ'त्ति सूत्रं, 'अब्रह्मचर्यं' प्रतीतं 'घोरं' रौद्रं रौद्रानुष्ठानहेतुत्वात्, 'प्रमादं' प्रमादवत् सर्वप्रमादमूलत्वात् 'दुराश्रयं' दुस्सेवं विदितजिनवचनेनानन्तसंसारहेतुत्वात्, यतश्चैवमतो 'नाचरन्ति' नासेवन्ते मुनयो 'लोके' मनुष्यलोके, किंविशिष्टा इत्याह-'भेदायतनवर्जिनो' भेदः-चारित्रभेदस्तदायनतनं-तत्स्थान-मिदमेवोक्तन्यायात्तद्वर्जिनः-चारित्रातिचारभीरव इति सूत्रार्थः॥

मू. (२४१) *मूलमेयमहम्मस्स, महादोससमुस्सयं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तम्हा मेहुणसंसग्गं, निग्गंथा वज्जयंति नं ॥*

**वृ.** एतदेव निगमयति-'मूलं'ति सूत्रं, 'मूलं' बीजमेतद् 'अधर्मस्य' पापस्येति पारलौकिकोऽपायः 'महादोषसमुच्छ्रयं' महतां दोषाणां-चौर्याप्रवृत्त्यादीनां समुच्छ्रयं-संघातवदित्यैहिकोऽपायः, यस्मादेवं तस्मात् 'मैथुनसंसर्गं' मैथुनसंबन्धं योषिदालापाद्यपि निर्ग्रन्था वर्जयन्ति, नमिति वाक्यालङ्कार इति सूत्रार्थः ॥

**मू. ( २४२ )** *बिडमुब्भेइमं लोणं, तिल्लं सप्पिं च फाणिअं ।*
*न ते संनिहिमिच्छंति, नायपुत्तवओरया ॥*

**वृ.** प्रतिपादितश्चतुर्थस्थानविधिः, इदानीं पञ्चमस्थानविधिमाह-'बिड'त्ति सूत्रं, 'बिडं' गोमूत्रादिपक्वं 'उद्भेद्यं' सामुद्रादि यद्वा 'बिडं' प्रासुकम् 'उद्भेद्यम्' अप्रासुकमपि, एवं द्विप्रकारं लवणं, तथा तैलं सर्पिश्च फाणितम्, तत्र तैलं प्रतीतं, सर्पिर्घृतं, फाणितं द्रवगडः, एतल्लवणाद्येवंप्रकारमन्यच्च न ते साधवः 'संनिधिं कुर्वन्ति' पर्युषितं स्थापयन्ति, 'ज्ञातपुत्रवचोरताः' भगवद्वर्धमानवचसि निःसङ्गताप्रतिपादनपरे सक्ता इति सूत्रार्थः ॥

**मू. ( २४३ )** *लोहस्सेस अनुप्फासे, मन्ने अन्नयरामवि ।*
*जे सिआ सन्निहिं कामे, गिही पव्वइए न से ॥*

**वृ.** संनिधिदोषमाह-'लोभस्स'त्ति सूत्रं, 'लोभस्य' चारित्रविघ्नकारिणश्चतुर्थकषायस्य 'एसोऽनुप्फास'त्ति एषोऽनुस्पर्शः-एषोऽनुभावो यदेतत्संनिधिकरणमिति, यतश्चैवमतो 'मन्ये' मन्यन्ते, प्राकृतशैल्या एकवचनम्, एवमाहुस्तीर्थकरगणधराः 'अन्यतरामपि' स्तोकामपि 'यः स्यात्' यः कदाचित्संनिधिं 'कामयते' सेवते 'गृही' गृहस्थोऽसौ भावतः प्रव्रजितो नेति, दुर्गतिनिमित्तानुष्ठानप्रवृत्तेः, संनिधीयते नरकादिष्वात्माऽनयेति संनिधिरिति शब्दार्थात् प्रव्रजितस्य च दुर्गतिगमनाभावादिति सूत्रार्थः ॥

**मू. ( २४४ )** *जंपि वत्थं व पायं वा, कंबलं पायपुंछणं ।*
*तंपि संजमलज्जट्ठा, धारंति परिहरंति अ ॥*

**वृ.** आह-यद्येवं वस्त्रादिधारयतां साधूनां कथमसंनिधिरित्यत आह 'जंपि'त्ति सूत्रं, यदप्यागमोक्तं 'वस्त्रं वा' चोलपट्टकादि 'पात्रं वा' अलाबुकादि 'कम्बलं' वर्षाकल्पादि, 'पादपुंछनं' रजोहरणं, तदपि 'संयमलज्जार्थ'मिति संयमार्थं पात्रादि, तद्व्यतिरेकेण पुरुषमात्रेण गृहस्थभाजने सति संयमपालनाभावात्, लज्जार्थं वस्त्रं, तद्व्यतिरेकेणाङ्गनादौ विशिष्टश्रुतपरिणत्यादिरहितस्य निर्लज्जतोपपत्तेः, अथवा संयम एव लज्जा तदर्थं सर्वमेतद्वस्त्रादि धारयन्ति, पुष्टालम्बनविधानेन 'परिहरन्ति च परिभुञ्जते च' मूर्च्छारहिता इति सूत्रार्थः ॥

**मू. ( २४५ )** *न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा ।*
*मुच्छा परिग्गहो वुत्तो, इअ वुत्तं महेसिणा ॥*

**वृ.** यतश्चैवमतः-'न सो'त्ति सूत्रं, नासौ निरभिष्वङ्गस्य वस्त्रधारणादिलक्षणः परिग्रह उक्तो, बन्धहेतुत्वाभावात्, केन?, 'ज्ञातपुत्रेण' ज्ञात-उदारक्षत्रियः सिद्धार्थः तत्पुत्रेण वर्धमानेन 'त्रात्रा' स्वपरपरित्राणसमर्थेन, अपि तु 'मूर्च्छा' असत्स्वपि वस्त्रादिष्वभिष्वङ्गः परिग्रह उक्तो, बन्धहेतुत्वाद्, अर्थतस्तीर्थकरेण, ततोऽवधार्य 'इति' एवमुक्तो 'महर्षिणा' गणधरेण, सूत्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेज्जंभव आहेति सूत्रार्थः ॥

*मू. ( २४६ ) सव्वत्थुवहिणा बुद्धा, संरक्खणपरिग्गहे।*
*सवि अप्पणोऽवि देहंमि, नायरंति ममाइयं ॥*

**वृ.** आह-वस्त्राद्यभावभाविन्यपि मूर्च्छा कथं वस्त्रादिभावे साधूनां न भविष्यति?, उच्यते, सम्यग्बोधेन तद्बीजभूताबोधोपघाताद्, आह च-'सव्वत्थ'त्ति सूत्रं, 'सर्वत्र' उचिते क्षेत्रे काले च 'उपधिना' आगमोक्तेन वस्त्रादिना सहापि 'बुद्धा' यथावद्विदितवस्तुतत्त्वाः साधवः 'संरक्षण-परिग्रह' इति संरक्षणाय षण्णां जीवनिकायानां वस्त्रादिपरिग्रहे सत्यपि नाचरन्ति ममत्वमिति योगः, किं चानेन?, ते हि भगवन्तः 'अप्यात्मनोऽपि देह' इत्यात्मनो धर्मकायेऽपि विशिष्ट-प्रतिबन्धसंगतिं न कुर्वन्ति 'ममत्वम्' आत्मीयाभिधानं, वस्तुतत्त्वावबोधात्, तिष्ठतु तावदन्यत्, ततश्च देहवदपरिग्रह एव तदिति सूत्रार्थः ॥

*मू. ( २४७ ) अहो निच्चं तवो कम्मं, सव्वबुद्धेहिं वण्णिअं।*
*जाव लज्जासमा वित्ती, एगभत्तं च भोअणं ॥*

**वृ.** उक्तः पञ्चमस्थानविधिः, अधुना षष्ठमधिकृत्याह-'अहो'त्ति सूत्रं, 'अहो नित्यं तपःकर्मे'ति अहो-विस्मये नित्यं नामापायाभावेन तदन्यगुणवृद्धिसंभवादप्रतिपात्येव तपःकर्म-तपोऽनुष्ठानं 'सर्वबुद्धैः' सर्वतीर्थकरैः 'वर्णितं' देशितं, किंविशिष्टमित्याह-'याव-ल्लज्जासमा वृत्तिः' लज्जा-संयमस्तेन समा-सदृशी तुल्या संयमाविरोधिनीत्यर्थः वर्तनं वृत्तिः-देहपालना 'एकभक्तं च भोजनम्' एकं भक्तं द्रव्यतो भावतश्च यस्मिन् भोजने तत्तथा, द्रव्यत एकम्-एकसंख्यानुगतं, भावत एकं-कर्मबन्धाभावादद्वितीयं, तद्दिवस एव रागादिरहितस्य अन्यथा भावत एकत्वाभावादिति सूत्रार्थः ॥

*मू. ( २४८ ) संतिमे सुहुमा पाणा, तसा अदुव थावरा।*
*जाइं राओ अपासंतो, कहमेसणिअं चरे? ॥*

**वृ.** रात्रिभोजने प्राणातिपातसंभवेन कर्मबन्धसद्वितीयतां दर्शयति-'संतिमे'त्ति सूत्रं, सन्त्येते-प्रत्यक्षोपलभ्यमानस्वरूपाः सूक्ष्माः 'प्राणिनो' जीवाः त्रसा-द्वीन्द्रियादयः अथवा स्थावराः-पृथिव्यादयः यान् प्राणिनो रात्रावपश्यन् चक्षुषा कथम् 'एषणीयं' सत्त्वानुपरोधेन चरिष्यति भोक्ष्यते च?, असंभव एव रात्रावेषणीयचरणस्येति सूत्रार्थः ॥

*मू. ( २४९ ) उदउल्लं बीअसंसत्तं, पाणा निवडिया महिं।*
*दिआ ताइं विवज्जिजा, राओ तत्थ कहं चरे? ॥*

**वृ.** एवं रात्रौ भोजने दोषमभिधायाधुना ग्रहणगतमाह-'उदउल्लं'ति सूत्रं, उदकार्द्रं पूर्व-वद्रेकग्रहणे तज्जातिग्रहणात्सस्निग्धादिपरिग्रहः, तथा 'बीजसंसक्तं' बीजैः संसक्तं-मिश्रम्, ओदनादीति गम्यते, अथवा बीजानि पृथग्भूतान्येव, संसक्तं चारनालाद्यपरेणेति, तथा 'प्राणिनः' संपातिमप्रभृतयो निपतिता 'मह्यां' पृथिव्यां संभवन्ति, ननु दिवाप्येतत्संभवत्येव?, सत्यं, किंतु परलोकभीरुश्चक्षुषा पश्यन् दिवा तान्युदकार्द्रादीनि विवर्जयेत्, रात्रौ तु तत्र कथं चरति संयमानुपरोधेन?, असंभव एव शुद्धचरणस्येति सूत्रार्थः ॥

*मू. ( २५० ) एअं च दोसं दट्ठूणं, नायपुत्तेण भासिअं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सव्वाहारं न भुंजंति, निग्गंथा राइभोअणं ॥*

**वृ.** उपसंहरन्नाह-'एअं च'त्ति सूत्रं, 'एतं च' अनन्तरोदितं प्राणिहिंसारूपमन्यं चात्म-विराधनादिलक्षणं दोषं दृष्ट्वा मतिचक्षुषा 'ज्ञातपुत्रेण' भगवता 'भाषितम्' उक्तं 'सर्वाहारं' चतुर्विधमप्यशनादिलक्षणमाश्रित्य न भुञ्जते 'निर्ग्रन्थाः' साधवो रात्रिभोजनमिति सूत्रार्थः ॥

**मू. (२५१)** *पुढविकायं न हिंसंति, मनसा वयसा कायसा ।*
*तिविहेणं करणजोएणं, संजया सुसमाहिआ ॥*

**वृ.** उक्तं व्रतषट्कम्, अधुना कायषट्कमुच्यते, तत्र पृथिवीकायमधिकृत्याह-'पुढवि'त्ति सूत्रं, पृथ्वीकायं न हिंसन्त्यालेखनादिना प्रकारेण मनसा वाचा कायेन, उपलक्षणमेतदत एवाह-'त्रिविधेन करणयोगेन' मनःप्रभृतिभिः करणादिरूपेण, के न हिंसन्तीत्याह-'संयताः' साधवः 'सुसमाहिता' उद्युक्ता इति सूत्रार्थः ॥

**मू. (२५२)** *पुढविकायं विहिंसंतो, हिंसई उ तयस्सिए ।*
*तसे अ विविहे पाणे, चक्खुसे अ अचक्खुसे ॥*

**वृ.** अत्रैव व्यापादयत्येव, 'तदाश्रितान्' पृथिवीश्रितान् 'त्रसांश्च विविधान् प्राणिनो' द्वीन्द्रियादीन् चशब्दात्स्थावरांश्चप्कायादीन् 'चाक्षुषांश्चाचाक्षुषांश्च' चक्षुरिन्द्रियग्राह्यानग्राह्यांश्चेति सूत्रार्थः ॥

**मू. (२५३)** *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्डणं ।*
*पुढविकायसमारंभं, जावजीवाइ वज्जए ॥*

**वृ.** यस्मादेवं 'तम्ह'त्ति सूत्रं, तस्मादेवं विज्ञाय दोषं तत्तदाश्रितजीवहिंसालक्षणं 'दुर्गति-वर्धनं' संसारवर्धनं पृथिवीकायसमारंभमालेखनादि 'यावज्जीवं' यावज्जीवमेव वर्जयेदिति।

**मू. (२५४)** *आउकायं न हिंसंति, मनसा वयसा कायसा ॥*
*तिविहेण करणजोएण, संजया सुसमाहिआ ॥*

**मू. (२५५)** *आउकायं विहिंसंतो, हिंसई उ तयस्सिए ।*
*तसे अ विविहे पाणे, चक्खुसे अ अचक्खुसे ॥*

**मू. (२५६)** *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्डणं ।*
*आउकायसमारंभं जावजीवाइ वज्जए ॥*

**वृ.** उक्तः सप्तमस्थानविधिः, अधुनाऽष्टमस्थानविधिमधिकृत्योच्यते-
'आउ-कायं'ति सूत्रं, सूत्रत्रयमप्कायाभिलापेन नेयं, ततश्चायमप्युक्त एव ॥

**मू. (२५७)** *जायतेअं न इच्छंति, पावगं जलइत्तए ।*
*तिक्खमन्नयरंसत्थं, सव्वओऽवि दुरासयं ॥*

**वृ.** साम्प्रतं नवमस्थानविधिमाह-'जायतेअं'ति सूत्रं, जाततेजा-अग्निः तं जाततेजसं नेच्छन्ति मनःप्रभृतिभिरपि 'पापकं' पाप एव पापकस्तं, प्रभूतसत्त्वापकारित्वेनाशुभमित्यर्थः, किं नेच्छन्तीत्याह-'सर्वशस्त्रम्, एकधारादिशस्त्रव्यवच्छेदेन सर्वतोधारशस्त्रकल्पमिति भावः, अत एव 'सर्वतोऽपि दुराश्रयं' सर्वतोधारत्वेनानाश्रयणीयमिति सूत्रार्थः ॥

**मू. (२५८)** *पाईणं पडिणं वावि, उड्ढं अणुदिसामवि ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहे दाहिणओ वावि, दहे उत्तरओवि अ।*

**वृ.** एतदेव स्पष्टयन्नाह- 'पाईणं' ति सूत्रं, 'प्राच्यां प्रतीच्यां वापि' पूर्वायां पश्चिमायां चेत्यर्थः, ऊद्धर्वमनुदिक्ष्वपि, 'सुपां सुपो भवन्ती' ति सप्तम्यर्थे षष्ठी, विदिक्ष्वपीत्यर्थः, अधो दक्षिणतश्चापि 'दहति' दाह्यं भस्मीकरोत्युत्तरतोऽपि च, सर्वासु दिक्षु विदिक्षु च दहतीति सूत्रार्थः ॥

**मू. ( २५९ )** *भूआणमेसमाधाओ, हव्ववाहो न संसओ।*
*तं पईवपयावट्ठा, संजया किंचि नारभे ॥*

**वृ.** यतश्चै वमतो 'भूआण' त्ति सूत्रं, 'भूतानां' स्थावरादीनामेष 'आघात' आघातहेतुत्वादाघातः 'हव्यवाहः' अग्निः 'नसंशय' इत्येवमेवैतद् आघात एवेति भावः, येनैवं तेन 'तं' हव्यवाहं 'प्रदीपप्रतापनार्थम्' आलोकशीतापनोदार्थं 'संयताः' साधवः 'किञ्चित्' संघट्टनादिनाऽपि नारभन्ते, संयतत्वापगमनप्रसङ्गादिति सूत्रार्थः ॥

**मू. ( २६० )** *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्ढणं।*
*तेउकायसमारंभं, जावजीवाइ वज्जाए ॥*

**वृ.** यस्मादेवं 'तम्ह' त्ति सूत्रं, व्याख्या पूर्ववत् ॥

**मू. ( २६१ )** *अनिलस्स समारंभं, बुद्धा मन्नंति तारिसं।*
*सावज्जबहुलं चेअं, नेअं ताईहि सेविअं ॥*

**वृ.** उक्तो नवमस्थानविधिः, साम्प्रतं दशमस्थानविधिमधिकृत्याह- 'अनि-लस्स' त्ति, 'अनिलस्य' वायोः 'समारम्भं' तालवृन्तादिभिः करणं 'बुद्धाः' तीर्थकरा 'मन्यन्ते' जानन्ति 'तादृशं' जाततेजःसमारम्भसदृशं। 'सावद्यबहुलं' पापभूयिष्ठं चैतमितिकृत्वा सर्वकालमेव नैनं 'त्रातृभिः' सुसाधुभिः 'सेवितम्' आचरितं मन्यन्ते बुद्धा एवेति सूत्रार्थः ॥

**मू. ( २६२ )** *तालिअंटेण पत्तेण, साहाविहुअनेन वा।*
*न ते वीइउमिच्छंति, वेआवेऊण वा परं ॥*

**वृ.** एतदेव स्पष्टयति- 'तालियंटेण' त्ति सूत्रं, तालवृन्तेन पत्रेण शाखाविधूननेन वेत्यमीषां स्वरूपं यथा षड्जीवनिकायिकायां, न 'ते' साधवो वीजितुमिच्छन्त्यात्मानामात्मना, नापि वीजयन्ति परैरात्मानं तालवृन्तादिभिरेव, नापि वीजयन्तं परमनुमन्यन्त इति सूत्रार्थः ॥

**मू. ( २६३ )** *जंपि वत्थं व पायं वा, कंबलं पायपुंछणं।*
*न ते वायकुईरंति, जयं परिहरंति अ।*

**वृ.** उपकारणात्तद्विराधनेत्येतदपि परिहरन्नाह- 'जंपि' त्ति सूत्रं, यदपि वस्त्रं वा पात्रं वा कम्बलं वा पादपुञ्छनम्, अमीषां पूर्वोक्तं धर्मोपकरणं तेनापि न ते वातमुदीरयन्ति अयतप्रत्युपेक्षणादिक्रियया, किंतु यतं परिहरन्ति, परिभोगपरिहारेण धारणापरिहारेण चेति सूत्रार्थः ॥

**मू. ( २६४ )** *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्ढणं।*
*वाउकायसमारंभं, जावजीवाइ वज्जए ॥*

**वृ.** यत एवं सुसाधुवर्जितोऽनिलसमारम्भः, 'तम्ह' त्ति सूत्रं, व्याख्या पूर्ववत् ॥

उक्तो दशमस्थानविधिः, इदानीमेकादशमाश्रित्य उच्यते इति

**मू. ( २६५ )** *वणस्सइं न हिंसंति, मणसा वयस कायसा।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तिविहेण करणजोएणं, संजया सुसमाहिआ ॥*

मू. ( २६६ ) *वणस्सइ विहिंसंतो, हिंसई अ तयस्सिए ।*
*तसे अ विविहे पाणे चक्खुसे अ अचक्खुसे ॥*

मू. ( २६७ ) *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्ढणं ।*
*वणस्सइसमारंभं, जावजीवाइ वज्जए ॥*

वृ. 'वणस्सइ' इत्यादि सूत्रत्रयं वनस्पतेरभिलापेन ज्ञेयं, ततश्चैकादशस्थानविधिरप्युक्त एव ॥

मू. ( २६८ ) *तसकायं न हिंसंति, मनसा वयस कायसा ।*
*तिविहेण करणजोएणं, संजया सुसमाहिआ ॥*

वृ. साम्प्रतं द्वादशस्थानविधिरुच्यते-'तसकायं'त्ति सूत्रं, 'त्रसकायं' द्वीन्द्रियादिरूपं न हिंसन्त्यारम्भप्रवृत्त्या मनसा वाचा कायेन-तदहितचिन्तनादिना 'त्रिविधेन करणयोगेन' मनः-प्रभृतिभिः करणादिना प्रकारेण 'संयताः' साधवः 'सुसमाहिताः' उद्युक्ता इति सूत्रार्थः ॥

मू. ( २६९ ) *तसकायं विहिंसंतो, हिंसई उ तयस्सिए ।*
*तसे अ विविहे पाणे, चक्खुसे अ अचक्खुसे ॥*

वृ. तत्रेव हिंसादोषमाह-'तसकायं'ति सूत्रं, त्रसकायं विहिंसेन् आरम्भप्रवृत्त्यादिना प्रकारेण हिनस्त्येव तुरवधारणार्थे व्यापादयत्येव 'तदाश्रितान्' त्रसान् विविधांश्च प्राणिनःतदन्यद्वीन्द्रियादीन्, चशब्दात्स्थावरांश्च पृथिव्यादीन्, 'चाक्षुषानचाक्षुषांश्च' चक्षुरिन्द्रियग्राह्यानग्राह्यांश्चेति सूत्रार्थः ॥

मू. ( २७० ) *तम्हा एअं विआणित्ता, दोसं दुग्गइवड्ढणं ।*
*तसकायसमारंभं, जावजीवाइ वज्जए ॥*

वृ. यस्मादेवं 'तम्ह'त्ति सूत्रं, तस्मादेतं विज्ञाय दोषं तदाश्रितजीवहिंसालक्षणं दुर्गतिवर्धनं संसारवर्धनं त्रयकायसमारम्भं तेन तेन विधिना 'यावज्जीवया' यावज्जीवमेव वर्जयेदिति।

मू. ( २७१ ) *जाइं चत्तारि भुज्जाइं, इसिण्णाऽऽहारमाइणि ।*
*ताइं तु विवज्जंतो, संजमं अनुपालए ॥*

वृ. उक्तो द्वादशस्थानविधिः, प्रतिपादितं कायषट्कम्, एतत्प्रतिपादनादुक्ता मूलगुणाः, अधुनैतद्वृत्तिभूतोत्तरगुणावसरः, ते चाकल्पादयः षडुत्तरगुणाः यथोक्तम्-'अकप्पो गिहि-भायण'मित्यादि, तत्राकल्पो द्विविधः-शिक्षकस्थापनाकल्पः अकल्पस्थापनाकल्पश्च, तत्र शिक्षकस्थापनाकल्पः अनधीतपिण्डनिर्युक्तादिनाऽऽनीतमाहारादि न कल्पत इति, उक्तं च-

"अनहीआ खलु जेणं पिंडेसणसेज्जवत्थपाएसा ।
तेनानियाणि जतिणो कप्पंति न पिंडमाईणि ॥१॥
उउबद्धंमि न अनला वासावासे उ दोऽवि नो सेहा ।
दिक्खिज्जंती पायं ठवणाकप्पो इमो होइ ॥२॥"

अकल्पस्थापनाकल्पमाह-'जाइं'त्ति सूत्रं, यानि चत्वारि 'अभोज्यानि संयमाप-कारित्वेनाकल्पनीयानि 'ऋषीणां' साधूनाम् 'आहारादीनि' आहारशय्यावस्त्रपात्राणिअ तानि

तु विधना वर्जयन् 'संयमं' सप्तदशप्रकारमनुपालयेत्, तदत्यागे संयमाभावादिति सूत्रार्थः ॥

*मू. ( २७२ ) पिंडं सिज्जं च वत्थं च, चउत्थं पायमेव य।*
*अकप्पिअं न इच्छिज्जा, पडिगाहिज्ज कप्पिअं ॥*

**वृ.**एतदेव स्पष्टयति-'पिंड'न्ति सूत्रं, पिण्डं शय्यां च वस्त्रं च चतुर्थं पात्रमेव च, एतत्स्वरूपं प्रकटार्थम्, अकल्पिकं नेच्छेत्, प्रतिगृह्णीयात्, 'कल्पिकं' यथोचित्तमिति सूत्रार्थः ॥

*मू. ( २७३ ) जे निआगं ममायंति, कीअमुद्देसिआहडं।*
*वहं ते समनुजाणंति, इअ उत्तं महेसिणा ॥*

**वृ.** अकल्पिके दोषमाह-'जे'त्ति सूत्रं, ये केचन द्रव्यसाध्वादयो द्रव्यलिङ्गधारिणो 'नियागं'ति नित्यमामन्त्रितं पिण्डं 'ममायन्ती'ति परिगृह्णन्ति, तथा 'क्रीतमौद्देशिकाहृतम्' एतानि यथा क्षुल्लकाचारकथायां 'वधं' त्रसस्थावरादिघातं 'ते' द्रव्यसाध्वादयः 'अनुजानन्ति' दातृ-प्रवृत्त्यनुमोदनेन इत्युक्तं च 'महर्षिणा' वर्धमानेनेति सूत्रार्थः ॥

*मू. ( २७४ ) तम्हा असणपाणाइं, कीअमुद्देसिआहडं।*
*वज्जयंति ठिअप्पाणो, निग्गंथा धम्मजीविणो ॥*

**वृ.**यस्मादेवं 'तम्ह'त्तिअ सूत्रं, तस्मानदशनपानादि चतुर्विधमपि यथोदितं क्रीतमौद्देशिक-माहृतं वर्जयन्ति 'स्थितात्मानो' महासत्त्वा 'निर्ग्रन्थाः' साधवो 'धर्मजीविनः' संयमैकजीविन इति सूत्रार्थः ॥

*मू. ( २७५ ) कंसेसु कंसपाएसु, कुंडमोएसु वा पुणो।*
*भुंजंतो असनपानाइं, आयारा परिभस्सइ ॥*

**वृ.** उक्तोऽकिल्पस्तदभिधानात्रयोदशस्थानविधिः, इदानीं चतुर्दशस्थानविधिमाह-'कंसेसु'त्ति सूत्रं, 'कंसेषु' करोटकादिषु 'कंसपात्रेषु' तिलकादिषु 'कुण्डमोदेषु' हस्तिपादा-कारेषु मृन्मयादिषु भुञ्जानोऽशनपानादि तदन्यदोषरहितमपि 'आचारात्' श्रमणसंबन्धिनः 'परिभ्रश्यति' अपैतीति सूत्रार्थः ॥

*मू. ( २७६ ) सीओदगसमारम्भे, मत्तधोअणछड्डणे।*
*जाइं छंनंति (छिप्पंति) भूआइं, दिट्ठो तत्थ असंजमो ॥*

**वृ.**कथमित्याह-'सीओदगं'ति सूत्रं, अनन्तरोद्दिष्टभाजनेषु श्रमणा भोक्ष्यन्ते मुक्तं वैभिरिति शीतोदकेन धावनं कुर्वन्ति, तदा 'शीतोदकसमारम्भे' सचेतनोदकेन भाजनधावनारम्भे तथा 'मात्रकधावनोज्झने' कुण्डमोदादिषु क्षालनजलत्यागे यानि 'क्षिप्यन्ते' हिंस्यन्ते 'भूतानि' अप्कायादीनि सोऽत्र-गृहिभाजनभोजने 'दृष्ट' उपलब्धः केवलज्ञानभास्वता असंयमः तस्य भोक्तुरिति सूत्रार्थः ॥

*मू. ( २७७ ) पच्छाकम्मं पुरेकम्मं, सिआ तत्थ न कप्पइ।*
*एअमट्ठं न भुंजंति, निग्गंथा गिहिभायणे ॥*

**वृ.** किंच -'पच्छाकम्मं'ति सूत्रं, पश्चात्कर्म पुरः-कर्म स्यात्-तत्र कदाचिद्भवेद्गृहि-भाजनभोजने, पश्चात्पुरःकर्मभावस्तूक्तवदित्येके, अन्ये तु भुञ्जन्तु तावत्साधवो वयं पश्चाद्भोक्ष्याम इति पश्चात्कर्म व्यत्ययेन तु पुरःकर्म व्याचक्षते, एतच्च न कल्पते धर्मचारिणां, यतश्चैवमतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एतदर्थं' पश्चात्कर्मादिपरिहारार्थं न भुञ्जते निर्ग्रन्थाः, केत्याह-'गृहिभाजने' अनन्त-रोदित इति सूत्रार्थः ॥

*मू. ( २७८ ) आसंदीपलिअंकेसु, मंचमासालएसु वा ।*
*अणायरिअमज्जाणं, आसइत्तु सइत्तु वा ॥*

वृ.उक्तो गृहिभाजनदोषः, तदभिधानाच्चतुर्दशस्थानविधिः, साम्प्रतं पञ्चदशस्थान-विधिमाह-'आसंदि'त्ति सूत्रं, आसन्दीपर्यङ्कौ प्रतीतौ, तयोरासन्दीपर्यङ्कयोः प्रतीतयाः, मञ्चाशालकयोश्च, मञ्चः-प्रतीतः आशालकस्तु-अवष्टम्भसमन्वित आसनविशेषः एतयोः 'अनाचरितम्' अनासेवितम् 'आर्याणां' साधूनाम् 'आसितुम्' उपवेष्टुं 'स्वप्तुं वा' निद्रातिवाहनं वा कर्तुं, शुषिरदोषादिति सूत्रार्थः ॥

*मू. ( २७९ ) नासंदीपलिअंकेसु, न निसिज्जा न पीढए ।*
*निग्गंथाऽपडिलेहाए, बुद्धवुत्तमहिट्ठगा ॥*

वृ.अत्रैवापवादमाह-'नासंदि'त्ति सूत्रं, न 'आसन्दीपर्यङ्कयोः' प्रतीतयोः न निषद्यायाम्-एकादिकल्परूपायां न पीठके-वेत्रमयादौ 'निर्ग्रन्थाः' साधवः 'अप्रत्युपेक्ष्य' चक्षुरादिना, निषीदनादि न कुर्वन्तीति वाक्यशेषः, नञ् सर्वत्राभिसम्बध्यते, न कुर्वन्तीति । किंविशिष्टा निर्ग्रन्थाः ?, इत्याह-'बुद्धोक्ताधिष्ठातारः' तीर्थकरोक्तानुष्ठानपरा इत्यर्थः, इह चाप्रत्युपेक्षिता-सन्द्यादौ निषीदनादिनिषेधात् धर्मकथादौ राजकुलादिषु प्रत्युपेक्षितेषु निषीदनादिविधिमाह, विशेषणान्यथानुपपत्तेरिति सूत्रार्थः ॥

*मू. ( २८० ) गंभीरविजया एए, पाणा दुप्पडिलेहगा ।*
*आसंदी पलिअंको अ, एअमट्ठं विवज्जिआ ॥*

वृ.तत्रेव दोषमाह-'गंभीर'त्ति सूत्रं, गम्भीरम्-अप्रकाशं विजय-आश्रयः अप्रकाशाश्रय 'एते' प्राणिनामासन्द्यादयः, एवं च प्राणिनो दुष्प्रत्युपेक्षणीया एतेषु भवन्ति, पीड्यन्ते चैतदुप-वेशनादिना, आसन्दः पर्यङ्कश्च चशब्दान्मञ्चादयश्च एतदर्थं विवर्जिताः साधुभिरिति सूत्रार्थः ॥

*मू. ( २८१ ) गोअरग्गपविट्ठस्स, निसिज्जा जस्स कप्पइ ।*
*इमेरिसमणायारं, आवज्जइ अबोहिअं ॥*

वृ.उक्तः पर्यङ्कस्थानविधिः, तदभिधानात्पञ्चदशस्थानम्, इदानीं षोडशस्थानमधिकृत्याह-'गोअरग्ग'त्ति सूत्रं, गोचराग्रप्रविष्टस्य भिक्षाप्रविष्टस्येत्यर्थः, निषद्या यस्य कल्पते, गृह एव निषीदनं समाचरति यः साधुरिति भावः, स खलु 'एवम्' ईदृशं वक्ष्यमाणलक्षणमनाचारम् 'आपद्यते' प्राप्नोति 'अबोधिकं' मिथ्यात्वफलमिति सूत्रार्थः ॥

*मू. ( २८२ ) विवत्ती बंभचेरस्स, पाणाणं च वहे वहो ।*
*वणीमगपडिग्घाओ, पडिकोहो अगारिणं ॥*

वृ.अनाचारमाह-'विवत्ति'त्ति सूत्रं, विपत्तिर्ब्रह्मचर्यस्य-आज्ञाखण्डनादोषतः साधुसमाचार-णस्य प्राणिनां च वधे वधो भवति, तथा सम्बन्धादाधाकर्मादिकरणेन, वनीपकप्रतीघातः, तदाक्षेपणाअदित्साभिधानादिना, प्रतिक्रोधश्चागारिणां तत्स्वजनानां च स्यात् तदाक्षेपदर्शनेनेति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( २८३ ) *अगुत्ती बंभचेरस्स, इत्थीओ वावि संकणं।*
*कुसीलवड्ढणं ठाणं, दूरओ परिवज्जए॥*

वृ. तथा 'अगुत्ति'त्ति सूत्रं, अगुप्तिर्ब्रह्मचर्यस्य तदिन्द्रियाद्यवलोकनेन, स्त्रीतश्चापि शङ्का भवति तदुत्फुल्ललोचनदर्शनादिना अनुभूतगुणायाः, कुशीलवर्धनं स्थानम्-उक्तेन प्रकारेणासंयमवृद्धिकारकं, दूरतः 'परिवर्जयेत्' परित्यजेदिति सूत्रार्थः ॥

मू. ( २८४ ) *तिण्हमन्नयरागस्स, निसिज्जा जस्स कप्पई।*
*जराए अभिभूअस्स, वाहिअस्स तवस्सिणो॥*

वृ. सूत्रेणैवापवादमाह-'तिण्हि'त्ति सूत्रं, 'त्रयाणां' वक्ष्यमाणलक्षणानाम् 'अन्यतरस्य' एकस्य निषद्या गोचरप्रविष्टस्य यस्य कल्पते औचित्येन, तस्य तदासेवने न दोष इति वाक्यशेषः, कस्य पुनः कल्पत इत्याह-'जरयाऽभिभूतस्य' अत्यन्तवृद्धस्य 'व्याधिमतः' अत्यन्तमशक्तस्य 'तपस्विनो' विकृष्टक्षपकस्य। एते च भिक्षाटनं न कार्यन्त एव, आत्मलब्धिकाद्यपेक्षया तु सूत्रविषयः, न चैतेषां प्राय उक्तदोषाः संभवन्ति, परिहरन्ति च वनीपकप्रतिघातादीति सूत्रार्थः ॥

मू. ( २८५ ) *वाहिओ वा अरोगी वा, सिणाणं जो उ पत्थए।*
*वुक्कंतो होइ आयारो, जढो हवइ संजमो॥*

वृ. उक्तो निषद्यास्थानविधिः तदभिधानोत्पोडशस्थानं, साम्प्रतं सप्तदशस्थानमाह-'वाहिओ व'त्ति सूत्रं, 'व्याधिमान् वा' व्याधिग्रस्तः 'अरोगी वा' रोगविप्रमुक्तो वा 'स्नानम्' अङ्गप्रक्षालनं यस्तु 'प्रार्थयते' सेवत इत्यर्थः, तेनेत्थंभूतेन व्युत्क्रान्तो भवति 'आचारो' बाह्यतपोरूपः, अस्नानपरीषहानतिसहनात्, 'जढः' परित्यक्तो भवति 'संयमः' प्राणिरक्षणादिकः, अप्कायादिविराधनादिति सूत्रार्थः ॥

मू. ( २८६ ) *संतिमे सुहुमा पाणा, घसासु भिलुगासु अ।*
*जे अ भिक्खू सिणायंतो, विअडेणुप्पलावए॥*

वृ. प्रासुकस्नानेन कथं संयमपरित्याग इत्याह-'संतिमे'त्ति सूत्रं, सन्ति 'एते' प्रत्यक्षोपलभ्यमानस्वरूपाः 'सूक्ष्माः' श्लक्ष्णाः 'प्राणिनो' द्वीन्द्रियादयः 'घसासु' शुषिरभूमिषु 'भिलुगासु च' तथाविधभूमिराजीषु च, यांस्तु भिक्षुः स्नानजलोज्झनक्रियया 'विकृतेन' प्रासुकोदकेनोत्प्लावयति, तथा च तद्विराधनातः संयमपरित्याग इति सूत्रार्थः ॥

मू. ( २८७ ) *तम्हा ते न सिणायंति, सीएण उसिणेण वा।*
*जावज्जीवं वयं घोरं, असिणाणमहिट्ठगा।*

वृ. निगमयन्नाह-'तम्ह'त्ति सूत्रं, यस्मादेवमुक्तदोषप्रसंगस्तस्मात् 'ते' साधवो न स्नान्ति शीतेन वोष्णोनोदकेन, प्रासुकेनाप्रासुकेन वेत्यर्थः, किंविशिष्टास्त इत्याह-'यावज्जीवम्' आजन्म व्रतं 'घोरं' दुरनुचरमस्नानमाश्रित्य 'अधिष्ठातारः' अस्यैव कर्तार इति सूत्रार्थः ॥

मू. ( २८८ ) *सिणाणं अदुवा कक्कं, लुद्धं पउमगाणि अ।*
*गायस्सुव्वट्टणट्ठाए, नायरंति कयाइवि॥*

वृ. किंच 'सिणाणं'ति सूत्रं, 'स्नानं' पूर्वोक्तम्, अथवा 'कल्कं' चन्दनकल्कादि 'लोध्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गन्धद्रव्यं' 'पद्मकानि च' कुङ्कुमकेसराणि, चशब्दादध्यच्चैवंविधं गात्रस्य 'उद्वर्त्तनार्थम्' उद्वर्त्तननिमित्तं नाचरन्ति कदाचिदपि, यावज्जीवमेव भावसाधव इति सूत्रार्थः ॥

मू. (२८९) *नगिणस्स वावि मुंडस्स, दीहरोमनहंसिणो।*
*मेहुणा उवसंतस्स, किं विभूसाई कारिअं ? ॥*

वृ. उक्तोऽस्नानविधिः, तदभिधानात्ससदशस्थानं, साम्प्रतमष्टादशं शोभावर्जनास्थानमुच्यते- शोभायां नास्ति दोषः 'अलङ्कुतश्चापि चरेद्धर्म'मित्यादिवचनाद् (इति) पराभिप्रायमाशङ्क्याह- 'नगिणस्स'त्ति सूत्रं, 'नग्नस्य वापि' कुचेलवतोऽप्युपचारनग्नस्य' निरुपचरितस्य नग्नस्य वा जिनकल्पिकस्येति सामान्यमेव सूत्रं मुण्डस्य द्रव्यभावाभ्यां 'दीर्घरोमनखवतः' दीर्घरोमवतः कक्षादिषु दीर्घनखवतो हस्तादौ जिनकल्पिकस्य, इतरस्य तु प्रमाणयुक्ता एव नखा भवन्ति यथाऽन्यसाधूनां शरीरेषु तमस्यपि न लगन्ति॥ मैथुनाद् 'उपशान्तस्य' उपरतस्य, किं 'विभूषया' राढया कार्यं ?, न किञ्चिदिति सूत्रार्थः ॥

मू. (२९०) *विभूसावत्तिअं भिक्खू, कम्मं बंधइ चिक्कणं।*
*संसारसायरे घोरे, जेणं पडइ दुरुत्तरे ॥*

वृ. इत्थं प्रयोजनाभावमभिधायापायमाह-'विभूस'त्ति सूत्रं, 'विभूषाप्रत्ययं' विभूषानिमित्तं 'भिक्षुः' साधुः कर्म बन्धाति 'चिक्कणं' दारुणं, संसारसागरे 'घोरे' रौद्रे येन कर्मणा पतति 'दुरुत्तारे' अकुशलानुबन्धतोऽत्यन्तदीर्घ इति सूत्रार्थः ॥

मू. (२९१) *विभूसावत्तिअं चेअं, बुद्धा मन्नंति तारिसं।*
*सावज्जबहुलं चेअं, नेयं ताईहिं सेविअं ॥*

वृ. एवं बाह्यविभूषापायमभिधाय संकल्पविभूषापायमाह-'विभूस'त्ति सूत्रं, 'विभूषाप्रत्ययं' विभूषानिमित्तं चेत एवं चैवं च यदि मम विभूषा संपद्यत इति, तत्प्रवृत्त्यङ्गं चित्तमित्यर्थः, 'बुद्धाः' तीर्थकरा 'मन्यन्ते' जानन्ति 'तादृशं' रौद्रकर्मबन्धहेतुभूतं विभूषाक्रिया-सदृशं 'सावद्य-बहुलं चैतद्' आर्तध्यानानुगतं चेतः, नैतदित्थंभूतं 'त्रातृभिः' आत्मारामैः साधुभिः 'सेवितम्' आचरितं, कुशलचित्तत्त्वात्तेषामिति सूत्रार्थः ॥

मू. (२९२) *खवंति अप्पाणममोहदंसिणो, तवे रया संजमअज्जवे गुणे।*
*धुणंति पावाइं पुरेकडाइं, नवाइं पावाइं न ते करंति ॥*

वृ. उक्तः शोभावर्जनस्थानविधिः, तदभिधानादष्टादशं पदं, तदभिधानाच्चोत्तरगुणाः, साम्प्रतमुक्तफलप्रदर्शनेनोपसंहरन्नाह-'खवंति'त्ति सूत्रं, क्षपयन्त्यात्मानं तेन तेन चित्तयोगेनानु-पशान्तं शमयोजनेन जीवं, किंविशिष्टा इत्याह-'अमोहदर्शिनः' अमोहं ये पश्यन्ति, यथावत्प-श्यन्तीत्यर्थः, त एव विशेष्यन्ते-तपसिअनशनादिलक्षणे रताः-सक्ताः, किंविशिष्टे तपसीत्याह- 'संयमार्जवगुणे' संयमार्जवे गुणौ यस्य तपसस्तस्मिन्, संयमऋजुभावप्रधाने, शुद्ध इत्यर्थः, त एवंभूता 'धुन्वन्ति' कम्पन्त्यपनयन्ति पापानि 'पुराकृतानि' जन्मान्तरोपात्तानि 'नवानि' प्रत्यग्राणि पापानि न 'ते' साधवः कुर्वन्ति, तथाऽप्रमत्तत्वादिति सूत्रार्थः ॥

मू. (२९३) *सओवसंता अममा अकिंचणा, सविज्जविज्जानुगया जसंसिणो।*
*उउप्पसन्ने विमलेव चंदिमा, सिद्धिं विमाणाइं उवेंति ताइणो ॥ त्तिबेमि ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. किं च - 'सदोवसंत'त्ति सूत्रं, 'सदोपशान्ताः' सर्वकालमेव क्रोधारहिताः, सर्वत्राममा-ममत्वशून्याः 'अकिञ्चना' हिरण्यादिमिथ्यादिद्रव्यभावकिञ्चनविनिर्मुक्ताः, स्वाआत्मीया विद्या स्वविद्या-परलोकोपकारिणी केवलश्रुतरूपा तया स्वविद्या विद्ययानुगतायुक्ताः, न पुनः परविद्यया इहलोकोपकारिण्येति, त एव विशेषयन्ते-'यशस्विनः' शुद्धपारलौकिकयशोवन्तः, त एवंभूता ऋतौ 'प्रसन्ने' परिणते शरत्कालादौ विमल इव चन्द्रमाः चन्द्रमा इव विमलाः, इत्येवंकल्पास्ते भावमलरहिताः 'सिद्धिं' निर्वृत्तिं तथा सावशेषकर्माणो 'विमानानि' सौधर्मा-वतंसकादीनि 'उपयान्ति' सामीप्येन गच्छन्ति 'त्रातारः' स्वपरापेक्षया साधवः, इति ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, साम्प्रतं नयाः, ते च पूर्ववत् ॥

अध्ययनं ६ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधितं सम्पादितं दशवैकालिक सूत्रे षष्ठमअध्ययनं सनिर्युक्तिः सटीकं समाप्तम्**

## अध्ययनं - ७-वाक्यशुद्धिः

वृ.साम्प्रतं वाक्यशुद्ध्याख्यमध्ययनं प्रारभ्यते, अस्य चायमभिसंबन्धः-इहानन्तराध्ययने गोचरप्रविष्टेन सता स्वाचारं पृष्टेन तद्विदाऽपि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्य-(आचार) इति, अपि स्वालये गुरवो वा कथयन्तीति वक्तव्यमित्येतदुक्तम्, इह त्वालयगतेनापि तेन गुरुणा वा वचनदोषगुणाभिज्ञेन निरवद्यवचसा कथयितव्य इत्येतदुच्यते, उक्तं च -

"सावज्जणवज्जाणं वयणाणं जो न याणइ विसेसं।
वोत्तुंपि तस्स न खमं किमंग पुण देसणं काउं ? ॥"

इत्यनेनाभिसंबन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नाम-निष्पन्नो निक्षेपः, तत्र वाक्यशुद्धिरिति द्विपदं नाम, तत्र वाक्यनिक्षेपाभिधानायाह-

**नि. [२७०]** निक्खेवो अ(उ) चउक्को वक्के दव्वं तु भासदव्वाइं।
भावे भासासद्दो तस्स य एगट्ठिआ इणमो ॥

वृ. व्याख्या-निक्षेपस्तु 'चतुष्को' नामस्थापनाद्रव्यभावलक्षणो 'वाक्ये' वाक्यविषयः, तत्र नामस्थापने क्षुण्णे, 'द्रव्यं तु' द्रव्यवाक्यं पुनर्ज्ञशरीरभव्यशरीरव्यतिरिक्तं 'भाषाद्रव्याणि' भाषकेण गृहीतान्यनुच्चार्यमाणानि, 'भाव' इति भाववाक्यं 'भाषाशब्दः' भाषाद्रव्याणि शब्दत्वेन परिणतान्युच्चार्यमाणानीत्यर्थः।

तस्य तु वाक्यस्य एकार्थिकानि 'अमूनि' वक्ष्यमाणलक्षणानीति गाथार्थः ॥

**नि. [२७१]** वक्कं वयणं च गिरा सरस्सई भारही अ गो वाणी।
भासा पन्नवणी देसणी अ वयजोग जोगे अ ॥

वृ. व्याख्या-वाक्य वचनं च गीः सरस्वती भारती च गौर्वाक भाषा प्रज्ञापनी देशनी च वाग्योगो योगश्च, एतानि निगदसिद्धान्येवेति गाथार्थः ॥ पूर्वोद्दिष्टां द्रव्यादिभाषामाह-

**नि. [२७२]** दव्वे तिविहा गहणे अ निसिरणे तह भवे पराधाए।
भावे दव्वे अ सुए चरित्तमाराहणी चेव ॥

वृ. 'द्रव्यं' इति द्वारपरामर्शः, द्रव्यभाषा त्रिविधा-ग्रहणे च निसर्गे तथा भवेत्पराघाते। तत्र ग्रहणं भाषाद्रव्याणां काययोगेन यत् सा ग्रहणद्रव्यभाषा, निसर्गस्तेषामेव भाषाद्रव्याणां वाग्योगेनोत्सर्गक्रिया, पराघातस्तु निसृष्टभाषाद्रव्यैस्तदन्येषां तथापरिणामापादनक्रियावत्प्रेरणम्, एषा त्रिप्रकाराऽपि क्रिया द्रव्ययोगस्य प्राधान्येन विवक्षितत्वात् द्रव्यभाषेति।

'भाव' इति द्वारपरामर्शः, भावभाषा त्रिविधैव, द्रव्ये च श्रुते चारित्र इति, द्रव्यभावभाषा श्रुतभावभाषा चारित्रभावभाषा च, तत्र द्रव्यं प्रतीत्योपयुक्तैर्या भाष्यते सा द्रव्यभावभाषा, एवं श्रुतादिष्वपि वाच्यम्, इयं त्रिप्रकारापि वक्त्रभिप्रायात्तद्रव्यभावप्राधान्यापेक्षया भावभाषा, इयं चौधत एवाराधनी चैवेति, द्रव्याद्याराधनात्, चशब्दद्विराधना चोभयं चानुभयं च भवति, द्रव्याद्याराधनादिभ्य इति। आह-इह द्रव्यभाववाक्यस्वरूपमभिधातव्यं, तस्य प्रस्तुतत्वात्, तत्किमनया भाषयेति, उच्यते वाक्यपर्यायत्वाद्भाषाया न दोषः, तत्त्वतस्तस्यैवाभिधानादिति गाथासमुदायार्थः, अवयवार्थं तु वक्ष्यति। तत्र द्रव्यभावभाषामधिकृत्याराधन्यादिभेदयोजनामाह-

नि. [२७३] आराधनी उ दव्वे सच्चा मोसा विराधनी होइ।
सच्चामोसा मीसा असच्चमोसा य पडिसेहा॥

वृ. आराध्यते-परलोकापीडया यथावदभिधीयते वस्त्वनयेत्याराधनी तु 'द्रव्य' इति द्रव्यविषया भावभाषा सत्या, तुशब्दात् द्रव्यतो विराधन्यपि काचित्सत्या, परपीडासंरक्षणफलभावाराधनादिति, मृषाविराधनी भवति, तद्रव्यान्यथाभिधानेन तद्विराधनादिति भावः, सत्यामृषा मिश्रा, मिश्रेत्याराधनी विराधनी च, असत्यामृषा च 'प्रतिषेध' इति नाराधनी नापि विराधनी, तद्वाच्यद्रव्ये तथोभयाभावादिति, आसां च स्वरूपमुदाहरणैः स्पष्टीभविष्यतीति गाथार्थः॥

नि. [२७४] जनवयसम्मयठवणा नामे रूवे पडुच्च सच्चे अ।
ववहारभावजोगे दसमे ओवम्मसच्चे अ॥

वृ. सत्यं तावद्वाक्यं दशप्रकारं भवति, जनपदसत्यादिभेदात्, तत्र जनपदसत्यं नाम नानादेशभाषारूपमप्यविप्रतिपत्त्या यदेकार्थप्रत्यायनव्यवहारसमर्थमिति, यथोदकार्थे कोङ्कणादिषु पयः पिच्चमुदकं नीरमित्याद्यदुष्टविवक्षाहेतुत्वान्नानाजनपदेष्विष्टार्थप्रतिपत्तिजनकत्वाद्व्यवहारप्रवृत्तेः सत्यमेतदिति, एवं शेषेष्वपि भावना कार्या। संमतसत्यं नाम-कुमुदकुवलयोत्पलतामरसानां समाने पङ्कसंभवे गोपादीनामपि संमतमरविन्दमेव पङ्कजमिति। स्थापनासत्यं नाम अक्षरमुद्राविन्यासादिषु यथा माषकोऽयं कार्षापणोऽयं शतमिदं सहस्रमिदमिति। नामसत्यं नाम कुलमवर्धयन्नपि कुलवर्द्धन इत्युच्यते धनमवर्धयन्नपि धनवर्द्धन इत्युच्यते अयक्षश्च यक्ष इति। रूपसत्यं नाम अतद्गुणस्य तथारूपधारणं रूपसत्यं, यथा प्रपञ्चयतेः प्रव्रजितरूपधारणमिति। प्रतीत्यसत्यं नाम यथा अनामिकाया दीर्घत्वं ह्रस्वत्वं चेति, तथाहि-अस्यानन्तपरिणामस्य द्रव्यस्य तत्तत्सहकारिकारणसंनिधानेन तत्तद्रूपमभिव्यज्यत इति सत्यता। व्यवहारसत्यं नाम दह्यते गिरिर्गलति भाजनमनुदरा कन्या अलोमा एडकेति गिरिगततृणादिदाहे व्यवहारः प्रवर्तते तथोदके च गलति सति तथा संभोगजबीजप्रभवोदराभावे च सति तथा लवनयोग्यलोमाभावे सति। भावसत्यं नाम शुक्ला बलाका, सत्यपि पञ्चवर्णसंभवे शुक्लवर्णोत्कटत्वाच्छुक्लेति। योगसत्यं नाम छत्रयोगाच्छत्री दण्डयोगाद्दण्डीत्येवमादि। दशममौपम्यसत्यं च, तत्रौपम्यसत्यं नाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुद्रवत्तडाग इति गाथार्थः ॥ उक्ता सत्या, अधुना मृषामाह-

**नि. [२७५]** कोहे माने माया लोभे पेज्जे तहेव दोसे अ।
हासभए अक्खाइय उवधाए निस्सिआ दसमा ॥

**वृ.** क्रोधे इति क्रोधनिसृता, यथा क्रोधाभिभूतः पिता पुत्रमाह-न त्वं मम पुत्रः, यद्वा क्रोधाभिभूतो वक्ति तदाशयविपत्तितः सर्वमेवासत्यमिति, एवं माननिसृता मानाध्यातः क्वचित्केनचिदल्पधनोऽपि पृष्ट आह-महाधनोऽहमिति, मायानिसृता मायाकारप्रभृतय आहुः-नष्टो गोलक इति, लोभनिसृता वणिक्प्रभृतीनामन्यथाक्रीतमेवेत्थमिदं क्रीतमित्यादि, प्रेमनिसृता अतिरक्तानां दासोऽहं तवेत्यादि, द्वेषनिसृता मत्सरिणां गुणवत्यपि निर्गुणोऽयमित्यादि, हास्यनिसृता कान्दर्पिकानां किंचित्कस्यचित्संबन्धि गृहीत्वा पृष्ठानां न दृष्टमित्यादि, भयनिसृता तस्करादिगृहीतानां तथा तथा असमञ्जसाभिधानम्, आख्यायिकानिसृता तत्प्रतिबद्धोऽसत्प्रलापः, उपघातनिसृता अचौरे चौर इत्यभ्याख्यानवचनमिति गाथार्थः ॥ उक्ता मृषा।

**नि. [२७६]** उप्पन्नविगयमीसग जीवमजीवे अ जीवअज्जीवे।
तहऽनंतमीसगा खलु परित्त अद्धा अ अद्धाद्धा ॥

**वृ.** 'उत्पन्नविगतमिश्रके'ति उत्पन्नविषया सत्यामृषा यथैकं नगरमधिकृत्यास्मिन्नद्य दश दारका उत्पन्ना इत्यभिदधतस्तन्न्यूनाधिकभावे, व्यवहारतोऽस्याः सत्यामृषात्वात्, श्वस्ते शतं दास्यामि इत्यभिधाय पञ्चाशत्स्वपि दत्तेषु लोके मृषात्वादर्शनात्, अनुत्पन्नेष्वेवादत्तेष्व(च)-मृषात्वसिद्धेः सर्वथा क्रियाभावेन सर्वथा व्यत्पयादित्येवं विगतादिष्वपि भावनीयमिति, तथाच विगतविषया सत्यामृषा यथैकं ग्राममधिकृत्यास्मिन्द्य दश वृद्धा विगता इत्यभिदधतस्तन्न्यूनाधिकभावे, एवं मिश्रका सत्यामृषा उत्पन्नविगतोभयसत्यामृषा, यथैकं पत्तनमधिकृत्याहास्मिन्नद्य दश दारका जाता दश च वृद्धा विगता इत्यभिदधतस्तन्न्यूनाधिकभावे, जीवमिश्रा-जीवविषया सत्यामृषा यथा जीवन्मृतकृमिराशौ जीवराशिरिति, अजीवमिश्रा च-अजीवविषया सत्यामृषा यथा तस्मिन्नेव प्रभूतमृतकृमिराशावजीवराशिरिति, जीवाजीवमिश्रेति-जीवाजीवविषया सत्यामृषा यथा तस्मिन्नैव जीवन्मृतकृमिराशौ प्रमाणनियमेनैतावन्तो जीवन्त्येतावन्तश्च मृता इत्यभिदधतस्तन्न्यूनाधिकभावे। 'तथानन्तमिश्रा खल्वि'ति अनन्तविषया सत्यामृषा यथा मूलकन्दादौ परीतपत्रादिमत्यन्तकायोऽयमित्यभिदधतः। अद्धामिश्रा-कालविषया सत्यामृषा यथा कश्चित् कस्मिंश्चित् प्रयोजने सहायांस्त्वरयन् परिणतप्राये वासर एव रजनी वर्तते इति ब्रवीति, अद्धद्धमिश्र च दिवसरजन्येकदेशः अद्धद्धोच्यते, तद्विषया सत्यामृषा यथा कस्मिंश्चित् प्रयोजने स्वरयन् प्रहरमात्र एव मध्याह्न इत्याह। एवं मिश्रशब्दः प्रत्येकमभिसंबध्यत इति गाथार्थः। उक्ता सत्यामृषा, साम्प्रतमसत्यामृषामाह-

**नि. [२७७]** आमंतणि आणवणी जायणि तह पुच्छणी अ पन्नवणी।
पच्चक्खाणी भासा भासा इच्छानुलोमा अ ॥

**वृ.** आमन्त्रणी यथा हे देवदत्त इत्यादि, एषा किलाप्रवर्तकत्वात्सत्यादिभाषात्रयलक्षण-वियोगतस्तथाविधदलोत्पत्तेरसत्यामृषेति, एवमाज्ञापनी यथेदं कुरु, इयमपि तस्य करणाकरण-भावतः परमार्थेनैकत्राप्यनियमत्तथाप्रतीतेः अदुष्टविवक्षाप्रसूतत्वादसत्यामृषेति, एवं स्वबुद्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याऽन्यत्रापि भावना कार्येति। याचनी यथा भिक्षां प्रयेच्छेति तथा प्रच्छनी यथा कथमेतदिति, प्रज्ञापनी यथा हिंसाप्रवृत्तो दुःखितादिर्भवति, प्रत्याख्यानी भाषा यथाऽदित्सेति भाषा, इच्छानुलोमा च यथा केनचित्कश्चिदुक्तः साधुसकाशं गच्छाम इति, स आह-शोभनमिदमिति।

नि. [२७८] अनभिग्गहिआ भासा भासा अ अभिग्गहंमि बोद्धव्वा।
संसयकरणी भासा वायड अव्वायडा चेव॥

वृ. अनभिगृहीता भाषा अर्थमनभिगृह्य योच्यते डित्थादिवत्, भाषा चाभिग्रहे बोद्धव्या-अर्थमभिगृह्य योच्यते घटादिवत्, तथा संशयकरणी च भाषा-अनेकार्थसाधारणा योच्यते सैन्धवमित्यादिवत्, व्याकृता-स्पष्टा प्रकटार्था देवदत्तस्यैषभ्रातेत्यादिवत्, अव्याकृता चैव-अस्पष्टाऽप्रकटार्था बालकादीनां थपनिकेत्यादिवदिति गाथार्थः॥ उक्ता असत्यामृषा -

नि. [२७९] सव्वावि अ सा दुविहा पज्जत्ता खलु तहा अपज्जत्ता।
पढमा दो पज्जत्ता उवरिल्ला दो अपज्जत्ता॥

वृ. सर्वाऽपि च 'सा' सत्यादिभेदभिन्ना भाषा द्विविधा-पर्याप्ता खलु तथाऽपर्याप्ता, पर्याप्ता या एकपक्षे निक्षिप्यते सत्या वा मृषा वेति तद्व्यवहारसाधनी, तद्विपरीता पुनरपर्याप्ता, अत एवाह-प्रथमे द्वे भाषे सत्यामृषे पर्याप्ते, तथास्वविषयव्यवहारसाधनात्, तथा उपरितने द्वे सत्या-मृषाऽसत्यामृषाभाषे अपर्याप्ते, तथास्वविषयव्यवहारासाधनादिति गाथार्थः॥ उक्ता द्रव्य-भावभाषा, साम्प्रतं श्रुतभावभाषामाह-

नि. [२८०] सुअधम्मे पुन तिविहा सच्चा मोसा असच्चमोसा अ।
सम्मद्दिट्ठी उ सुओवउत्तु सो भासई सच्चं॥

वृ. 'श्रुतधर्म' इति श्रुतधर्मविषया पुनस्त्रिविधा भवति भावभाषा, तद्यथा-सत्या मृषा असत्यामृषा चेति, तत्र 'सम्यग्दृष्टिस्तु' सम्यग्दृष्टिरेव 'श्रुतोपयुक्त' इत्यागमे यथावदुपयुक्तो यः स भाषते 'सत्यम्' आगमानुसारेण वक्तीति गाथार्थः॥

नि. [२८१] सम्मद्दिट्ठी उ सुअंमि अनुवउत्तो अहेउगं चेव।
जं भासइ सा मोसा मिच्छादिट्ठीवि अ तहेव॥

वृ. 'सम्मद्दिट्ठी' सम्यग्दृष्टिरेव सामान्येन 'श्रुते' आगमे अनुपयुक्तः प्रमादा-द्यत्किंचिद् 'अहेतुकं चैव' युक्तिविकलं चैव यद्भाषते तन्तुभ्यः पट एव भवतीत्येवमादि सा मृषा, विज्ञाना-दरेपि तत एव भावादिति। मिथ्यादृष्टिरपि 'तथैवे'त्युपयुक्तोऽनुपयुक्तो वा यद्-भाषते सा मृषैव, घृणाक्षरन्यायातसंवादेऽपि सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवदिति।

नि. [२८२] हवइ उ असच्चमोसा सुअंमि उवरिल्लए तिनाणंमि।
जं उवउत्तो भासइ एत्तो वोच्छं चरित्तंमि॥

वृ. भवति तु असत्यामृषा 'श्रुते' आगम एव परावर्तनादि कुर्वतस्तस्यामन्त्रण्यादिभाषारूप-त्वात्तथा 'उपरितने' अवधिमनःपर्यायकेवललक्षणे 'त्रिज्ञान' इति ज्ञानत्रये यदुपयुक्तो भाषते सा असत्यामृषा, आमन्त्रण्यादिवत् तथाविधाध्यवसायप्रवृत्तेः, इत्युक्ता श्रुतभावभाषा। अत ऊर्ध्वं वक्ष्ये 'चारित्र' इति चारित्रविषयां भावभाषामिति गाथार्थः॥

नि. [२८३] पढमबिइआ चरित्ते भासा दो चेव होंति नायव्वा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचरित्तस्स उ भासा सच्चा मोसा उ इअरस्स ॥

**वृ.** 'प्रथमाद्वितीये' सत्यामृषे 'चारित्र' इति चारित्रविषये भाषे द्वे एव भवतो ज्ञातव्ये, स्वरूपमाह-'सचरित्रस्य' चारित्रपरिणामवतः, तुशब्दात्तद्वृद्धिनिबन्धनभूता च भाषा द्रव्यतस्त-थाऽन्यथाभावेऽपि सत्या, सतां, हितत्वादिति। मृषा तु 'इतरस्य' अचारित्रस्य तद्वृद्धिनिबन्धन-भूता चेति गाथार्थः ॥ उक्तं वाक्यमधुना शुद्धिमाह-

**नि. [२८४]** नामंठवणासुद्धी दव्वसुद्धी अ भावसुद्धी अ।
एएसिं पत्तेअं परूवणा होइ कायव्वा ॥

**वृ.** नामशुद्धिः स्थापनाशुद्धिर्द्रव्यशुद्धिश्च भावशुद्धिश्च, 'एतेषां' नामशुद्ध्यादीनां प्रत्येकं प्ररूपणा भवति कर्तव्येति गाथार्थः ॥

तत्र नामस्थापने क्षुण्णत्वादनङ्गीकृत्य द्रव्य-शुद्धिमाह-

**नि. [२८५]** तिविहा उ दव्वसुद्धी तद्दव्वादेसओ पहाणे अ।
तद्दव्वगमाएसो अनन्नमीसा हवइ सुद्धी ॥

**वृ.** त्रिविधा तु द्रव्यशुद्धिर्भवति 'तद्रव्यत' इति तद्रव्यशुद्धिः 'आदेशत' इति आदेशद्रव्यशुद्धिः 'प्राधान्यतश्चे'ति प्राधान्यद्रव्यशुद्धिश्च। तत्र तद्रव्यशुद्धिः 'अनन्ये'त्यन्यद्रव्यशुद्धिः, यद्रव्यमन्येन द्रव्येण सहासंयुक्तं सच्छुद्धं भवति क्षीरं दधि वा असौ तद्रव्यशुद्धिः, आदेशे मिश्रा भवति शुद्धिरन्यानन्यविषया, एतदुक्तं भवति-आदेशतो द्रव्यशुद्धिर्द्विविधाअन्यत्वेनानन्यत्वेन च, अन्यत्वे यथा शुद्धवासा देवदत्तः, अनन्यत्वे शुद्धदन्त इति गाथार्थः ॥ प्राधान्यद्रव्यशुद्धिमाह-

**नि. [२८६]** वण्णरसगंधफासे समणुण्णा सा पहाणओ सुद्धी।
तत्थ उ सुक्किल महुरा उ संमया चेव उक्कोसा ॥

**वृ.** वर्णरसगन्धस्पर्शेषु या मनोज्ञता-सामान्येन कमनीयता अथवा मनोज्ञता-यथाभिप्राय-मनुकूलता सा प्राधान्यतः शुद्धिरुच्यते, 'तत्र' चैवंभूतचिन्ताव्यतिकरे शुक्लमधुरौ वर्णरसौ तुशब्दात्सुरभिमृद् गन्धस्पर्शौ च संमतौ, यथाभिप्रायमपि प्रायो मनोज्ञौ, बहूनामित्थंप्रवृत्ति-सिद्धेः, 'उत्कृष्टौ च' कमनीयौ च। चशब्दस्य व्यवहित उपन्यास इति गाथार्थः ॥ उक्ता द्रव्यशुद्धिः,

**नि. [२८७]** एमेव भावसुद्धी तब्भावएसओ पहाणे अ।
तब्भावगमाएसो अनन्नमीसा हवइ सुद्धी ॥

**वृ.** 'एवमेवे'ति यथा द्रव्यशुद्धिस्तथा भावशुद्धिरपि, त्रिविधेत्यर्थः, 'तद्भाव' इति तद्भावशुद्धिः 'आदेशत' इति आदेशभावशुद्धिः 'प्राधान्यतश्चे'ति प्राधान्यभावशुद्धिश्च, तत्र तद्भावशुद्धिः 'अनन्ये' त्यनन्मभावशुद्धिस्तद्भावशुद्धिः, यो भावोऽन्येन भावेन सहासंयुक्तः सन् शुद्धो भवति बुभुक्षितादेरन्नाद्यभिलाषवदसौ तद्भावशुद्धिः, आदेशे मिश्रा भवति शुद्धिस्तदन्यानन्यविषयेत्यर्थः, एतदुक्तं भवति-आदेशभावशुद्धिर्द्विविधा-अन्यत्वेऽनन्यत्वे च, अन्यत्वे यथा शुद्धभावस्य साधोर्गुरुः अनन्यत्वे शुद्धभाव इति गाथार्थः ॥ प्रधानभावशुद्धिमाह-

**नि. [२८८]** दंसणनाणचरित्ते तवोविसुद्धी पहाणमाएसो।
जम्हा उ विसुद्धमलो तेन विसुद्धो हवइ सुद्धो ॥

**वृ.** 'दर्शनज्ञानचारित्रेषु' दर्शनज्ञानचारित्रविषया तथा तपोविशुद्धिः 'प्राधान्यादेश' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्दर्शनादीनामादिश्यमानानां प्रधानं सा प्रधानभावशुद्धिः, यथा दर्शनादिषु क्षायिकाणि ज्ञान-दर्शनचारित्राणि, तपःप्रधानभावशुद्धिः-आन्तरतपोऽनुष्ठानाराधनमिति। कथं पुनरियं प्रधान-भावशुद्धिरिति ?, उच्यते, एभिर्दर्शनादिभिः शुद्धैर्यस्माद्विशुद्धमलो भवति साधुः, कर्ममलरहित इत्यर्थः, तेन च मले न 'विशुद्धो' मुक्तो भवति सिद्ध इत्यतः प्रधानभावशुद्धिय-थोक्तान्येव दर्शनादीनीति गाथार्थः ॥ उक्ता शुद्धिः इह च भावशुद्धिः, सा च वाक्य-शुद्धेर्भवतीत्याह-

नि. [२८९] जं वक्कं वयमाणस्स संजमो सुज्झई न पुण हिंसा।
न य अत्तकलुसभावो तेन इहं वक्कसुद्धित्ति ॥

वृ. 'यद्' यस्माद्वाक्यं शुद्धं वदतः सतः संयमः शुद्धयति, शुद्धयतीति निर्मल उपजायते, न पुनर्हिसा भवति कौशिकादेरिव, न चात्मनः कलुषभावः कालष्यं-दुष्टाभिसंधिरूपं संजायते, तेन कारणेन 'इह' प्रवचने वाक्यशुद्धिर्भावशुद्धेर्निमित्तमित्यतोऽत्र प्रयतितव्यमिति गाथार्थः ॥

नि. [२९०] वयणविभत्तीकुसलस्स संजमंमी समुज्जुयमइस्स।
दुब्भासिएण हुज्जा हु विराधना तत्थ जइअव्वं ॥

वृ.अ'वचनविभक्ति कुशलस्य' वाच्येतरवचनप्रकारभिज्ञस्य न केवलमित्थंभूतस्यापितु 'संयमे उ(सम्)द्यतमतेः' अहिंसायां प्रवृत्तचित्तस्येत्यर्थः तस्याप्येवंभूतस्य कथंचिद्दुर्भाषितेन कृतेन भवेत् विराधना-परलोकपीडा अतः 'तत्र' दुर्भाषितवाक्यपरिज्ञाने 'यतितव्यं' प्रयत्नः कार्य इति गाथार्थः ॥

आह-यद्येवमलमनेनैव प्रयासेन, मौनं श्रेय इति, न, अज्ञस्य तत्रापि दोषाद्, आह च-

नि. [२९१] वयणविभत्तिअकुसलो वओगयं बहुविहं अयाणंतो।
जइवि न भासइ किंची न चेव वयगुत्तयं पत्तो ॥

वृ. 'वचनविभक्त्यकुशलो' वाच्येतरप्रकारानभिज्ञः 'वाग्गतं बहुविधम्' उत्सर्गादिभेद-भिन्नमजानानः यद्यपि न भाषते किञ्चित् मौनेनैवास्ते, न चैव वाग्गुप्ततां प्राप्तः, तथाप्यसौ अवाग्गुप्त एवेति गाथार्थः ॥ व्यतिरेकमाह-

नि. [२९२] वयणविभत्तीकुसलो वओगयं बहुविहं वियाणंतो।
दिवसंपि भासमाणो तहावि वयगुत्तयं पत्तो ॥

वृ. 'वचनविभक्तिकुशलो' वाच्येतरप्रकाराभिज्ञः 'वाग्गतम्' बहुविधमुत्सर्गादिभेदभिन्नं विजानन् दिवसमपि भाषमाणः सिद्धान्तविधिना तथापि वाग्गुप्ततां प्राप्तः, वाग्गुप्त एवासाविति गाथार्थः ॥ साम्प्रतं वचनविभक्तिकुशलस्यौघतो वचनविधिमाह-

नि. [२९३] पुव्वं बुद्धीइ पेहित्ता, पच्छा वयमुयाहरे।
अचक्खुओ व नेतारं, बुद्धिमन्नेउअ ते गिरा ॥

वृ-व्याख्या-'पूर्वं' प्रथममेव वचनोच्चारणकाले 'बुद्धया प्रेक्ष्य' वाच्यं दृष्ट्वा पश्चाद्वाक्य-मुदाहरेत्, अर्थापत्त्या कस्यचिदपीडाकरमित्यर्थः, दृष्टान्तमाह-'अचुक्षुष्मानिव' अन्ध इव 'नेता-रम्' आकर्षकं 'बुद्धिमन्वेतु ते गीः' बुद्धयनुसारेण वाक्यप्रवर्तताभिनि श्लोकार्थः ॥

उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादिचर्च्चः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्ववत्तावद्यावत्सूत्रा-नुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

*मू. ( २१४ ) चउण्हं खलु भासाणं, परिसंखया पन्नवं।*
*दुण्हं तु विनयं सिक्खे, दो न भासिज्ज सव्वसो॥*

**वृ.** चतुसृणां खलु भाषाणां, खलुशब्दोऽवधारणे, चतसृणामेव, नातोऽन्या भाषा विद्यत इति, 'भाषाणां' सत्यादीनां 'परिसंख्याय' सर्वैः प्रकारैर्ज्ञात्वा, स्वरूपमिति वाक्यशेषः, 'प्रज्ञावान्' प्राज्ञो बुद्धिमान्, साधुः, किमित्याह-'द्वाभ्यां' सत्यासत्यामृषाभ्यो तुरवधारणेद्वाभ्यामेवाभ्यां 'विनयं' शुद्धप्रयोगं विनीयतेऽनेन कर्मेतिकृत्वा 'शिक्षेत' जानीयात्, 'द्वे' असत्यासत्यामृषे न भाषेत 'सर्वशः' सर्वैः प्रकारैरिति सूत्रार्थः॥

*मू. ( २१५ ) जा अ सच्चा अवत्तव्वा, सच्चामोसा अ जा मुसा।*
*जा अ बुद्धेहिं नाइन्ना, न तं भासिज्ज पन्नवं।*

**वृ.** विनयमेवाह-'जा अ सच्च'त्ति सूत्रं, या च सत्या पदार्थतत्त्वमङ्गीकृत्य 'अवक्तव्या' अनुच्चारणीया सावद्यत्वेन, अमुत्र स्थिता पल्लीत कौशिकभाषावत्, सत्यामृषा वा यथा दश दारका जाता इत्यादिलक्षणा, मृषा च संपूर्णैव, चशब्दस्य व्यवहितः संबन्धः, या च 'बुद्धैः' तीर्थकरगणधरैरनाचित असत्यामृषा आमन्त्रण्याज्ञापन्यादिलक्षणा अविधिपूर्वकं स्वरादिना प्रकारेण, 'नैनां भाषेत' नेत्थंभूतां वाचं समुदाहरेत् 'प्रज्ञावान्' बुद्धिमान् साधुरिति सूत्रार्थः॥

*मू. ( २१६ ) असच्चामोसं सच्चं व, अनवज्जमकक्कसं।*
*समुप्पेहमसंदिद्धं, गिरं भासिज्ज पन्नवं॥*

**वृ.** यथाभूताऽवाच्या भाषा तथाभूतोक्ता, साम्प्रतं यथाभूता वाच्या तथाभूतामाह-'असच्च-मोसं'ति सूत्रम्, 'असत्यामृषाम्' उक्तलक्षणां 'सत्यां च' उक्तलक्षणामेव, इयं च सावद्यापि कर्कशापि भवत्यत आह-'असावद्याम्' अपापाम् 'अकर्कशाम्' अतिशयोक्त्या ह्यमत्सरपूर्वां 'संप्रेक्ष्य' स्वरपोपकारिणीति बुद्धयाऽऽलोच्य 'असंदिग्धां' स्पष्टामक्षेपेण प्रति-पत्तिहेतुं 'गिरं' वाचं 'भाषेत' ब्रूयात् 'प्रज्ञावान्' बुद्धिमान् साधुरिति सूत्रार्थः॥

*मू. ( २१७ ) एअं च अट्ठमन्नं वा, जं तु नामेइ सासयं।*
*स भासं सच्चमोसंपि, तंपि धीरो विवज्जए॥*

**वृ.** साम्प्रतं सत्यासत्यमृषाप्रतिषेधार्थमाह-'एअं च'त्ति सूत्रम्, 'एतं चार्थम्' अनन्तरप्रति-षिद्धं सावद्यकर्कशविषयम् 'अन्यं वा' एवंजातीयं, प्राकृतशैल्या 'यस्तु नामयति शाश्वतं' य एव कश्चिदर्थो नामयति-अननुगुणं करोति शाश्वतं-मोक्षं तमाश्रित्य 'स' साधुः पूर्वोक्तभाषा-भापकत्वेनाधिकृतो भाषां 'सत्यामृषामपि' पूर्वोक्ताम्, अपिशब्दात्सत्यापि या तथाभूता तामपि 'धीरो' बुद्धिमान् 'विवर्जयेत्' न ब्रूयादिति भावः। आह-सत्यामृषाभाषया ओघत एव प्रतिषेधा-त्तथाविधसत्यायाश्च सावद्यत्वेन गतार्थं सूत्रमिति, उच्यते, मोक्षपीडाकरं सूक्ष्ममप्यर्थमङ्गीकृत्यान्तर भाषा भाषणमपि न कर्तव्यमित्यतिशयप्रदर्शनपरमेतददुष्टमेवेति सूत्रार्थः॥

*मू. ( २१८ ) वितहंपि तहामुत्तिं, जं गिरं भासए नरो।*
*तम्हा सो पुट्ठो पावेणं, किं पुणं जो मुसं वए ?॥*

**वृ.** साम्प्रतं मृषाभाषासंरक्षणार्थमाह-'वितहंपि'त्ति सूत्रं, 'वितथम्' अतथ्यं 'तथामूर्त्यपि'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथंचित्तत्स्वरूपमपि वस्तु, अपिशब्दस्य व्यवहितः संबन्धः, एतदुक्तं भवतिपुरुषनेपथ्यस्थितवनिताद्यप्यङ्गीकृत्य याकगिरं भाषते नरः, इयं स्त्री आगच्छति गायति वेत्यादिरूपां, 'तस्माद्' भाषणादेवंभूतात्पूर्वमेवासौ वक्ता भाषणाभिसंधिकाले 'स्पृष्टः पापेन' बद्धः कर्मणा, किं पुनर्यो मृषा वक्ति भूतोपधातिनीं वाचं ?, स सुतरां बद्धयत इति सूत्रार्थः ॥

*मू. ( २९९ ) तम्हा गच्छामो वक्खामो, अमुगं वा ने भविस्सइ।*
*अहं वा नं करिस्सामि, एसो वा नं करिस्सइ ॥*

**वृ.** 'तम्ह'त्ति सूत्रं, यस्माद्वितथं तथामूर्त्यपि वस्त्वङ्गीकृत्य भाषमाणो बुद्धयेत तस्माद्गमिष्याम एव श्व इतोऽन्यत्र, वक्ष्याम एव श्वस्तत्तदौषधनिमित्तमिति, अमुकं वा नः कार्यं वसत्यादि भविष्यत्येव, अहं चेदं लोचादि करिष्यामि नियमेन, एष वा साधुरस्माकं विश्रामणादि करिष्यत्येवेति सूत्रार्थः ॥

*मू. ( ३०० ) एवमाइ उ जा भासा, एसकालंमि संकिआ।*
*संपयाइअमट्ठे वा, तंपि धीरो विवज्जए ॥*

**वृ.** 'एवमाइ'त्ति सूत्रम्, एवमाद्या तु या भाषा, आदिशब्दात् पुस्तकं ते दास्याम्येवेत्येवमादिपरिग्रहः, 'पुष्यत्काले' भविष्यत्कालविषया, बहुविघ्नत्वात् मुहूर्तादीनां 'शङ्किता' किमिदमित्थमेव भविष्यत्युतान्यथेत्यनिश्चितगोचरा, तथा साम्प्रतातीतार्थयोरपि या शङ्किता, साम्प्रतार्थे स्त्रीपुरुषाविनिश्चये एष पुरुष इति, अतीतार्थेऽप्येवमेव बलीवर्दतत्स्त्र्याद्यनिश्चये तदाऽत्र गौरस्माभिर्दष्ट इति। याप्येवंभूता भाषा शङ्किता तामपि धीरो विवर्जयेत्, तत्तथाभावनिश्चयाभावेन व्यभिचारतो मृषात्वोपपत्तेः, विघ्नतोऽगमनादौ गृहस्थमध्ये लाघवादिप्रसङ्गात्, सर्वमेव सावसरं वक्तव्यमिति सूत्रार्थः ॥

*मू. ( ३०१ ) अईअंमि अ कालंमि, पच्चुप्पन्नमनागए।*
*जमट्ठं तु न जाणिज्जा, एवमेअंति नो वए।*

**वृ.** 'अईयंमि'त्ति सूत्रं, अतीते च काले तथा 'प्रत्युत्पन्ने' वर्तमानेऽनागते च यमर्थं तु न जानीयात् सम्यगेवमयमिति, तमङ्गीकृत्य एवमेतदिति न ब्रूयादिति सूत्रार्थः ।

*मू. ( ३०२ ) अईअंमि अ कालंमि, पच्चुप्पन्नमनागए।*
*जत्थ संका भवे तं तु, एवमेअं ति नो वए।*

**वृ.** तथा-'अईयम्मि'त्ति सूत्रं, अतीते च काले प्रत्युत्पन्नेऽनागते यत्रार्थे शङ्का भवेदिति तमप्यर्थमाश्रित्यैवमेतदिति न ब्रूयादिति सूत्रार्थः, अयमपि विशेषतः शङ्कितभाषणप्रतिषेधः ॥

*मू. ( ३०३ ) अईयंमि अ कालंमि, पच्चुप्पन्नमनागए।*
*निस्संकिअं भवे जं तुं, एवमेअं तु निद्दिसे ॥*

**वृ.** तथा-'अईयंमि'त्ति सूत्रं, अतीते च काले प्रत्युत्पन्नेऽनागते निःशङ्कितं भवेत्, यदर्थजातं तुशब्दादनवद्यं, तदेवमेतदिति निर्दिशेत्, अन्ये पठन्ति-'स्तोकस्तोक'मिति, तत्र परिमितया वाचा निर्दिशेदिति सूत्रार्थः ॥

*मू. ( ३०४ ) तहेव फरुसा भासा, गुरुमूओवधाइणी।*
*सच्चावि सा न वत्तव्वा, जओ पावस्स आगमो ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'तहेव'त्ति सूत्रं, तथैव 'परुषा भाषा' निष्ठुरा भावस्नेहरहिता 'गुरुभूतोपघातिनी' महाभूतोपघातवती, यथा कश्चित्कस्यचित् कुलपुत्रतवेन प्रतीतस्तदा तं दासमित्यभिदधतः, सर्वथा सत्यापि सा बाह्यार्थातथाभावमङ्गीकृत्य न वक्तव्या, 'यतो' यस्या भाषायाः सकाशात् 'पापस्यागमः' अकुशलबन्धो भवतीति सूत्रार्थः ॥

मू. (३०५) *तहेव काणं काणे त्ति, पंडगं पंडगे त्ति वा ।*
*वाहिअं वा वि रोगिति, तेणं चोरे त्ति नो वा ।*

वृ.'तहेव'त्ति सूत्रं, तथैवेति पूर्ववत्, 'काणं'ति भिन्नाक्षं काण इत्ति, तथा 'पण्डकं' नपुंसकं पण्डक इति वा, व्याधिमन्तं वापि रोगीति, स्तेनं चौर इति नो वदेत्, अप्रीतिलज्जानाश-स्थिररोगबुद्धिविराधनादिदोषप्रसङ्गादिति गाथार्थः ॥

मू. (३०६) *एएणऽन्नेण अट्ठेणं, परो जेणुवहम्मइ ।*
*आयारभावदोसन्नू, न तं भासिज्ज पन्नवं ॥*

वृ. 'एएण'त्ति सूत्रं, एतेनान्येन वाऽर्थेनोक्तेन सता परो येनोपहन्यते, येन केनचित्प्रका-रेणे । आचारभावदोषज्ञो यतिर्न तं भाषेत प्रज्ञावांस्तमर्थमिति सूत्रार्थः ॥

मू. (३०७) *तहेव होले गोलित्ति, साणे वा वसुलित्ति अ ।*
*दमए दुहुए वावि, नेवं भासिज्ज पन्नवं ॥*

वृ. 'तहेव'त्ति सूत्रं, तथैवेति पूर्ववत्, होलो गोल इति श्वा वा वसुल इति वा द्रमको वा दुर्भगश्चापि नैवं भाषेत प्रज्ञावान् । इह होलादिशब्दास्तत्तद्देशप्रसिद्धितो नैष्ठुर्यादिवाचकाः अतस्त-त्प्रतिषेध इति सूत्रार्थः ॥

मू. (३०८) *अज्जिए पज्जिए वावि, अम्मो माउसिअत्ति अ ।*
*पिउस्सिए भायणिज्जत्ति, धूए नत्तुनिअत्ति अ ॥*

वृ. एवं स्त्रीपुरुषयोः सामान्येन भाषणप्रतिषेधं कृत्वाऽधुना स्त्रियमधिकृत्याह-'अज्जिए'-त्ति सूत्रं, आर्जिके प्रार्जिके वापि अम्बमातृष्वस इति च पितृष्वसः भागिनेयीति दुहितः नप्त्रीति च । एतान्यामन्त्रणवचनानि वर्तन्ते, तत्र मातुः पितुर्वा माताऽऽर्यिका, तस्या अपि याऽन्या माता सा प्रार्यिका, शेषाभिधानानि प्रकटार्थान्येवेति सूत्रार्थः ॥

मू. (३०९) *हले हलित्ति अन्नित्ति, भट्टे सामिणि गोमिणि ।*
*होले गोले वसुलित्ति, इत्थिअं नेवमालवे ॥*

वृ. किं च -'हले हले'त्ति सूत्रं, हले हले इत्येवमन्रे इत्येवं तथा भट्ट स्वामिनि गोमिनि । तथा होले गोले वसुले इति, एतान्यपि नानादेशापेक्षया आमन्त्रणवचनानि गौरव-कुत्सादिगर्भाणि वर्तन्ते, यतश्चैवमतः स्त्रियं नैवं हलादिशब्दैरालपेदिति, दोषाश्चैवमालपनं कुर्वतः सङ्गगर्हातत्प्र-द्वेषप्रवचनलाघवादय इति सूत्रार्थः ॥

मू. (३१०) *नामधिज्जेण नं बूआ, इत्थीगुत्तेण वा पुणो ।*
*जहारिहमभिगिज्झ, आलविज्ज लविज्ज वा ॥*

वृ.यदि नैवमालपेत् कथं तर्ह्यालपेदित्याह-'नामाधिज्जेणं'ति सूत्रं, 'नामधेयेने'ति नाम्नैव एनां ब्रूयात्स्त्रियं क्वचित्कारणे यथा देवदत्ते ! इत्येवमादि ! नामास्मरणादौ गोत्रेण वा पुनर्ब्रूयात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रियं यथा काश्यपगोत्रे ! इत्येवमादि, 'यथार्हं' यथायथं वयोदेशैश्वर्याद्यपेक्षया 'अभिगृह्य' गुणदोषानालोच्य 'आलपेल्लपेद्वा' ईषत्सकृद्धा लपनमालपनमतोऽन्यथा लपनं, तत्र वयोवृद्धा मध्यदेशे ईश्वरा धर्मप्रियाऽन्यत्रोच्यते धर्मशीले इत्यादिना, अन्यथा च यथा न लोकोपघात इति।

*मू. ( ३११ )* *अज्जए पज्जए वावि, बप्पो चुल्लपिउत्ति अ।*
*माउलो भाइणिज्ज त्ति, पुत्ते नत्तुनिअत्ति अ॥*

वृ. उक्तः स्त्रियमधिकृत्यालपनप्रतिषेधो विधिश्च, साम्प्रतं पुरुषमाश्रित्याह'अज्जए'त्ति सूत्रं, आर्यकः प्रार्यकश्चापि बप्पश्चल्लुपितेति च, तथा मातुल भागिनेयेति पुत्र नप्त इति च, इह भावार्थः स्त्रियामिव द्रष्टव्यः, नवरं चुल्लबप्पः पितृव्योऽभिधीयते इति सूत्रार्थः ॥

*मू. ( ३१२ )* *हे भो हलित्ति अन्नित्ति, भट्टे सामिअ गोमिअ।*
*होल गोल वसुलि त्ति, पुरिसं नेवामालवे॥*

वृ. किंच-'हे भो'त्ति सूत्रं, हे भो हलेति। अन्नेत्ति भर्तः। स्वामिन् गोमिन् होल गोल वसुल इति पुरुषं नैवमालपेदिति, अत्रापि भावार्थः पूर्ववदेवेति सूत्रार्थः ॥

*मू. ( ३१३ )* *नामधिज्जेण नं बूआ, पुरिसगुत्तेण वा पुणो।*
*जहारिहमभिगिज्झ, आलविज्ज लविज्ज वा॥*

वृ. यदि नैवमालपेत्, कथं तर्ह्यालपेदित्याह-'नामधिज्जेण'त्ति सूत्रं, व्याख्या पूर्ववदेव, नवरं पुरुषाभिलापेन योजना कार्येति ॥

*मू. ( ३१४ )* *पंचिंदिआण पाणाणं, एस इत्थी अयं पुमं।*
*जाव नं न विजाणिज्जा, ताव जाइत्ति आलवे।*

वृ.उक्तः पुरुषमप्याश्रित्यालपनप्रतिषेधो विधिश्च, अधुना पञ्चेन्द्रियतिर्यग्गतं वाग्विधिमाह-

'पंचिंदिआण'त्ति सूत्रं, 'पञ्चेन्द्रियाणां' गवादीनां प्राणिनां 'कचिद्' विप्रकृष्टदेशावस्थितानामेषा स्त्री गौरयं पुमान् बलीवर्दः, यावदेतद्विशेषेण न विजानीयात् तावन्मार्गप्रश्नादौ प्रयोजने उत्पन्ने सति 'जाति'मिति जातिमाश्रित्यालपेत्, अस्माद्गोरूपजातात्कियद्दूरेणेत्येवमादि, अन्यथाअ लिङ्गव्यत्ययसंभवान्मृषावादापत्तिः, गोपालादीनामपि विपरिणाम इत्येवमादयो दोषाः आक्षेपपरिहारौ तु वृद्धविवरणादवसेयौ, तच्चेदम्-जइ लिंगवच्चए दोसो ता कीस पुढवादि नपुंसगत्तेवि पुरिसित्थिनिद्देसो पयट्टइ, जहा पत्थरो मट्टिआ करओ उस्सा मुम्मरो जाला वाओवाउली अंबओ अंबिलिआ किमिओ जलूया मक्कोडाओ कीडिआ भमरओ मच्छिया इच्चेवमादि ?, आयरिओ आह-जनवयसच्चेण ववहारसच्चेण य एवं पयट्टइत्ति न एत्थ दोसो, पंचिंदिएसु पुन न एयमंगीकीरइ, गोवालादीणवि न सुदिट्ठधम्मत्ति विपरिणा-मसंभवाओ, पुच्छिअसाभायारिकहणे वा गुणसंभवादिति इति सूत्रार्थः ॥

*मू. ( ३१५ )* *तहेव मानुसं पसुं, पक्खि वावि सरीसवं।*
*थूले पमेइले वज्झे, पायमित्ति अ नो वए॥*

वृ.किंच-'तहेव'त्ति सूत्रं, 'तथैव' यथोक्तं प्राक् 'मनुष्यम्' आर्यादिकं 'पशुम्' अजादिकं 'पक्षिणं वापि' हंसादिकं 'सरीसृपम्' अजगरादिकं 'स्थूलः' अत्यन्तमांसलोऽयं मनुष्यादिः तथा 'प्रमेदुरः' प्रकर्षेण भेदःसंपन्न तथा 'वध्यो' व्यापादनीयः पाक्य इति च नो वदेत्, 'पाक्यः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाकप्रायोग्यः, कालप्राप्त इत्यन्ये, 'नो वदेत्' न ब्रूयात् तदप्रीतितदव्यापत्त्याशङ्कादिदोष-प्रसङ्गादिति सूत्रार्थः ॥

*मू. (३१६) परिवूढत्ति नं बूआ, बूआ उवचिअत्ति अ।*
*संजाए पीणिए वावि, महाकायत्ति आलवे ॥*

**वृ.** कारणे पुनरुत्पन्न एवं वदेदित्याह-'परिवूढ'त्ति सूत्रं, परिवृद्ध इत्येनंस्थूलं मनुष्यादिं ब्रूयात्, तथा ब्रूयादुपचित इति च, संजातः प्रीणितश्चापि महाकाय इति चालपेत् परिवृद्धं, पलोपचित्तं परिहरेदित्यादाविति सूत्रार्थः ॥

*मू. (३१७) तहेव गाओ दुज्झाओ, दम्मा गोरहगत्ति अ।*
*वाहिमा रहजोगित्ति, नेवं भासिज्ज पन्नवं।*

**वृ.** किं च -'तहेव'त्ति सूत्रं, तथैव गावो 'दोह्या' दोहार्हा दोहसमय आसां वर्तत इत्यर्थः, 'दम्या' दमनीया गोरथका इति च, गोरथकाः कल्होडाः, तथा वाह्याः सामान्येन ये कचित्ताना-श्रित्य रथयोग्याश्चे इति नैवं भाषेत प्रज्ञावान् साधुः, अधीकरणलाघवादिदोषादिति सूत्रार्थः ॥

*मू. (३१८) जुवं गवित्ति नं बूआ, धेनुं रसदयत्ति अ।*
*रहस्से महल्लए वावि, वए संवहनित्ति अ ॥*

**वृ.** प्रयोजने तु क्वचिदेवं भाषेतेत्याह-जुवं ति सूत्रं, युवा गौरिति-दम्यो गौर्युवेति ब्रूयात्, धेनुं गां रसदेति ब्रूयात्, रसदा गौरिति, तथा ह्रस्वं महल्लकं वापि गोरथकं ह्रस्वं वाह्यं महल्लकं वदेत्, संवहनमिति रथयोग्यं संवहनं वदेत्, क्वचिद्दिगुपलक्षणादौ प्रयोजन इति सूत्रार्थः ॥

*मू. (३१९) तहेव गंतुमुज्जाणं, पव्वायणि वणाणि अ।*
*रुक्खा महल्ल पेहाए, नेवं भासिज्ज पन्नं ॥*

**वृ.** 'तहेव'त्ति सूत्रं, 'तथैवे'ति पूर्ववत्, गत्वा 'उद्यानं' जनक्रीडास्थानं तथा पर्वतान् प्रतीतान् गत्वा तथा वनानि च, तत्र वृक्षान् 'महतो' महाप्रमाणान् 'प्रेक्ष्य' दृष्ट्वा नैवं भाषेत 'प्रज्ञावान्' साधुरिति सूत्रार्थः ॥

*मू. (३२०) अलं पासायखंभाणं, तोरणाण गिहाण अ।*
*फलिहऽग्गलनावाणं, अलं उदगदोणिणं ॥*

**वृ.** किमित्याह-'अलं'ति सूत्रं, 'अलं' पर्याप्ता एते वृक्षाः प्रासादस्तम्भयोः, अत्रैकस्तम्भः प्रासादः, स्तम्भस्तु स्तंभ एव, तयोरलम्, तथा 'तोरणानां' नगरतोरणादीनां 'गृहाणां च' कुटीर-कादीनाम्, अलमिति योगः, तथा 'परिघार्गलानावां वा' तत्र नगरद्वारे परिघः गोपुर-कपाटा-दिष्वर्गला नौः प्रतीतेति आसामलभेते वृक्षाः, तथा उदकद्रोणीनां अलम्, उदकद्रोण्योऽरह-ट्टजलधारिका इति सूत्रार्थः ॥

*मू. (३२१) पीढए चंगबेरे अ, नंगले मइयं सिआ।*
*जंतलट्ठी व नाभी वा, गंडिआ व अलं सिआ ॥*

**वृ.** तथा 'पीढए'त्ति सूत्रं, पीठकायालमेते वृक्षाः, पीठकं प्रतीतं तदर्थम्, 'सुपां सुपो भवन्ती'ति चतुर्थ्यर्थे प्रथमा, एवं सर्वत्र योजनीयं, तथा 'चंगबेरा ये'ति चङ्गबेराकाष्ठापात्री तथा 'नंगले'त्ति लाङ्गलं-हलं, तथा अलं मयिकाय स्यात्, मयिकम्-उप्तबीजाच्छादानं, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्त्रयष्टये वा, यन्त्रयष्टिः प्रतीता, तथा नाभये वा, नाभिः शकटरथाङ्ग, गण्डिकायै वाऽलं स्युरेते वृक्षा इति, नैवं भाषेत प्रज्ञावानिति वर्तते, गण्डिका सुवर्णकाराणामधिकरणी (अहिगरणी) स्थापनी भवतीति सूत्रार्थः ॥

*मू. ( ३२२ ) आसनं सयनं जाणं, हुज्जा वा किंचुवस्सए।*
*भूओवघाइणिं भासं, नेवं भासिज्ज पन्नवं ॥*

**वृ.** तथा 'आसनं'ति सूत्रं, 'आसनम्' आसन्दकादि 'शयनं' पर्यङ्कादि 'यानं' युग्यादि भवेद्वा किञ्चदुपाश्रये-वसतावन्यद्-द्वारपात्राद्येतेषु वृक्षेष्विति 'भूतोपघातिनीं' सत्त्वपीडाकारिणीं भाषां नैव भाषेत प्रज्ञान् साधुरिति सूत्रार्थः ॥ दोषाश्चात्र तद्वनस्वामी व्यन्तरादिः कुप्येत्, सलक्षणो वा वृक्ष इत्यभिगृह्णीयात्, अनियमितभाषिणो लाघवं चेत्येवमादयो योज्याः ॥

*मू. ( ३२३ ) तहेव गंतुमुज्जाणं, पव्वयाणि वनानि अ।*
*रुक्खा महल्ल पेहाए, एवं भासिज्ज पन्नवं ॥*

**वृ.** अत्रैव विधिमाह-'तहेव'त्ति सूत्रं, वस्तुतः पूर्ववदेव, नवरमेवं भाषेत ॥

*मू. ( ३२४ ) जाइमंता इमे रुक्खा, दीहवट्टा महालया।*
*पयायसाला विडिमा, वए दरिसणित्ति अ।*

**वृ.** 'जाइमंत'त्ति सूत्रं, 'जातिमन्तः' उत्तमजातयोऽशोकादयः अनेकप्रकारा 'एत' उपलभ्यमानस्वरूपया वृक्षा 'दीर्घवृत्ता महालयाः' दीर्घा नालिकेरीप्रभृतयः वृत्ता नन्दिवृक्षादयः महालया वटादयः 'प्रजातशाखा' उत्पन्नडाला 'विटपिनः' प्रशाखावन्तो वदेद्दर्शनीया इति च। एतदपि प्रयोजन उत्पन्ने विश्रमणतदासन्नमार्गकथनादौ वदेन्नान्यदेति सूत्रार्थः ॥

*मू. ( ३२५ ) तहा फलाइं पक्काइं, पायखज्जाइं नो वए।*
*वेलोइयाइं टालाइं, वेहिमाइ त्ति नो वए।*

**वृ.** 'तहा फलाणि'त्ति सूत्रं, तथा 'फलानि' आम्रफलादीनि 'पक्वानि' पाकप्राप्तानि तथा 'पाकस्वाद्यानि' बद्धास्थीनीति गर्तप्रक्षेपकोद्रवपलालादिना विपाच्य भक्षणयोग्यानीति नो वदेत्। तथा 'वेलोचितानि' पाकातिशयतो ग्रहणकालोचितानि, अतः परं कालं न विषहन्तीत्यर्थः, 'टालानि' अबद्धास्थीनि कोमलानीति तदुक्तं भवति, तथा 'द्वैधिकानी'त्ति पेशीसंपादनेन द्वैधीभावकरणयोग्यानीति नो वदेत्। दोषाः पुनरत्रात ऊर्ध्वं नाश एवामीषां न शोभनानि वा प्रकारान्तर भोगेनेत्यवधार्य गृहिप्रवृत्तावधिकरणादय इति सूत्रार्थः ॥

*मू. ( ३२६ ) असंथडा इमे अंबा, बहुनिव्वडिमाफला।*
*वइज्ज बहुसंभूआ, भूअरूवत्ति वा पुणो ॥*

**वृ.** प्रयोजने पुनर्मार्गदर्शनादावेवं वदेदित्याह-'असंथड'त्ति सूत्रं, असमर्था 'एते' आम्राः, अतिभरेण न शक्नुवन्ति फलानि धारयितुमित्यर्थः, आम्रग्रहणं प्रधानवृक्षोपलक्षणम्, एतेन पक्वार्थ उक्तः, तथा 'बहुनिर्वर्त्तितफलाः' बहूनि निर्वर्त्तितानि-बद्धास्थीनि फलानि येषु ते तथा, अनेन पाकखाद्यार्थ उक्तः, वदेद् 'बहुसंभूताः' बहूनि संभूतानि-पाकातिशयतो ग्रहणकालोचितानि फलानि येषु ते तथा, अनेन वेलोचितार्थ उक्तः, तथा भूतरूपा इति वा पुनर्वदेत्, भूतानि रूपाणी-अबद्धास्थीनि कोमलफलस्वरूपाणि येषु ते तथा, अनेन टालद्यर्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलक्षित इति सूत्रार्थः ॥

*मू. ( ३२७ ) तहेवोसहिओ पक्काओ, नीलिआओ छवीइ अ।*
*लाइमा भज्जिमाउत्ति, पिहुखज्ज त्ति नो वए ॥*

**वृ.** 'तहेव'त्ति सूत्रं, तथा 'ओषधयः' शाल्यादिलक्षणः, पक्वा इति, तथा नीलाश्छवय इति वा वल्लचवलकादिफललक्षणाः तथा 'लवनवत्यो' लवनयोग्याः 'भर्जनवत्य' इति भर्जन-योग्याः तथा 'पृथकभक्ष्या' इति पृथुकभक्षणयोग्याः, नो वदेदिति सर्वत्राभिसंबध्यते, पृथुका अर्धपक्वशाल्यादिषु क्रियन्ते, अभिधानदोषाः पूर्ववदिति सूत्रार्थः ॥

*मू. ( ३२८ ) रूढा बहुसंभूआ, थिरा ओसढावि अ।*
*गब्भिआओ पसूआओ, संसाराउत्ति आलवे ॥*

**वृ.**प्रयोजने पुनर्मार्गदर्शनादावेवमालपेदित्याह-'रूढ'त्ति सूत्रं, 'रूढाः' प्रादुर्भूताः 'बहुसंभूता' निष्पन्नप्रायाः 'स्थिरा' निष्पन्नाः 'उत्सृता' इति उपघातेभ्यो निर्गता इति वा, तथा 'गर्भिता' अनिर्गतशीर्षकाः 'प्रसूता' निर्गतशिर्षकाः 'प्रसूता' निर्गतशीर्षकाः 'संसाराः' संजाततन्दुलादि-सारा इत्येवमालपेत्, पक्वाद्यर्थयोजना स्वधिया कार्येति सूत्रार्थः ॥

*मू. ( ३२९ ) तहेव संखडिं नच्चा, किच्चं कज्जंति नो वए।*
*तेनगं वावि वज्झित्ति, सुतित्थित्ति अ आवगा ॥*

**वृ.**वाग्विधिप्रतिषेधाधिकारेऽनुवर्तमान इदमपरमाह-'तहेव'त्ति सूत्रं, तथैव 'संखडिं ज्ञात्वा' संखण्डयन्ते प्राणिनामायूंषि यस्यां प्रकरणक्रियायां सा संखडी तां ज्ञात्वा, 'करणीये'ति पित्रा-दिनिमित्तं कृत्यैवैषेति नो वदेत्, मिथ्यात्वोपबृंहणदोषात्, तथा स्तेनकं वापि वध्य इति नो वदेत्, तदनुमतत्वेन निश्चयादिदोषप्रसङ्गात्, सुतीर्था इति च, चशब्दादुस्तीर्था इति वा 'आपगा' नद्यः केनचित्पृष्टाः सन्नो वदेत्, अधिकरणविधातादिदोषप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ३३० ) संखडिं संखडिं बूआ, पणिअट्ठ त्ति तेनगं।*
*बहुसमाणि तित्थाणि, आवगाणं विआगरे ॥*

**वृ.**प्रयोजने पुनरेवं वदेदित्याह-'संखडि'न्ति सूत्रं, संखडिं संखडिं ब्रूयात्, साधुकथनादौ संकीर्णा संखडीत्येवमादि, पणितार्थ इति स्तेनकं वदेत्, शैक्षकादिकर्मविपाकदर्शनादौ, पणि-तेनार्थोऽस्येति पणितार्थः, प्राणद्यूतप्रयोजन इत्यर्थः, तथा बहुसमानि तीर्थानि 'आपगानां' नदीनां व्यागृणीयात् साध्वादिविषय इति सूत्रार्थः ॥

*मू. ( ३३१ ) तहा नईओ पुण्णाओ, कायतिज्जत्ति नो वए।*
*नावाहिं तारिमाउत्ति, पाणिपिज्जत्ति नो वए ॥*

**वृ.** वाग्विधिप्रतीषेधाधिकार एवेदमाह-'तहा नईउ'त्ति सूत्रं, तथा नद्यः 'पूर्णा' भृता इति नो वदेत्, प्रवृत्तश्रवणनिवर्त्तनादिदोषात्, तथा 'कायतरणीयाः' शरीरतरणयोग्या इति नो वदेत्, साधुवचनतोऽविघ्नमिति प्रवर्त्तनादिप्रसङ्गात्, तथा नौभिः-द्रोणीभिस्तरणीयाः-तरणयोग्या इत्येवं नो वदेत्, अन्यथा विघ्नशङ्कया तत्प्रवर्त्तनात्, तथा 'प्राणिपेयाः' तटस्थप्राणिपेया नो वदेदिति, तथैव प्रवर्तनादिदोषादिति सूत्रार्थः ॥

*मू. ( ३३२ ) बहुवाहडा अगाहा, बहुसलिलुप्पिलोदगा।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*बहुवित्थडोदगा आवि, एवं भासिज्ज पन्नवं ॥*

**वृ.**प्रयोजने तु साधुमार्गकथनादावेवं भाषेतेत्याह- 'बहुवाहड' त्ति सूत्रं, बहुभृता: प्रायशो भृता इत्यर्थ:, तथा 'अगाधा' इति बह्वगाधा: प्रायोगम्भीरा:, तथा 'बहुसलिलोत्पीलोदका:' प्रतिस्रोतोवाहितापरसरित इत्यर्थ:, तथा 'विस्तीर्णोदकाश्च' स्वतीरफ्लावनप्रवृत्तजलाश्च, एवं भाषेत प्रज्ञावान् साधु:, न तु तदाऽऽगतपृष्टो न वेद्म्यहमिति ब्रूयात्, प्रत्यक्षमृषावादित्वेन तत्प्रद्वेषादिदोषप्रसङ्गादिति सूत्रार्थ: ॥ वाग्विधिप्रतिषेधाधिकार एवेदमाह-

**मू. ( ३३३ )** *तहेव सावज्जं जोगं, परस्सट्ठा अ निट्ठिअं ।*
*कीरमाणंति वा नच्चा, सावज्जं न लवे मुणी ॥*

**वृ.**तहेव' त्ति सूत्रं, तथैव 'सावद्यं' सपापं 'योगं' व्यापारमधिकरणं सभादिविषयं 'परस्यार्थाय' परनिमित्तं 'निष्ठितं' निष्पन्नं तथा 'क्रियमाणं वा' वर्त्तमानं वाशब्दाद्भविष्यत्कालभाविनं वा ज्ञात्वा 'सावद्यं नालपेत्' सपापं न ब्रूयात् 'मुनि:' साधुरिति सूत्रार्थ: ॥

**मू. ( ३३४ )** *सुकडित्ति सुपक्कित्ति, सुच्छिन्ने सुहडे मडे ।*
*सुनिट्ठिए सुलट्ठित्ति, सावज्जं वज्जए मुनी ॥*

**वृ.** तत्र निष्ठितं नैवं ब्रूयादित्याह-'सुकडि' त्ति सूत्रं, 'सुकृत' मिति सुष्ठु कृतं सभादि 'सुपक्क' मिति सुष्ठु पक्कं सहस्रपाकादि 'सुच्छिन्न' मिति सुष्ठु छिन्नं तद्वनादि 'सुहृत' मिति सुष्ठु हृतं क्षुद्रस्य वित्तं 'सुमृत' इति सुष्ठु मृत: प्रत्यनीक इति, अत्रापि सुशब्दोऽनुवर्तते, 'सुनिष्ठित' मिति सुष्ठु निष्ठितं वित्ताभिमानिनो वित्तं 'सुलट्ठि' त्ति सुष्ठु सुन्दरा कन्या इत्येवं सावद्यमालपनं वर्जयेद् मुनि:, अनुमत्यादिदोषप्रसङ्गात्, निरवद्यं तु न वर्जयेत्, यथा-'सुकृत' मिति सुष्ठु कृतं वैयावृत्त्यमनेन 'सुपक्व' मिति सुष्ठु पक्वं ब्रह्मचर्यं साधो: 'सुच्छिन्न' मिति सुष्ठु छिन्नं स्नेहबन्धनमनेन, 'सुहृत' मिति सुष्ठु हृतं शिक्षकोपकरणमुपसर्गे 'सुमृत' इति सुष्ठु मृत: पण्डितमरणेन साधुरिति, अत्रापि सुशब्दोऽनुवर्तते, 'सुनिष्ठित' मिति सुष्ठु निष्ठितं कर्माप्रमत्तसंयतस्य 'सुलट्ठ' त्ति सुष्ठु सुन्दरा साधुक्रियेत्येवमादीति सूत्रार्थ: ॥

**मू. ( ३३५ )** *पयत्तपक्कत्ति व पक्कमालवे, पयत्तछिन्नत्ति व छिन्नमालवे ।*
*पयत्तलट्ठित्ति व कम्महेउअं, पहारगाढत्ति व गाढमालवे ॥*

**वृ.**उक्तानुक्तापवादविधिमाह-'पयत्त' त्ति सूत्रं, 'प्रयत्नपक्व' मिति वा प्रयत्नक्वमेतत् 'पक्वं' सहस्रपाकादि ग्लानप्रयोजन एवमालपेत् तथा 'प्रयत्नच्छिन्न' मिति वा प्रयत्नच्छिन्नमेतत् 'छिन्नं' वनादि साधुनिवेदनाद्रौ एवमालपेत् तथा 'प्रयत्नलष्टे' ति वा प्रयत्नसुन्दरा कन्या दीक्षिता सती सम्यक् पालनीयेत 'कर्महेतुक' मिति सर्वमेव वा कृतादि कर्मनिमित्तमालपेदिति योग:, तथा 'गाढप्रहार' मिति वा कञ्चन गाढमालपेत्-गाढप्रहारं ब्रूयात् क्वचित्प्रयोजने, एवं हि तदप्रीत्यादयो दोषा: परिहृता भवन्तीति सूत्रार्थ: ॥

**मू. ( ३३६ )** *सव्वुक्कसं परग्घं वा, अउलं नत्थि एरिसं ।*
*अविक्किअमवत्तव्वं, अचिअतं चेव नो वए ॥*

**वृ.**क्वचिद्व्यवहारे प्रक्रान्ते पृष्टोऽपृष्टो वा नैवं ब्रूयादित्याह-'सव्वुक्कसं' ति सूत्रं, एतन्मध्य इदं 'सर्वोत्कृष्टं' स्वभावेन सुन्दरमित्यर्थ:, 'परार्धं वा' उत्तमार्धं वा महार्घं क्रीतमिति भाव:

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतुलं नास्तीदृशमन्यत्रापी कचित्, 'अविक्किअं'ति असंस्कृतं सुलभमीदृशमन्यत्रापि, 'अवक्तव्य'मित्यनन्तगुणमेतत् अविअत्तं वा-अप्रीतिकरं चैतदिति नो वदेत्, अधिकरणान्तरयाद्रिदोषप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ३३७ ) सव्वमेअं वइस्सामि, सव्वमेअं ति नो वए।*
*अनुवीइ सव्वं सव्वत्थ, एवं भासिज्ज पन्नवं ॥*

**वृ.** किं च -'सव्वमेअं'त्ति सूत्रं, 'सर्वमेतद्वक्ष्यामी'ति केनचित् कस्यचित् संदिष्टे सर्वमेतत्त्वया वक्तव्यमिति सर्वमेतद्वक्ष्यामीति नो वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, तथा सर्वमेतदिति नो वदेत्, कस्यचित्संदेशं प्रयच्छन् सर्वमेतदित्येवं वक्तव्य इति नो वदेत्, सर्वस्य तथास्वरव्यञ्जनाद्युपेतस्य वक्तुमशक्यत्वात्, असंभवाभिधाने मृषावादः, यतश्चैवमतः 'अनुचिन्त्य' आलोच्य सर्वं वाच्यं 'सर्वत्र' कार्येषु यथा असंभवाद्यभिधानादिना मृषावादो न भवत्येवं भाषेत प्रज्ञावान् साधुरिति सूत्रार्थः ॥

*मू. ( ३३८ ) सुक्कीअं वा सुविक्कीअं, अकिज्जं किज्जमेव वा।*
*इमं गिण्ह इमं मुंच, पणीअं नो विआगरे ॥*

**वृ.** किंच-'सुक्कीअं व'त्ति सूत्रं, 'सुक्रीतं वे'त्ति किञ्चित् केनचित् क्रीतं दर्शितं सत्सुक्रीतमिति न व्यागृणीयात् इति योगः, तथा 'सुविक्रीत'मिति किञ्चित्केनचिद्विक्रीतं दृष्ट्वा पृष्टः सन् सुविक्रीतमिति न व्यागृणीयात्, तथा केनचित् क्रीते पृष्टः 'अक्रेयं' क्रयार्हमेव न भवतीति न व्यागृणीयात्, तथैवमेव 'क्रेयमेव वा' क्रयार्हमेवेति, तथा 'इदं' गुडादि गृहाणागामिनि काले महार्घं भविष्यति तथा 'इदं' मुञ्च धृताद्यागामिनी काले समर्घं भविष्यतीतिकृत्वा 'पणितं' पण्यं नैव व्यागृहणीयात्, अप्रीत्यधिकरणादिदोषप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ३३९ ) अप्पग्घे वा महग्घे वा, कए वा विक्कएवि वा।*
*पणिअट्ठे समुप्पन्ने, अनवज्जं विआगरे ॥*

**वृ.** अत्रैव विधिमाह-'अप्पग्घे व'त्ति सूत्रं, अल्पार्घे वा महार्घे वा, कस्मिन्नित्याह-क्रये वा विक्रयेऽपि वा 'पणितार्थे' पण्यवस्तुनि समुत्पन्ने केनचित्त पृष्टः सन् 'अनवद्यम्' अपापं व्यागृणीयात् यथा नाधिकारोऽत्र तपस्विनां व्यापाराभावादिति सूत्रार्थः ॥

*मू. ( ३४० ) तहेवासंजयं धीरो, आस एहि करेहि वा।*
*सय चिट्ठ वयाहित्ति, नेवं भासिज्ज पन्नवं ॥*

**वृ.** 'तहेव'त्ति सूत्रं, तथैव 'असंयतं' गृहस्थं 'धीरः' संयतः आस्वेहैव, एहीतोऽत्र, कुरु वेदं-संचयादि, तथा शेष्वनिद्रया, तिष्ठोर्ध्वस्थानेन, व्रज ग्राममितिनैवं भाषेत प्रज्ञावान् साधुरिति।

*मू. ( ३४१ ) बहवे इमे असाहू, लोए वुच्चंति साहुणो।*
*न लवे असाहु साहुत्ति, साहुं साहुत्ति आलवे ॥*

**वृ.** किंच-'बहवे'त्ति सूत्रं, बहवः 'एते' उपलभ्यमानस्वरूपा आजीवकादयः असाधवः निर्वाणसाधकयोगापेक्षया 'लोके तु' प्राणिसंघाते उच्यन्ते साधवः सामान्येन, तत्र नालपेदसाधुं साधुं, मृषावादप्रसङ्गात्, अपितु साधुं साधुमित्यालपेत्, न तु तमपि नालपेत्, उपबृंहणातिचारदोषप्रसङ्गादिति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ३४२ ) नाणदंसणसंपन्नं, संजमे अ तवे रयं।*
*एवंगुणसमाउत्तं, संजयं साहुमालवे॥*

**वृ.** किंविशिष्टं साधुं साधुमित्यालपेदित्यत आह- 'नाण'त्ति सूत्रं, ज्ञानदर्शनसंपन्नंसमृद्धं संयमे तपसि च रतं यथाशक्ति एवंगुणसमायुक्तं संयतं साधुमालपेत्, न तु द्रव्यलिङ्गधारिणमपीति सूत्रार्थः ॥

*मू. ( ३४३ ) देवाणं मनुआणं च, तिरिआणं च वुग्गहे।*
*अमुगाणं जओ होउ, मा वा होउ त्ति नो वए॥*

**वृ.** किंच- 'देवाणं'ति सूत्रं, 'देवानां' देवासुराणां 'मनुजानां' नरेन्द्रादीनां 'तिरश्चां' महिषादीनां च 'विग्रहे' संग्रामे सति 'अमुकानां' देवादीनां जयो भवतु मा वा भवत्विति नो वदेद्, अधिकरण-तत्सवाम्यादिद्वेषदोषप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ३४४ ) वाओ वुट्ठं च सीउण्हं, खेमं धायं सिवंति वा।*
*कया नु हुज्ज एआणि ?, मा वा होउ त्ति नो वए।*

**वृ.** किं च - 'वाउ'त्ति सूत्रं, 'वातो' मलयमारुतादिः, 'वृष्टं वा' वर्षणं, शीतोष्णं प्रतीतं 'क्षेमं' राजविड्वरशून्यं 'ध्रातं' सुभिक्षं 'शिव'मिति चोपसर्गरहितं कदा नु भवेयुः 'एतानि' वातादीनि, मा व भयेवुरिति धर्माद्यभिभूतो नो वदेद्, अधिकरणादिदोषप्रसङ्गाद्, वातादिषु सत्सु सत्त्वपीडापत्तेः तद्वचनतस्तथाभवनेऽप्यार्तध्यानभावादिति सूत्रार्थः ॥

*मू. ( ३४५ ) तहेव मेहं व नहं व मानवं, न देवदेवत्ति गिरं वइज्जा।*
*समुच्छिए उन्नए वा पओए, वइज्ज वा वुट्ठ बलाहय त्ति॥*

**वृ.** 'तहेव'त्ति सूत्रं, तथैव मेघं वा नभो वा मानवं वाऽऽश्रित्त्व नो देवदेवत्ति गीरं वदेत्, मेघमुन्नतं दृष्ट्वा उन्नतो देव इति नो वदेत्, एवं 'नभ' आकाशं 'मानवं' राजानं वा देवमिति नो वदेत्, मिथ्यावालाघवादिप्रसङ्गात्। कथं तर्हि वदेदित्याह-उन्नतं दृष्ट्वा संमूर्छित उन्नतो वा पयोद इति, वदेद्वा वृष्टो बलाहक इति सूत्रार्थः ॥

*मू. ( ३४६ ) अंतलिक्खत्ति नं बूआ, गुज्झाणुचरिअत्ति अ।*
*रिद्धिमंतं नरं दिस्स, रिद्धिमंतंति आलवे॥*

**वृ.** नभ आश्रित्याह- 'अंतलिक्ख'त्ति सूत्रं, इह नभोऽन्तरिक्षमिति ब्रूयादुह्यानुचरितमिति वा, सुरसेवितमित्यर्थः, एवं किल मेघोऽप्येतदुभयशब्दवाच्य एव। तथा 'ऋद्धिमन्त' संपदुपेतं नरं दृष्ट्वा, किमित्याह- 'रिद्धिमंत'मिति ऋद्धिमानयमित्येवमालपेत्, व्यवहारतो मृषावादादि-परिहारार्थमिति सूत्रार्थः ॥

*मू. ( ३४७ )तहेव सावज्जणुमोअणी गिरा, ओहारिणी जा य परोवधाइणी।*
*से कोह लोह भय हास मानवो, न हासमाणोऽवि गिरं वइज्जा॥*

**वृ.** किंच- 'तहेव'त्ति सूत्, तथैव सावद्यानुमोदिनी 'गीः' वाग् यथा सुष्ठु हतो ग्राम इति, तथा 'अवधारिणी' इदमित्थमेवेति, संशयकारिणी वा, या च परोपघातिनी यथामांसमदोषाय 'से' इति तामेवंभूतां क्रोधाल्लोभाद्भयाद्धासाद्वा, मानप्रेमादीनामुपलक्षणमेतत्, 'मानवः' पुमान् साधुर्न हसन्नपि गिरं वदेत्, प्रभूतकर्मबन्धहेतुत्वादिति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ३४८ )सवक्कसुद्धिं समुपेहिआ मुनी, गिरं च दुट्ठं परिज्जए सया।*
*मिअं अदुट्ठे अनुवीइ भासए, सयाण मज्झे लहई पसंसणं॥*

**वृ.**वाक्यशुद्धिफलमाह-'सवक्क'त्ति सूत्रं, सद्वाक्यशुद्धिं वा, सतीं शोभनां, स्वामात्मीयां, स इति वक्ता, वाक्यशुद्धिं 'संप्रेक्ष्य' सम्यग् दृष्ट्वा 'मुनिः' साधुः गिरं तु 'दुष्टां' यथोक्तलक्षणां परिवर्जयेत् सदा, किंतु 'मितं' स्वरतः परिमाणतश्च, 'अदुष्टं' देशकालोपपन्नादि 'अनुविचिन्त्य' पर्यालोच्य भाषमाणः सन् 'सतां' साधूनां मध्ये 'लभते प्रशंसनं' प्राप्नोति प्रशंसामिति।

*मू. ( ३४९ )भासाइ दोसे अ गुणे अ जाणिआ, तीसे अ दुट्ठे परिवज्जए सया।*
*छसु संजए सामणिए सया जए, वइज्ज बुद्धे हिअ मानुलोमिअं॥*

**वृ.**यतश्चैवमतः-'भासाइ'त्ति सूत्रं, 'भाषाया' उक्तलक्षणाया दोषांश्च गुणांश्च 'ज्ञात्वा' यथावदवेत्य तस्याश्च दुष्टाया भाषायाः परिवर्जकः सदा, एवंभूतः सन् षड्जीवनिकायेषु संयतः, तथा 'श्रामण्ये' श्रमणभावे चरणपरिणामगर्भे चेष्टिते 'सदा यतः' सर्वकालमुद्युक्तः सन् वदेद् बुद्धो 'हितानुलोमं' हितं-परिणामसुन्दरम् अनुलोमं-मनोहारीति सूत्रार्थः॥

*मू. ( ३५० )परिक्खभासी सुसमाहिइंदिए, चउक्कसायावगए अनिस्सिए।*
*से निद्धुणे धुन्नमलं पुरेकडं, आराहए लोगमिणं तहा परं॥ ति बेमि॥*

**वृ.**उपसंहरन्नाह-'परिक्ख'त्ति सूत्रं, 'परीक्ष्यभाषी' आलोचितवक्ता तथा 'सुसमाहितेन्द्रियः' सुप्रणिहितेन्द्रिय इत्यर्थः, 'अपगतचतुष्कषायः' क्रोधादिनिरोधकर्तेति भावः, 'अनिश्रितो' द्रव्यभावनिश्रारहितः, प्रतिबन्धविमुक्त इति हृदयम्, स इत्थंभूतो 'निर्धूय' प्रस्फोट्य 'धून्नमलं' पापमलं 'पुराकृतं' जन्मान्तरकृतं, किमिति ?-'आराधयति' प्रगुणीकरोति लोकम् 'एनं' मनुष्यलोकं वाक्यसंयतत्वेन, तथा 'पर'मिति परलोकमाराधयति निर्वाणलोकं, यथासंभवमनन्तरं पारम्पर्येण वेति गर्भः। ब्रवीमिति पूर्ववत्। नयाः पूर्ववदेव॥

अध्ययनं ७ समाप्तम्

**मुनि दीपरत्न सागरेण संशोधिता सम्पादिता दशवैकालिकसूत्रे सप्तमअध्ययनस्य भद्रबाहु स्वामि विरचिता निर्युक्तिः एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता।**

## अध्ययनं - ८ - आचारप्रणिधिः

**वृ.**व्याख्यातं वाक्यशुद्ध्यध्ययनम्, इदानीमाचारप्रणिध्याख्यामारभ्यते, अस्य चायमभिसंबन्धः इहानन्तराध्ययने साधुना वचनगुणदोषाभिज्ञेन निरवद्यवचसा वक्तव्यमित्येतदुक्तम्, इह तु तन्निरवद्यं वच आचारे प्रणिहितस्य भवतीति तत्र यत्नवता भवितव्यमित्येतदुच्यते,

"पणिहाणरहिअस्सेह, निरवज्जंपि भासिअं।
सावज्जतुल्लं विन्नेअं, अज्झत्थेणेह संवुडम्॥"

इत्यनेनाभिसंबन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्नो निक्षेपः, तत्र चाचारप्रणिधिरिति द्विपदं नाम, तत्राचारनिक्षेपमतिदिशन् प्रणिधिं च प्रतिपादयन्नाह-

**नि. [२९४]** जो पुव्विं उद्दिट्ठो आयारो सो अहीनमइरित्तो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुविहो अ होइ पणिही दव्वे भावे अ नायव्वो ॥

वृ.यः पूर्वं क्षुल्लिकाचारकथायामुद्दिष्ट आचारः सोऽहीनातिरिक्तः-तदवस्थ एवेहपि द्रष्टव्य इति वाक्यशेषः, क्षुण्णत्वान्नामस्थापने अनादृत्य प्रणिधिमधिकृत्याह- द्विविधश्च भवति प्रणिधिः, कथमित्याह-'द्रव्य' इति द्रव्यविषयो 'भाव' इति भावविषयश्च ज्ञातव्य इति गाथार्थः ।

नि. [२९५] दव्वे निहाणमाई मायपउत्ताणि चेव दव्वाणि ।
भाविंदिअनोइंदिअ दुविहो उ पसत्थ अपसत्थो ॥

वृ.'द्रव्य' इति द्रव्यविषयः प्रणिधिः निधानादि प्रणिहितं निधानं निक्षिप्तमित्यर्थः, आदिशब्दः स्वभेदप्रख्यापकः, मायाप्रयुक्तानि चेह द्रव्याणि द्रव्यप्रणिधिः, पुरुषस्य स्त्रीवेषेण पलायनादि-करणं स्त्रियो वा पुरुषवेषेणत्यादि । तथा 'भाव' इति भावप्रणिधिर्द्विविधः-इन्द्रियप्रणिधिर्नो-इन्द्रियप्रणिधिश्च, तत्रेन्द्रियप्रणिधिर्द्विविधः-प्रशस्तोऽप्रशस्तश्चेति गाथार्थः ॥

नि. [२९६] सद्देसु अ रूवेसु अ गंधेसु रसेसु तह य फासेसु ।
नवि रज्जइ न वि दुस्सइ एसा खलु इंदिअप्पणिही ॥

वृ.शब्देषु च रूपेषु च गन्धेषु रसेषु तथा च स्पर्शेषु एतेष्विन्द्रियार्थेष्विष्टानिष्टेषु चक्षुरादि-भिरिन्द्रियैर्नापि रज्यते नापि द्विष्यते एष खलु माध्यस्थ्यलक्षण इन्द्रियप्रणिधिः प्रशस्त इति गाथार्थः, अन्यथा त्वप्रशस्तः, तत्र दोषमाह-

नि. [२९७] सोइंदिअरस्सीहि उ मुक्काहिं सद्दमुच्छिओ जीवो ।
आइअइ अनाउत्तो सद्दगुणसमुट्ठिए दोसे ॥

वृ.'श्रोत्रेन्द्रियरश्मिभिः' श्रोतेन्द्रियरज्जुभिः 'मुक्ताभिः' उच्छृङ्खलाभिः, किमित्याह-'शब्दमूर्च्छितः' शब्दगृद्धो जीवः 'आदत्ते' गृह्णात्यनुपयुक्तः सन्, कानित्याह-शब्दगुण-समुत्थितान् दोषान्-शब्द एवेन्द्रियगुणः तत्समुत्थितान् दोषान्-बन्धवधादीन् श्रोत्रेन्द्रिय-रज्जुभिरादत्त इति गाथार्थः ॥ शेषेन्द्रियातिदेशमाह-

नि. [२९८] जह एसो सद्देसु एसेव कमो उ सेसएहिं पि ।
चउहिंपि इंदिएहिं रूवे गंधे रसे फासे ॥

वृ.यथैष 'शब्देषु' शब्दविषयः श्रोत्रेन्द्रियमधिकृत्य दोष उक्तः, एष एव क्रमः 'शेषैरपि' चक्षुरादिभिश्चतुर्भिरपीन्द्रियैर्दोषाभिधाने द्रष्टव्यः, तद्यथा-चक्खिन्दिअरस्सीहि उ, इत्यादि, अत एवाह-'रूपे गन्धे रसे स्पर्शे' रूपादिविषय इति गाथार्थः ॥ अमुमेवार्थं दृष्टान्ताभिधानेनाह-

नि. [२९९] जस्स खलु दुप्पणिहिआणि इंदिआइं तवं चरंतस्स ।
सो हीरइ असहीणेहिं सारही वा तुरंगेहिं ॥

वृ. 'यस्य खल्वि'ति यस्यापि दुष्प्रणिहितानीन्द्रियाणि विश्रोतोगामीनि 'तपश्चरत' इति तपोऽपि कुर्वतः स तथाभूतो 'ह्रियते' अपनीयते इन्द्रियैरेव निर्वाणहेतोश्चरणात्, दृष्टान्तमाह-'अस्वाधीनैः' अस्ववशैः 'सारथिरिव' रथनेतेव 'तुरङ्गमैः' अश्वैरिति गाथार्थः ॥

नि. [३००] कोहं मानं मायं लोहं च महब्भयाणि चत्तारि ।
जो रुंभइ सुद्धप्पा एसो नोइंदिअप्पणिही ॥

वृ.क्रोधं मानं मायां लोभं चेत्येतेषां स्वरूपमनन्तानुबन्ध्यादिभेदभिन्नं पूर्ववत्, एत एव च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाभयानि चत्वारि, सम्यग्दर्शनादिप्रतिबन्धरूपत्वात्। एतानि यो रुणद्धि शुद्धात्मा उदयनिरोधादिना 'एष' निरोद्धा क्रोधादिनिरोधपरिणामानन्यत्वान्नोइन्द्रियप्रणिधिः, कुशलपरिणामत्वादिति गाथार्थः ॥ एतदनिरोधे दोषमाह-

**नि. [३०१]** जस्सवि अ दुप्पणिहिआ होंति कसाया तवं चरंतस्स।
सो बालतवस्सीविव गयण्हाणपरिस्समं कुणइ ॥

**वृ.** यस्यापि कस्यचिद्व्यवहारतस्विनो दुष्प्रणिहिता-अनिरुद्धा भवन्ति 'कषायाः' क्रोधादयः 'तपश्चरतः' तपः कुर्वत इत्यर्थः स बालतपस्वीव उपवासपारणकप्रभूततरारम्भको जीवो(यथा) गजस्नानपरिश्रमं करोति, चतुर्थषष्ठादिनिमित्ताभिधानतः प्रभूतकर्मबन्धोपपत्तेरिति गाथार्थः ॥ अमुमेवार्थं स्पष्टतरमाह-

**नि. [३०२]** सामान्नमनुचरंतस्स कसाया जस्स उक्कडा होंति।
मन्नामि उच्छुफुल्लं व निप्फलं तस्स सामन्नं ॥

**वृ.** 'श्रामण्यमनुचरतः' श्रमणभावमपि द्रव्यतः पालयत इत्यर्थः, कषाया यस्योत्कटा भवन्ति क्रोधादयः मन्ये इक्षुपुष्पमिव निष्फलं निर्जराफलमधिकृत्य तस्य श्रामण्यमिति गाथार्थः ॥ उपसंहरन्नाह-

**नि. [३०३]** एसो दुविहो पणिही सुद्धो जइ दोसु तस्स तेसिं च।
एत्तो पसत्थमपसत्थ लक्खणमज्झत्थनिप्फन्नं ॥

**वृ.** 'एषः' अनन्तरोदितो 'द्विविधः प्रणिधिः' इन्द्रियनोइन्द्रियलक्षणः 'शुद्धं' इति निर्दोषो भवति, यदि 'द्वयोः' बाह्याभ्यन्तरचेष्टयोः 'तस्य' इन्द्रियकषायवतः 'तेषां च' इन्द्रियकषायाणां सम्यग्योगो भवति, एतदुक्तं भवति-यदि बाह्यचेष्टायामभ्यन्तरचेष्टायां च तस्य च प्रणिधिमत इन्द्रियाणां कषायाणां च निग्रहो भवति ततः शुद्धः प्रणिधिरितरथा त्वशुद्धः, एवमपि तत्त्वनीत्याऽभ्यन्तरैव चेष्टेह गरीयसीत्याह, अत एवमपि तत्त्वे प्रशस्तं चारु, तथाऽप्रशस्तमचारु लक्षणं प्रणिधेः 'अध्यात्मनिष्पन्नम्' अध्यवसानोद्गतमिति गाथार्थः ॥ एतदेवाह-

**नि. [३०४]** मायागारवसहिओ इंदिअनोइंदिएहिं अपसत्थो।
धम्मत्था अ पसत्थो इंदिअनोइंदिअप्पणिही ॥

**वृ.** 'मायागारवसहितो' मातृस्थानयुक्त ऋद्धयादिगारवयुक्तश्चेन्द्रियनोइन्द्रिय-योर्निग्रहं करोति, मातृस्थानत ईर्यादिप्रत्युपेक्षणं द्रव्यक्षान्त्याद्यासेवनं तथा ऋद्धयादिगारवाद्वेति 'अप्रशस्त' इत्ययमप्रशस्तः प्रणिधिः। तथा धर्मार्थं प्रशस्त इति, मायागारवरहितो धर्मार्थमेवेन्द्रियनोइन्द्रियनिग्रहं करोति यः स तदभेदोपचारात् 'प्रशस्तः' सुन्दर इन्द्रियनोइन्द्रियप्रणिधिर्निर्जराफलत्वादिति गाथार्थः ॥ साम्प्रतमप्रशस्तेतरप्रणिधेर्दोषगुणानाह-

**नि. [३०५]** अट्ठविहं कम्मरयं बंधइ अपसत्थपणिहिमाउत्तो।
तं चेव खवेइ पुणो पसत्थपणिहीसमाउत्तो ॥

**वृ.** 'अष्टविधं' ज्ञानावरणीयादिभेदात् कर्मरजो 'बन्धाति' आदत्ते, क इत्याह-'अप्रशस्तप्रणिधिमायुक्तः' अप्रशस्तप्रणिधौ व्यवस्थित इत्यर्थः, तदेवाष्टविधं कर्मरजः क्षपयति पुनः, कदेत्याह-प्रशस्तप्रणिधिसमायुक्त इति गाथार्थः ॥ संयमाद्यर्थं च प्रणिधिः प्रयोक्तव्य -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. [३०६] दंसणनाणचरित्ताणि संजमो तस्स साहणट्ठाए।
पणिही पउंजिअव्वो अनायणाइं च वज्जाइं ॥

वृ. दर्शनज्ञानचारित्राणि संयमः संपूर्णः, 'तस्य' संपूर्णसंयमस्य साधनार्थं प्रणिधिः प्रशस्तः प्रयोक्तव्यः, तथा 'अनायतनानि च' विरुद्धस्थानानि वर्जनीयानि इति गाथार्थः ॥

नि. [३०७] दुप्पणिहिअजोगी पुण लंछिज्जइ संजमं अयाणंतो।
वीसत्थनिसट्ठंगोव्व कंटइल्ले जह पडंतो ॥

वृ. 'दुष्प्रणिहितयोगी पुनः' सुप्रणिधिरहितस्तु प्रव्रजित इत्यर्थः लञ्छ्यतेखण्डयते संयममजानानः संयत एवेति। दृष्टान्तमाह-विश्रब्धो निसृष्टाङ्गस्तथा अयत्नपरः कंटकवति श्वभ्रादौ यथा पतन् कुश्चिल्लञ्छ्यते तद्वदसौ संयत इति गाथार्थः ॥ व्यतिरेकमाह-

नि. [३०८] सुप्पणिहिअजोगी पुण न लिप्पई पुव्वभणिअदोसेहिं।
निद्दहइ अ कम्माइं सुक्कतणाइं जहा अग्गी ॥

वृ. 'सुप्रणिहितयोगी पुनः' सुप्रणिहितः प्रव्रजितः पुनः न लिप्यते 'पूर्वभणितदोषैः' कर्मबन्धादिभिः, संवृताश्रवद्वारत्वात्, निर्दहति च कर्माणि प्राक्तनानि तपःप्रणिधिभावेन, दृष्टान्तमाह-शुष्कतृणानि यथा अग्निर्निर्दहति तद्वदिति गाथार्थः ॥

नि. [३०९] तम्हा उ अप्पसत्थं पणिहाणं उज्झिऊण समणेणं।
पणिहाणंमि पसत्थे भणिओ आयारपणिहित्ति ॥

वृ. यस्मादेवमप्रशस्तप्रणिधिर्दुःखद इतरश्च सुखदस्तस्माद् 'अप्रशस्तं प्रणिधानम्' अप्रशस्तं प्रणिधीम् 'उज्झित्वा' परित्यज्य 'श्रमणेन' साधुना 'प्रणिधाने' प्रणिधौ 'प्रशस्ते' कल्याणे, यत्नः कार्य इति वाक्यशेषः। निगमयत्राह-भणित आचारप्रणिधिरिति गाथार्थः ॥

उक्तो नाम-निष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादिचर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सुत्रमुच्चारणीयं, तच्चेदम्-

*मू. (३५१) आयारप्पणिहिं लद्धुं, जहा कायव्व भिक्खुणा।*
*तं भे उदाहरिस्सामि, आनुपुव्विं सुणेह मे ॥*

वृ. व्याख्या-'आचारप्रणिधिम्' उक्तलक्षणं 'लब्ध्वा' प्राप्य 'यथा' येन प्रकारेण कर्तव्यं विहितानुष्ठानं 'भिक्षुणा' साधुना 'तं' प्रकारं 'भे' भवद्भ्यः 'उदाहरिष्यामि' कथयिष्यामि 'आनुपूर्व्या' परिपाट्या शृणुत ममेति गौतमादयः स्वशिष्यानाहुरिति सूत्रार्थः ॥

*मू. (३५२) पुढविदगअगनिमारुअ, तणरुक्खस्सबीयगा।*
*तसा अ पाणा जीवत्ति, इइ वुत्तं महेसिणा ॥*

वृ. तं प्रकारमाह-'पुढवि'त्ति सूत्रं पृथिव्युदकाग्निवायवस्तृणवृक्षसबीजा एते पञ्चैकेन्द्रियकायाः पूर्ववत्, त्रसाश्च प्राणिनो द्वीन्द्रियादयो जीवा इत्युक्तं 'महर्षिणा' वर्धमानेन गौतमेन वेति।

*मू. (३५३) तेसिं अच्छणजोएण, निच्चं होअव्वयं सिआ*
*मनसा कायवक्केणं, एवं हवइ संजए ॥*

वृ. यतश्चैवमतः 'तेसिं'ति सूत्रं, अस्य व्याख्या-'तेषां' पृथिव्यादीनाम् 'अक्षणयोगेन' अहिंसाव्यापारेण नित्यं 'भवितव्यं' वर्तितव्यं स्यात् भिक्षुणा मनसा कायेन वाक्येन एभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणैरित्यर्थः, एवं वर्तमानोऽहिंसकः सन् भवति संयतो, नान्यथेति सूत्रार्थः ॥

*मू. ( ३५४ ) पुढविं भित्तिं सिलं लेलुं, नेव भिंदे न संलिहे ।*
*तिविहेण करणजोएणं, संजए सुसमाहिए ॥*

वृ.एवं सामान्येन षड्जीवनिकायाहिंसया संयतत्वमभिधायाधुना तद्गत-विधीन्विधानतो विशेषेणाह-'पुढवि'त्ति सूत्रं, पृथिवीं शुद्धां 'भित्तिं' तटीं 'शिलां' पाषाणात्मिकां 'लेष्टुम्' इष्टालखण्डं नैव भिन्द्यात् तो संलिखेत्, तत्र भेदनं द्वैधीभावोत्पादनं 'संलेखनम्' ईषल्लेखनं 'त्रिविधेन करणयोगेन' न करोति मनसेत्यादिना 'संयतः' साधुः 'सुसमाहितः' शुद्धभाव इति।

*मू. ( ३५५ ) सुद्धपुढवीं न निसीए, ससरक्खंमि अ आसने ।*
*पमज्जित्तु निसीइज्जा, जाइत्ता जस्स उग्गहं ॥*

वृ.तथा 'सुद्ध'त्ति सूत्रं, 'शुद्धपृथिव्याम्' अशस्त्रोपहतायामनन्तरितायां न निषीदेत्, तथा 'सरजस्के वा' पृथ्वीरजोऽवगुण्ठिते वा 'आसने' पीठकादौ न निषीदेत्, निषीदनग्रहणा-त्स्थानत्वग्वर्तनपरिग्रहः, अचेतनायां तु प्रमृज्यतां रजोहरणेन निषीदेत् 'ज्ञात्वे'त्वचेतनां ज्ञात्वा 'याचयित्वाऽवग्रह'भिति यस्य संबन्धिनी पृथिवी तमवग्रहमनुज्ञाप्येति सूत्रार्थः ॥

*मू. ( ३५६ ) सीओदगं न सेविज्जा, सिलावुट्ठं हिसाणि अ ।*
*उसिणोदगं तत्तफासुअं, पडिगाहिज्ज संजए ॥*

वृ. उक्तः पृथिवीकायविधिः, अधुना अप्कायविधिमाह-

'सीओदगं'ति सूत्रं, 'शीतोदकं' पृथिव्युद्भवं सच्चित्तोदकं न सेवेत, तथा शिलावृष्टं हिमानि च न सेवेत, तत्र शिलाग्रहणेन करकाः परिगृह्यन्ते, वृष्टं वर्षणं, हिमं प्रतीतं प्राय उत्तरापथे भवति। यद्येवं कथमयं वर्त्ततेत्याह-'उष्णोदकं' कथितोदकं 'तप्तप्रासुकं' तप्तं सत्प्रासुकं त्रिदण्डोद्वृत्तं, नोष्णोदकमात्रं, प्रतिगृह्णीयाद्वृत्त्यर्थं 'संयतः' साधुः, एतच्च सौवीराद्युपलक्षणमिति।

*मू. ( ३५७ ) उदउल्लं अप्पणो कायं, नेव पुंछे न संलिहे ।*
*समुप्पेह तहाभूअं, नो नं संघट्टए मुनी ॥*

वृ.तथा 'उदउल्लं'ति सूत्रं, नदीमुत्तीर्णो भिक्षाप्रविष्टो वा वृष्टिहतः 'उदकार्द्रम्' उदकबिन्दु-चितमात्मनः 'कायं' शरीरं स्निग्धं वा नैव 'पुञ्छयेद्' वस्त्रतृणादिभिः 'न संलिखेत्' पाणिना, अपितु 'संप्रेक्ष्य' निरीक्ष्य 'तथाभूतम्' उदकार्द्रादिरूपं नैव कायं 'संघट्टयेत्' मुनिर्मनागपि न स्पृशेदिति सूत्रार्थः ॥

*मू. ( ३५८ ) इंगालं अगणिं अच्चि, अलायं वा सजोइअं ।*
*न उंजिज्जा न घट्टिज्जा, नो नं निव्वावए मुनी ॥*

वृ. उक्तोऽप्कायविधिः, तेजःकायविधिमाह-'इंगालं'ति सूत्रं, 'अङ्गारं' ज्वालारहितम् 'अग्निम्' अयःपिण्डानुगतम् 'अर्चिः' छिन्नज्वालम् 'अलातम्' उल्मुकं वा 'सज्योतिः' साग्निकमित्यर्थः, किमित्याह-नोत्सिञ्चेत् न घट्टयेत्, तत्रोञ्जनमुत्सेचनं प्रदीपादेः, घट्टनं मिथश्चालनं, तथा नैनम्-अग्निं 'निर्वापयेद्' अभावमापादयेत् 'मुनिः' साधुरिति सूत्रार्थः ॥

*मू. ( ३५९ ) तालिअंटेण पत्तेण, साहाए विहुणेण वा ।*
*न वीइज्जऽप्पणो कायं, बाहिरं वावि पुग्गलं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. प्रतिपादितस्तेजःकायविधिः, वायुकायविधिमाह- 'तालिअंटेण'त्ति सूत्रं, 'तालवृन्तेन' व्यजनविशेषण 'पत्रेग' पद्मिनीपत्रादिना 'शाखया' वृक्षडालरूपया 'विधूपनेन वा' व्यजनेन वा, किमित्याह-न वीजयेद् 'आत्मनः कायं' स्वशरीरमित्यर्थः 'बाह्यं वापि पुद्गलम्' उष्णोदकादीति सूत्रार्थः ॥ प्रतिपादितो वायुकायविधिः, वनस्पतिविधिमाह-

मू. (३६०) *तणरुक्खं न छिंदिज्जा, फलं मूलं च कस्सई।*
*आमगं विविहं बीअं, मनसावि न पत्थए ॥*

वृ. 'तण'त्ति सूत्रं, तृणवृक्षमित्येक-वद्भावः, तृणानि-दर्भादीनि वृक्षाः कदम्बादयः, एतान्न छिन्द्यात्, फलं मूलं वा कस्यचिद्वृक्षादेर्न छिन्द्यात्, तथा 'आमम्' अशस्त्रोपहतं 'विविधम्' अनेकप्रकारं बीजं न मनसाऽपि प्रार्थयेत्, किमुत अश्नीयादिति सूत्रार्थः ॥

मू. (३६१) *गहणेसु न चिट्ठिज्जा, बीएसु हरिएसु वा।*
*उदगंमि तहा निच्चं, उत्तिगपणगेसु वा ॥*

वृ. तथा 'गहणेसु'त्ति सूत्रं, 'गहनेषु' वननिकुञ्जेषु न तिष्ठेत्, संघट्टनादिदोष-प्रसङ्गात्, तथा 'बीजेषु' प्रसारितशाल्यादिषु 'हरितेषु वा' दूर्वादिषु न तिष्ठेत्, 'उदके तथा नित्यम्' अत्रोदकम्-अनन्तवनस्पतिविशेषः, यथोक्तम्-'उदए अवए पणए' इत्यादि, उदकेवान्ये, तत्र नियमतो वनस्पतिभावात्, उत्तिङ्गपनकयोर्वा न तिष्ठेत्, तत्रोत्तिङ्गः-सर्पच्छत्रादिः पनकः-उल्लिवनस्पतिरिति सूत्रार्थः ॥ उक्तो वनस्पतिकायविधिः, त्रसकायविधिमाह-

मू. (३६२) *तसे पाणे न हिंसिज्जा, वाया अदुव कम्मुणा।*
*उवरओ सव्वभूएसु, पासेज्ज विविहं जगं ॥*

वृ. 'तस'त्ति सूत्रं, 'त्रसप्राणिनो' द्वीन्द्रियादीन् न हिंस्यात्, कथमित्याह-वाचा अथवा 'कर्मणा' कायेन, मनसस्तदन्तर्गतत्वाद-ग्रहणम्, अपि च-'उपरतः' सर्वभूतेषु निक्षिप्तदण्डः सन् पश्येद्विविधं 'जगत्' कर्मपरतन्त्रं नरकादिगतिरूपं, निर्वेदायेति सूत्रार्थः ॥

मू. (३६३) *अट्ठ सुहुमाइ पेहाए, जाइं जाणित्तु संजए।*
*दयाहिगारी भूएसु, आस चिट्ठ सएहि वा ॥*

वृ. उक्तः स्थूलविधिः, अथ सूक्ष्मविधिमाह-'अट्ठ'त्ति सूत्रं, अष्टौ 'सूक्ष्माणि' वक्ष्यमाणानि प्रेक्ष्योपयोगत आसीत तिष्ठेच्छयीत वेति योगः, किंविशिष्टानीत्याह-यानि ज्ञात्वा संयतो ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च दयाधिकारी भूतेषु भवति, अन्यथा दयाधिकार्येव नेति, तानि प्रेक्ष्य तद्रहित एवासनादीनि कुर्याद्, अन्यथा तेषां सातिचारतेति सूत्रार्थः ॥

मू. (३६४) *कयराइं अट्ठ सुहुमाइं?, जाइं पुच्छिज्ज संजए।*
*इमाइं ताइं मेहावी, आइक्खिज्ज विअक्खणो ॥*

वृ. आह-'कयराणि' सूत्रं, कतराण्यष्टौ सूक्ष्माणि यानि दयाधिकारित्वाभावभयात् पृच्छे-त्संयतः?, अनेन दयाधिकारिण एव एवंविधेषु यत्नमाह, स ह्यवश्यं तदुपकारकाण्यपकारकाणि च पृच्छति, तत्रैव भावप्रतिबन्धादिति। 'अमूनि' तानि अनन्तरं वक्ष्यमाणानि मेधावी आचक्षीत विचक्षण इति, अनेनाप्येतदेवाह-मर्यादावर्तिना तज्ज्ञेन तत्प्ररूपणा कार्या, एवं हि श्रोतुस्त-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रोपादेयबुद्धिर्भवति, अन्यथा विपर्यय इति सूत्रार्थः ॥

**मू. ( ३६५ )** *सिनेहं पुप्फसुहुमं च, पाणुत्तिंगं तहेव य।*
*पणगं बीअहरिअं च, अंडसुहुमं च अट्ठमं ॥*

**वृ.** 'सिनेहं'त्ति सूत्रं, 'स्नेह'मिति स्नेहसूक्ष्मम्-अवश्यायहिममहिकाकरकहरतनुरूपं, पुष्पसूक्ष्मं चेति वटोदुम्बराणां पुष्पाणि, तानि तद्वर्णानि सूक्ष्माणीति न लक्ष्यन्ते, 'पाणी'ति प्राणिसूक्ष्ममनुद्धरिः कुन्थुः स हि चलन् विभाव्यते, न स्थितः, सूक्ष्मत्वात्। 'उत्तिंगं' तथैव चे'त्युत्तिंगसूक्ष्म-कीटिकानगरं, तत्र कीटिका अन्ये च सूक्ष्मसत्त्वा भवन्ति। तथा पनकसूक्ष्मं प्रायः प्रावृट्काले भूमिकाष्ठादिषु पञ्चवर्णस्तद्रव्यलीनः पनक इति, तथा 'बीजसूक्ष्मं' शाल्यादिबीजस्य मुखमूले कणिका, या लोके तुषमुखमित्युच्यते, 'हरितं चे'ति हरितसूक्ष्मं, तच्चात्यन्ताभिनवोद्भिन्नं पृथिवीसमानवर्णमेवेति, 'अण्डसूक्ष्मं चाष्टम'मिति एतच्च मक्षिकाकीटकागृहकोलिकाब्राह्मणीकुकलासाद्यण्डमिति सूत्रार्थः ॥

**मू. ( ३६६ )** *एवमेआणि जाणिज्जा, सव्वभावेण संजए।*
*अप्पमत्तो जए निच्चं सव्विंदिअसमाहिए ॥*

**वृ.** 'एवमेआणि'त्ति सूत्रं, 'एवम्' उक्तेन प्रकारेण एतानि सूक्ष्माणि ज्ञात्वा सूत्रादेशेन 'सर्वभावेन' शक्तयनुरूपेण स्वरूपसंरक्षणादिना 'संयतः' साधुः किमित्याह-

'अप्रमत्तो' निद्रादिप्रमादरहितः यतेत मनोवाक्कायैः संरक्षणं प्रति 'नित्यं' सर्वकालं 'सर्वेन्द्रियसमाहितः' शब्दादिषु रागद्वेषावगच्छन्निति सूत्रार्थः ॥

**मू. ( ३६७ )** *धुवं च पडिलेहिज्जा, जोगसा पायकंबलं ।*
*सिज्जमुच्चारभूमिं च, संथारं अदुवाऽऽसनं ॥*

**वृ.** तथा 'धुव'न्ति सूत्रं, तथा 'ध्रुव च' नित्यं च यो यस्य काल उक्तोऽनागतः परिभोगे च तस्मिन् प्रत्युपेक्षेत सिद्धान्तविधिना 'योगे सति' सति सामर्थ्ये अन्यूनातिरिक्तं, किं तदित्याह-'पात्रकम्बलम्' पात्रग्रहणादलाबुदारुमयादिपरिग्रहः, कम्बलग्रहणादूर्णा-सूत्रमयपरिग्रहः, तथा 'शय्यां' वसतिं द्विकालं त्रिकालं च उच्चारभुवं च-अनापातवदादि स्थण्डिलं तथा 'संस्तारकं' तृणमयादिरूपमथवा 'आसनम्' अपवादगृहीतं पीठकादि प्रत्युपेक्षे-तेति सूत्रार्थः ॥

**मू. ( ३६८ )** *उच्चारं पासवणं, खेलं सिंधाणजल्लिअं।*
*फासुअं पडिलेहित्ता, परिट्ठाविज्ज संजए ।*

**वृ.** तथा 'उच्चारं'ति सूत्रं, उच्चारं प्रस्त्वणं श्लेष्म सिंघाणं जल्लमिति प्रतितानि, एतानि प्रासुकं प्रत्युपेक्ष्य स्थण्डिलमिति वाक्यशेषः, 'परिस्थापयेद्' व्युत्सृजेत् संयत इति सूत्रार्थः ॥

**मू. ( ३६९ )** *पविसित्तु परागारं, पाणट्ठा भोअणस्स वा।*
*जयं चिट्ठे मिअं भासे, न य रूवेसु मनं करे।*

**वृ.** उपाश्रयस्थानविधिरुक्तो, गोचरप्रवेशमधिकृत्याह-'पविसित्तु' सूत्रं, प्रविश्य 'परागारं' परगृहं पानार्थं भोजनस्य ग्लानादेरौषधार्थं वा यतंगवाक्षकादीन्यनवलोकयन् तिष्ठेदुचितदेशे, मितं यतनया भाषेत आगमनप्रयोजनादीति, न च 'रूपेषु' दातृकान्तादिषु मनः कुर्यात्, एवंभूतान्येतानीति न मनो निवेशयत्, रूपग्रहणं रसाद्युपलक्षणमिति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( ३७० ) *बहुं सुणेहि कन्नेहिं, बहुं अच्छीहिं पिच्छइ ।*
*न य दिट्ठं सुअं सव्वं, भिक्खू, अक्खाउमरिहइ ॥*

वृ. गोचरादिगत एव केनचित्तथाविधं पृष्ट एवं ब्रूयादित्याह-'बहु'न्ति सूत्रं, अथवा उपदेशाधिकारे सामान्येनाह-'बहु'न्ति सूत्रं, 'बहु' अनेकप्रकारं शोभनाशोभनं शृणोति कर्णाभ्यां, शब्दजातमिति गम्यते, तथा 'बहु' अनेकप्रकारमेव शोभनाशोभनभेदेनाक्षिभ्यां पश्यति, रूपजातमिति गम्यते, एवं न च दृष्टं श्रुतं सर्वं स्वपरोभयाहितमपि 'श्रुता ते रुदपी पत्नी'त्यव-मादि भिक्षुराख्यातुमर्हति, चारित्रोपघातात्, अर्हति च स्वपरोभयहितं 'दृष्टस्ते राजानमुपशामय-ञ्शिष्य' इति सूत्रार्थः ॥

मू. ( ३७१ ) *सुअं वा जइ वा दिट्ठं, न लविज्जोवधाइअं ।*
*न य केणइ उवाएणं, गिहिजोगं समायरे ।*

वृ.एतदेव स्पष्टयन्नाह-'सुअं'ति सूत्रं, श्रुतं वा अन्यतः यदिवा दृष्टं स्वयमेव 'नालपेत्' न भाषेत, 'औपघातिकम्' उपघातेन निर्वृत्तं तत्फलं वा, यथा-चौरस्त्वमित्यादि, अतो नालपेदपीति गम्यते, तथा न च केनचिदुपायेन सूक्ष्मयाऽपि भङ्गया 'गृहियोगं' गृहिसंबन्धं तद्बालग्रहणादिरूपं गृहिव्यापारं वा-प्रारम्भरूपं 'समाचरेत्' कुर्यान्नैवेति सूत्रार्थः ॥

मू. ( ३७२ ) *निट्ठाणं रसनिज्जूढं, भद्दगं पावगंति वा ।*
*पुट्ठो वावि अपुट्ठो वा, लाभालाभं न निद्दिसे ॥*

वृ. किं च -'निट्ठाणं'ति सूत्रं, 'निष्ठानं' सर्वगुणोपेतं संभृतमन्नं रसं निर्यूढमेतद्विपरीतं कदशनम्, एतदाश्रित्याद्यं भद्रकं द्वितीयं पापकमिति वा, पृष्टो वापि परेण कीदृग् लब्धमिति अपृष्टो वा स्वयमेव लाभालाभं निष्ठानादेर्न निर्दिशेद्, अद्य साधु लब्धमसाधु वा शोभनमिद-मपरमशोभनं वेति सूत्रार्थः ॥

मू. ( ३७३ ) *न य भोअणंमि गिद्धो, चरे उंछं अयंपिरो ।*
*अफासुअं न भुंजिज्जा, कीअमुद्देसिआहडं ॥*

वृ. किं च -'न य'त्ति सूत्रं, न च भोजने गृद्धः सन् विशिष्टवस्तुलाभायेश्वरादिकुलेषु मुखमङ्गलिकया चरेत्, अपितु उञ्छं भावतो ज्ञाताज्ञातमजल्पन शीलो धर्मलाभमात्राभिधायी चरेत्, तत्रापि 'अप्रासुकं' सचित्तं सन्मिश्रादि कथञ्चिद्गृहीतमपि न भुञ्जीत, तथा क्रीतमौद्देशि-काहृतं प्रासुकमपि न भुञ्जीत, एतद्विशोध्यविशोधिकोट्यपलक्षणमिति सूत्रार्थः ॥

मू. ( ३७४ ) *संनिहिं च न कुव्विज्जा, अनुमायंपि संजए ।*
*मुहाजीवी असंबद्धे, हविज्ज जगनिस्सिए ॥*

वृ. 'संनिहिं'ति सूत्रं, 'संनिधिं च' प्राङनिरूपितस्वरूपां न कुर्यात् 'अणुमात्रमपि' स्तोकमपि 'संयतः' साधुः, तथा मुधाजीवीति पूर्ववत्, असंबद्धः पद्मिनीपत्रोकवद्गृहस्थैः, एवभूतः सन् भवेत् 'जगन्निश्रितः' चराचरसंरक्षणप्रतिबद्ध इति सूत्रार्थः ॥

मू. ( ३७५ ) *लूहवित्ती सुसंतुट्ठे, अप्पिच्छे सुहरे सिआ ।*
*आसुरत्तं न गच्छिज्जा, सुच्चा नं जिनसासनं ॥*

वृ. किंच-'लहू'त्ति सूत्रं, रूक्षैः-वल्लचणकादिभिर्वृत्तिरस्येति रूक्षवृत्तिः, सुसंतुष्टो येन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा तेन वा संतोषगामी, अल्पेच्छो न्यूनोदरतयाऽऽहारपरित्यागी, सुभरः स्यात् अल्पेच्छत्वादेव दुर्भिक्षादाविति फलं प्रत्येकं वा स्यादिति क्रियायोग, रूक्षवृत्तिः स्यादित्यादि। तथा 'आसुरत्वं' क्रोधभावं न गच्छेत् कचित् स्वपक्षादौ श्रुत्वा 'जिनशासनं' क्रोधविपाकप्रतिपादकं वीतराग-वचनं। "जहा चउहिं ठाणेहिं जीवा आसुरत्ताए कम्मं पकरेंति, तंजहा-कोहसीलयाए पाहुडसीलयाए जहा ठाणे जाव जं नं मए एस पुरिसे अन्नाणी मिच्छादिट्ठी अक्कोसइ हणइ वा तं न मे एस किंचि अवरज्झइत्ति, किं तु मम एयाणि वेयणिज्जाणि कम्माणि अवरज्झंतित्ति सम्ममहियासमाणस्स निज्जरा एव भविस्सइ'त्ति सूत्रार्थः ॥

*मू. ( ३७६ )* *कन्नसुक्खेहिं सद्देहिं, पेम्मं नाभिनिवेसए।*
*दारुणं कक्कसं फासं, काएण अहिआसए॥*

वृ.तथा 'कण्ण'त्ति सूत्रं, कर्णसौख्यहेतवः कर्णसौख्याः शब्दा-वेणुवीणादिसंबन्धिनस्तेषु 'प्रेम' रागं 'न अभिनिवेशयत्' न कुर्यादित्यर्थः, 'दारुणम्' अनिष्टं 'कर्कशं' कठिनं स्पर्शमुपनतं सन्तं कायेनाधिसहेत् न तत्र द्वेषं कुर्यादिति, अनेनाद्यन्तयो रागद्वेषनिराकरणेन सर्वेन्द्रियविषयेषु रागद्वेषप्रतिषेधो वेदितव्य इति सूत्रार्थः ॥

*मू. ( ३७७ )* *खुहं पिवासं दुस्सिज्जं, सीउण्हं अरइं भयं।*
*अहिगासे अव्वहिओ, देहदुक्खं महाफलं॥*

वृ.किं च-'खुहं पि'त्ति सूत्रं, 'क्षुधं' बुभुक्षां 'पिपासां' तृषं 'दुःशय्यां' विषमभूम्यादिरूपां शीतोष्णं प्रतीतम् 'अरतिं' मोहनीयोद्भवां 'भयं' व्याघ्रादिसमुत्थमतिसहेदेतत्सर्वमेव 'अव्य-थितः' अदीनमनाः सन् देहे दुःखं महाफलं संचिन्त्येति वाक्यशेषः। तथा च शरीरे सत्येतदुःखं, शरीरं चासारं, सम्यगतिसह्यमानं च मोक्षफलमेवेदमिति सूत्रार्थः॥

*मू. ( ३७८ )* *अत्थंगयंमि आइच्चे, पुरत्था अ अनुग्गए।*
*आहारमइयं सव्वं, मनसावि न पत्थए॥*

वृ. किंच-'अत्थं'ति सूत्रं, 'अस्तं गत आदित्ये' अस्तपर्वतं प्राप्ते अदर्शनीभूते वा 'पुरस्ताच्चानुद्गते' प्रत्यूषस्यनुदित इत्यर्थः, आहारात्मकं 'सर्वं' निरवशेषमाहारजातं मनसापि न प्रार्थयेत्, किमङ्ग पुनर्वाचा कर्मणा वेति सूत्रार्थः॥

*मू. ( ३७९ )* *अतिंतिणे अचवले, अप्पभासी मिआसने।*
*हविज्ज उअरे दंते, थोवं लद्धुं न खिंसए॥*

वृ. दिवाप्यलभमान आहारे किमित्याह-'अतिन्तिणो भवेत्, अतिन्तिणो नामालाभेऽपि नेषद्यत्किञ्चनभाषी, तथा अचपलो भवेत्, सर्वत्र स्थिर इत्यर्थः। तथा 'अल्पभाषी' कारणे परिमितवक्ता, तथा 'मिताशनो' मितभोक्ता 'भवे'दित्येवंभूतो भवेत्, तथा 'उदरे दान्तो' येन वा तेन वा वृत्तिशीलः, तथा 'स्तोकं लब्ध्वा न खिंसयेत्' देयं दातारं वा न हीलयेदिति।

*मू. ( ३८० )* *न बाहिरं परिभवे, अत्ताणं, न समुक्कसे।*
*सुआलभे न मज्जिज्जा, जच्चा तवस्सिबुद्धिए॥*

वृ.मदवर्जनार्थमाह- 'न बाहिरं'ति सूत्रं, न 'बाह्यम्' आत्मनोऽन्यं परिभवेत्, तथा आत्मानं न समुत्कर्षयेत्, सामान्येनेत्थंभूतोऽहमिति, श्रुतलाभाभ्यां न माद्येत, पण्डितो लब्धिमानहमित्येवं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा जात्यातापस्व्येन बुद्ध्या वा, न माद्येतेति वर्त्तते, जातिसंपन्नस्तपस्वी बुद्धिमानहमित्येवम्, उपलक्षणं चैतत्कुलबलरूपाणाम्, कुलसंपन्नोऽहं बलसंपन्नोऽहं, रूपसंपन्नोऽहमित्येवं न माद्येतेति सूत्रार्थः ॥

*मू. ( ३८१ ) से जाणमजाणं वा, कट्टु आहम्मिअं पयं।*
*संवरे खिप्पमप्पाणं, बीअं तं न समायरे ॥*

वृ. ओघत आभोगानाभोगसेवितार्थमाह-

'से' त्ति सूत्रं, 'स' साधुः 'जानन्नजानन् वा' आभोगतोऽनाभोगतश्चेत्यर्थः 'कृत्वाऽधार्मिकं पदं' कथञ्चिद्रागद्वेषाभ्यां मूलोत्तरगुणविराधना-मिति भावः 'संवरेत्' 'क्षिप्रमात्मानं' भावतो निवर्त्यालोभनादिना प्रकारेण, तथा द्वितीयं पुनस्तत्र समाचरेत्, अनुबन्धदोषादिति सूत्रार्थः ॥

*मू. ( ३८२ ) अनायारं परकम्म, नेव गूहे न निण्हवे।*
*सुई सया वियडभावे, असंसत्ते जिइंदिए ॥*

वृ. एतदेवाह- 'अनायारं' ति सूत्रं, 'अनाचारं' सावद्ययोगं 'पराक्रम्य' आसेव्य गुरुसकाश आलोचयन् 'नैव गूहयेत् न निह्नुवीत' तत्र गूहनं किञ्चित्कथनं निह्नव एकान्तापलापः, किंविशिष्टः सन्नित्याह- 'शुचिः' अकलुषितमतिः सदा 'विकटभावः' प्रकटभावः 'असंसक्तः' अप्रतिबद्धः कचित् 'जितेन्द्रियो' जितेन्द्रियप्रमादः सन्निति सूत्रार्थः ॥

*मू. ( ३८३ ) अमोहं वयणं कुज्जा, आयरिअस्स महप्पणो।*
*तं परिगिज्झ वायाए, कम्मुणा उववायए ॥*

वृ. तथा 'अमोहं' ति सूत्रं, 'अमोघम्' अवन्ध्यं 'वचनम्' इदं कुर्वित्यादिरूपं 'कुर्या' दिति एवमित्यभ्युपगमेन, केषामित्याह- 'आचार्याणां महात्मानां' श्रुतादिभिर्गुणैः, तत्परिगृह्य वाचा एवमित्यभ्युपगमेन 'कर्मणोपपादयेत्' क्रियया संपादयेदिति सूत्रार्थः ॥

*मू. ( ३८४ ) अधुवं जीविअं नच्चा, सिद्धिमग्गं विआणिआ।*
*विणिअट्टिज्ज भोगेसु, आउं परिमिअप्पणो ॥*

वृ. तथा 'अधुवं' ति सूत्रं, 'अध्रुवम्' अनित्यं मरणाशङ्कि जीवितं सर्वभावनिबन्धनं ज्ञात्वा। तथा 'सिद्धिमार्गं' सम्यग्दर्शनज्ञानचारित्रलक्षणं विज्ञाय विनिवर्तेत भोगेभ्यो बन्धैक-हेतुभ्यः, तथा ध्रुवमप्यायुः परिमितं संवत्सरशतादिमानेन विज्ञायात्मनो विनिवर्तेत भोगेभ्य इति।

*मू. ( ३८५ ) बलं थामं च पेहाए, सद्धामारुग्गमप्पणो।*
*खित्तं कालं न विन्नाय, तहप्पाणं निजुंजए।*

*मू. ( ३८६ ) जरा जाव न पीडेई, वाही जाव न वड्ढई।*
*जाविंदिआ न हायंति, ताव धम्मं समायरे ॥*

वृ. उपदेशाधिकारे प्रक्रान्तमेव समर्थयन्नाह- 'जर' त्ति सूत्रं, 'जरा' वयोहानिलक्षणा यावन्न पीडयति 'व्याधिः' क्रियासामर्थ्यशत्रूर्यावन्न वर्द्धते यावद् 'इन्द्रियाणि' क्रियासामर्थ्योपकारीणि श्रोत्रादीनि न हीयन्ते तावदत्रान्तरे प्रस्ताव इतिकृत्वा धर्मं समाचरेच्चारित्रधर्ममिति सूत्रार्थः ॥

*मू. ( ३८७ ) कोहं मानं च मायं च, लोभं च पावड्ढणं।*
*वमे चत्तारि दोसे उ, इच्छंतो हिअमप्पणो ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. तदुपायमाह-'कोहं' गाहा, क्रोधं मानं च मायां च लोभं च पापवर्धनं, सर्व एते पापहेतव इति पापवर्द्धन-व्यपदेशः, यतश्चैवमतो वमेच्चतुरो 'दोषान्' एतानेव क्रोधादीन्, हितमिच्छन्नात्मनः, एतद्वमने हि सर्वसंपदिति सूत्रार्थः ॥

*मू. ( ३८८ ) कोहो पीइं पणासेइ, मानो विनयनासणो।*
*माया मित्ताणि नासेइ, लोभो सव्वविणासणो ॥*

वृ. अवमने त्विहलोक एवापायमाह-

'कोह'त्ति सूत्रं, क्रोधः प्रीतिं प्रणाशयति, क्रोधान्धवचनतस्तदुच्छेददर्शनात्, मानो विनय-नाशनः, अवलेपेन मूर्खतया तदकरणोपलब्धेः, माया मित्राणि नाशयति, कौटिल्यवतस्तत्त्याग-दर्शनात्, लोभः सर्वविनाशन, तत्त्वतस्त्रयाणा-मपि तद्भावभावित्वादिति सूत्रार्थः ॥

*मू. ( ३८९ ) उवसमेन हणे कोहं, मानं मद्दवया जिने।*
*मायं चज्जवभावेण, लोभं संतोसओ जिने ॥*

वृ. यत एवमतः-'उवसमेण'त्ति सूत्रं, 'उपशमेन' शान्तिरूपेण हन्यात् क्रोधम्, उदय-निरोधोदयप्राप्ताफलीकरणेन, एवं मानं मार्दवेन-अनुच्छ्रितया जयेत् उदयनिरोधादिनैव, मायां च ऋजुभावेन-अशठतया जयेत् उदयनिरोधादिनैव, एवं लोभं 'संतोषतः' निःस्पृहत्वेन जयेत्, उदयनिरोधोदयप्राप्ताफलीकरणेनेति सूत्रार्थः ॥

*मू. ( ३९० )कोहो अ मानो अ अनिग्गहीआ, माया अ लोभो अ पवड्ढमाणा।*
*चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुनब्भवस्स ॥*

वृ. क्रोधादीनामेव परलोकापायमाह-

'कोहो'त्ति सूत्रं, क्रोधश्च मानश्चानिगृहीतौ-उच्छृङ्खलौ, माया च लोभश्च 'विवर्धमानौ च' वृद्धिं गच्छन्तौ, 'चत्वार' एते क्रोधादयः 'कृत्स्नाः' संपूर्णाः 'कृष्णा वा' क्लिष्टाः कषायाः सिञ्चन्ति अशुभभावजलेन मूलानि तथाविधकर्मरूपाणि पुनर्जन्मतरोरिति सूत्रार्थः ॥

*मू. ( ३९१ )रायाणिएसु विनयं पउंजे, धुवसीलयं सययं न हावइज्जा।*
*कुम्मुव्व अल्लीणपलीणगुत्तो, परक्कमिज्जा तवसंजमंमि ॥*

वृ. यत एवमतः कषायनिग्रहार्थमिदं कुर्यादित्याह-'रत्नाधिकेषु' चिरदीक्षितादिषु 'विनयम्' अभ्युत्थानादिरूपं प्रयुञ्जीत, तथा 'ध्रुवशीलताम्' अष्टादशशीलाङ्ग-सहस्रपालनरूपां 'सततम्' अनवरतं यथाशक्त्या न हापयेत्, तथा 'कूर्म इव' कच्छप इवालीनप्रलीनगुप्तः अङ्गोपाङ्गानि सम्यक् संयम्येत्यर्थः, 'पराक्रमेत' प्रवर्त्तेत 'तपःसंयमे' तपःप्रधाने संयम इति सूत्रार्थः ॥

*मू. ( ३९२ ) निद्दं च न बहु मनिज्जा, सप्पहासं विवज्जए।*
*मिहो कहाहिं न रमे, सज्झायंमि रओ सया।*

वृ. किंच-'निद्दं च'त्ति सूत्रं, 'निद्रां च न बहु मन्येत' न प्रकामशायी स्यात्। 'सप्रहासं च' अतीवहासरूपं विवर्जयेत्, 'मिथःकथासु' राहस्यिकीषु न रमेत, 'स्वाध्याये' वाचनादौ रतः सदा, एवंभूतो भवेदिति सूत्रार्थः ॥

*मू. ( ३९३ ) जोगं च समणधम्मंमि, जुंजे अनलसो धुवं।*
*जुत्तो अ समणधम्ममि, अट्ठं लहइ अनुत्तरं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.तथा-'जोगं च'त्ति सूत्रं, 'योगं च' त्रिविधं मनोवाक्कायव्यापारं 'श्रमणधर्मे' क्षान्त्यादिलक्षणे युञ्जीत 'अनलसः' उत्साहवान्, 'ध्रुवं' कालाद्यौचित्येन नित्यं संपूर्णं सर्वत्र प्रधानोपसर्जनभावेन वा, अनुप्रेक्षाकाले मनोयोगमध्ययनकाले प्राप्नोत्यनुत्तरं भावार्थं ज्ञानादिरूपमिति।

मू. (३९४) *इहलोगपारत्तहिअं, जेणं गच्छइ सुग्गइं।*
*बहुस्सुअं पज्जुवासिज्जा, पुच्छिज्जत्थविनिच्छयं॥*

वृ. एतदेवाह-'इहलोग'त्ति सूत्रं, 'इहलोकपरत्रहितम्' इहाकुशलप्रवृत्तिदुःखनिरोधेन परत्र कुशलानुबन्धत उभयलोकहितमित्यर्थः, 'येन' अर्थेन ज्ञानादिनाकरणभूतेन गच्छति सुगतिं, पारम्पर्येण सिद्धिमित्यर्थः, उपदेशाधिकार उक्तव्यतिकरसाधनोपायमाह- 'बहुश्रुतम्' आगमवृद्धं 'पर्युपासीत' सेवेत, सेवमानश्च पृच्छेद् 'अर्थविनिश्चयम्' अपायरक्षकं कल्याणावहं वाऽर्थावितथभावमिति सूत्रार्थः॥

मू. (३९५) *हत्थं पायं च कायं च, पणिहाय जिइंदिए।*
*अल्लीणगुत्तो निसिए, सगासे गुरुणो मुनी॥*

वृ. पर्युपासीनश्च 'हत्थं'ति सूत्रं, हस्तं पादं च कायं च 'प्रणिधाये'ति संयम्य जितेन्द्रियो निभृतो भूत्वा आलीनगुप्तो निषीदेत्, ईषल्लीन उपयुक्त इत्यर्थः, सकाशे गुरोर्मुनिरिति सूत्रार्थः॥

मू. (३९६) *न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ।*
*न य ऊरं समासिज्जा, चिट्ठिज्जा गुरुणंतिए॥*

वृ. किं च-'न पक्खओ'त्ति सूत्रं, न पक्षतः- पार्श्वतः न पुरतः-अग्रतः नैव 'कृत्यानाम्' आचार्याणां 'पृष्ठतो' मार्गतो निषीदेदिति वर्त्तते, यथासंख्यमविनयवन्दमानात्रायादर्शनादिदोषप्रसङ्गात्। न च 'ऊरं समाश्रित्य' ऊरोरुपर्यूरुं कृत्वा तिष्ठेद्गुर्वन्तिके, अविनयादिदोषप्रसङ्गादिति सूत्रार्थः॥

मू. (३९७) *अपुच्छिओ न भासिज्जा, भासमाणस्स अंतरा।*
*पिट्ठिमंसं न खाइज्जा, मायामोसं विवज्जए॥*

वृ. उक्तः कायप्रणिधिः, वाक्प्रणिधिमाह-'अपुच्छिओ'त्ति सूत्रं, अपृष्टो निष्कारणं न भाषेत, भाषमाणस्य चान्तरेण न भाषेत, नेदमित्थं किं तर्ह्येवमिति, तथा 'पृष्ठिमांसं' परोक्षदोषकीर्तनरूपं 'न खादेत्' न भाषेत, 'मायामृषां' मायाप्रधानां मृषावाचं विवर्जयेदिति सूत्रार्थः॥

मू. (३९८) *अप्पत्तिअं जेण सिआ, आसु कुप्पिज्ज वा परो।*
*सव्वसो तं न भासिज्जा, भासं अहिगणामिणिं॥*

वृ. किंच-'अप्पत्तिअं'ति सूत्रं, 'अप्रीतिर्येन स्या'दिति प्राकृतशैल्या येनेतियया भाषया भाषितया अप्रीतिरित्यप्रीतिमात्रं भवेत् तथा 'आशु' शीघ्रं 'कुप्येद्वा परो'रोषकार्यं दर्शयेत् 'सर्वशः' सर्वावस्थासु 'ताम्' इत्थंभूतां न भाषेत भाषाम् 'अहितगामिनीम्' उभयलोकविरुद्धामिति सूत्रार्थः॥

मू. (३९९) *दिट्ठं मिअं असंदिद्धं, पडिपुन्नं विअं जिअं।*
*अयंपिरमणुव्विग्गं, भासं निसिर अत्तवं॥*

वृ. भाषणोपायमाह-'दिट्ठं'ति सूत्रं, 'दृष्टां' दृष्टार्थविषयां 'मितां' स्वरूपप्रयोजनाभ्याम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'असंदिग्धां' निःशङ्कितां 'प्रतिपूर्णां' स्वरादिभिः 'व्यक्ताम्' अलल्लां 'जितां' परिचिताम् 'अजल्पनशीलां' नोच्चैर्लग्नविलग्नाम् 'अनुद्विग्नां' नोद्वेगकारिणीमेवंभूतां भाषां 'निसृजेद्' ब्रूयाद् 'आत्मवान्' सचेतन इति सूत्रार्थः ॥

मू. (४००) *आयारपन्नत्तिधरं, दिट्ठिवायमहिज्जगं ।*
*वायविक्खलिअं नच्चा, न तं उवहसे मुनी ॥*

वृ. प्रस्तुतोपदेशाधिकार एवेदमाह-'आयार'त्ति सूत्रं, 'आचारप्रज्ञप्तिधर'मित्याचारधरः स्त्रीलिङ्गादीनि जानाति प्रज्ञप्तिधरस्तान्येव सविशेषाणीत्येवंभूतम् । तथा दृष्टिवादमधीयानं प्रकृतिप्रत्ययलोपागमवर्णविकारकालकारकादिवेदिनं 'वाग्विस्खलितं ज्ञात्वा' विविधमनेकैः प्रकारैर्लिङ्गभेदादिभिः स्खलितं विज्ञाय न 'तम्' आचारादिधरमुपहसेन्मुनिः, अहो नु खल्वाचारादिधरस्य वाचि कौशलमित्येवम्, इह च दृष्टिवादमधीयानमित्युक्तमत इदं गम्यतेनाधीतदृष्टिवादं, तस्य ज्ञानाप्रमादातिशयतः स्खलनाऽसंभवाद्, यद्येवंभूतस्यापि स्खलितं संभवति न चैनमुपहसेदित्युपदेशः, ततोऽन्यस्य सुतरां संभवति, नासौ हसितव्य इति सूत्रार्थः ॥

मू. (४०१) *नक्खत्तं सुमिणं जोगं, निमित्त मंतभेसजं ।*
*गिहिणो तं न आइक्खे, भूआहिगरणं पयं ॥*

वृ. किं च-'नक्खत्तं'ति सूत्रं, गृहिणा पृष्टः सन्नक्षत्रम्-अश्विन्यादि 'स्वप्नं' शुभाशुभफलमनुभूतादि 'योगं' वशीकरणादि 'निमित्तम्' 'मन्त्रं' वृश्चिकमन्त्रादि 'भेषजम्' अतीसाराद्यौषधं 'गृहिणाम्' असंयतानां तद् नाचक्षीत, किंविशिष्टमित्याह-'भूताधिकरणं पद'मिति भूतानि-एकेन्द्रियादीनि संघट्टनादिनाऽधिक्रियन्तेऽस्मिन्निति, ततश्च तदप्रीति-परिहारार्थमित्थं ब्रूयाद्-अनधिकारोऽत्र तपस्विनामिति सूत्रार्थः ॥

मू. (४०२) *अन्नट्ठं पगडं लयणं, भइज्ज सयनासनं ।*
*उच्चारभूमिसंपन्नं, इत्थीपसुविवज्जिअं ॥*

वृ. किं च-'अन्नट्ठं'ति सूत्रं, 'अन्यार्थं प्रकृतं' न साधुनिमित्तमेव निर्वर्त्तितं 'लयनं' स्थानं वसतिरूपं 'भजेत्' सेवेत, तथा 'शयनासन'मित्यन्यार्थं प्रकृतं संस्तारकपीठकादि सेवेतेत्यर्थः, एतदेव विशेष्यते-'उच्चारभूमिसंपन्नम्' उच्चारप्रस्त्रवणादिभूमियुक्तं, तद्रहि-तेऽसकृत्तदर्थं निर्गमनादिदोषात्, तथा 'स्त्रीपशुविवर्जित'मित्येकग्रहणे तज्जातीयग्रहणात् स्त्रीपशुपण्डक-विवर्जितं स्त्र्याद्यालोकनादिरहितमिति सूत्रार्थः ॥

मू. (४०३) *विवित्ता अ भवे सिज्जा, नारीणं न लवे कहं ।*
*गिहिसंथवं न कुज्जा, कुज्जा साहूहिं संथवं ॥*

वृ. तदित्थंभूतं लयनं सेवमानस्य धर्मकथाविधिमाह-

'विवित्ता य'त्ति सूत्रं, 'विविक्ता च' तदन्यसाधुभी रहिता च, चशब्दात्तथाविधभुजङ्ग-प्रायैकपुरुषयुक्ता च भवे-च्छय्या-वसतिर्यादि ततो 'नारीणां' स्त्रीणां न कथयेत्कथां, शङ्कादि-दोषप्रसङ्गात्, औचित्यं विज्ञाय पुरुषाणां तु कथयेत्, अविविक्तायां नारीणामपीति, तथा 'गृहिसंस्तवं' गृहिपरिचयं न कुर्यात् तत्स्नेहादिदोषसंभवात् । कुर्यात्साधुभिः सह 'संस्तवं' परिचयं, कल्याणमित्रयोगेन कुशलपक्षवृद्धिभावत इति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४०४) *जहा कुक्कुडपोअस्स, निच्चं कुललओ भयं।*
*एवं खुबंभयारिस्स, इत्थीविग्गहओ भयं॥*

वृ. कथञ्चिद्गृहिसंस्तवभावेऽपि स्त्रीसंस्तवो न कर्तव्य एवेत्यत्र कारणमाह-'जह'त्ति सूत्रं, यथा 'कुक्कुटपोतस्य' कुक्कुटचेल्लस्य 'नित्यं' सर्वकालं 'कुललतो' मार्जारात् भयम्, एवमेव 'ब्रह्मचारिणः' साधोः 'स्त्रीविग्रहात्' स्त्रीशरीरद्भयम्। विग्रहग्रहणं मृतविग्रहादपी भयख्या-पनार्थमिति सूत्रार्थः॥

मू. (४०५) *चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकिअं।*
*भूक्खरंपिव दट्ठूणं, दिट्ठिं पडिसमाहरे॥*

वृ. यतश्चैवमतः-'चित्त'त्ति सूत्रं, 'चित्तभित्तिं' चित्रगतां स्त्रियं 'न निरीक्षेत' न पश्येत्, नारीं वा सचेतनामेव स्वलङ्कृताम्, उपलक्षणमेतदनलंकृतां च न निरीक्षेत, कथञ्चिद्दर्शनयोगेऽपि 'भास्करमिव' आदित्यमिव दृष्ट्वा दृष्टिं 'प्रतिसमाहरेद्' द्रागेव निवर्तयेदिति सूत्रार्थः॥

मू. (४०६) *हत्थपायपलिच्छिन्नं, कण्णनासविगप्पिअं।*
*अवि वाससयं नारिं, बंभयारी विवज्जए॥*

वृ. किं बहुना?, 'हत्थ'त्ति सूत्रं, 'हस्तपादप्रतिच्छिन्ना' मिति प्रतिच्छिन्नहस्तपादां 'कर्ण-नासाविकृत्ता'मिति विकृत्तकर्णनासामपि वर्षशतिकां नारीम्, एवंविधामपि किमङ्ग पुनस्त-रुणीं?, तां तु सुतरामेव, 'ब्रह्मचारी' चारित्रधनो महाधन इव तस्करान् विवर्जयेदिति सूत्रार्थः॥

मू. (४०७) *विभूसा इत्थिसंसग्गो, पणीअं रसभोअणं।*
*नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा॥*

वृ. अपिच-'विभूस'त्ति सूत्रं, 'विभूषा' वस्त्रादिराढा 'स्त्रीसंसर्गः' येन केनचित्प्रकारेण स्त्रीसंबन्धः 'प्रणीतरसभोजनं' गलत्स्नेहरसाभ्यवहारः, एतत्सर्वमेव विभूषादिनरस्य 'आत्मग-वेषिण' आत्महितान्वेषणपरस्य 'विषं तालपुटं यथा' तालमात्रव्यापत्तिकरविषकल्पमहितमिति।

मू. (४०८) *अंगपच्चंगसंठाणं, चारुल्लविअपेहिअं।*
*इत्थीणं तं न निज्झाए, कामरागविवड्ढणं॥*

वृ. 'अंग'त्ति सूत्रं, 'अङ्गप्रत्यङ्गसंस्थान'मिति अङ्गानि-शिरःप्रभृतीनि प्रत्यङ्गानिनयनादीनि एतेषां संस्थानं-विन्यासविशेषं, तथा चारु-शोभनं 'लपितप्रेक्षितं' लपितं-जल्पितं प्रेक्षितं-निरीक्षितं स्त्रीणां संबन्धि, तदङ्गप्रत्यङ्गसंस्थानादि 'न निरीक्षेत' न पश्येत्, किमित्यत आह-कामरागविवर्द्धनमिति, एतद्धि निरीक्ष्यमाणं मोहदोषात् मैथुनाभिलाषं वर्द्धयति, अत एवास्य प्राक् स्त्रीणां निरीक्षणप्रतिषेधाद्गतार्थतायामपि प्राधान्यख्यापनार्थो भेदेनोपन्यास इति सूत्रार्थः॥

मू. (४०९) *विसएसु मणुन्नेसु, पेमं नाभिनिवेसए।*
*अनिच्चं तेसिं विन्नाय, परिणामं पुग्गलाण उ।*

वृ किं च -'विसएसु'त्ति सूत्रं, 'विषयेषु' शब्दादिषु 'मनोज्ञेषु' इन्द्रियानुकूलेषु 'प्रेम' रागं 'नाभिनिवेशयेत्' न कुर्यात्, एवममनोज्ञेषु द्वेषम्, आह-उक्तमेवेदं प्राक् 'कण्णसोक्खेहिं'-त्यादौ किमर्थं पुनरुपन्यास इति?, उच्यते, कारणविशेषाभिधानेन विशेषो-पलम्भार्थमिति, आह च-'अनित्यमेव' परिणामानित्यतया 'तेषां' पुद्गलानां, तुशब्दाच्छब्दा-दिविषयसंबन्धि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामिति योगः, 'विज्ञाय' अवेत्य जिनवचनानुसारेण, किमित्याह-'परिणामं' पर्यायान्तरापत्ति-लक्षणं, ते हि मनोज्ञा अपि सन्तो विषयाः क्षणादमनोज्ञतया परिणमन्ति अमनोज्ञा अपि मनोज्ञतया इति तुच्छं रागद्वेषयोर्निमित्तमिति सूत्रार्थः ॥

**मू. (४१०)** *पोग्गलाणं परीणामं, तेसिं नच्चा जहा तहा।*
*विणीअतण्हो विहरे, सीईभूएण अप्पणा ॥*

**वृ.** एतदेव स्पष्टयन्नाह-'पुद्गलानां' शब्दादिविषयान्तर्गतानां 'परिणामम्' उक्तलक्षणं तेषां 'ज्ञात्वा' विज्ञाय यथा मनोज्ञेतररूपतया भवन्ति तथा ज्ञात्वा 'विनीततृष्णः' अपेताभिलाषः शब्दादिषु विहरेत् 'शीतीभूतेन' क्रोधाद्यग्न्युपगमात्प्रशान्तेनात्मनेति सूत्रार्थः ॥

**मू. (४११)** *जाइ सद्धाइ निक्खंतो, परिआयट्ठाणमुत्तमं।*
*तमेव अनुपलिज्जा, गुणे आयरिअसंमए ॥*

**वृ.** किं च-'जाइ'त्ति सूत्रं, यया 'श्रद्धया' प्रधानगुणस्वीकरणरूपा निष्क्रान्तोऽविरति-जम्बालात् 'पर्यायस्थानं' प्रव्रज्यारूपम् 'उत्तमं' प्रधानं प्राप्त इत्यर्थः, तामेव श्रद्धामप्रतिपतिततया प्रवर्द्धमानामनुपालयेद्यत्नेन, क इत्याह-'गुणेषु' मूलगुणादिलक्षणेषु, 'आचार्यसुमतेषु' तीर्थकरादिबहुमतेषु, अन्ये तु श्रद्धाविशेषणमेतदिति व्याचक्षते, तामेव श्रद्धामनुपालयेद्गुणेषु, किंभूताम् ?-आचार्यसंमतां, न तु स्वाग्रहकलङ्किताममिति सूत्रार्थः ॥

**मू. (४१२)** *तवं चिमं संजमजोगयं च, सज्झायजोगं च सया अहिट्ठए।*
*सुरे व सेणाइ समत्तमाउहे, अलमप्पणो होइ अलं परेसिं ॥*

**वृ.** आचारप्रणिधिफलमाह- 'तपश्चेदम्-अनशनादिरूपं साधुलोकप्रतीतं 'संयमयोगं च' पृथिव्यादिविषयं संयमव्यापारं च 'स्वाध्याययोगं च' वाचनादिव्यापारं 'सदा' सर्वकालम् 'अधिष्ठाता' तपःप्रभृतीनां कर्तेत्यर्थः, इह च तपोऽभिधानात्तद्ग्रहणेऽपि स्वाध्याययोगस्य प्राधान्यख्याप-नार्थं भेदेनाभिधानमिति। 'स' एवंभूतः 'शूर इव' विक्रान्तभट इव 'सेनया' चतुरङ्गरूपया इन्द्रियकषायादिरूपया निरुद्धः सन् 'समाप्तायुधः' संपूर्णतपःप्रभृतिखगाद्यायुधः 'अलम्' अत्यर्थमात्मनो भवति संरक्षणाय अलं च परेषां निरा-करणायेति सूत्रार्थः ॥

**मू. (४१३)** *सज्झायसज्झाणरयस्स ताइणो, अपावभावस्स तवे रयस्स।*
*विसुज्झई जंसि मलं पुरेकडं, समीरिअं रुप्पमलं व जोइणा ॥*

**वृ.** एतदेव स्पष्टयन्नाह-'स्वाध्याय एव सद्ध्यानं स्वाद्ध्यायसद्ध्यानं तत्र रतस्य-सक्तस्य 'त्रातुः' स्वपरोभयत्राणशीलस्य 'अपापभावस्य' लब्ध्याद्यपेक्षारहिततया शुद्धचित्तस्य 'तपसि' अनशनादौ यथाशक्ति रतस्य् 'विशुद्ध्यते' अपैति यद् 'अस्य' साधोः 'मलं' कर्ममलं 'पुराकृतं' जन्मान्तरोपात्तं, दृष्टान्तमाह-'समीरितं' प्रेरितं रूप्यमलमिव 'ज्योतिषा' अग्निनेति सूत्रार्थः ॥

**मू. (४१४)** *से तारिसे दुक्खसहे जिइंदिए, सुएण जुत्ते अममे अकिंचने।*
*विरायई कम्मघणंमि अवगए, कसिणब्भपुडावगमे व चंदिमि ॥ त्ति बेमि ॥*

**वृ.** ततः-'से तारिसे'त्ति सूत्रं, 'स तादृशः' अनन्तरोदितगुणयुक्तः साधुः 'दुःख-सहः' परीषहजेता 'जितेन्द्रियः' पराजितश्रोत्रेन्द्रिययादिः 'श्रुतेन युक्तो' विद्यावानित्यर्थः 'अममः' सर्वत्र ममत्वरहितः 'अकिञ्चनो' द्रव्यभावकिञ्चनरहितः 'विराजते' शोभते, 'कर्मधने'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानावरणीयादिकर्ममेघे अपगते सति, निदर्शनमाह- 'कृत्स्नाभ्रपुटापगम इव चन्द्रमा इति' यथा कृत्स्ने कृष्णे वा अभ्रपुटे अपगते सति चन्द्रो विराजते शरदि तद्वदसावपेतकर्मधनः समासादित-केवलालोको विराजत इति सूत्रार्थः ॥

ब्रवीमिति पूर्ववत्, उक्तोऽनुगम, साम्प्रतं नयाः, ते च पूर्ववदेव ॥

अध्ययनं - ८ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिकसूत्रे अष्टमअध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्ति एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता**

## अध्ययनं - ९ विनयसमाधिः

**वृ.** अधुना विनयसमाध्याख्यमारभ्यते, अस्य चायमभिसंबन्धः-

इहानन्तराध्ययने निरवद्यं वच आचारे प्रणिहितस्य भवतीति तत्र यत्नवता भवितव्यमित्येतदुक्तम्, इह त्वाचारप्रणिहितो यथोचित्तविनयसंपन्न एव भवतीत्येतदुच्यते, उक्तं च -

"आयारपणिहाणंमि, से सम्मं वट्टई बुहे।
नाणादीण विनीए जे, मोक्खट्ठा निव्विगिच्छए॥"

इत्यनेनाभिसंबन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्नो निक्षेपः तत्र च विनयसमाधिरिति द्विपदं नाम, तन्निक्षेपामाह-

**नि. [३१०]** विनयस्स समाहीए निक्खेवो होइ दोण्हवि चउक्को।
दव्वविनयंमि तिणिसो सुवण्णमिच्चेवमाईणि॥

**वृ.** 'विनयस्य' प्रसिद्धतत्त्वस्य 'समाधेश्च' प्रसिद्धतत्त्वस्यैव निक्षेपो-न्यासो भवति द्वयोरपि चतुष्को नामादिभेदात्, तत्र नामस्थापने क्षुण्णत्वादनाहत्य द्रव्यविनयमाह-द्रव्यविनये ज्ञशरीरभव्यशरीरव्यतिरिक्ते 'तिनिशो' वृक्षविशेष उदाहरणं, स रथाङ्गादिषु यत्र यत्र यथा यथा विनीयते तत्र तत्र तथा तथा परिणमति, योग्यत्वादिति। तथा सुवर्णमित्यादीनि कटककुण्डलादिप्रकारेण विनयनाद् द्रव्याणि द्रव्यविनयः, आदिशब्दात्तत्तद्योग्यरूप्यादिपरिग्रह इति गाथार्थः॥ साम्प्रतं भावविनयमाह-

**नि. [३११]** लोगोवयारविनओ अत्थनिमित्तं च कामहेउं च।
भयविनय मुक्खविनओ विनओ खलु पंचहा होइ॥

**नि. [३१२]** अब्भुट्ठाणं अंजलि आसनदानं अतिहिपूआ य।
लोगोवयारविनओ देवयपूआ य विहवेणं॥

**नि. [३१३]** अब्भासवित्तिछंदाणुवत्तणं देसकालदानं च।
अब्भुट्ठाणं अंजलिआसनदानं च अत्थकए॥

**नि. [३१४]** एमेव कामविनओ भए अ नेअव्वमानुपुव्वीए।
मोक्खंमिऽवि पंचविहो परूवणा तस्सिमा होइ॥

**वृ.** लोकोपचारविनयो लोकप्रतिपत्तिफलः 'अर्थनिमित्तं च' अर्थप्राप्त्यर्थं च 'कामहेतुश्च' कामनिमित्तश्च तथा 'भयविनयो' भयनिमित्तो 'मोक्षविनयो' मोक्षनिमित्तः, एवमुपाधि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदाद्विनयः खलु 'पञ्चधा' पञ्चप्रकारो भवतीति गाथासमासार्थः ॥

व्यासार्थाभिधित्सया तु लोकोपचारविनयमाह-'अभ्युत्थानं' तदुचितस्यागतस्याभिमुखमुत्थान् 'अञ्जलिः' विज्ञापनादौ, आसनदानं च गृहागतस्य प्रायेण, अतिथिपूजा चाहारादिदानेन 'एष' इत्थंभूतो लोकोपचारविनयः देवतापूजा च यथाभक्ति बल्याद्युपचाररूपा 'विभवेने'त्ति यथाविभवं विभवोचितेति गाथार्थः ॥

उक्तो लोकोपचारविनयः, अर्थविनयमाह-'अभ्यासवृत्तिः' नरेन्द्रादीनां समीपावस्थानं 'छन्दोऽनुवर्तनम्' अभिप्रायाराधनं 'देशकालदानं च' कटकादौ विशिष्टनृपतेः प्रस्तावदानं, तथाऽभ्युत्थानमञ्जलिरासनदानं च नरेन्द्रादीनामेव कुर्वन्ति 'अर्थकृते' अर्थार्थमिति गाथार्थः ॥

उक्तोऽर्थविनयः, कामादिविनयमाह-'एवमेव' यथाऽर्थविनय उक्तोऽभ्यासवृत्त्यादिः तथा कामविनयः 'भये चे'ति भयविनयश्च 'ज्ञातव्यो' विज्ञेयः 'आनुपूर्व्या' परिपाट्य, तथाहि-कामिनो वेश्यादीनां कामार्थमेवाभ्यासवृत्त्यादि यथाक्रमं सर्वं कुर्वन्ति प्रेष्याश्च भयेन स्वामिनामिति, उक्तौ कामभयविनयौ, मोक्षविनयमाह-'मोक्षेऽपि' मोक्षविषयो विनयः पञ्चप्रकारः 'प्ररूपणा' निरूपणा तस्यैषा भवति वक्ष्यमाणेति गाथार्थः ॥

**नि. [३१५]** दंसणनाणचरित्ते तवे अ तह ओवयारिए चेव।
एसो अ मोक्खविनओ पंचविहो होइ नायव्वो ॥

**नि. [३१६]** दव्वाण सव्वभावा उवइट्ठा से जहा जिनवरेहिं।
ते तह सद्दहइ नरो दंसणविनओ हवइ तम्हा ॥

**नि. [३१७]** नाणं सिक्खइ नाणं गुणेइ कुणइ किच्चाइं।
नाणी नवं न बंधइ नाणविनीओ हवइ तम्हा ॥

**नि. [३१८]** अट्ठविहं कम्मचयं जम्हा रित्तं करेइ जयमाणो।
नवमन्नं च न बंधइ चरित्तविनओ हवइ तम्हा ॥

**नि. [३१९]** अवणेइ तवेण तमं उवणेइ अ सग्गमोक्खमप्पाणं।
तवविनयनिच्छमई तवोविनीओ हवइ तम्हा ॥

**नि. [३२०]** अह ओवयारिओ पुण दुविहो विनओ समासओ होइ।
पडिरूवजोगजुंजण तह य अणासायणाविनओ ॥

**नि. [३२१]** पडिरूवो खलु विनओ काइअजोए य वाइ मानसिओ।
अट्ठ चउव्विह दुविहो परूवणा तस्सिमा होइ ॥

**नि. [३२२]** अब्भुट्ठाणं अंजलि आसनदानं अभिग्गह किई अ।
सुस्सूसणमणुगच्छण संसाहण काय अट्ठविहो ॥

**नि. [३२३]** हिअमिअअफरुसवाई अनुवीईभासि वाइओ विनओ।
अकुसलचित्तनिरोहो कुसलमणउदीरणा चेव ॥

**वृ.** 'दर्शनज्ञानचारित्रेषु' दर्शनज्ञानचारित्रविषयः 'तपसि च' तपोविषयश्च तथा 'औपचारिकश्चैव' प्रतिरूपयोगव्यापारश्चैव, एष तु मोक्षविनयो-मोक्षनिमित्तः पञ्चविधो भवति ज्ञातव्य इति गाथासमासार्थः ॥ व्यासार्थे दर्शनविनयमाह-'द्रव्याणां' धर्मास्तिकायादीनां 'सर्वभावाः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वपर्यायाः 'उपदिष्टाः' कथिता 'ये' अगुरुलघ्वादयो 'यथा' येन प्रकारेण 'जिनवरैः' तीर्थकरैः 'तान्' भावान् 'तथा' तेन प्रकारेण श्रद्धत्ते नरः, श्रद्दधानश्च कर्म विनयति यस्मा-द्दर्शनविनयो भवती तस्माद्, दर्शनाद्विनयो दर्शनविनय इति गाथार्थः ॥ ज्ञानविनयमाह-'ज्ञानं शिक्षति' अपूर्वं ज्ञानमादत्ते, 'ज्ञानं गुणयति' गृहीतं सत्प्रत्यावर्त्तयति, ज्ञानेन करोति 'कृत्यानि' संयमकृत्यानि, एवं ज्ञानी नवं कर्म न बन्धाति प्राक्तनं च विनयति यस्मात् 'ज्ञानविनीतो' ज्ञानेनापनीतकर्मा भवति तस्मादिति गाथार्थः ॥

चारित्रविनयमाह-'अष्टविधम्' अष्टप्रकारं 'कर्मचयं' कर्मसंघातं प्राग्बद्धं यस्माद् 'रिक्तं करोति' तुच्छतापादनेनापनयति 'यतमानः' क्रियायां यत्नपरः तथा नवमन्यं च कर्मचयं न बध्नाति यस्मात् 'चारित्रविनय' इति चारित्राद्विनयश्चारित्रविनयः चारित्रेण विनीतकर्मा भवति तस्मादिति गाथार्थः ॥

तपोविनयमाह-अपनयति तपसा 'तमः' अज्ञानम् उपनयति च स्वर्गं मोक्षम् 'आत्मानं' जीवं तपोविनयनिश्चयमतिः, यस्मादेवंविधस्तपोविनीतो भवति तस्मादिति गाथार्थः ॥

उपचार-विनयमाह-अथौपचारिकः पुनर्द्विविधो विनयः समासतो भवति, द्वैविध्यमेवाह-प्रतिरूपयोगयोजनं तथाऽनाशातनाविनय इति गाथासमासार्थः ॥

व्यासार्थमाह-'प्रतिरूपः' उचितः खलु विनयस्त्रिविधः, 'काययोगे च वाचि मानसः' कायिको वाचिको मानसश्च, अष्टचतुर्विधद्विविधः, कायिकोऽष्टविधः वाचिकश्चतुर्विधः मानसो द्विविधः। प्ररूपणा तस्य कायिकाष्टविधादेरियं भवति वक्ष्यमाणलक्षणेति गाथार्थः ॥

कायिकमाह-अभ्युत्थानमर्हस्य, अञ्जलिः प्रश्नादौ, आसनदानं, पीठकाद्युपनयनम्, अभि-ग्रहो गुरुनियोगकरणाभिसंधिः, 'कृतिश्चे'ति कृतिकर्म वन्दनमित्यर्थः, 'शुश्रूषणं' विधिवददूरा-सन्नतया सेवनं, 'अनुगमनम्' आगच्छतः प्रत्युद्गमनं, 'संसाधनं च' गच्छतोऽनुव्रजनं चाष्टविधः कायविनय इति गाथार्थः ॥

वागादिविनयमाह-'हितमितापरुषवा'गिति हितवाक्-हितं वक्ति परिणामसुन्दरं, मितवाग्-मितं स्तोकैरक्षरैः, अपरुषवागपुरुषम्-अनिष्ठुरं, तथा 'अनुविचिन्त्यभाषी' स्वालोचितवक्तेति वाचिको विनयः। तथा अकुशलमनोनिरोधः आर्तध्यानादिप्रतिषेधेन, कुशलमनउदीरणं चैव धर्मध्यानादि-प्रवृत्त्येति मानस इति गाथार्थः ॥

आह-किमर्थमयं प्रतिरूपविनयः ?, कस्य चैष इति ?, उच्यते-

**नि. [३२४]** पडिरूवो खलु विनओ पराणुअत्तिमइओ भुणेअव्वो।
अप्पडिरूवो विनवो नायव्वो केवलीणं तु ॥

**नि. [३२५]** एसो मे परिकहिओ विनओ पडिरूवलक्खणो तिविहो।
बावन्नविहिविहाणकबेंति अनासयणाविनयं ॥

**नि. [३२६]** तित्थगरसिद्धकुलगणसंघकियाधम्मनाणनाणीणं।
आयरिअथेरओज्झागणीणं तेरस पयाणि ॥

**नि. [३२७]** अनसायणा य भत्ती बहुमानो तहय वन्नसंजलणा।
तित्थगराई तेरस चउग्गुणा होंति बावन्ना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'प्रतिरूपः' उचितः खलु विनयः 'परानुवृत्यात्मकः' तत्तद्वस्त्वपेक्षया प्राय आत्मव्यतिरिक्तप्रधानानुवृत्यात्मको मन्तव्यः । अयं च बाहुल्येन छद्मस्थानां । तथा 'अप्रतिरूपो विनयः' अपरानुवृत्यात्मकः, स च ज्ञातव्यः केवलिनामेव, तेषां तेनैव प्रकारेण कर्मविनयनात्, तेषामपीत्वरः प्रतिरूपोऽज्ञातकेवलभावानां भवत्येवेति गाथार्थः ॥

उपसंहरन्नाह-'एषः' अनन्तरोदितो 'भे' भवतां परिकथितो विनयः प्रतिरूपलक्षणः 'त्रिविधः' कायिकादिः 'द्विपञ्चाशद्विधिविधानम्' एतावत्प्रभेदमित्यर्थः 'ब्रुवते' अभिदधति तीर्थकरा 'अनाशातनाविनयं' वक्ष्यमाणमिति गाथार्थः ॥

एतदेवाह-तीर्थकरसिद्धकुलगणसङ्घक्रिया-धर्मज्ञानज्ञानिनां तथा आचार्यस्थविरोपाध्यायगणिनां संबन्धीना त्रयोदश पदानि, अत्र तीर्थकरसिद्धौ प्रसिद्धौ, कुलं नागेन्द्रकुलादि, गणः कोटिकादिः, सङ्घः प्रतीतः, क्रियाऽस्तिवादरूपा, धर्मः श्रुतधर्मादि, ज्ञानं मत्यादि, ज्ञानिनस्तद्वन्तः, आचार्यः प्रतीतः, स्थविरः सीदतां स्थिरी-करणहेतुः, उपाध्यायः प्रतीतः, गणाधिपतिर्गणिरिति गाथार्थः ॥ एतानी त्रयोदश पदानि अनाशातनादिभिश्चतुर्भिर्गुणितानि द्विपञ्चाशद्‌भवन्तीत्याह-अनाशातना च तीर्थकरादीनां सर्वथा अहीलनेत्यर्थः, तथा भक्तिस्तेष्वेवोचितोपचाररूपा, तथा बहुमानस्तेष्वेवान्तरभावप्रतिबन्धरूपः, तथा च वर्णसंज्वलना-तीर्थकरादीनामेव सद्‌भूतगुणोत्कीर्तना ।

एवमनेन प्रकारेण तीर्थकरादयस्त्रयोदश चतुर्गुणा अनाशातनाद्युपाधिभेदेन भवन्ति द्विपञ्चाशद्‌भेदा इति गाथार्थः ॥ उक्तो विनयः, साम्प्रतं समाधिरुच्यते, तत्रापि नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यादिसमाधिमाह-

**नि. [३२८]** दव्वं जेण व दव्वेण समाही आहिअं च जं दव्वं ।
भावसमाहि चउव्विह दंसणनाणे तवचरित्ते ॥

वृ. 'द्रव्य'मिति द्रव्यमेव समाधिः द्रव्यसमाधिः यथा मात्रकम् अविरोधि वा क्षीरगुडादि तथा येन वा द्रव्येणोपयुक्तेन समाधिस्त्रिफलादिना तद् द्रव्यसमाधिरिति । तथा आहितं वा यद्रव्यं समतां करोति तुलारोपितपलशतादिवत्स्वस्थाने तद् द्रव्यं समाधिरिति । उक्तो द्रव्यसमाधिः, भावसमाधिमाह-'भावसमाधिः' प्रशस्तभावाविरोधलक्षणश्चतुर्विधः, चातुर्विध्यमेवाह-दर्शनज्ञानतपश्चारित्रेषु । एतद्विषयो दर्शनादीनां व्यस्तानां समस्तानां वा सर्वथाऽविरोध इति गाथार्थः ॥ उक्तः समाधिः, तदभिधानान्नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादिचर्चः पूर्ववत् तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं,

## -: अध्ययनं-९ उद्देशक-१ :-

*मू. ( ४१५ )थंभा व कोहा व मयप्पमाया, गुरुस्सगासे विनयं न सिक्खे ।*
*सो चेव उ तस्स अभूइभावो, फलं व कीअस्स वहाय होइ ॥*

वृ. 'थंभा व'त्ति, अस्य व्याख्या-'स्तम्भाद्वा' मानाद्वा जात्यादिनिमित्तात् 'क्रोधाद्वा' अक्षान्तिलक्षणात् 'मायाप्रमादा'दिति मायातो-निकृतिरूपायाः प्रमादाद्-निद्रादेः सकाशात्, किमित्याह-'गुरोः सकाशे' आचार्यादेः समीपे 'विनयम्' आसेवनाशिक्षाभेदभिन्नं 'न शिक्षते' नोपादत्ते, तत्र स्तम्भात्कथमहं जात्यादिमान् जात्यादिहीनसकाशे शिक्षामीति, एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधात्क्वचिद्वितथकरणचोदितो रोषाद्वा, मायातः शूलं मे क्रियत इत्यादिव्याजेन, प्रमादात्प्रक्रान्तोचितमनवबुद्ध्यमानो निद्रादिव्यासङ्गेन, स्तम्भादिक्रमोपन्यासश्चेत्थमेवामीषां विनयविघ्नहेतुतामाश्रित्य प्राधान्यख्यापनार्थः । तदेवं स्तम्भादिभ्यो गुरोः सकाशे विनयं न शिक्षते, अन्ये तु पठन्ति-गुरोः सकाशे 'विनये न तिष्ठति' विनये न वर्त्तते, विनयं नासेवत इत्यर्थः । इह च 'स एव तु' स्तम्भादिर्विनयशिक्षाविघ्नहेतुः 'तस्य' जडमतेः 'अभूतिभाव' इति अभूतेर्भावोऽभूतिभावः, असंपद्भाव इत्यर्थः, किमित्याह-'वधाय भवति' गुणलक्षणभावप्राणविनाशाय भवति, दृष्टान्तमाह-'फलमिव कीचकस्य' कीचको-वंशस्तस्य यथा फलं वधाय भवति, सति तस्मिंस्तस्य विनाशात्, तद्वदिति सूत्रार्थः ॥

*मू. (४१६) जे आवि मंदित्ति गुरुं विइत्ता, डहरे इमे अप्पसुअत्ति नच्चा ।*
*हीलंति मिच्छं पडिवज्जमाणा, करंति आसायण ते गुरूणं ॥*

**वृ.** किं च-'जे आवि'त्ति सूत्रं, ये चापि केचन द्रव्यसाधवोऽगम्भीराः, किमित्या-ह-'मन्द इति गुरु विदित्वा' क्षयोपशमवैचित्र्यात्तन्त्रयुक्तलोचनाऽसमर्थः सत्प्रज्ञाविकल इति स्वमाचार्यं ज्ञात्वा । तथा कारणान्तरस्थापितमप्राप्तवयसं 'डहरोऽयम्' अप्राप्तवयाः खल्वयं, तथा 'अल्पश्रुत' इत्यनधीतागम इति विज्ञाय, किमित्याह-'हीलयन्ति' सूययाऽसूयया वा खिंसयन्ति, सूयया अतिप्रज्ञस्त्वं वयोवृद्धो बहुश्रुत इति, असूयया तु मन्दप्रज्ञस्त्वमित्याद्यभिदधति, 'मिथ्यात्वं प्रतिपद्यमाना' इति गुरुर्न हीलनीय इति तत्त्वमन्यथाऽवगच्छन्तः कुर्वन्ति 'आशातनां' लघुतापादनरूपां 'ते' द्रव्यसाधवः 'गुरूणाम्' आचार्याणां, तत्स्थापनाया अबहुमानेन एकगुर्वाशातनायां सर्वेषाकाशातनेति बहुवचनम्, अथवा कुर्वन्ति 'आशातनां' स्वसम्यग्दर्शनादिभावापहासरूपां ते गुरूणां संबन्धिनीं, तन्निमित्तत्वादिति सूत्रार्थः ॥

*मू. (४१७) पगईई मंदावि भवंति एगे, डहरावि अ जे सुअबुद्धोववेआ ।*
*आयारमंतो गुणसुट्ठिअप्पा, जे हीलिआ सिहिरिव भास कुज्जा ॥*

**वृ.** अतो न कार्या हीलनेति, आह च-'पगइ'त्ति सूत्रं, 'प्रकृत्या' स्वभावेन कर्मवैचित्र्यात् 'मन्दा अपि' सद्बुद्धिरहिता अपि भवन्ति 'एके' केचन वयोवृद्धा अपि तथा 'डहरा अपि च' अपरिणता अपि च वयसाऽन्येऽमन्दा भवन्तीति वाक्यशेषः, किंविशिष्टा इत्याह-ये च 'श्रुतबुद्ध्युपपेताः' तथा सत्प्रज्ञावन्तः श्रुतेन बुद्धिभावेन वा, भाविनीं वृत्ति-माश्रित्याल्पश्रुता इति, सर्वथा 'आचारवन्तो' ज्ञानाद्याचारसमन्विताः 'गुणसुस्थितात्मानो' गुणेषु-संग्रहोपग्रहादिषु सुष्ठु-भावसारं स्थित आत्मा येषां ते तथाविधा न हीलनीयाः, ये 'हीलिताः' खिंसिताः 'शिखीव' अग्निरिवेन्धनसंघातं 'भस्मसात्कुर्युः' ज्ञानादिगुणसंघातमपनयेयुरिति सूत्रार्थः ॥

*मू. (४१८) जे आवि नागं डहरंति नच्चा, आसायए से अहिआय होइ ।*
*एवायरिअंपि हु हीलयंतो, निअच्छई जाइपहं खु मंदो ॥*

**वृ.** विशेषेण डहरहीलनादोषमाह-'जे आवि'त्ति सूत्रं, यश्चापि कश्चिदज्ञो 'नागं' सर्पं 'डहर इति' बाल इति 'ज्ञात्वा' विज्ञाय 'आशातयति' किलिञ्चादिना कदर्थयति 'स' कदर्थ्यमानो नागः 'से' तस्य कदर्थकस्य 'अहिताय भवति' भक्षणेन प्राणनाशाय भवति, एष दृष्टान्तोऽयमर्थोपनयः-एवमाचार्यमपि कारणतोऽपरिणतमेव स्थापितं हीलयन् निर्गच्छति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जातिपन्थानं' द्वीन्द्रियादिजातिमार्गं 'मन्दः' अज्ञः, संसारे परिभ्रमतीति सूत्रार्थः ॥

*मू. (४१९) आसीविसो वावि परं सुरुट्ठो, किं जीवनासाउ परं न कुज्जा ? ।*
*आयरिअपाया पुण अप्पसन्ना, अबोहिआसायण नत्थि मुक्खो ॥*

**वृ.** अत्रैव दृष्टान्तदार्ष्टान्तिकयोर्महदन्तरमित्येतदाह-'आसि'त्ति सूत्रं, 'आशीविषश्चापि' सर्पोऽपि परं 'सुरुष्टः' सुक्रुद्धः सन् किं 'जीवितनाशात्' मृत्योः परं कुर्यात् ?, न किंचिद-पीत्यर्थः, आचार्यपादाः पुनः 'अप्रसन्ना' हीलनयाऽननुग्रहे प्रवृत्ताः, किं कुर्वन्तीत्याह-'अबोधिं' निमित्तहेतुत्वेन मिथ्यात्वसंहतिं, तदाशातनया मिथ्यात्वबन्धात्, यतश्चैवमत आशात-नया गुरोर्नास्ति मोक्ष इति, अबोधिसंतानानुबन्धेनानन्तरसंसारिकत्वादिति सूत्रार्थः ॥

*मू. (४२०) जो पावगं जलिअमवक्कमिज्जा, आसीविसं वावि हु कोवइज्जा ।*
*जो वा विसं खायई जीविअट्ठी, एसोवमाऽऽसायणया गुरूणं ॥*

**वृ.** किं च-'जो पावगं'ति सूत्रं, यः 'पावकम्' अग्निं ज्वलितं सन्तम्, 'अपक्रामेद्' अवष्टभ्य तिष्ठति, 'आशीविषं वापि हि' भुजङ्गमं वापि हि 'कोपयेत्' रोषं ग्राहयेत्, यो वा विषं स्वादति 'जीवितार्थी' जीवितुकामः, 'एषोपमा' अपायप्राप्तिं प्रत्येतदुपमानम्, आशातनया कृतया गुरूणां संबन्धिन्या तद्वदपायो भवतीति सूत्रार्थः ॥

*मू. (४२१) सिआ हु से पावय नो डहिज्जा, आसीविसो वा कुविओ न भक्खे ।*
*सिआ विसं हालहलं न मारे, न आवि मुक्खो गुरुहीलणाए ॥*

**वृ.** अत्र विशेषमाह-'सिआ हु'त्ति सूत्रं, 'स्यात्' कदाचिन्मन्त्रादिप्रतिबन्धादसौ 'पावकः' अग्निः 'न दहेत्' न भस्मसात्कुर्यात्, 'आशीविषो वा' भुजङ्गो वा कुपितो 'न भक्षयेत्' न स्वादयेत्, तथा 'स्यात्' कदाचिन्मन्त्रादिप्रतिबन्धादेव विषं 'हालाहलम्' अतिरौद्रं 'न मारयेत्' न प्राणांस्त्याजयेत्, एवमेतत्कदाचिद्भवति न चापि मोक्षो 'गुरुहीलनया' गुरोराशातनया कृतया भवतीति सूत्रार्थः ॥

*मू. (४२२) जो पव्वयं सिरसा भित्तुमिच्छे, सुत्त व सीहं पडिबोहइज्जा ।*
*जो वा दए सत्तिअग्गे पहारं, एसोवमाऽऽसायणया गुरूणं ॥*

**वृ.** किंच-'जो पव्वयं'ति सूत्रं, यः पर्वतं 'शिरसा' उत्तमाङ्गेन भेत्तुमिच्छेत्, सुप्तं वा सिंहं गिरिगुहायां प्रतिबोधयेत्, यो वा ददाति 'शक्त्यग्रे' प्रहरणविशेषाग्रे प्रहारं हस्तेन, एषोपमा-ऽऽशातनया गुरूणामिति पूर्ववदेवेति सूत्रार्थः ॥

*मू. (४२३) सिआ हु सीसेण गिरिंपि भिंदे, सिआ हु सीहो कुविओ न भक्खे ।*
*सिआ न भिंदिज्ज व सत्तिअग्गं, न आवि मुक्खो गुरुहीलणाए ॥*

**वृ.** अत्र विशेषमाह-'सिआ हु'त्ति सूत्रं, 'स्यात्' कदाचित्कश्चिद्वासुदेवादिः प्रभावाति-शयाच्छिरसा 'गिरिमपि' पर्वतमपि भिन्द्यात्, स्यान्मन्त्रादिसामर्थ्यात्सिंहः कुपितो न भक्षयेत्, स्याद्देवतानुग्रहादेर्न भिन्द्याद्वा शक्त्यग्रं प्रहारे दत्तेऽपि, एवमेतत्कदाचिद्भवत्ति, न चापि मोक्षो 'गुरुहीलनया' गुरोराशातनया भवतीति सूत्रार्थः ॥

*मू. (४२४) आयरिअपाया पुण अप्पसन्ना, अबोहिआसायण नत्थि मुक्खो ।*
*तम्हा अणाबाहसुहाभिकंखी, गुरुप्पसायाभिमुहो रमिज्जा ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.एवं पावकाद्याशातनाया गुर्वाशातना महतीत्यतिशयप्रदर्शनार्थमाह-'आयरिअ'त्ति सूत्रं, आचार्यपादाः पुनरप्रसन्ना इत्यादि पूर्वार्धं पूर्ववत्, यस्मादेवं तस्माद् 'अनाबाधसुखाभिकाङ्क्षी' मोक्षसुखाभिलाषी साधुः 'गुरुप्रसादाभिमुखः' आचार्यादिप्रसाद उद्युक्तः सन् 'रमेत' वर्तेत इति।

*मू.(४२५) जहाहिअग्गी जलणं नमंसे, नाणाहुईमंतपयाभिसित्तं।*
*एवायरिअं उवचिट्ठइज्जा, अनंतनाणोवगओऽवि संतो॥*

वृ. केन प्रकारेणेत्याह-'जहाहिअग्गि'त्ति सूत्रं, यथा 'आहिताग्निः' कृतावसथा-दिर्ब्राह्मणो 'ज्वलनम्' अग्निं नमस्यति, किंविशिष्टमित्याह-'नानाहुतमन्त्रपदाभिषिक्तं' तत्रा-हुतयो-धृतप्रेक्षपादिलक्षणा मन्त्रपदानि अग्नये स्वाहेत्येवमादीनि तैरभिषिक्तं-दीक्षा-संस्कृतमित्यर्थः, 'एवम्' अग्निमिवाचार्यम् 'उपतिष्ठेत्' विनयेन सेवेत, किंविशिष्ट इत्याह-

'अनन्तज्ञानोपगतोऽपी'ति अनन्तं स्वपरपर्यायापेक्षया वस्तु ज्ञायते येन तदनन्तज्ञानं तदुपगतोऽपि सन्, किमङ्ग पुनरन्य इति सूत्रार्थः॥

*मू.(४२६) जस्संतिए धम्मपयाइं सिक्खे, तस्संतिए वेणइयं पउंजे।*
*सक्कारए सिरसा पंजलीओ, कायग्गिरा भो मनसा अ निच्चं॥*

वृ.एतदेव स्पष्टयति-'जस्स'त्ति सूत्रं, 'यस्यान्तिके' यस्य समीपे 'धर्मपदानि' धर्मफलानि सिद्धान्तपदानि 'शिक्षेत' आदद्यात् 'तस्यान्तिके' तत्समीपे किमित्याह-'वैनयिकं प्रयुञ्जीत' विनय एव वैनयिकं तत्कुर्यादिति भावः, कथमित्याह-सत्कारयेदभ्युत्थानादिना पूर्वोक्तेन 'शिरसा' उत्तमाङ्गेन 'प्राञ्जलिः' प्रोद्गताञ्जलिः सन् 'कायेन' देहेन 'गिरा' वाचा मस्तकेन वन्दे इत्यादिरूपया 'भो' इति शिष्यामन्त्रणं 'मनसा च' भावप्रतिबन्धरूपेण 'नित्यं' सदैव सत्कारयेत्, न तु सूत्रग्रहणकाल एव, कुशलानुबन्धव्यवच्छेदप्रसङ्गादिति सूत्रार्थः॥

*मू.(४२७) लज्जा दया संजम बंभचेरं, कल्लाणभागिस्स विसोहिठाणं।*
*जे मे गुरू सययमनुसासयंति, तेऽहं गुरू सययं पूअयामि॥*

वृ. एवं च मनसि कुर्यादित्याह-'लज्जा दय'त्ति सूत्रं, 'लज्जा' अपवादभयरूपा 'दया' अनुकम्पा 'संयमः' पृथिव्यादिजीवविषयः 'ब्रह्मचर्यं' विशुद्धतपोऽनुष्ठानम्, एतल्लज्जादि विपक्षव्यावृत्त्या कुशलपक्षप्रवर्त्तकत्वेन कल्याणभागिनो जीवस्य 'विशोधिस्थानं' कर्म-मलापनयनस्थानं वर्त्तते, अनेन ये मां 'गुरव' आचार्याः 'सततम्' अनवरतम् 'अनुशासयन्ति' कल्याणयोग्यतां नयन्ति तानहमेवंभूतान् गुरून् सतत पूजयामि, न तेभ्योऽन्यः पूजार्ह इति।

*मू.(४२८) जहा निसंते तवणच्चिमाली, पभासई केवल भारहं तु।*
*एवायरिओ सुअसीलबुद्धिए, विरायई सुरमज्झे व इंदो॥*

वृ.इतश्चैते पूज्या इत्याह-'जह'त्ति सूत्रं, यथा 'निशान्ते' रात्र्यवसाने दिवस इत्यर्थः, तपन् 'अर्चिर्मालीवाचार्यः 'श्रुतेन' आगमेन 'शीलेन' परद्रोहविरतिरूपेण 'बुद्ध्या च' स्वाभाविक्या युक्तः सन् प्रकाशयति जीवादिभावानिति। एवं च वर्त्तमानः सुसाधुभिः परिवृतो विराजते 'सुरमध्य इव' सामानिकादिमध्यगत इव इन्द्र इति सूत्रार्थः॥

*मू.(४२९) जहा ससी कोमुइजोगजुत्तो, नक्खत्ततारागणपरिवुडप्पा।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*खे सोहई विमले अब्भमुक्के, एवं गणी सोहइ भिक्खुमज्झे ॥*

**वृ.** किंच-'जह'त्ति सूत्रं, यथा 'शशी' चन्द्रः 'कौमुदीयोगयुक्तः' कार्त्तिकपौर्ण-मास्यामुदित इत्यर्थः, स एव विशेष्यते-'नक्षत्रतारागणपरिवृतात्मा' नक्षत्रादिभिर्युक्त इति भावः, 'खे' आकाशे शोभते, किंविशिष्टे खे?-'विमलेऽभ्रमुक्ते' अभ्रमुक्तमेवात्यन्तं विमलं(तत्) भवतीति ख्यापनार्थमेतत्, एवं चन्द्र इव 'गणी' (तत्) आचार्यः शोधते 'भिक्षुमध्ये' साधुमध्ये, अतोऽयं महत्त्वात्पूज्य इति सूत्रार्थः ॥

*मू. (४३०) महागरा आयरिआ महेसी, समाहिजोगेसुअसीलबुद्धिए।*
*संपाविउकामे अनुत्तराइं, आराहए तोसइ धम्मकामी।*

**वृ.** किंच-'महागर'त्ति सूत्रं, महाकरा ज्ञानादिभावरत्नापेक्षया आचार्या 'महैषिणो' मोक्षैषिणः, कथं महैषिण इत्याह-'समाधियोगश्रुतशीलबुद्धिभिः' समाधियोगैः-ध्यानविशेषैः श्रुतेन-द्वादशाङ्गाभ्यासेन शीलेन-परद्रोहविरतिरूपेण बुद्धया च औत्पत्तिक्यादिरूपया, अन्ये तु व्याचक्षते-समाधियोगश्रुतशीलबुद्धीनां महाकरा इति। तानेवंभूतानाचार्यान् संप्राप्तुकामोऽनुत्तराणि ज्ञानादीनि आराधयेद्विनयकरणेन, न सकृदेव, अपि तु 'तोषयेद्' असकृत्करणेन तोषं ग्राहयेत् धर्मकामो-निर्जरार्थं, न तु ज्ञानादिफलापेक्षयाऽपीति सूत्रार्थः ॥

*मू. (४३१) सुच्चाण मेहावि सुभासिआइं, सुस्सूसए आयरिअप्पमत्तो।*
*आराहइत्ताण गुणे अनेगे, से पावई सिद्धिमनुत्तरं॥ ते बेमि ॥*

**वृ.** 'सोच्चाण'त्ति सूत्रं, श्रुत्वा मेधावी सुभाषितानी गुर्वाराधनफलाभिधायीनि, किमित्याह-शुश्रुषयेदाचार्यान् 'अप्रमत्तो' निद्रादिरहितस्तदाज्ञां कुर्वीतेत्यर्थः, य एवं गुरुशुश्रुषापरः स आराध्य 'गुणान्' अनेकान् ज्ञानादीन् प्राप्नोति सिद्धिमनुत्तरां, मुक्तिमित्यर्थः, अनन्तरं सुकुलादिपरम्परया वा। ब्रवीमीति पूर्ववदयं सूत्रार्थः ॥

अध्ययनं-९ उद्देशकः-१ समाप्तः

## -: अध्ययनं-९ उद्देशक-२ :-

*मू. (४३२) मूलाउ खंधप्पभवो दुमस्स, खंधाउ पच्छा समुविंति साहा।*
*साहप्पसाहा विरुहंति पत्ता, तओ सि पुप्फं च फलं रसो अ।*

**वृ. (४३२)** विनयाधिकारवानेव द्वितीय उच्यते, तत्रेदमादिमं सूत्रं- 'मूलाउ' इत्यादि, 'मूलाद्' आदिप्रबन्धात् 'स्कन्धप्रभवः' स्थुडोत्पादः, कस्येत्याह-'द्रुमस्य' वृक्षस्य। 'ततः' स्कन्धात् सकाशात् 'पश्चात्' तदनु 'समुपयान्ति' आत्मानं प्राप्नुवन्त्युत्पद्यन्त इत्यर्थः, कास्ता इत्याह-'शाखाः' तद्भजाकल्पाः। तथा 'शाखाभ्य' उक्तलक्षणाभ्यः प्रशाखास्तदंशभूता 'विरोहन्ति' जायन्ते, तथा तेभ्योऽपि 'पत्राणि' पर्णानि विरोहन्ति। 'ततः' तदनन्तरं 'से' तस्य द्रुमस्य पुष्पं च फलं च रसश्च फलगत एवैते क्रमेण भवन्तीति सूत्रार्थः ॥

*मू. (४३३) एवं धम्मस्स विनओ, मूलं परमो से मुक्खो।*
*जेण कित्तिं सुअं सिग्घं, नीसेसं चाभिगच्छइ ॥*

**वृ.** एवं द्दष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवं' द्रुममूलवत् धर्मस्य परमकल्पवृक्षस्य विनयो 'मूलम्' आदिप्रबन्धरूपं 'परम' इत्यग्रो रसः 'से' तस्य फलरस्वन्मोक्षः, स्कन्धादिकल्पानि तु देवलोकगमनसुकुलागमनादीनि, अतो विनयः कर्तव्यः किंविशिष्ट इत्याह- 'येन' विनयेन 'कीर्त्ति' सर्वत्र शुभप्रवादरूपां तथा 'श्रुतम्' अङ्गप्रविष्टादि 'श्लाध्यं' प्रशंसास्पदभूतं 'निःशेषं' संपूर्णम् 'अधिगच्छति' प्राप्नोतीति ॥

*मू. (४३४) जे अ चंडे मिए थद्धे, दुव्वाई नियडी सढे ।*
*वुज्झइ से अविनीअप्पा, कट्ठं सोअगयं जहा ।*

वृ. अविनयवतो दोषमाह- 'जे अ'त्ति सूत्रं, यः 'चण्डो' रोषणो 'मृगः' अज्ञः हितमप्युक्तो रुष्यति तथा 'स्तब्धो' जात्यादिमदोन्मत्तः 'दुर्वाग्' अप्रियवक्ता 'निकृतिमान्' मायोपेतः 'शठः' संयमयोगेष्वनादृतः, एभ्यो दोषेभ्यो विनयं न करोति यः उह्यतेऽसौ पापः संसारस्रोतसा 'अविनीतात्मा' सकलकल्याणैकनिबन्धनविनयविरहितः । किमिवेत्याह-काष्ठं 'स्तोतोगतं' नद्यादिवहनीपतितं यथा तद्वदिति सूत्रार्थः ॥

*मू. (४३५) विनयंपि जो उवाएणं, चोइओ कुप्पई नरो ।*
*दिव्वं सो सिरिमिज्जंतिं, दंडेण पडिसेहए ॥*

वृ. किं च- 'विनयंपी'ति सूत्रं, 'विनयम्' उक्तलक्षणं यः 'उपायेनापि' एकान्तमृदुभणनादिलक्षणेनापि अपिशब्दस्य व्यवहितः संबन्धः 'चोदित' उक्तः 'कुप्यति' रुष्यति नरः । अत्र निदर्शनमाह- 'दिव्याम्' अमानुषीम् 'असौ' नरः 'श्रियं' लक्ष्मीम् 'आगच्छन्तीम्' आत्मनो भवन्तीं 'दण्डेन' काष्ठमयेन 'प्रतिषेधयति' निवारयति । एतदुक्तं भवति-विनयः संपदो निमित्तं, तत्र स्खलितं यदि कश्चिच्चोदयति स गुणस्तत्रापि रोषकरणेन वस्तुतः संपदो निषेधः, उदाहरणं चात्र दशारादयः कुरूपागतश्रीप्रार्थनाप्रणयभङ्गकारिणस्तद्रहितास्तदभङ्ग-कारी च तद्युक्तः कृष्ण।

*मू. (४३६) तहेव अविनीअप्पा, उववज्झा हया गया ।*
*दीसंति दुहमेहंता, आभिओगमुवट्ठिआ*

वृ. अविनयदोषोपदर्शनार्थमेवाह- 'तहेव'त्ति सूत्रं, 'तथैवे'ति तथवैते अविनीतात्मानो' विनयरहिता अनात्मज्ञाः, उपवाह्यानांराजादिवल्लभानामेते कर्मकरा इत्यौपवाह्याः 'हया' अश्वाः 'गजा' हस्तिनः, उपलक्षणमेतन्महिषकादीनामिति । एते किमित्याह- 'दृश्यन्ते' उपलभ्यन्त एव मन्दुरादौ अविनयदोषेण उभयलोकवर्त्तिना यवसादिवोढारः 'दुःख' संक्लेशलक्षणम् 'एधयन्तः' अनेकार्थत्वादनुभवन्तः 'अभियोग्यं' कर्मकरभावम् 'उपस्थिताः' प्राप्ता इति सूत्रार्थः ॥

*मू. (४३७) तहेव सुविनीअप्पा, उववज्झा हया गया ।*
*दीसंति सुहमेहंता, इड्ढिं पत्ता महायसा ॥*

वृ. एतेष्वेव विनयगुणमाह- 'तहेव'त्ति सूत्रं, 'तथैवे'ति तथैवैते 'सुविनीतात्मानो' विनयवन्त आत्मज्ञा औपवाह्या राजादीनां हया गजा इति पूर्ववत् । एते किमित्याह- 'दृश्यन्ते' उपलभ्यन्त एव सुखम्-आह्लादलक्षणम् 'एधमाना' अनुभवन्तः 'ऋद्धि प्राप्ता' इति विशिष्ट-भूषणालय-भोजनादिभावतः प्राप्तर्द्धयो 'महायशसो' विख्यातसद्गुणा इति सूत्रार्थः ॥

*मू. (४३८) तहेव अविनीअप्पा, लोगंमि नरनारिओ ।*
*दीसंति दुहमेहंता, छाया विगलितेंदिआ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.**एतदेव विनयाविनयफलं मनुष्यानिधिकृत्याह–

'तहेव'त्ति सूत्रं, 'तथैव' तिर्यञ्च इव अविनीतात्मान इति पूर्ववत्। 'लोके' अस्मिन्मनुष्य-लोके, नरनार्य इति प्रकटार्थं दृश्यन्ते दुःखमेधमाना इति पूर्ववत् 'छारा(ताः)' कसधातव्रणाङ्कित-शरीराः 'विगलितेन्द्रिया' अपनीतनासिकादीन्द्रियाः पारदारिकादय इति सूत्रार्थः ॥

**मू.(४३९)** *दंडसत्थापरिज्जुन्ना, असब्भयवयणेहि अ।*
*कलुणाविवन्नच्छंदा, सुप्पिवासाइपरिगया॥*

**वृ.** तथा 'दंड'त्ति सूत्रं, दण्डा–वेत्रदण्डादयः शस्त्राणि–खङ्गादीनी ताभ्यां परिजीर्णाः-समन्ततो दुर्बलभावमापादिताः तथा 'असभ्यवचनैश्च' खरकर्कशादिभिः परिजीर्णाः, त एवंभूताः सतां करुणाहेतुत्वात्करुणा–दीना व्यापन्नच्छन्दसः–परायत्ततया अपेतस्वाभिप्रायाः, क्षुधा-बुभुक्षया पिपासया–तृषा परिगता–व्याप्ता अन्नादिनिरोधस्तोकदानाभ्यामिति। एवमिह लोके प्रागविनयोपात्तकर्मानुभावत एवंभूताः परलोके तु कुशलाप्रवृत्तेर्दुःखिततरा विज्ञेया इति।

**मू.(४४०)** *तहेव सुविनीअप्पा, लोगंसि नरनारिओ।*
*दीसंति सुहमेहंता इड्ढिं पत्ता महायसा॥*

**वृ.**विनयफलमाह–'तहेव'त्ति सूत्रं, 'तथैव' विनीततिर्यञ्च इव सुविनीतात्मानो लोकेऽस्मि-न्नरनार्य इति पूर्ववत्। दृश्यन्ते सुखमेधमानाः शुर्द्धि प्राप्ता महायशस इति पूर्ववदेव, नवरं स्वाराधितनृपगुरुजना उभयलोकसाफल्यकारिण एत इति सूत्रार्थः ॥

**मू.(४४१)** *तहेव अविनीअप्पा, देवा जक्खा अ गुज्झगा।*
*दीसंति दुहमेहंता, आभिओगमुवट्ठिआ॥*

**वृ.(४४१)**एतदेव विनयाविनयफलं देवानधिकृत्याह– 'तहेव'त्ति सूत्रं, 'तथैव' यथा नरनार्यः 'अविनीतात्मानो' भवान्तरेऽकृतविनयाः 'देवा' वैमानिका ज्योतिष्का 'यक्षाश्च' व्यन्तराश्च 'गुह्यका' भवनवासितः, त एते दृश्यन्ते आगमभावचक्षुषा दुःखमेधमानाः पराज्ञाकरणपरवृद्धि-दर्शनादिना, आभियोग्यमुपस्थिताः–अभियोगःआज्ञाप्रदानलक्षणोऽस्यास्तीत्यभियोगी तद्भाव आभियोग्यं कर्मकरभावमित्यर्थः उपस्थिताःप्राप्ता इति सूत्रार्थः ॥

**मू.(४४२)** *तहेव सुविनीअप्पा, देवा जक्खा अ गुज्झगा।*
*दीसंति सुहमेहंता, इड्ढिं पत्ता महायसा॥*

**वृ.** विनयफलमाह–'तहेव'त्ति सूत्रं, 'तथैवे'ति पूर्ववत्, 'सुविनीतात्मानो' जन्मान्तर-कृतविनया निरतिचारधर्माराधका इत्यर्थः, देवा यक्षाश्च गुह्यका इति पूर्ववदेव, दृश्यन्ते सुखमेध-माना अर्हत्कल्याणादिषु 'ऋद्धिं प्राप्ता' इति देवाधिपादिप्राप्तर्द्धयो 'महायशसो' विख्यात-सद्गुणा इति सूत्रार्थः ॥

**मू.(४४३)** *जे आयरिअउवज्झायाणं, सुस्सूसावयणंकरा।*
*तेसिं सिक्खा पवड्ढंति, जलसित्ता इव पायवा॥*

**वृ.**एवं नारकापोहेन व्यवहारतो येषु सुखदुःखसंभवस्तेषु विनयाविनयफलमुक्तम्, अधुना विशेषतो लोकोत्तरविनयफलमाह–'य आचार्यो–पाध्याययोः–प्रतीतयोः 'शुश्रुषावचनकराः' पूजाप्रधानवचनकरणशीलास्तेषां पुण्यभाजां 'शिक्षा' ग्रहणासेवनालक्षणा भावार्थरूपाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'प्रवर्द्धन्ते' वृद्धिमुपयान्ति, दृष्टान्तमाह-जलसिक्ता इव 'पादपा' वृक्षा इति सूत्रार्थः ॥

*मू. (४४४) अप्पणट्ठा परट्ठा वा, सिप्पा नेउणिआणि अ।*
*गिहिणो उवभोगट्ठा, इहलोगस्स कारणा ॥*

वृ. एतच्च मनस्याधाय विनयः कार्य इत्याह- 'आत्मार्थम्' आत्मनिमित्तमनेन मे जीविका भविष्यतीति, एवं 'परार्थं वा' परनिमित्तं वा पुत्रमहमेतद्ग्राहयिष्यामीत्येवं 'शिल्पानि' कुम्भ-कारक्रियादीनि 'नैपुण्यानि च' आलेख्यादिकलालक्षणानि 'गृहिणः' असंयता 'उपभोगार्थम्' अन्नपानादिभोगाय, शिक्षन्त इति वाक्यशेषः 'इहलोकस्य कारणम्' इहलोकनिमित्तमिति।

*मू. (४४५) जेणं बंधं वहं धोरं, परिआवं च दारुणं।*
*सिक्खमाणा निअच्छंति, जुत्ता ते ललिइंदिआ।*

वृ. 'येन' शिल्पादिना शिक्ष्यमाणेन 'बन्धं' निगडादिभिः 'वधं' कषादिभिः 'घोरं' रौद्रं परितापं च 'दारुणम्' एतज्जनितमनिष्टं निर्भर्त्सनादिवचनजनितं च शिक्षमाणा गुरोः सकाशात् 'नियच्छन्ति' प्राप्नुवन्ति 'युक्ता' इति नियुक्ताः शिल्पादिग्रहणे ते 'ललितेन्द्रिया' गर्भेश्वरा राजपुत्रादय इति सूत्रार्थः ॥

*मू. (४४६) तेऽवि तं गुरुं पूअंति, तस्स सिप्पस्स कारणा।*
*सक्कारंति नमंसंति, तुट्ठा निद्देसवत्तिणो ॥*

वृ. तेऽपीत्वरं शिल्पादि शिक्षमाणास्तं गुरुं बन्धादिकारकमपि पूजयन्ति सामान्यतो मधुर-वचनाभिनन्दनेन तस्य शिल्पस्येत्वरस्य कारणात्, तन्निमित्वादिति भावः, तथा 'सत्कारयन्ति' वस्त्रादिना 'नमस्यन्ति' अञ्जलिप्रग्रहादिना। तुष्टा इत्यमुत इदमवाप्यत इति हृष्टा 'निर्देशवर्त्तिन' आज्ञाकारणि इति सूत्रार्थः ॥

*मू. (४४७) किं पुणं जे सुअग्गाही, अनंतहिअकामए।*
*आयरिआ जं वए भिक्खू, तम्हा तं नाइवत्तए ॥*

वृ. यदि तावदेतेऽपि तं गुरुं पूजयन्ति अतः-किं पुनर्यः साधुः 'श्रुतग्राही' परमगुरुषप्रणी-तागमग्रहणाभिलाषी 'अनन्तहितकामुकः' मोक्षं यः कामयत इत्यभिप्रायः, तेन तु सुतरां गुरवः पूजनीया इति, यतश्चैवमाचार्या यद्वदन्ति किमपि तथा तथाऽनेकप्रकारं 'भिक्षुः' साधुस्त-स्मात्तदाचार्यवचनं नातिवर्त्तेत, युक्तत्वात्सर्वमेव संपादयेदिति सूत्रार्थः ॥

*मू. (४४८) नीअं सिज्जं गइं ठाणं, नीअं च आसनानि अ।*
*नीअं च पाए वंदिज्जा, नीअं कुज्जा अ अंजलिं ॥*

वृ. विनयोपायमाह-नीचां 'शय्यां' संस्तारकलक्षणामाचार्यशय्यायाः सकाशात्कुर्यादिति योगः, एवं नीचां गतिं आचार्यगतेः, तत्पृष्ठतो नातिदूरेण नातिदूरेण नातिद्रुतं यायादित्यर्थः, एवं नीचं स्थानमाचार्यस्थानात्, यत्राचार्य आस्ते तस्मान्नीचतरे स्थाने स्थातव्यमिति भावः। तथा 'निचानि' लघुतराणि कदाचित्कारणजाते 'आसनानि' पीठकानि तस्मिन्नुपविष्टे तदनुज्ञातः सेवेत, नान्यथा, तथा 'नीचं' च सम्यगवनतोत्तमाङ्गः सन् पादावाचार्यसत्कौ वन्देत, नावज्ञया, तथा कचित्प्रश्नादौ 'नीचं' नम्रकायं 'कुर्यात्' संपादयेच्चाञ्जलिं, न तु स्थाणुवत्स्तब्ध एवेति।

*मू. (४४९) संघट्टइत्ता काएणं, तहा उवहिणामवि।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*खमेह अवराहं मे, वइज्ज न पुणुत्ति अ ॥*

**वृ.**एवं कायविनयमधिधाय वाग्विनयमाह-

'संघट्टिय' स्पृष्ट्वा 'कायेन' देहेन कथंचित्तथाविधप्रदेशोपविष्टमाचार्यं तथा 'उपधिनापि' कल्पादिना कथंचित्संघट्टय मिथ्यादुष्कृतपुरःसरमभिवन्द्य 'क्षमस्व' सहस्व 'अपराधं' दोषं मे मन्दभाग्यस्यैवं 'वदेद्' ब्रूयात् 'न पुनरिति च' नाहमेनं भूयः करिष्यामीति सूत्रार्थः ॥

**मू. (४५०)** *दुग्गओ वा पओएणं, चोइओ वहई रहं।*
*एवं दुबुद्धि किच्चाणं, वुत्तो वुत्तो पकुव्वई ॥*

**वृ.**एतच्च बुद्धिमान् स्वयमेव करोति, तदन्यस्तु कथमित्याह-

'दुर्गौरिव' गलिबलीवर्दवत् 'प्रतोदेन' आरादण्डलक्षणेन 'चोदितो' विद्धः सन् 'वहति' नयति क्वापि 'रथं' प्रतीतम्, 'एवं' दुर्गौरिव 'दुर्बुद्धिः' अहितावहबुद्धिः शिष्यः 'कृत्यानाम्' आचार्यादीनां 'कृत्यानि वा' तदभिरुचितकार्याणि 'उक्त उक्तः' पुनः पुनरभिहित इत्यर्थः, 'प्रकरोति' निष्पादयति प्रयुङ्क्ते चेति सूत्रार्थः ॥

**मू. (४५१)** *"आलवंते लवंते वा, न निसिज्जाइ पडिस्सुणे।*
*मुत्तूण आसनं धीरो, सुस्सूसाए पडिस्सुणे ॥"*

**मू. (४५२)** *कालं छंदोवयारं च, पडिलेहित्ता न हेउहिं।*
*तेन तेन उवाएणं, तं तं संपडिवायए ॥*

**वृ.**एवं च कृतान्यमूनि न शोभनानीत्यतः (आह)-'कालं' शरदादिलक्षणं, 'छन्दः' तदिच्छा-रूपम् 'उपचारम्' आराधनाप्रकारं, चशब्दाद्देशादिपरिग्रहः, एतत् 'प्रत्युपेक्ष्य' ज्ञात्वा 'हेतुभिः' यथानुरूपैः कारणैः किमित्याह-तेन तेनोपायेन-गृहस्थावर्जनादिना 'तत्तत्' पित्तहरादि-रूपमशनादि संप्रतिपादयेत्, यथा काले शरदादौ पित्तहरादिभो-जनं प्रवातनिवातादिरूपा शय्या, इच्छानुलोभं वा यद्यस्य हितं रोचते च आराधनाप्रकारोऽनुलोभं भाषणं ग्रन्थाभ्यासवैया-वृत्यकरणादि देशे अनूपदेशाद्युचितं निष्ठीवनादिभिर्हेतुभिः श्लेष्माद्याधिक्यं विज्ञाय तदुचितं संपादयेदिति सूत्रार्थः ॥

**मू. (४५३)** *विवत्ती अविनीस्स, संपत्ती विनिअस्स य।*
*जस्सेयं दुहओ नायं, सिक्खं से अभिगच्छइ ॥*

**वृ.** किंच-विपत्तिरविनीतस्य ज्ञानादिगुणानां, संप्राप्तिर्विनीतस्य च ज्ञानादिगुणानामेव, 'यस्यैतत्' ज्ञानादि प्रास्यप्रासिद्धयम् 'उभयतः' उभयाभ्यां विनयाविनयाभ्यां सकाशात् भवती-त्येवं 'ज्ञातम्' उपादेयं चैतदिति भवति 'शिक्षा' ग्रहणासेवनारू पाम् 'असौ' इत्थंभूतः अधि-गच्छति-प्राप्नोति, भावत उपादेयपरिज्ञानादिति सूत्रार्थः ॥

**मू. (४५४)** *जे आवि चंडे मइइड्ढिगारवे, पिसुणे नरे साहसहीणपेसणे।*
*अदिट्ठधम्मे विनए अकोविए, असंविभागी न हु तस्स मुक्खो ॥*

**वृ.**एतदेव दृढयन्नविनीतफलमाह-यश्चापि 'चेण्डः' प्रवजितोऽपि रोषणः 'ऋद्धिगौरव-मतिः' ऋद्धिगौरवे अभिनिविष्टः 'पिशुनः' पृष्ठिमांसखादकः 'नरो' नरव्यञ्जनो न भावनरः 'साहसिकः' अकृत्यकरणपरः 'हीनप्रेषणः' हीनगुर्वाज्ञापर 'अदृष्टधर्मा' सम्यगनुपलब्धश्रुतादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मा 'विनयेऽकोविदो' विनयविषयेऽपण्डितः 'असंविभागी' यत्र क्वचन लाभे न संविभाग-वान्। य इत्थंभूतोऽधमो नैव तस्य मोक्षः, सम्यग्दृष्टेश्चारित्रवत इत्थंविधसंक्लेशाभावादिति।

मू. (४५५) *निद्देसवित्ती पुण जे गुरूणं, सुअत्थधम्मा विनयंमि कोविआ।*
*तरित्तु ते ओघमिणं दुरुत्तरं, खवित्तु कम्मं गइमुत्तमं गय॥*

वृ. विनयफलाभिधानेनोपसंहरन्नाह-निर्देश-आज्ञा तद्वर्त्तिनः पुनर्ये 'गुरूणाम्' आचार्यादीनां 'श्रुतार्थधर्मा' इथि प्राकृतशैल्या श्रुतधर्मार्थो इत्यर्थः, विनये कर्त्तव्ये कोविदा-विपश्चितो य इत्थंभूतास्तीर्त्वा ते महासत्त्वा 'ओघमेनं' प्रत्यक्षोपलभ्यमानं संसारसमुद्रं दुरुत्तारं तीर्त्वेव तीर्त्वा, चरमभवं केवलित्वं च प्राप्येति भावः, ततः क्षपयित्वा कर्म निरवशेषं भवोपग्राहिसंज्ञितं गतुमुत्तमां सिद्ध्याख्यां 'गताः' प्राप्ताः। इति ब्रवीमीति पूर्ववदिति।

अध्ययन - ९, उद्देशक : - २ समाप्तः

## -: अध्ययनं-९, उद्देशक :-३ :-

मू. (४५६) *आयरिअं अग्गिमिवाहिअग्गी, सुस्सूमाणो पडिजागरिज्जा।*
*आलोइअं इंगिअमेव नच्चा, जो छंदमाराहयइ स पुज्जो॥*

वृ. साम्प्रतं तृतीय आरभ्यते, इह च विनीतः पूज्य इत्युपदर्शयन्नाह-

'आचार्य' सूत्रार्थप्रदं तत्स्थानीयं वाऽन्य ज्येष्ठार्य, किमित्याह-'अग्निमिव' तेजस्कायमिव 'आहिताग्नि' ब्राह्मणः 'शुश्रूषमाणः' सम्यक्सेवमानः 'प्रतिजागृयात्' तत्तत्कृत्यसंपादनेनोप-चरेत्। आह-यथाऽऽहिताग्निरित्यादिना प्रागिदमुक्तमेव, सत्यं, किं तु तदाचार्यमेवाङ्गीकृत्य इदं तु रत्नाधि-कादिकमप्यधिकृत्योच्यते, वक्ष्यति च-'रायणीएसु विनय' मित्यादि, प्रति-जागरणोपायमाह-'आलोकितं' निरीक्षितम् 'इङ्गितमेव च' अन्यथावृत्तिलक्षणं 'ज्ञात्वा' विज्ञायाचार्योयं 'यः' साधुः 'छन्दः' अभिप्रायमाराधयति। यथा शीते पतति प्रावरणावलोकने तदानयने, इङ्गिते वा निष्ठीवनादिलक्षणे शुण्ठ्यद्यानयनेन 'स पूज्यः' स इत्थंभूतः साधुः पूजार्हः, कल्याणभागिति सूत्रार्थः॥

मू. (४५७) *आयारमट्ठा विनयं पउंजे, सुस्सूसमाणो परिगिज्झ वक्कं।*
*जहोवइट्ठं अभिकंखमाणो, गुरुं तु नासाययई स पुज्जो॥*

वृ. प्रक्रान्ताधिकार एवाह-

'आचारार्थं' ज्ञानाद्याचारनिमित्तं 'विनयम्' उक्तलक्षणं 'प्रयुङ्क्ते' अतोऽन्यथाकरणेन 'गुरुं त्वि' ति आचार्यमेव 'नाशातयति' न हीलयति यः स पूज्य इति सूत्रार्थः॥

मू. (४५८) *रायनिएसु विनयं पउंजे, डहराऽवि अ जे परिआयजिट्ठा।*
*नीअत्तणे वट्टइ सच्चवाई, उवायवं वक्ककरे स पुज्जो॥*

वृ. किं च -'रत्नाधिकेषु' ज्ञानादिभावरत्नाभ्युच्छ्रितेषु 'विनयं' यथोचितं 'प्रयुङ्क्ते' करोति, तथा डहरा अपि च ये वयःश्रुताभ्यां 'पर्यायज्येष्ठां' चिरप्रव्रजितास्तेषु विनयं प्रयुङ्क्ते, एवं च यो 'नीचत्वे' गुणाधिकान् प्रति नीचभावे वर्त्तते 'सत्यवादी' अविरुद्धवक्ता तथा 'अवपातवान्' वन्दनशीलो निकटवर्त्ती व ।एवं च यो 'वाक्यकरो' गुरुनिर्देशकरणशीलः स पूज्य इति।

मू. (४५९) *अन्नायउंछं चरई विसुद्धं, जवणट्ठया समुआणं च निच्चं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अलद्धुअं नो परिदेवइज्जा, लद्धुं न विकत्थई स पुज्जो ॥*

**वृ.** किं च-'अज्ञातोञ्छं' परिचयाकरणेनाज्ञातः सन् भावोञ्छं गृहस्थोद्धरितादि 'चरति' अटित्वाऽऽनीतं भुङ्क्ते, न तु ज्ञातस्तद्बहुमतमिति, एतदपि 'विशुद्धम्' उद्‌गमादि-दोषरहितं, न तद्विपरीतम्, एतदपि 'यापनार्थं' संयमभरोद्वाहिशरीरपालनाय नान्यथा 'समुदानं च' उचितभिक्षालब्धं च 'नित्यं' सर्वकालं न तूञ्छमप्येकत्रैव बहुलब्धं कादाचित्कं वा, एवंभूतमपि विभागतः 'अलब्ध्वा' अनासाद्य 'न परिदेवयेत्' न खेदं यायात्, यथा-मन्द-भाग्योऽहमशोभना वाऽयं देश इति, एवं विभागतश्च 'लब्ध्वा' प्राप्योक्ति 'न विकत्थते' न श्लाघां करोति-सपुण्योऽहं शोभना वाऽयं देश इत्येवं स पूज्य इथि सूत्रार्थः ॥

**मू. (४६०)** *संथारसिज्जासनभत्तपाने, अप्पिच्छया अइलाभेऽवि संते ।*
*जो एवमप्पाणभितोसइज्जा, संतोसपाहन्नरए स पुज्जो ॥*

**वृ.** किं च-संस्तारकशय्यासनभक्तपानानि प्रतीतान्येव, एतेषु 'अल्पेच्छता' अमूर्च्छया परिभोगोऽतिरिक्ताग्रहणं वा अतिलाभेऽपि सति संस्तारकादीनां गृहस्थेभ्यः सकाशात् य एवमात्मानम् 'अभितोषयति' येन वा तेन वा यापयति 'संतोषप्राधान्यरतः' संतोष एव प्रधानभावे शक्तः स पूज्य इति सूत्रार्थः ॥

**मू. (४६१)** *सक्का सहेउं आसाइ कंटया, अओमया उच्छहया नरेणं ।*
*अनासए जो उ सहिज्ज कंटए, वईमए कन्नसरे स पुज्जो ॥*

**वृ.** इन्द्रियसमाधिद्वारेण पूज्यतामाह-शक्याः सोढुम् 'आशये'ति इदं मे भविष्यतीति प्रत्याशया, क इत्याह-कण्टका 'अग्रोमया' लोहात्मकाः 'उत्सहता नरेण' अर्थोद्यमवतेत्यर्थः, तथा च कुर्वन्ति केचिदयोमयकण्टकास्तरणशय-नमप्यर्थलिप्सया, न तु वाक्कण्टकाः शंक्या इत्येवं व्यवस्थिते 'अनाशया' फलप्रत्याशया निरीहः सन् यस्तु सहेत कण्टकान् 'वाङ्म-यान्' खरादिवागात्मकान् 'कर्णसरान्' कर्णगामिनः स पूज्य इति सूत्रार्थः ॥

**मू. (४६२)** *मुहुत्तदुक्खा उ हवंति कंटया, अओमया तेऽवि तओ सुउद्धरा ।*
*वायुदुरुत्ताणि दुरुद्धाराणि, वेरानुबंधीणि महब्भयाणि ॥*

**वृ.** एतदेव स्पष्टयति-'मुहूर्त्तदुःखा' अल्पकालदुःखा भवन्ति कंटका अयोमयाः, वेधकाल एव प्रायो दुःखभावात्, तेऽपि 'ततः' कायात् 'सद्धराः' सुखेनैवोध्ध्रियन्ते व्रणपरिकर्म च क्रियते, वाग्दुरुक्तानि पुनः 'दुरुद्धराणि' दुःखेनोध्ध्रियन्ते मनोलक्षवेधनाद् 'वैरानुबन्धीनि' तथाश्रवणप्रद्वेषादिनेह परत्र च वैरानुबन्धीनि भवन्ति अत एव महाभयानि, कुगतिपातादि-महाभयहेतुत्वादिति सूत्रार्थः ॥

**मू. (४६३)** *समावयंता वयणाभिधाया, कन्नंगया दुम्मणिअं जणंति ।*
*धम्मुत्ति किच्चा परमंग्गसूरे, जिइंदिए जो सहई स पुज्जो ॥*

**वृ.** च-'समापततन्त' एकीभावेनाभिमुखं पतन्तः, "इत्याह-'वचनाभिधाताः' खरादि-वचनप्रहाराः कर्णगताः सन्तः प्रायोऽनादिभवाभ्यासात् 'दौर्मनस्यं' दुष्टमनोभावं जनयन्ति, प्राणिनामेवंभूतान् वचनाभिधातान् धर्मइतिकृत्वा सामायिकपरिणामापन्नो न त्वशक्तयादिना 'परिमाग्रशूरो' दानसंग्रामशूरोपेक्षया प्रधानः शूरो जितेन्द्रियः सन् यः सहते न तु तैर्विकारमुप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शयति स पूज्य इति सूत्रार्थः ॥

*मू. (४६४)* *अवण्णवायं च परम्मुहस्स, पच्चक्खओ पडिणीअं च भासं।*
*ओहारणिं अप्पिअकारिणिं च, भासं न भासिज्ज सया स पुज्जो ॥*

**वृ.** तथा-'अवर्णवादं च' अश्लाघावादं च 'पराव्मुखस्य' पृष्ठत इत्यर्थः 'प्रत्यक्षस्य च 'प्रत्यनीकाम्' अपकारिणीं चौरस्त्वमित्यादिरूपां भाषां तथा 'अवधारिणीम्' अशोभन एवाय-मित्यादिरूपाम् 'अप्रियकारिणींच' श्रोतुर्मृतनिवेदनादिरूपां 'भाषां' वाचं 'न भाषेत सदा' यः कदाचिदपि नैव ब्रूयात्स पूज्य इति सूत्रार्थः ॥

*मू. (४६५)* *अलोलुए अक्कुहए अमाई, अपिसुणे आवि अदीनवित्ती।*
*नो भावए नोऽविअ भाविअप्पा, अकोउहल्ले अ सया स पुज्जो ॥*

**वृ.** तथा-'अलोलुप' आहारादिष्वलुब्धः 'अकुहक' इन्द्रजालादिकुहकरहितः 'अमायी' कौटिल्यशून्यः 'अपिशुनश्चापि' नो छेदभेदकर्ता 'अदीनवृत्तिः' आहाराद्यलोभेऽपि शुद्धवृत्तिः नो भावयेद् अकुशलभावनया परं, यथाऽमुकपुरतो भवताऽहं वर्णनीयः 'नापि च भावितात्मा' स्वयमन्यपुरतः स्वगुणवर्णनापरः अकौतुकश्च सदा नटनर्त्तकादिषु यः स पूज्य इति सूत्रार्थः ॥

*मू. (४६६)* *गुणेहि साहू अगुणेहिऽसाहू गिण्हाहि साहु गुण मुंचऽसाहू।*
*विआणिआ अप्पगमप्पएणं, जो रागदोसेहिं समो स पुज्जो ॥*

**वृ.** किं च-'गुणैः' अनन्त रोदितैर्विनयादिभिर्युक्तः साधुर्भवति, तथा 'अगुणैः' उक्तगुणविपरीतैरसाधुः, एवं सतिगृहाण साधुगुमान् मुञ्चासाधुगुणानिति शोभन उपदेशः, एवमधिकृत्य प्राकृतशैल्या 'विज्ञापयति' विविधं ज्ञापयत्यात्मानमात्मना यः तथा 'रागद्वेषयोः समः' न रागवान्न द्वेषवानिति स पूज्य इति सूत्रार्थः ॥

*मू. (४६७)* *तहेव डहरं च महल्लगं वा, इत्थीं पुमं पव्वइअं गिहिं वा।*
*नो हीलए नोऽवि अ खिंसइज्जा, थंभं च कोहं च चए स पुज्जो ॥*

**वृ.** किं च -'तथैवे'ति पूर्ववत्, डहरं वा महल्लकं वा, वाशब्दान्मध्यमं वा, स्त्रियं पुमांस-मुपलक्षणत्वान्नपुंसकं वा प्रव्रजितं गृहिणं वां, वाशब्दादन्यतीर्थिकं वा 'न हीलयति नापि च खिंसयति' तत्र सूयया असूयया वा सकृद्दुष्टाभिधानं हीलनं, तदेवासकृत्खिंसनमिति।

हीलनखिंसनयोश्च निमित्तभूतं 'स्तम्भं च'मानं च 'क्रोधं च' रोषं च त्यजति यः स पूज्यो, निदानत्यागेन तत्त्वतः कार्यात्यागदिति सूत्रार्थः ॥

*मू. (४६८)* *जे मानिआ सययं मानयंति, जत्तेण कन्नं व निवेसयंति।*
*ते मानए मानारिहे तवस्सी, जिइंदिए सच्चरए स पुज्जो ॥*

**वृ.** किं च-'ये मानिता अभ्युत्थानादिसत्कारैः 'सततम्' अनवरतं शिष्यान् 'मानयन्ति' श्रुतोपदेशं प्रति चोदनादिभिः, तथा 'यत्नेन कन्यामिव निवेशयन्ति' यथा मातपितरः कन्यां गुणैर्वयसा च संवर्द्धय योग्यभर्त्तरि स्थापयन्ति एवमाचार्याः शिष्यं सूत्रार्थवेदिनं दृष्ट्वा महत्या-चार्यपदेऽपि स्थापयन्ति। तानेवभूतान् गुरू न्मानयति योऽभ्युत्थानादिना 'मानार्हान्' मानयोग्यान् तपस्वी सन् जितेन्द्रियः सत्यरत इति, प्राधान्यख्यापनार्थ विशेषणद्वयं, स पूज्य इति।

*मू. (४६९)* *तेसिं गुरू णं गुणसायराणं, सुच्चाण मेहावि सुभासिआइं।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*चरे मुनी पंचरए तिगुत्तो, चउक्कसायावगए स पुज्जो ॥*

**वृ.**तेषां 'गुरूणाम्' अनन्तरोदितानां 'गुणसागराणां' गुणसमुद्राणां मंबन्धीनि श्रुत्वा मेधावी 'सुभाषितानि' परलोकोपकारकाणि 'चरति' आचरति 'मुनिः' साधुः 'पञ्चरतः' पञ्चमहाव्रत-सक्तः 'त्रिगुप्तो' मनोगुप्त्यादिमान् 'चतुःकषायापगत' इत्यपगतक्रोधादिकषायो यः स पूज्य इति सूत्रार्थः ॥

**मू. (४७०)** *गुरुमिह सययं पडिअरिअ मुनी, जिनमयनिउणे अभिगमकुसले।*
*धुणिअ रयमलं पुरेकडं, भासुरमउलं गई वई ॥ ति बेमि ॥*

**वृ.**प्रस्तुतफलाभिधानेनोपसंहरन्नाह-'गुरुम्'आचार्यादिरूपम् 'इह' मनुष्यलोके 'सततम्' अनवरतं 'परिचर्य' विधिनाऽऽराध्य 'मुनिः' साधुः, किंविशिष्टोमुनिरित्याह-'जिनमतनिपुणः' आगमे प्रवीणः 'अभिगामकुशलो' लोकप्राघूर्णकादिप्रतिपत्तदक्षः, स एवंभूतः विधूय रजोमलं पुराकृतं, क्षपयित्वाऽष्टप्रकारं कर्मेति भावः, किमित्याह-भास्वरां ज्ञानतेजोमयत्वात् 'अतुलाम्' अनन्यसदृशीं 'गतिं' सिद्धरू पां 'व्रजती'ति गच्छति तदा जन्मान्तरेण वा सुकुलप्रजात्यादिना प्रकारेण। ब्रबीमीति पूर्ववदिति सूत्रार्थः ॥

अध्ययनं-९, उद्देशक :-३ समाप्तः

## -: अध्ययनं-९, उद्देशकः-४ :-

**मू. (४७१)** *सुअं मे आउसं! तेनं भगवया एवमक्खायं-इह खलु थेरेहिं भगवंतेहिं चत्तारि विनयसमाहिट्ठाणा पन्नता,, कयरे खलु ते थेरेहिं भगवंतेहिं चत्तारि विनयसमाहिठाणा पन्नत्ता ?, इमे खलु ते थेरेहिं भगवंतेहिं चत्तारि विनयसमाहिट्ठाणा पन्नता, तंजहा विनयसमाही सुअसमाही तवसमाही आयारसमाही।*

**वृ.** -अथ चतुर्थ आरभ्यते, तत्र सामान्योक्तविनयविशेषोपदर्शनार्थमिदमाह-श्रुतं मया आयुष्मंस्तेन भगवता एवमाख्यातमित्येतद्यथा षड्जीवनिकायां तथैव द्रष्टव्यम्, इह 'खल्वि'ति इह क्षेत्रे प्रवचने वा खलुशब्दो विशेषणार्थः न केवलमत्र किं त्वन्यत्राप्यन्यतीर्थकृत्प्रवचनेष्वपि 'स्थविरैः' गणधरैः 'भगवद्भिः' परमैश्वर्यादियुक्तैश्चत्वारि 'विनयसमाधिस्थानानि' विनय-समाधिभेदरूपाणि 'प्रज्ञप्तानि' प्ररूपितानि, भगवतः सकाशे श्रुत्वा ग्रन्थत उपरचितानीत्यर्थः, कतराणि खलु तानीत्यादिना प्रश्नः, अमूनि खलुतानीत्यादिना निर्वचनं, 'तद्यथे'त्युदाहरणो-पन्यासार्थः,विनयसमाधिः १ श्रुतसमाधिः २ तपःसमाधिः ३ आचारसमाधिः ४, तत्र समाधानं समाधिः-परमार्थत आत्मनो हितं सुखं स्वास्थ्यं, विनये विनयाद्वा समाधिः विनयसमाधिः एवं शेषेष्वपिशब्दार्थो भावनीयः ॥ एतदेव श्लोकेन संगृह्णाति-

**मू. (४७२)** *विनय सुए अ तवे, आयारे निच्चपंडिआ।*
*अभिरामयंति अप्पाणं, जे भवंति जिइंदिआ ॥*

**वृ.** विनये' यथोक्तलक्षणे 'श्रुते' अङ्गादौ 'तपसि' बाह्यादौ 'आचारे च' मूलगुणादौ, चशब्दस्य व्यवहित उपन्यासः, 'नित्यं' सर्वकालं 'पण्डिताः' सम्यक्परमार्थवेदिनः, किं कुर्वन्तीत्याह-'अभिरमयन्ति' अनेकार्थत्वादाभिमुखेन विनयादिषु युञ्जते 'आत्मानं' जीवं, किमिति ?, अस्योपादेयत्वात्, क एवं कुर्वन्तीत्याह-ये भवन्ति 'जितेन्द्रिया' जितचक्षुरादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावशत्रवः, त एव परमार्थतः पण्डिता इति प्रदर्शनार्थमेतदिति सूत्रार्थः ॥

*मू. (४७३) चउव्विहा खलु विनयसमाही भवई, तंजहा-अनुसासिज्जंतो सुस्सूसइ १ सम्मंसंपडिवज्जइ २ वेयमाराहइ ३ न य भवइ अत्तसंपग्गहिए ४ चउत्थं पयं भवइ।*

**वृ.** विनयसमाधिमभिधित्सुराह-चतुर्विधः खलु विनयसमाधिर्भवति, 'तद्यथे'-त्युदाहरणोपन्यासार्थः, 'अनुसासिज्जंतो' इत्यादि, 'अनुशास्यमानः' तत्र तत्र चोद्यमानः 'शुश्रु-षति' तदनुशासनमर्थितया श्रोतुमिच्छति १, इच्छाप्रवृत्तितः तत् 'सम्यक् संप्रतिपद्यते' सम्यग्-अविपरीतमनुशासनतत्त्वं यथाविषयमवबुद्ध्यते २, सचैव विशिष्टप्रतिपत्तेरेव वेदमाराधयति, वेद्यतेऽनेनेति वेदः-श्रुतज्ञानं तद् यथोक्तानुष्ठानपरतया सफलीक रोति ३, अत एव विशुद्धप्रवृत्तेः 'न च भवत्यात्मसंप्रगृहीतः' आत्मैव सम्यक् प्रकर्षेण गृहीतो येनाहं विनीतः सुसाधुरित्येवमादिना स तथाऽनात्मोत्कर्षप्रधानत्वाद्विनयादेः, न चैवंभूतो भवतीत्यभिप्रायः, 'चतुर्थं पदं भवती'त्येतदेव सूत्रक्रमप्रामाण्यादुत्तरोत्तरगुणापेक्षया चतुर्थमिति,

*मू. (४७४) भवई अ इत्थ सिलोगो -*

**वृ.** भवति च 'अत्र श्लोकः' अत्रेति विनय समाधौ 'श्लोकः' छन्दोविशेषः ॥ स चायम्-

*मू. (४७५) पेहेइ हिआणुसासणं, सुस्सूसई तं च पुणो अहिट्ठए।*
*न य मानमएण मज्जई, विनयसमाहि आययट्ठिए ॥*

**वृ.** 'प्रार्थयते हितानुशासनम्' इच्छतीहलोकपरलोकोपकारिणमाचार्यादिभ्य उपदेशं, 'शुश्रूषती'त्यनेकार्थत्वाद्यथाविषयमवबुध्यते, तच्चावबुद्धं सत्पुनरधितिष्ठति-यथावत् करोति, न च कुर्वन्नपि 'मानमदेन'मानगर्वेण 'माद्यति' मदं याति 'विनयसमाधौ' विनयसमाधि-विषये 'आयतार्थिको'मोक्षार्थीति सूत्रार्थः ॥

*मू. (४७६) चउव्विहा खलु सुअसमाही भवई, तंजहा-सुअं मे भवस्सइत्ति अज्झाइअव्वं भवइ १, एगग्गचित्तो भविस्सामित्ति अज्झाइअव्वयं भवइ २, अप्पाणं ठावइस्सामित्ति अज्झा-अव्वयं भवइ ३, ठिओ परं ठावइस्सामित्ति अज्झाइअव्वयं भवइ ४, चउत्थं पयं भवइ।*

**वृ.** उक्तो विनयसमाधिः, श्रुतसमाधिमाह-चतुर्विधः खलु श्रुतसमाधिर्भवति, 'तद्यथे'-त्युदाहारणोपन्यासार्थः। श्रुतं मे आचारादि द्वादशाङ्गं भविष्यतीत्यनया बुद्ध्याऽध्यतव्यं भवति, न गौरवाद्यालम्बनेन १. तथाऽध्ययनं कुर्वन्नेकाग्रचित्तो भविष्यामि न विप्लुतचित्त इत्यध्येत्यं भवत्यनेन चालम्बनेन २, तथाऽध्ययनं कुर्वन्विदि-तधर्मतत्त्व आत्मानं स्थापयिष्यामि शुद्धधर्म इत्यनेनचालम्बनेनाध्येतव्यं भवति ३, तथाऽध्ययनफलात् स्थितः स्वयं धर्मे 'परं' विनयं स्थापयिष्यामि तत्रैवेत्यध्येतव्यंभवत्यनेनालम्बनेन ४चतुर्थं पदं भवति।

*मू. (४७७) भवइ अ इत्थ सिलोगो*

**वृ.** भवति चात्र श्लोक इति पूर्ववत् ॥ स चायम् -

*मू. (४७८) नाणमेगग्गचित्तो अ, ठिओ अ ठावई परं।*
*सुआणि अ अहिज्जित्तो, रओ सुअसमाहिए ॥*

**वृ.** 'ज्ञान'मित्यध्ययनपरस्य ज्ञानं भवति 'एकाग्रचित्तश्च' तत्परतया एकाग्रालम्बनश्च भवति 'स्थित' इति विवेकाद्धर्मस्थितो भवति 'स्थापयति पर'मिति स्वयं धर्मे स्थितत्वादन्यमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापयति, श्रुतानि च नानाप्रकाराण्यधीतेऽधीत्य च 'रतः' सक्तो भवति श्रुतसमाधाविति।

*मू. (४७९) चउव्विहा खलु तवसमाही भवइ, तंजहा-नो इहलोगट्ठयाए तवमहिट्ठिज्जा१ नो परलोगट्ठयाए तवमहिट्ठिज्जा २, नो कित्तिवण्णसद्दसिलोगट्ठयाए तवमहिट्ठिज्जा ३, नन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा४, चउत्थं पयं भवइ। [भवइ अ इत्थ सिलोगो-]*

वृ. उक्तः श्रुतसमाधिः, तपःसमाधिमाह-चतुर्विधः खलु तपःसमाधिर्भवति,'तद्यथे'-त्युदाहरणोपन्यासार्थः, न 'इहलोकार्थम्' इहलोकनिमित्तंलब्ध्यादिवाञ्छया 'तपः' अनशनादि-रूपम् 'अधितिष्ठेत्' न कुर्याद्धम्मिलवत् १, तथा न 'परलोकार्थं' जन्मान्तरभोग-निमित्तं-तपोऽधितिष्ठेद्ब्रह्मदत्तवत्, एवं नं 'कीर्त्तिवर्णशब्दश्लाधार्थि'मिति सर्वदिग्व्यापी साधुवादः कीर्त्तिः, एकदिग्व्यापी वर्णः, अर्द्धदिग्व्यापी शब्दः, तत्स्थान एव श्लाघा, नैतदर्थं तपोऽधित-तिष्ठित्, अपि तु 'न्यायत्र निर्जरार्थ'मिति न कर्मनिर्जरामेकां विहाय तपोऽधितिष्ठेत्, अकामः सन् यथा कर्मनिर्जरैव फलं भवति तथाऽधितिष्ठेदित्यर्थः चतुर्थं पदं भवति।

भवति चात्र श्लोक इति पूर्ववत्।

*मू. (४८०) विविहगुणतवोरए निच्चं, भवइ निरासए निज्जरट्ठिए।*
*तवसा धुणइ पुराणपावगं, जुत्तो सया तवसमाहिए॥*

वृ. च चायम्-विविधगुणतपोरतो हि नित्यम्-अनशनाद्यपेक्षचयाऽनेकगुणं यत्तपस्तद्रत एव सदा भवति 'निराशो' निष्प्रत्याश इहलोकादिषु 'निर्जरार्थिकः' कर्मनिर्जरार्थी, स एवं-भूतस्तपसा विशुद्धेन 'धुनोति' अपनयति 'पुराणपापं' चिरन्तनं कर्म, नवं च न बन्धात्येवं युक्तः सदा तपःसमाधाविति सूत्रार्थः॥

*मू. (४८१) चउव्विहा खलु आयारसमाही भवई, तंजहा-नो इहलोगट्ठयाए आयार-महिट्ठिज्जा १, परलोगट्ठयाए आयारमहिट्ठिज्जा २, नो कित्तिवण्णसद्दसिलोगट्ठयाए आयार-महिट्ठिज्जा ३ नन्नत्थ आरहंतेहिं हेऊहिं आयारमहिट्ठिज्जा ४, चउत्थं पयं भवइ।*

*(भवइ अ इत्थ सिलोगो)*

वृ. उक्तस्तपःसमाधिः, आचारसमाधिमाह-चतुर्विधः खल्वाचारसमाधिर्भवति, 'तद्यथे' त्युदाहरणोपन्यासार्थः, नेहलोकार्थमित्यादि, चाचाराभिधानभेदेन पूर्ववद्यावन्नान्यत्र 'आर्हतैः' अर्हत्संबन्धिभिर्हेतुभिरनाश्रवत्वादिभिः 'आचारं' मूलगुणोत्तरगुणमयमधितिष्ठेन्निरीहः सन् यथा मोक्ष एव भवतीति चतुर्थं पदं भवति। (भवति चात्र श्लोक इति पूर्ववत्)

*मू. (४८२) जिनवयणरए अतिंतिणे, पडिपुन्नाययमाययट्ठिए।*
*आयारसमाहिसंवुडे, भवइ अ दंते भावसंधए॥*

वृ. च चायम्-'जिनवचनरत' आगमे सक्तः 'अतिन्तिनः' न सकृत्किञ्चिदुक्तः सन्नसूयया भूयो भूयो वक्ता प्रतिपूर्णः सूत्रादिना, 'आयतमायतार्थिक' इत्यत्यन्तं मोक्षार्थी 'आचार-समाधिसंवृतं' इति आचारे यः समाधिस्तेन स्थगिताश्रवद्वारः सन् भवति दान्त इन्द्रियनोइन्द्रिय-दमाभ्यां 'भावसंधकः' भावो-मोक्षस्तत्संधक आत्मनो मोक्षासन्नकारीति सूत्रार्थः॥

*मू. (४८३) अभिगम चउरो समाहिओष सुविसुद्धो सुसमाहिअप्पओ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विउलहिअं सुहावहं पुणो, कुव्वइ अ सो पयखेममप्पणो ॥*

**वृ.** सर्वसमाधिफलमाह-'अभिगम्य' विज्ञायासेव्य च 'चतुरः समाधीन्' अनन्तरोदितान्, सुविशुद्धो मनोवाक्कायैः, सुसमाहितात्मा सप्तदशविधे संयमे, एवंभूतो धर्मराज्यमासाद्य 'विपुल-हितसुखावहं पुन'रिति विपुलं-विस्तीर्णं हितं तदात्वे आयात्यां च पथ्यं सुखमावहतिप्रापयति यत्तत् तथाविधं करोत्यसौ साधुः पदं-स्थानं क्षेमं-शिवम् आत्मन इत्यात्मन एव न त्वन्यस्य इत्यनेनैकान्तक्षणभङ्गव्यवच्छेदमाहेति सूत्रार्थः ॥

*मू. (४८४) जाइमरणाओ मुच्चइ, इत्थंथं च चएइ सव्वसो ।*
*सिद्धे वा हवइ सासए, देवे वा अप्परए महड्डिए ॥*

**वृ.** एतदेव स्पष्टयति-'जातिमरणात्' संसारान्मुच्यते असौ सुसाधुः 'इत्थंस्थं चेती'दंप्रकार-मापन्नमित्थम् इत्थं स्थितमित्थंस्थं-नारकादिव्यपदेशबीजं वर्णसंस्थानादि तच्च त्यजति 'सर्वशः' सर्वैः प्रकारैरपुनर्ग्रहणतया एवं 'सिद्धो वा' कर्मक्षयात्सिद्धो भवति 'शाश्वतः', अपुनरागामी सावशेषकर्मा देवो वा 'अल्परतः' कण्डूपरिगतकण्डूयनकल्परतरहितः 'महर्द्धिकः' अनुत्तरवैमानिकादिः । ब्रवीमीति पूर्ववदिति सूत्रार्थः, उक्तोऽनुगमः, नयाः पूर्ववत् .

अध्ययनं-९, उद्देशक : ४ समाप्त :-

अध्ययनं-९ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता संपादिता दशवैकालिकसूत्रे**
**नवमं अध्ययनं सनिर्युक्तिः सटिकं समाप्तम्**

## अध्ययनं :- १० सभिक्षुः

**वृ.** अधुना सभिक्ष्वास्यमारभ्यते, अस्य चायमभिसंबन्धः, इहानन्तराध्ययन आचारः-प्रणिहितो यथोचितवि-नयसंपन्नो भवति एतदुक्तम्, इह त्वेतेष्वेव नवस्वध्ययनार्थेषु यो व्यव-स्थितः स सम्यगभिक्षुरित्येतदुच्यते, इत्यनेनाभिसंबन्धेनायातमिदमध्ययनम्, अस्य चानुयोग-द्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्नो निक्षेपः, तत्र च सभिक्षुरित्यध्ययननाम, अतः सकारो निक्षेसव्यो भिक्षुश्च, तत्र सकारनिक्षेपमाह-

**नि. [३२९]** नामंठवणसयारो दव्वे भावे अ होइ नायव्वो ।
दव्वे पसंसमाई भावे जीवो तदुवउत्तो ॥

**वृ.** नामसकारः सकार इति नाम, स्थापनासकारः सकार इति स्थापना, 'द्रव्ये भावे च भवति ज्ञातव्यः' द्रव्यसकारो भावसकारश्च, तत्र द्रव्य इत्यागमनोआगमज्ञशरीरभव्यशरीर-तद्व्यतिरिक्तः प्रशंसादिविषयो द्रव्यसकारः, भाव इति भावसकारो जीवः 'तदुपयुक्तः' सकारोप-युक्तः तदुपयोगानन्यत्वादिति गाथार्थः ॥ प्रकृतोपयोगीत्यागमनोआगमज्ञशरीरभव्यशरीराति-रिक्तं प्रशंसादिविषयं द्रव्यसकारमाह-

**नि. [३३०]** निद्देसपसंसाए अत्थीभावे अ होइ उ सगारो ।
निद्देसपसंसाए अहिगारो इत्थ अज्झयणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. निर्देशे प्रशंसायामस्तिभावे चेत्येतेष्वर्थेषु त्रिषु भवति तु सकारः । तत्र निर्देशे यथा सोऽनन्तरमित्यादि, प्रशंसायां यथा सत्पुरुष इत्यादि, अस्तिभावे यथा सद्भूतममुकमित्यादि। तत्र 'निर्देशप्रसंशाया'मिति निर्देशे प्रशंसायां च यः सकारस्तेनाधिकारोऽत्राध्ययने प्रक्रान्त इति गाथार्थः ॥ एतदेव दर्शयति-

नि. [३३१] जे भावा दसवेआलिअम्मि करणिज्ज वण्णिअ जिनेहिं ।
तेसिं समावणमिति(मी) जो भिक्खू भन्नइ स भिक्खू ॥

वृ. ये 'भावाः' पदार्थाः पृथिव्यादिसंरक्षणादयो 'दशवैकालिके' प्रस्तुते शास्त्रे 'करणीया' अनुष्ठेया 'वर्णिताः' कथिता जिनैः-तीर्थकरगणधरैः, 'तेषां' भावानां 'समापने' यथा-शक्त्या(क्ति) द्रव्यतो भावतश्चाचरणेन पर्यन्तनयनेन 'यो भिक्षुः' तदर्थं यो भिक्षणशीलो न तदूरादिभरणार्थं भण्यते स भिक्षुरिति, इतिशब्दस्य व्यवहित उपन्यासः । स भिक्षुरित्यत्र निर्देशे सकार इति गाथार्थः ॥ प्रशंसायामाह-

नि. [३३२] चरगमरुगाइआणं भिक्खुजीवीण काउणमपोहं।
अज्झयणगुणनिउत्तो होइ पसंसाइ उ सभिक्खू ॥

वृ. 'चरकमरुकादीना'मिति चरकाः-परिव्राजकविशेषाः मरुका-धिग्वर्णाः आदिशब्दा-च्छाक्यादिपरिग्रहः, अमीषां 'भिक्षोपजीविनां' भिक्षणशीलानामगुणवत्त्वेनापोहं कृत्वा 'अध्य-यनगुणनियुक्तः' प्रक्रान्तशास्त्रनिष्यन्दभूतप्रक्रान्ताध्ययनाभिहितगुणसमन्वितो भवति । प्रशंसायामवगम्यमानायां सद्भिक्षुः-संश्चासौ भिक्षुश्च तत्तदन्यापोहेन सद्भिक्षुरिति गाथार्थः ॥
उक्तः सकारः, इदानीं भिक्षुमभिधातुकाम आह-

नि. [३३३] भिक्खुस्स य निक्खेवो निरुत्तएगट्ठिआणि लिंगाणि।
अगुणट्ठिओ न भिक्खू अवयवा पंच दाराइं ॥

वृ. भिक्षोः 'निक्षेपो' नामादिलक्षणः कार्यः, तथा निरुक्तं वक्तव्यं भिक्षोरेव, तथा 'एका-र्थिकानि' पर्यायशब्दरूपाणि वक्तव्यानि, तथा 'लिङ्गानि' संवेगादीनि, तथा अगुणस्थितो न भिक्षुरपि तु गुणस्थित एवेत्येतद्वच्यम्। अत्र च 'अवयवाः पञ्च' प्रतिज्ञादयो वक्ष्यमाणा इति, द्वारण्येतानीति गाथासमासार्थः ॥ यथाक्रमं व्यासार्थमाह-

नि. [३३४] नामंठवणाभिक्खू दव्वभिक्खू अ भावभिक्खू अ।
दव्वम्मि आगमाई अन्नोऽवि अ पज्जवो इणमो ॥

वृ. 'नामस्थापनाभिक्षु'रिति भिक्षुशब्दः प्रत्येकभिसंबध्यते, नामभिक्षुः स्थापनाभिक्षुः द्रव्यभिक्षुश्च भावभिक्षुश्चेति । तत्र नामस्थापने क्षुण्णत्वादनाहत्य द्रव्यभिक्षुमाह-'द्रव्य' इति द्रव्यभिक्षुः 'आगमादिः' आगमनोआगमज्ञशरीरभव्यशरीरतद्व्यतिरिक्तैकभविकादिभेदभिन्नः, अन्योऽपि च 'पर्यायो' भेदः 'अयं' द्रव्यभिक्षोर्वक्ष्यमाणलक्षण इति गाथार्थः ॥

नि. [३३५] भेअओ भेअणं चेव, भिंदिअव्वं तहेव य।
एएसिं तिण्हंपि अ, पत्तेअपरूवणं वोच्छं ॥

वृ. भेदकः पुरुषः भेदनं चैव परश्वादि भेत्तव्यं तथैव च काष्ठादीति भावः । एतेषां 'त्रयाणा-मपि' भेदकादीनां 'प्रत्येकं' पृथक्पृथक् प्ररूपणां वक्ष्य इति गाथार्थः ॥ एतदेवाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. [३३६] जह दारुकम्मगारो भेअणभित्तव्वसंजुओ भिक्खू।
अन्नेवि दव्वभिक्खू जे जायणगा अवरिया अ॥

वृ. यथा 'दारुकर्मकरो' वर्धक्यादिः भेदनभेत्तव्यसंयुक्तः सन्-क्रियाविशिष्टविदारणादि-दारुसमन्वितो द्रव्यभिक्षुः, द्रव्यं भिनत्तीतिकृत्वा, तथाऽन्येऽपि द्रव्यभिक्षवः-अपारमार्थिकाः, क इत्याह-ये 'याचनका' भिक्षणशीला 'अविरताश्च' अनिवृत्ताश्च पापस्थानेभ्य इति गाथार्थः॥

एते च द्विविधाः-गृहस्था लिङ्गिनश्चेति, तदाह-

नि. [३३७] गिहिणोऽवि सयारंभग उज्जुप्पन्नं जनं विमग्गंता।
जीवणिअ दीणकिविना ते विज्जा दव्वभिक्खुत्ति॥

वृ. 'गृहिणोऽपि' सकलत्रा अपि 'सदारंभका' नित्यमारम्भकाः षण्णां जीवनिकायाना-मृजुप्रज्ञं जनं अनालोचकं विमृगयन्तः-अनेकप्रकारं द्विपदादि भूमिदेवा वयं लोकहितायावतीर्णा इत्यभिधाय याचमानाः, द्रव्यभिक्षणशीलत्वाद्रव्यभिक्षयः, एते च धिग्वर्णाः, तथा ये च 'जीव-निकायै' जीवनिकानिमित्तं 'दीनकृपणाः' कार्पटिकादयो भिक्षामटन्ति तान् 'विद्याद्' विजा-नीयाद्रव्यभिक्षूनिति, द्रव्यार्थं भिक्षणशीलत्वादिति गाथार्थः॥ उक्ता गृहस्थद्रव्यभिक्षवः, लिङ्गि-नोऽधिकृत्याह-

नि. [३३८] मिच्छद्दिट्ठी तसथावराण पुढवाइबिंदिआईणं।
निच्चं वहकरणरया अबंभयारी अ संचइआ॥

वृ. शाक्यभिक्षुप्रभृतयो हि 'मिथ्यादृष्टयः' अतत्त्वाभिनिवेशिनः प्रशमादिलिङ्गशून्याः, त्रसस्थावराणां प्राणिनां पृथिव्यादीनां द्वीन्द्रियादीनां च, अत्र पृथिव्यादयः स्थावराः द्वीन्द्रियाद-यस्त्रसाः, नित्यं वधकरणरताः- सदैतदतिपाते सक्ताः, कथमित्यत्राह-अब्रह्मचारिणः संचयिनश्च यतः, अतोऽप्रधानत्वाद्रव्यभिक्षवः, चशब्दस्य व्यवहित उपन्यास इति गाथार्थः॥ एते चाब्रह्म-चारिणः संचयादेवेति संचयमाह-

नि. [३३९] दुपयचउप्पयधणधन्नकुविअतिअतिअपरिग्गहे निरया।
सच्चित्तभोइ पयमाणगा अ उद्दिट्ठभोई अ॥

वृ. द्विपदं-दास्यादि चतुष्पदं-गवादि धनं-हिरण्यादि धान्यं-शाल्यादि कुप्यम्-अलिञ्जरादि एतेषु द्विपदादिषु क्रमेण मनोलक्षणादिना करणत्रिकेण त्रिकपरिग्रहे-कृतकारितानुमतपरिग्रहे निरताः-सक्ताः। न चैतदनार्षम्- "विहारान् कारयेद्रम्यान्वासयेच्च बहुश्रुतान्" इतिवचनात्, सद्भूतगुणानुष्ठायिनो नेत्थंभूता इत्याशङ्क्याह-सचित्तभोजिनः, तेऽपि मांसाप्कायादिभोजिनः, तदप्रतिषेधात् 'पचन्तश्च' स्वयंपचास्तापसादयः, उद्दिष्टभोजिनश्च सर्व एव शाक्यादयः, तत्प्र-सिद्ध्या तपस्विनोऽपि, पिण्डविशुद्ध्यपरिज्ञानादिति गाथार्थः॥

त्रिकत्रिकपरिग्रहे निरता इत्येतद्व्याचिख्यासुराह-

नि. [३४०] करणतिए जोअतिए सावज्जे आयहेउपरउभए।
अट्ठाणपवत्ते ते विज्जा दव्वभिक्खुत्ति॥

वृ. करणत्रिक इति 'सुपां सुपो भवन्ती'ति 'करणत्रिकेण' मनोवाक्कायलक्षणेन 'योगत्रितय' इति कृतकारितानुमतिरूपे 'सावद्ये' सपापे आत्महेतोः-आत्मनिमित्तं देहाद्युपचयाय, एवं परनि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्तं-मित्राद्युपभोगसाधनाय एवमुभयनिमित्तम्-उभयसाधनार्थम्, एवमर्थायात्माद्यर्थम् अनर्थाय वा-विना प्रयोजनेन आर्त्तध्यानचिन्तनखरादिभाषणलक्षवेधनादिभिः प्राणातिपातादौ प्रवृत्तान्-तत्परान् तानेवंभूतान् 'विद्याद्-विजानीयात् द्रव्यभिक्षूनिति, प्रवृत्ताश्चैवं शाक्यादयः, तद्रव्यभिक्षव इति गाथार्थः ॥ एवं स्त्र्यादिसंयोगाद्विशुद्धतपोऽनुष्ठानाभावच्चाब्रह्मचारिण एत इत्याह-

नि. [३४१] इत्थीपरिग्गहाओ आणादाणाइभावसंगाओ।
सुद्धतवाभावाओ कुतित्थिआऽबंभचारित्ति ॥

वृ. 'स्त्रीपरिग्रहा'दिति दास्यादिपरिग्रहात् 'आज्ञादानादिभावसङ्गाच्च' परिणामशुद्धेरित्यर्थः न च शाक्या भिक्षवः, 'शुद्धतपोऽभावा'दिति शुद्धस्य तपसोऽभावात् तापसादयः कृतीर्थिका अब्रह्मचारिण इति, ब्रह्मशब्देन शुद्धं तपोभिधीयते, तदचारिण इति गाथार्थः ॥ उक्तो द्रव्यभिक्षुः,-

नि. [३४२] आगमतो उवउत्तो तग्गुणसंवेअओ अ (उ) भावंमि।
तस्स निरुत्तं भेअगभेअणभेत्तव्वएण तिहा ॥

वृ. भावभिक्षुर्द्विविधः-आगमतो नोआगमतश्च, तत्रागमत 'उपयुक्त' इति भिक्षुपदार्थज्ञस्तत्र चोपयुक्तः, 'तद्गुणसंवेदकस्तु' भिक्षुगुणसंवेदकः पुनर्नोआगमतो भवति भावभिक्षुरित्युक्तो भिक्षुनिक्षेपः। साम्प्रतं निरुक्तमभिधातुकाम आह- 'तस्य निरुक्त'मिति 'तस्य' भिक्षोर्निश्चित-मुक्तमन्वर्थरूपं भेदकभेदनभेत्तव्यैरेभिर्भेदैर्वक्ष्यमाणैस्त्रिधा भवतीति गाथार्थः ॥ एतदेव स्पष्टयति-

नि. [३४३] भेत्ताऽऽगमोवउत्तो दुविह तवो भेअणं च भेत्तव्वं।
अट्ठविहं कम्मखुहं तेन निरुत्तं स भिक्खुत्ति ॥

वृ. 'भेत्ता' भेदकोऽत्रागमोपयुक्तः साधुः, तथा 'द्विविधं' बाह्याभ्यन्तरभेदेन तपो भेदनं वर्तते, तथा 'भेत्तव्यं' विदारणीयं चाष्टविधं कर्म च-अष्टप्रकारं ज्ञानावरणीयादि कर्म, तच्च क्षुदादिदुःखहेतुत्वात् क्षुच्छब्दवाच्यं, यतश्चैवं तेन निरुक्तं-यः शास्त्रनीत्या तपसा कर्म भिनत्ति स भिक्षुरति गाथार्थः ॥ किं च-

नि. [३४४] भिंदंतो अ जह खुहं भिक्खू जयमाणओ जई होइ।
संजमचरओ चरओ भवं खिवंतो भवंतो उ॥

वृ. 'भिन्दंश्च' विदारयंश्च यथा 'क्षुधं' कर्म भिक्षुर्भवति, भावतो यतमानस्तथा तथा गुणेषु स एव यतिर्भवति नान्यथा, एवं 'संयमचरकः' सप्तदशप्रकारसंयमानुष्ठायी चरकः, एवं 'भवं' संसारं 'क्षपयन्' परीतं कुर्वन् स एव भवान्तो भवति नान्यथेति गाथार्थः ॥ प्रकारान्तरेण निरुक्तम्-

नि. [३४५] जं भिक्खमत्तवित्ती तेन व भिक्खू खवेइ जं व अनं।
तवसंजमे तवस्सित्ति वावि अन्नोऽवि पज्जाओ ॥

वृ. 'यद्' यस्माद् 'भिक्षामात्रवृत्तिः' भिक्षामात्रेण सर्वोपधाशुद्धेन वृत्तिरस्येति समासः, तेन वा भिक्षुर्भिक्षणशीलो भिक्षुरितिकृत्वा, अनेनैव प्रसङ्गेन अन्येषामपि तत्पर्यायाणां निरुक्त-माह-क्षययति 'यद्' यस्माद्वा 'ऋणं' कर्म तस्मात्क्षपणः, क्षपयतीति क्षपण इतिकृत्वा, तथा संयमतपसीति संयमप्रधानं तपः संयमतपः तस्मिन् विद्यमाने तपस्वीति वापि भवति, तपोऽस्या-स्तीतिकृत्वा, अन्योऽपि पर्याय इति-अन्योऽपि भेदोऽर्थतो भिक्षुशब्दनिरुक्तस्येति गाथार्थः।

उक्तं निरुक्तद्वारम्, अधुनैकार्थिकद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. [३४६] तिन्ने ताई दविए वई अ खंते अ दंत विरए अ।
मुणितावसपन्नवगुजुभिक्खू बुद्धे जइ विऊ अ॥

वृ. तीर्णवत्तीर्णः विशुद्धसम्यग्दर्शनादिलाभाद्भवार्णमिति गम्यते, तायोऽस्यास्तीति तायी, तायः सुदृष्टमार्गोक्तिः, सुपरिज्ञातदेशनया विनेयपालयितेत्यर्थः, द्रव्यं रागद्वेषरहितः, व्रती च हिंसादिविरतश्च, क्षान्तश्च क्षाम्यति क्षमा करोतीति क्षान्तः, बहुलवचनात् कर्तरिनिष्ठा, एवं दाम्यतीन्द्रियादिदमं करोतीति दान्तः, विरतश्च विषयसुखनिवृत्तश्च, मुनिर्मन्यते जगतस्त्रिकालावस्थामिति मुनिः, तपःप्रधानस्तापसः, प्रज्ञापकोऽपवर्गमार्गस्य प्ररूपकः, ऋजुः-मायारहितः संयमवान् भिक्षुः पूर्ववत्, बुद्धोऽवगततत्त्वः, यतिरुत्तमाश्रमी प्रयत्नवान् वा, विद्वांश्च-पण्डितश्चेति गाथार्थः ॥ तथा-

नि. [३४७] पव्वइए अनगारे पासंडी चरग बंभणे चेव।
परिवायगे अ समणे निग्गंथे संजए मुत्ते॥

वृ. प्रव्रजितः-पापन्निष्क्रान्तः, अनगारो-द्रव्यभावागारशून्यः, पाषण्डी-पाशाड्डीनः, चरकः पूर्ववत्, 'ब्राह्मणश्चैव' विशुद्धब्रह्मचारी चैव, परिव्राजश्च-पापवर्जकश्च, श्रमणः पूर्ववत्, निर्ग्रंथः संयतो मुक्त इत्येतदपि पूर्ववदेवेति गाथार्थः ॥ तथा-

नि. [३४८] साहू लूहे अ तहा तिरठ्ठी होइ चेव नायव्वो।
नामाणि एवमाईणि होंति तवसंजमरयाणं॥

वृ. साधू रूक्षश्च तथे'ति निर्वाणसाधकयोगसाधनात्साधुः स्वजनादिषु स्नेहविरहाद्रूक्षः 'तीरार्थी चैव भवति ज्ञातव्यं' इति तीरार्थी भवार्णवस्य, 'नामानि' एकार्थिकानि पर्यायाभिधानान्येवमादीनि यथोक्तलक्षणानि भवन्ति। केषामित्याह-तपःसंयमरतानां भावसाधूनामिति गाथार्थः ॥

प्रति-पादितमेकार्थिकद्वारम्, इदानीं लिङ्गद्वारं व्याचिख्यासुराह-

नि. [३४९] संवेगो निव्वेओ विसयविवेगो सुसीलसंसग्गो।
आराधना तवो नाणदंसणचरित्तविनओ अ।

वृ. 'संवेगो' मोक्षसुखाभिलाषः, 'निर्वेदः' संसारविषयः, 'विषयविवेको' विषयपरित्यागः, 'सुशीलसंसर्गः' शीलवद्भिः संसर्गः, तथा 'आराधना' चरमकाले निर्यापणरूपा, 'तपो' यथाशक्त्यनशनाद्यासेवनं, 'ज्ञानं' यथावस्थितपदार्थविषयमित्यादि 'दर्शनं' नैसर्गिकादि 'चारित्रं' सामायिकादि 'विनयश्च' ज्ञानादिविनय इति गाथार्थः ॥ तथा-

नि. [३५०] खंती अ मद्दवऽज्जव विमुत्तया तह अदीणय तितिक्खा।
आवस्सगपरिसुद्धी अ होंति भिक्खुस्स लिंगाइं॥

वृ. 'क्षान्तिश्च' आक्रोशादिश्रवणेऽपि क्रोधात्यागश्च 'मार्दवार्जवविमुक्तते'ति जात्यादिभावेऽपि मानत्यागान्मार्दवं, परस्मिन्निकृतिपरेऽपि मायापरित्याग आर्जवं, धर्मोपकरणेष्वप्यमूर्च्छा विमुक्तता, तथाऽशनाद्यलाभेऽप्यदीनता, क्षुदादिपरीषहोपनिपातेऽपि तितिक्षा, तथा 'आवश्यकपरिशुद्धिश्च' अवश्यकरणीययोगनिरतिचारता च, भवन्ति 'भिक्षोः' भावसाधोः 'लिङ्गानि' अनन्तरोदितानि संवेगादीनीति गाथार्थः ॥ व्याख्यातं लिङ्गद्वारम्, अवयवद्वारमाह-

नि. [३५१] अज्झयणगुणी भिक्खू न सेस इह नो पइन्न-को हेऊ?।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगुणत्ता इह हेऊ-को दिट्ठंतो ? सुवण्णमिव ॥

**वृ.** 'अध्ययनगुणी' प्रक्रान्ताध्ययनोक्तगुणवान् 'भिक्षुः' भावसाधुर्भवतीति, तत्स्वरूपमेतत्, 'न शेषः' तद्गुणरहित इति 'नः प्रतिज्ञा' अस्माकं पक्षः, 'को हेतुः' ? कोऽत्र पक्षधर्म इत्याशङ्कयाह- 'अगुणत्वादिति हेतुः' अविद्यमानगुणोऽगुणस्तदभावस्तत्त्वं तस्मादित्ययं हेतुः, अध्ययनगुण-शून्यस्य भिक्षुत्वप्रतिषेधः साध्य इति, 'को दृष्टान्तः ?' किं पुनरत्र निदर्शनमित्याशङ्कयाह- 'सुवर्णमिव' यथा सुवर्णं स्वगुणरहितं सुवर्णं न भवति तद्वदिति गाथार्थः ॥ सुवर्णगुणानाह-

**नि. [३५२]** विसघाइ रसायण मंगलत्थ विनिए पयाहिणावत्ते ।
गुरुए अडज्झऽकुत्थे अट्ठ सुवण्णे गुणा भणिआ ॥

**वृ.** 'विषघाति' विषघातनसमर्थं 'रसायनं' वयस्तम्भनकर्तृ 'मङ्गलार्थं' मङ्गलप्रयोजनं 'विनीतं' यथेष्टकटकादिप्रकारसंपादनेन 'प्रदक्षिणावर्त्तं तप्यमानं प्रादक्षिण्येनावर्त्तते 'गुरु' सारोपतम् 'अदाह्यं' नाग्निना दह्यते 'अकुथनीयं' न कदाचिदपि कुथतीत्येतेऽष्टावनन्तरोदिताः 'सुवर्णे' सुवर्णविषया गुणा भणितास्तस्तरूपज्ञैरिति गाथार्थः ॥ उक्ताः सुवर्णगुणाः, साम्प्रतमुपनयमाह-

**नि. [३५३]** चउकारणपरिसुद्धं कसछेअणतावतालणाए अ ।
जं तं विसघाइरसायणाइगुणसंजुअं होइ ॥

**वृ.** 'चतुष्कारणपरिशुद्धं' चतुःपरीक्षायुक्तमित्यर्थः, कथमित्याह- 'कषच्छेदतापताडनया चे'ति कषेण छेदेन तापेन ताडनया च, यदेवंविधं तद्विषघाति रसायनादिगुणसंयुक्तं भवति, भावसुवर्णं स्वकार्यसाधकमिति गाथार्थः ॥ यच्चैवंभूतम्-

**नि. [३५४]** तं कसिणगुणोवेअं होइ सुवण्णं न सेसयं जुत्ती ।
नहि नामरूवमेत्तेण एवमगुणो हवइ भिक्खू ॥

**वृ.** 'तद्' अनन्तरोदितं 'कृत्स्नगुणोपेतं' संपूर्णगुणसमन्वितं भवति सुवर्णं यथोक्तं, न 'शेषं' कषाद्यशुद्धं, 'युक्ति'रिति वर्णादिगुणसाम्येऽपि युक्तिसुवर्णमित्यर्थः, प्रकृते योजयति- यथैतत्सुवर्णं न भवति, एवं न हि नामरूपमात्रेण-रजोहरणादिसंधारणादिना 'अगुणः' अविद्यमानप्रस्तुताध्ययनोक्तगुणो भवति भिक्षुः, भिक्षामटन्नपि न भवतीति गाथार्थः ॥

**नि. [३५५]** जुत्तीसुवण्णगं पुण सुवण्णवण्णं तु जइवि कीरिज्जा ।
न हु होइ तं सुवण्णं सेसेहि गुणेहिं संतेहिं ॥

**वृ.** युक्तिसुवर्णं कृत्रिमसुवर्णमिह लोके 'सुवर्णवर्णं तु' जात्यसुवर्णवर्णमपि यद्यपि क्रियेत पुरुषनैपुण्येन तथापि नैव भवति तत् सुवर्णं परमार्थेन 'शेषैर्गुणैः' कषादिभिः 'असद्भिः' अविद्यमानैरिति गाथार्थः ॥ एवमेव किमित्याह-

**नि. [३५६]** जे अज्झयणे भणिआ भिक्खुगुणा तेहि होइ सो भिक्खू ।
वण्णेण अच्चसुवण्णगं व संते गुणनिहिंमि ॥

**वृ.** येऽध्ययने भणिता भिक्षुगुणा अस्मिन्नेव प्रक्रान्ते जिनवचने चित्तसमाध्यादयः तैः करणभूतैः सद्भिर्भवत्यसौ भिक्षुर्नामस्थापनाद्रव्यभिक्षुव्यपोहेन भावभिक्षुः, परिशुद्ध-भिक्षावृत्तित्वात्। किमिवेत्याह- 'वर्णेन' पीतलक्षणेन 'जात्यसुवर्णमिव' परमार्थसुवर्णमिव 'सति गुणनिधौ' विद्यमानेऽन्यस्मिन् कषादौ गुणसंघाते, एतदुक्तं भवति-यथाऽन्यगुणयुक्तं शोभनवर्णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुवर्णं भवति तथा चित्तसमाध्यादिगुणयुक्तो भिक्षणशीलो भिक्षुर्भवतीति गाथार्थः ॥

नि.[३५७] जो भिक्खू गुणरहिओ भिक्खं गिण्हइ न होइ सो भिक्खू।
वण्णेण जुत्तिसुवण्णगं व असई गुणनिहिम्मि ॥

वृ.यो भिक्षुः 'गुणरहितः' चित्तसमाध्यादिशून्यः सन् भिक्षामटति न भवत्यसौ भिक्षुर्भिक्षाटनमात्रेणैव, अपरिशुद्धभिक्षावृत्तित्वात्, किमिवेत्याह-वर्णेन युक्तिसुवर्णमिव, यथा तद्वर्णमात्रेण सुवर्णं न भवत्यसति 'गुणनिधौ' कषादिक इति गाथार्थः ॥ किंच-

नि.[३५८] उद्दिट्ठकयं भुंजइ छक्कायपमद्दओ घरं कुणइ।
पच्चक्खं च जलगए जो पियइ कह नु सो भिक्खू ?॥

वृ.उद्दिश्य कृतं मुक्तं इत्यौद्देशिकमित्यर्थः, षट्कायप्रमर्दकः-यत्र कचन पृथिव्याद्युपमर्दकः, गृहं करोति संभवत्येवैषणीयालये मूर्च्छया वसतिं भाटकगृहं वा, तथा 'प्रत्यक्षं च' उपलभ्यमान एव 'जलगतान्' अप्कायादीन् यः पिबति, तत्त्वतो विनाऽऽलम्बनेन, कथं न्वसौ भिक्षुः, नैव भावभिक्षुरिति गाथार्थः ॥ उक्त उपनयः साम्प्रतं निगमनमाह-

नि.[३५९] तम्हा जे अज्झयणे भिक्खुगुणा तेहिं होइ सो भिक्खू।
तेहि अ सउत्तरगुणेहि होइ सो भाविअतरो उ ॥

वृ. यस्मादेतदेवं यदनन्तरमक्तं तस्माद् येऽध्ययने प्रस्तुत एव 'भिक्षुगुणा' मूलगुणरूपा उक्तास्तैः करणभूतैः सद्भिर्भवत्यसौ भिक्षुः, तैश्च 'सोत्तरगुणैः' पिण्डविशुद्ध्याद्युत्तरगुणसमन्वितैर्भवत्यसौ 'भाविततरः' चारित्रधर्मे तु प्रसन्नतर इति गाथार्थः ॥ उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादि चर्चः पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं तच्चेदम्-

*मू.( ४८५ )निक्खम्ममाणाइ अ बुद्धवयणे, निच्चं चित्तसमाहिओ हविज्जा।*
*इत्थीण वसं न आवि गच्छे, वंतं नो पडिआयइ जे स भिक्खू ॥*

वृ. 'निष्क्रम्य' द्रव्यभावगृहात् प्रव्रज्यां गृहीत्वेत्यर्थः 'आज्ञया' तीर्थकरगणधरोपदेशेन योग्यतायां सत्यां, निष्क्रम्य किमित्याह-'बुद्धवचने' अवगततत्त्वतीर्थकरगणधरवचने 'नित्यं' सर्वकालं 'चित्तसमाहितः' चित्तेनातिप्रसन्नो भवेत्, प्रवचन एवाभियुक्त इति गर्भः, व्यतिरेकतः समाधानोपायमाह-'स्त्रीणां' सर्वासत्कार्यनिबन्धनभूतानां 'वशं' तदायत्ततारूपं न चापि गच्छेत्, तद्वशगो हि नियमतो वान्तं प्रत्यापिबति, 'अतो' बुद्धवचनचित्तसमाधानतः सर्वथा स्त्रीवशत्यागाद्, अनेनैवोपायेनान्योपायासंभवात्, 'वान्तं' परित्यक्तं सद्विषयजम्बालं 'न प्रत्यापिबति' न मनागप्याभोगतोऽनाभोगतश्च तत्सेवते यः स भिक्षुः-भावभिक्षुरिति सूत्रार्थः ॥

*मू.( ४८६ ) पुढविं न खणे न खणावए, सीओदगं न पिए न पिआवए।*
*अगनिसत्थं जहा सुनिसिअं, तं न जले न जलावए जे स भिक्खू ॥*

वृ.तथा-'पृथिवीं सचेत्तनादिरूपां न स्वनति स्वयं न स्वानयति परैः, 'एकग्रहणे तज्जातीयग्रहण'मिति खनन्तमप्यन्यं न समनुजानाति, एवं सर्वत्र वेदितव्यं। 'शीतोदकं' सचित्तं पानीयं न पिबति स्वयं न पाययति परानिति, अग्निः षड्जीवधातकः, किंवदित्याह-'शस्त्रं' खंगादि यथा 'सुनिशितम्' उज्जवालितं तद्वत्, तं न ज्वालयति स्वयं न ज्वालयति परैः, य इत्थंभूतः स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्षुः । आह-षड्जीवनिकायादिषु सर्वाध्ययनेष्वयमर्थोऽभिहितः किमर्थं पुनरुक्त इति, उच्यते, तदुक्तार्थानुष्ठानपर एव भिक्षुरिति ज्ञापनार्थं, ततश्च न दोष इति सूत्रार्थः ।

**मू. ( ४८७ )** *अनिलेन न वीए न वीयावए, हरियाणि न छिंदे न छिंदावए।*
*बीआणि सया विवज्जयंतो, सच्चितं नाहारए जे स भिक्खू ॥*

**वृ.** तथा 'अनिलेन' अनिलहेतुना चेलकर्णादिना न बीजयत्यात्मादि स्वयं न बीजयति परैः । 'हरितानि' शष्पादीनि न छिनत्ति स्वयं न छेदयति परैः, 'बीजानि' हरितफलरूपाणि व्रीह्यादीनि 'सदा' सर्वकालं विवर्जयन् संघट्टनादिक्रियया, सचित्तं नाहारयति यः कदाचिदप्युपुष्टालम्बनः स भिक्षुरिति सूत्रार्थः ॥

**मू. ( ४८८ )** *वहणं तसथावराण होइ, पुढवीतणकट्ठनिस्सिआणं।*
*तम्हा उद्देसिअं न भुंजे, नोऽवि पए न पयावए जे स भिक्खू ॥*

**वृ.** औद्देशिकादिपरिहारेण त्रसस्थावरपरिहारमाह-'वधनं' हननं 'त्रसस्थावराणां' द्वीन्द्रियादि-पृथिव्यादीनां भवति कृतौद्देशिके, किंविशिष्टानाम्?-'पृथिवीतृणकाष्ठनिश्रितानां' तथासमारम्भात्, यस्मादेवं तस्मादौद्देशिकं कृताद्यन्यच्च सावद्यं न भुंक्ते, न केवलमेतत्, किंतु ? नापि पचति स्वयं न पाचयति अन्यैर्न पचन्तमनुजानाति यः स भिक्षुरिति सूत्रार्थः ॥

**मू. ( ४८९ )** *रोइअ नायपुत्तवयणे, अत्तसमे मन्निज्ज छप्पि काए।*
*पंच य फासे महव्वयाइं, पंचासवसंवरे जे स भिक्खू ॥*

**वृ.** किंच-'रोचयित्वा' विधिग्रहणभावनाभ्यां प्रियं कृत्वा, किं तदित्याह-'ज्ञातपुत्रवचनं' भगवन्महावीरवर्धमानवचनम् 'आत्मसमान्' आत्मतुल्यान् मन्येत 'षडपि कायान्' पृथिव्यादीन् 'पञ्च चे'ति चशब्दोऽप्यर्थः पञ्चापि 'स्पृशति' सेवते महाव्रतानि 'पञ्चाश्रवसंवृतश्च' द्रव्यतोऽपि पञ्चेन्द्रियसंवृतश्च यः स भिक्षुरिति सूत्रार्थः ॥

**मू. ( ४९० )** *चत्तारि वमे सया कसाए, धुवजोगी हविज्ज बुद्धवयणे।*
*अहणे निज्जायरूवरयए, गिहिजोगं परिवज्जए जे स भिक्खू ॥*

**वृ.** किं च-चतुरः क्रोधादीन् वमति तत्प्रतिपक्षाभ्यासेन 'सदा' सर्वकालं कषायान्, ध्रुवयोगी च-उचितनित्ययोगवांश्च भवति, बुद्धवचन इति तृतीयार्थे सप्तमी, तीर्थकरवचनेन करणभूतेन, ध्रुवयोगी भवति यथागममेवेति भावः, 'अधनः' चतुष्पादादिरहितः 'निर्जातरूपरजतो' निर्गत-सुवर्णरूप्य इति भावः, 'गृहियोगं' मूर्च्छया गृहस्थसंबन्धं 'परिवर्जयति' सर्वैः प्रकारैः परित्यजति यः स भिक्षुरिति सूत्रार्थः ॥

**मू. ( ४९१ )** *सम्मद्दिट्ठी सया अमूढे, अत्थि हु नाणे तवे संजमे अ।*
*तवसा धुणइ पुराणपावगं, मनवयकायसुसंवुडे जे स भिक्खू ॥*

**वृ.** तथा-'सम्यग्दृष्टिः' भावसम्यग्दर्शनी सदा 'अमूढः' अविप्लुतः सन्नेवं मन्यतेअस्त्येव ज्ञानं हेयोपादेयविषयमतीन्द्रियेष्वपि तपश्च बाह्याभ्यन्तरकर्ममलापनयनजलकल्पं संयमश्च नवकर्मानुपादनरूपः, इत्थं च दृढभावस्तपसाधुनोति पुराणपापं भावसारया प्रवृत्त्या 'मनोवाक्काय-संवृतः' तिसृभिर्गुप्तिभिर्गुप्तो यः स भिक्षुरिति सूत्रार्थः ॥

**मू. ( ४९२ )** *तहेव असनं पानगं वा, विविहं खाइमसाइमं लभित्ता।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*होही अट्ठो सुए परे वा, तं न निहे न निहावए जे स भिक्खू ॥*

**वृ.** 'तथैवे'ति पूर्वर्षिविधानेन 'अशनं पानं च' प्रागुक्तस्वरूपं तथा 'विविधम्' अनेकप्रकारं 'खाद्यं स्वाद्यं च' प्रागुक्तस्वरूपमेव 'लब्ध्या' प्राप्य, किमित्याह- भविष्यति 'अर्थः' प्रयोजनमनेन श्वः परश्वो वेति 'तद्' अशनादि 'न निधत्ते' न स्थापयति स्वयं तथा 'न निधायपति' न स्थापयत्यन्यैः स्थापयन्तमन्यं नानुजानाति, यः सर्वथा संनिधिपरित्यागवान् स भिक्षुरिति सूत्रार्थः ॥

**मू. (४९३)** *तहेव असनं पानगं वा, विविहं खाइमसाइमं लभित्ता।*
*छंदिअ साहम्मिआण भुंजे, भुच्चा सज्झायरए जे स भिक्खू ॥*

**वृ.** किं च- तथैवाशनं पानं च विविधं खाद्यं स्वाद्यं च लब्ध्येति पूर्ववत्, लब्ध्या किमित्याह- 'छन्दित्वा' निमन्त्र्य 'समानधार्मिकान्' साधून् भृंक्ते, स्वात्मतुल्यतया तद्वात्सल्यसिद्धेः, तथा भुक्त्वा स्वाध्यायरतश्च यः चशब्दाच्छेषानुष्ठानपरश्च यः स भिक्षुरिति सूत्रार्थः ॥

**मू. (४९४)** *न य वुग्गहिअं कहं कहिज्जा, न य कुप्पे निहुइंदिए पसंते।*
*संजमे धुवं जोगेण जुत्ते, उवसंते अविहेडए जे स भिक्खू ॥*

**वृ.** भिक्षुलक्षणाधिकार एवाह- न च 'वैग्रहिकीं' कलहप्रतिबद्धां कथां कथयति, सद्वादकथादिष्वपि न च कुप्यति परस्य, अपितु 'निभृतेन्द्रियः' अनुद्धतेन्द्रियः 'प्रशान्तो' रागादि-रहित एवास्ते, तथा 'संयमे' पूर्वोक्ते 'ध्रुवं' सर्वकालं 'योगेन' कायवाङ्मनःकर्मलक्षणेन युक्तो योगयुक्तः, प्रतिभेदमौचित्येन प्रवृत्तेः, तथा 'उपशान्तः' अनाकुलः कायचापलादिरहितः 'अवि-हेठकः' न क्वचिदुचितेऽनादरवान्, क्रोधादीनां विश्लेषक इत्यन्ये, य इत्थंभूतः स भिक्षुरिति।

**मू. (४९५)** *जो सहइ हु गामकंटए, अक्कोसपहारतज्जणाओ अ।*
*भयभेरवसद्दसप्पहासे, समसुहदुक्खसहे अ जे स भिक्खू ॥*

**वृ.** किंच- यः खलु महात्मा सहते 'सम्यग्ग्रामकमण्टकान्' ग्रामा- इन्द्रियाणि तद्दुःखहेतवः कण्टकान्तानः, स्वरूपपत एवाह- आक्रोशान् प्रहरान् तर्जनाश्चेति, तत्राक्रोशो यकारादिभिः प्रहाराः कशादिभिः तर्जना असूयादिभिः, तथा 'भैरवभया' अत्यन्तरौद्रभयजनकाः शब्दाः सप्रहासा यस्मिन् स्थान इति स्थान इति गम्यते तत्तथा तस्मिन्, वैतालादिकृतार्त्तनादाट्टहास इत्यर्थः, अत्रोपसर्गेषु सत्सु समसुखदुःखसहश्च- यः अचिलतसामायिकभावाः स भिक्षुरिति सूत्रार्थः ॥

**मू. (४९६)** *पडिमं पडिवज्जिआ मसाणे, नो भीयए भवभेरवाइं दिस्स।*
*विविहगुणतवोरए अ निच्चं, न सरीरं चाभिकंखए जे स भिक्खू ॥*

**वृ.** एतदेव स्पष्टयति- 'प्रतिमां' मासादिरूपां 'प्रतिपद्य' विधिनाऽङ्गीकृत्य 'श्मशाने' पितवृवने 'न बिभेति' न भयं याति 'भैरवभयानि दृष्ट्वा' रौद्रभयहेतूनुपलभ्य वैतालादिरूपशब्दादीनि 'विविधगुणतपोरश्च नित्यं' मूलगुणाद्यनशनादिसक्तश्च सर्वकालं, न शरीरमभिकाङ्क्षते निःस्पृह-तया वार्त्तमानिकं भावि च, य इत्थंभूतः स भिक्षुरिति सूत्रार्थः ॥

**मू. (४९७)** *असइं वोसट्टचत्तदेहे, अक्कुट्ठे व हए लूसिए वा।*
*पुढविसमे मुनी हविज्जा, अनिआणे अकोउहल्ले जे स भिक्खू ॥*

**वृ.** न सकुदसकृत्सर्वदेत्यर्थः, किमित्याह- 'व्युत्सृष्टत्यक्तदेहः' व्युत्सृष्टो भावप्रतिबन्धा-भावेन त्यक्तो विभूषणाकरणेन देहः- शरीरं येन स तथाविधः, आक्रुष्टो वा यकारादिना हतो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दण्डादिना लूषितो वा खंगादिना भक्षितो वा श्वशृगालादिना 'पृथिवीसमः' सर्वसहो मुनिर्भवति, न च रागादिना पीड्यते, तथा 'अनिदानो' भाविफलासंसाररहितः, अकुतूहलश्च नटादिषु, य एवंभूतः स भिक्षुरिति सूत्रार्थः ॥

*मू. ( ४९८ ) अभिभूअ काएण परीसहाइं, समुद्धरे जाइपहाउ अप्पयं।*
*विइत्तु जाईमरणं महब्भयं, तवे रए सामणिए जे स भिक्खू ॥*

**वृ.** भिक्षुस्वरूपाभिधानाधिकार एवाह-'अभिभूय' पराजित्य 'कायेन' शरीरेणापि, न भिक्षुसिद्धान्तनीत्या मनोवाग्भ्यामेव, कायेनानिभभवे तत्त्वतस्तदनभिभवात्, 'परीषहान्' क्षुदादीन्, 'समुद्धरति' उत्तारयति 'जातिपथात्' संसारमार्गादात्मानं, कथमित्याह-'विदित्वा' विज्ञाय ज्ञातिमरणं संसारमूलं, 'महाभयं' महाभयकारणं, 'तपसि रतः' तपसि सक्तः, किंभूत इत्याह- 'श्रामण्ये' श्रमणानां संबन्धिनि, शुद्ध इति भावः, य एवंभूतः स भिक्षुरिति सूत्रार्थः ॥

*मू. ( ४९९ ) हत्थसंजए पायसंजए, वायसंजए संजइंदिए।*
*अज्झप्परए सुसमाहिअप्पा, सुत्तत्थं च विआणइ जे स भिक्खू ॥*

**वृ.** तथा हस्तसंयतः पादसंयत इति-कारणं विना कूर्मवल्लीन आस्ते कारणे च सम्यग्गच्छति, तथा वाक्संयतः अकुशलवाग्निरोधकुशलवागुदीरणेन, 'संयतेन्द्रियो' निवृत्तविषयप्रसरः, 'अध्यात्मरतः' प्रशस्तध्यानासक्तः, सुसमाहितात्मा ध्यानापादकगुणेषु, तथा सूत्रार्थं च यथावस्थितं विधिग्रहणशुद्धं विजानाति यः सम्यग्यथाविषयं स भिक्षुरिति सूत्रार्थः ॥

*मू. ( ५०० ) उवहिंमि अमुच्छिए अगिद्धे, अन्नायउंछं पुलनिप्पुलाए।*
*कयविक्कयसंनिहिओ विरए, सव्वसंगावगए अ जे स भिक्खू ॥*

**वृ.** तथा-'उपधौ' वस्त्रादिलक्षणे 'अमूर्च्छितः' तद्विषयमोहत्यागेन 'अगृद्धः' प्रतिबन्धाभावेन, अज्ञातोञ्छंचरति भावपरिशुद्धं, स्तोकं स्तोकमित्यर्थः, 'पुलाकनिष्पुलाक' इति संयमासारतापादकदोषरहितः, 'क्रयविक्रयसंनिधिभ्यो विरतः' द्रव्यभावभेदभिन्नक्रयविक्रयपर्युषितस्थापनेभ्यो निवृत्तः, 'सर्वसङ्गापगतश्च यः' अपगतद्रव्यभावसङ्गश्च यः, स भिक्षुरिति।

*मू. ( ५०१ ) अलोल भिक्खू न रसेसु गिज्झे, उंछं चरे जीविअ नाभिकंखे।*
*इड्ढिं च सक्कारणपूअणं च, चए ठिअप्पा अनिहे जे स भिक्खू ॥*

**वृ.** किंच-अलोलो नाम नाप्राप्तप्रार्थनपरो 'भिक्षुः' साधुः न रसेषु गृद्धः प्राप्तेष्वप्यप्रतिबद्ध इति भावः, उञ्छमेवेति पूर्ववत्, नवरं तत्रोपधिमाश्रित्योक्तमिह त्वाहारमित्यपौनरुक्त्यं, तथा जीवितं नाभिकाङ्क्षते, असंयमजीवितं, तथा 'ऋद्धिं च' आमर्षौषध्यादिरूपां सत्कारं वस्त्रादिभिः पूजनं च स्तवादिना त्यजति, नैतदर्थमेव यतते, स्थितात्मा ज्ञानादिषु, 'अनिभ' इत्यमायो यः स भिक्षुरिति सूत्रार्थः ॥

*मू. ( ५०२ ) न परं वइज्जासि अयं कुसीले, जेणं च कुप्पिज्ज न तं वइज्जा।*
*जाणिअ पत्तेअं पुण्णपावं, अत्ताणं न समुक्कसे जे स भिक्खू ॥*

**वृ.** तथा न 'परं' स्वपक्षविनेयव्यतिरिक्तं वदतिअयं कुशीलः, तदप्रीत्यादिदोषप्रसङ्गात्, स्वपक्षविनेयं तु शिक्षाग्रहणबुद्ध्या वदत्यपि, सर्वथा येनान्यः कश्चित् कुप्यति न तद् ब्रवीति दोषसद्भावेऽपि, किमित्याह आह-ज्ञात्वा प्रत्येकं पुण्यपापं, नान्यसंबन्ध्यन्यस्य भवति अग्नि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाहवेदनावत्, एवं सत्स्वपि गुणेषु नात्मानं समुत्कर्षति-न स्वगुणैर्गर्वमायाति यः स भिक्षुरिति।

मू.(५०३) *न जाइमत्ते न य रूवमत्ते, न लाभमत्ते न सुएण मत्ते।*
*मयाणि सव्वाणि विवज्जइत्ता, धम्मज्झाणरए जे स भिक्खू॥*

वृ. मदप्रतिषेधार्थमाह-न जातिमत्तो यथाऽहं ब्राह्मणः क्षत्रियो वा, न च रूपमत्तो यथाऽहं रूपवानादेयः, न लाभमत्तो यथाऽहं लाभवान्, न श्रुतमत्तो यथाऽहं पण्डितः, अनेन कुलमदादि-परिग्रहः, अत एवाह-मदान् सर्वान् कुलादिविषयानपि 'परिवर्ज्य' परित्यज्य 'धर्मध्यानरतो' यो यथागमं तत्र सक्तः स भिक्षुरिति सूत्रार्थः॥

मू.(५०४) *पवेअए अज्जपयं महामुनी, धम्मे ठिओ ठावयई परं पि।*
*निक्खम्म वज्जिज्ज कुसीललिंगं, न आवि हासंकुहए जे स भिक्खू॥*

वृ. किंच-'प्रवेदयति' कथयति 'आर्यपदं' शुद्धधर्मपदं परोपकाराय 'महामुनिः' शीलवान् ज्ञाता एवंभूत एव वस्तुतो नान्यः, किमित्येतदेवमित्यत आह-धर्मे स्थितः स्थापयति परमपि श्रोतारं, तत्रादेयभावप्रवृत्तेः, तथा निष्क्रम्य वर्जयति 'कुशीललिङ्गम्' आरम्भादि कुशीलचेष्टितं, तथा 'न चापि हास्यकुहको' न हास्यकारिकुहकयुक्तो यः स भिक्षुरिति सूत्रार्थः॥

मू.(५०५) *तं देहवासं असुइं असासयं, सया चए निच्चिहिअट्ठिअप्पा।*
*छिंदित्तु जाईमरणस्स बंधणं, उवेइ भिक्खू अपुणागमं गइं। ते बेमि॥*

वृ. भिक्षुभावफलमाह-'तं देहवास'मित्येवं प्रत्यक्षोपलभ्यमानं चारकरूपं शरीरवासमए अशुचि शुक्रशोणितोद्भवत्वादिना अशाश्वतं प्रतिक्षणपरिणत्या सदा त्यजति ममत्वानुबन्धत्यागेन, क इत्याह-'नित्यहिते' मोक्षसाधने सम्यग्दर्शनादौ 'स्थितात्मा' अत्यन्तसुस्थितः, स चैवं-भूतश्छित्त्वा 'जातिमरणस्य' संसारस्य 'बन्धनं' कारणम् 'उपैति' सामीप्येन गच्छति 'भिक्षुः' यतिः 'अपुनरागमां' पुनर्जन्मादिरहितामित्यर्थः, गतिमिति-सिद्धिगतिं, ब्रवीमीति पूर्व-वदिति सूत्रार्थः॥ उक्तोऽनुगमो, नयाः पूर्ववत्, इति व्याख्यातं सभिक्षवध्ययन्॥

अध्ययनं-१० समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिक सूत्रे दशमअध्ययनस्य भद्रबाहुस्वामि विरचिता निर्युक्तिः एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता**

## प्रथमा चूलिका रतिवाक्यं

वृ. अधुनैधतश्चूडे आरभ्येते, अनयोश्चायमभिसंबन्धः-इहानन्तराध्ययने भिक्षुगणयुक्त एव भिक्षुरुक्तः, स चैवंभूतोऽपि कदाचित् कर्मपरतन्त्रवत् कर्मणश्च बलवत्त्वात् सीदेद्, अतस्त-त्स्थिरीकरणं कर्त्तव्यमिति तदर्थाधिकारवच्चूडाद्वयमभिधीयते, तत्र चूडाशब्दार्थमेवाभिधातु-काम आह-

**नि.[३६०]** दव्वे खेत्ते काले भावम्मि अ चूलिआय निक्खेवो।
तं पुण उत्तरतंतं सुअगहिअत्थं तु संगहणी॥

वृ. नामस्थापने क्षुण्णत्वादनादृत्याह-'द्रव्ये क्षेत्रे काले भावे च' द्रव्यादिविषयः चूडाया 'निक्षेपो' न्यास इति तत्पुनश्चूडाद्वयम् 'उत्तरतंत्रं' दशवैकालिकस्य आचारपञ्चचूडावत्, एत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्चोत्तरतन्त्रं 'श्रुतगृहीतार्थमेव' दशवैकालिकाख्यश्रुतेन गृहीतोऽस्येति विग्रहः, यद्येवमपार्थकमिदं, नेत्याह- 'संग्रहणी' तदुक्तानुक्तार्थसंक्षेप इति गाथार्थः ॥ द्रव्यचूडादिव्याचिख्यासयाऽऽह-

नि. [३६१] दव्वे सच्चिताई कुक्कुडचूडामणीमऊराई।
खेत्तंमि लोगनिक्कुड मंदरचूडा अ कूडाई ॥

वृ. 'द्रव्य' इति द्रव्यचूडा आगमनोआगमज्ञशरीरेतरादि, व्यतिरिक्ता त्रिविधा 'सचित्ताद्या' सचित्ता अचित्ता मिश्रा च, यथासंख्यं दृष्टान्तमाह-कुक्कुटचूडा सचित्ता मणिचूडा अचित्ता मयूरशिखा मिश्रा। 'क्षेत्र' इति क्षेत्रचूडा लोकनिष्कुटा उपरिवर्त्तिनः, मन्दरचूडा च पाण्डुकम्बला कूटादयश्च तदन्यपर्वतानां, क्षेत्रप्राधान्यता, आदिशब्दादधोलोकस्य सीमन्तकः तिर्यग्लोकस्य मन्दर ऊर्ध्वलोकस्येषत्प्राग्भारेति गाथार्थः ॥

नि. [३६२] अइरित्त अहिगमासा अहिगा संवच्छरा अ कालंमि।
भावे खओवसमिए इमा उ चूडा मुणेअव्वा ॥

वृ. 'अतिरिक्ता' उचितकालात् समधिका 'अधिकमासकाः' प्रतीताः, अधिकाः संवत्सराश्च षष्ठ्यब्दाद्यपेक्षया 'काल' इति कालचूडा, 'भाव' इति भावचूडा क्षायोपशमिके भावे इयमेव द्विप्रकारा चूडा 'मन्तव्या' विज्ञेया क्षायोपशमिकत्वाच्छ्रुतस्येति गाथार्थः ॥ तत्रापि प्रथमा रतिवाक्यचूडा, अस्याश्चानुयोगद्वारोपन्यासः पूर्ववत्तावद्यावन्नामनिष्पन्ने निक्षेपे रतिवाक्येति द्विपदं नाम, तत्र रतिनिक्षेप उच्यते-तत्रापि नामस्थापने अनादृत्य द्रव्यभावरत्यभिधित्सयाऽऽह-

नि. [३६३] दव्वे दुहा उ कम्मे नोकम्मरई अ सद्ददव्वाई।
भावरई तस्सेव उ उदए एमेव अरईवि ॥

वृ. द्रव्यरतिरागमनोआगमज्ञशरीरेतरातिरिक्ता द्विधा-कर्मद्रव्यरतिर्नोकर्मद्रव्यरतिश्च, तत्र कर्मद्रव्यरती रतिवेदनीयं कर्म, एतच्च बद्धमनुदयावस्थं गृह्ये नोकर्मद्रव्यरतिस्तु शब्दादिद्रव्याणि, आदिशब्दात्, स्पर्शरसादिपरिग्रहः रतिजनकानि-रतिकारणानि। भावरतिः 'तस्यैव तु' रतिवेदनीयस्य कर्मण उदये भवति, एवमेवारतिरपि द्रव्यभावभेदभिन्ना यथोक्तरतिप्रतिपक्षतो विज्ञेयेति गाथार्थः ॥ उक्ता रतिः, इदानीं वाक्यमतिदिशन्नाह-

नि. [३६४] वक्कं तु पुव्वभणिअं धम्मे रइकारगाणि वक्काणि।
जेणमिमीए तेन रइवक्के सा हवइ चूडा ॥

वृ. वाक्यं तु पूर्वभणितं-वाक्यशुद्ध्यध्ययनेऽनेकप्रकारमुक्तं 'धर्मे' चारित्ररूपे 'रतिकारकाणि' रतिजनकानि तानि च वाक्यानि येन कारणेन 'अस्यां' चूडायां तेन निमित्तेन रतिवाक्यैषा चूडा, रतिकर्तृणि वाक्यानि यस्यां सा रतिवाक्येति गाथार्थः ॥ इह च रत्यभिधानं सम्यक्सहनेन गुणकारिणीत्वोपदर्शनार्थम्। आह च-

नि. [३६५] जह नाम आउरस्सिह सीवणछेज्जेसु कीरमाणेसु।
जंतणमपत्थकुच्छाऽऽमदोसविरई हिअकरी उ ॥

वृ. यथा नामेति प्रसिद्धमेतत् 'आतुरस्य' शरीरसमुत्थेन आगन्तुकेन वा व्रणेन ग्लानस्य 'इह' लोके 'सीवनच्छेदेषु' सीवनच्छेदनकर्मसु क्रियामाणेषु सत्सु, किमित्याह-यन्त्रणं गलयन्त्रादिना 'अपथ्यकुत्सा' अपथ्यप्रतिषेधः 'आमदोषविरतिः' अजीर्णदोषनिवृत्तिः हितकारिण्येव विपाक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुन्दरत्वादिति गाथार्थः ॥ दार्ष्टान्तिकयोजनामाह-

नि.[३६६] अट्ठविहकम्मरोगाउरस्स जीअस्स तह तिगिच्छाए।
धम्मे रई अधम्मे अरई गुणकारिणी होइ ॥

वृ. 'अष्टविधकर्मरोगातुरस्य' ज्ञानावरणीयादिरोगेण भावग्लानस्य 'जीवस्य' आत्मनः 'तथा' तेनैव प्रकारेण 'चिकित्सायां' संयमरूपायां प्रकान्तायामस्नानलोचादिना पीडाभावेऽपि 'धर्मे' श्रुतादिरूपे 'रतिः' आसक्तिः 'अधर्मे' तद्विपरीते 'अरतिः' अनासक्तिर्गुणकारिणी भवति, निर्वाण-साधकत्वेनेति गाथार्थः ॥ एतदेव स्पष्टयति-

नि.[३६७] सज्झायसंजमतवे वेआवच्चे अ झाणोजोगे अ।
जो रमइ नो रमइ अस्संजमम्मि सो वच्चई सिद्धिं ॥

वृ. स्वाध्याये-वाचनादौ संयमे-पृथिवीकायसंयमादौ तपसि-अनशनादौ वैयावृत्त्ये च-आचार्यादिविषये ध्यानयोगे च-धर्मध्यानादौ यो 'रमते' स्वाध्यायादिषु सक्त आस्ते, तथा 'न रमते' न सक्त आस्ते 'असंयमे' प्राणातिपातादौ स 'व्रजति सिद्धिं' गच्छति मोक्षम्। इह च संयमतपोग्रहणे सति स्वाध्यायादिग्रहणं प्राधान्यख्यापनार्थमिति गाथार्थः ॥ उपसंहरन्नाह-

नि.[३६८] तम्हा धम्मे रइकारगाणि अरइकारगाणि उ(य) अहम्मे।
ठाणाणि ताणि जाणे जाइं भणिआइं अज्झयणे ॥

वृ.तस्माद् 'धर्मे' चारित्ररूपे 'रतिकारकाणि' रतिजनकानि 'अरतिकारकाणि च' अरतिजनकानि च 'अधर्मे' असंयमे स्थानानि 'तानि' वक्ष्यमाणानि जानीयात् यानि 'भणितानि' प्रतिपादितानि इह अध्ययने प्रक्रान्त इति गाथार्थः ॥ उक्तो नामनिष्पन्नो निक्षेपः, साम्प्रतं सूत्रालापकनिष्पन्नस्यावसर इत्यादि पूर्ववत्तावद्यावत्सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

*मू.( ५०६ ) इह खलु भो! पव्वइएणं उत्पन्नदुक्खेणं संजमे अरइसमावन्नचित्तेणं ओहाणुप्पेहिणा अणोहाइएणं चेव हयरस्सिगयंकुसपोयपडागाभूआइं इमाइं अट्ठारस ठाणाइं सम्मं संपडिलेहि-अव्वाइं भवंति-तंजहा- हंभो! दुस्समाए दुप्पजीवी १, लहुसगा इत्तरिआ गिहीणं कामभोगा २, भुज्जो अ साइबहुला मनुस्सा ३, इमे अ मे दुक्खे न चिरकालोवट्ठाई भविस्सई४, ओमजणपुरक्कि ५, वंतस्स य पडिआयणं ६, अहरगइवासोवसंपया ७, दुल्लहे खलु भो! गिहीणं धम्मे गिहवासमज्झे वसंताणं ८, आयंके से वहाय होइ ९, संकप्पे से वहाय होइ १०, सवोक्के से गिहवासे निरुवक्के से परिआए ११, बंधे गिहवासे मुक्खे परिआए १२, सावज्जे गिहवासे अणवज्जे परिआए १३, बहुसाहारणा गिहीणं कामभोगा १४, पत्तेअं पुण्णपावं १५, अणिच्चे खलु भो! मणुआण जीविए कुसग्गजल-बिंदुचंचले १६, बहुं न खलु भो! पावं कम्मं पगडं १७, पावाणं च खलु भो! कडाणं कम्माणं पुव्विं दुच्चिन्नाणं दुप्पडिकंताणं वेइत्ता मुक्खो, नत्थि अवेइत्ता, तवसा वा झोसइत्ता १८, अट्ठारसमं पयं भवइ। (भवइ अ इत्थ सिलोगो-)*

वृ. 'इह खलु भोः प्रव्रजितेन' इहेति जिनप्रवचने खलुशब्दोऽवधारणे स च भिन्नक्रम इति दर्शयिष्यामः, भो इत्यामन्त्रणे, प्रव्रजितेन-साधुना, किंविशिष्टेनेत्याह-'उत्पन्नदुःखेन' संजात-शीतादिशारीरस्त्रीनिषद्यादिमानसदुःखेन 'संयमे' व्यावर्णितस्वरूपे 'अरतिसमापन्नचित्तेन' उद्वेग-गताभिप्रायेण संयमनिर्विण्णभावेनेत्यर्थः, स एव विशेष्यते-'अवधानोत्प्रेक्षिणा' अवधानम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपसरणं संयमादुत्-प्राबल्येन प्रेक्षितुं शीलं यस्य स तथाविधस्तेन, उत्प्रव्रजितुकामेनेति भावः, 'अनवधावितेनैव' अनुत्प्रव्रजितेनैव 'अमूनि' वक्ष्यमाणलक्षणान्यष्टादश स्थानानि 'सम्यग्' भावसारं 'सुष्ठु प्रेक्षितव्यानि' सुष्ठावलोचनीयानि भवन्तीति योगः, अव-धावितस्य तु प्रत्युपेक्षणं प्रायोऽनर्थकमिति।

तान्येव विशेष्यन्ते-'हयरश्मिगजाङ्कुशपोतपताकाभूतानि' अश्वखलिनगजाङ्कुशबोहित्थ-सितपटतुल्यानि, एतदुक्तं भवति-यथा हयादीनामुन्मार्गप्रवृत्तिकामानां रश्म्यादयो नियमनहेत-वस्तथैतान्यपि संयमादुन्मार्गप्रवृत्तिकामानां भव्यसत्त्वानामिति, यतश्चैवमतः सम्यक् संप्रत्युपेक्षित-व्यानि भवन्ति, खलुशब्दोऽवधारणे, योगात्सम्यक्-सम्यगेव संप्रत्युपेक्षितव्यान्येवेत्यर्थः 'तद्यथे'त्यादि, तद्यथेत्युपन्यासार्थः, 'हंभो दुष्षमायां दुष्प्रजीविन' इति हंभो-शिष्यामन्त्रणे दुष्ष्-मायाम्-अधमकालाख्यायां कालदोषादेव दुःखेन-कृच्छ्रेण प्रकर्षेणोदारभोगापेक्षया जीवितुं शीला दुष्प्रजीविनः, प्राणिन इति गम्यते, नरेन्द्रादीनामप्यनेकदुःखप्रयोगदर्शनात्, उदारभोगरहितेन च विडम्बनाप्रायेण कुगतिहुतना किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति प्रथमं स्थानम् १।

तथा 'लघव इत्वारा गृहिणां कामभोगाः' दुष्षमायामिति वर्त्तते, सन्तोऽपि 'लघवः' तुच्छाः प्रकृत्यैव तुषमुष्टिवदसाराः 'इत्वरा' अल्पकालाः 'गृहिण' गृहस्थानां 'कामभोगा' मदनकाम-प्रधानाः शब्दादयो विषया विपाककटवश्च, न देवानामिव विपरीताः, अतः किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति द्वितीयं स्थानम् २।

तथा 'भूयश्च स्वातिबहुला मनुष्याः' दुष्षमायामिति वर्त्तत एव, पुनश्च 'स्वातिबहुला' मायाप्रचुरा 'मनुष्या' इति प्राणिनो, न कदाचिद्विश्रम्भहेतवोऽभी, तद्रहितानां च कीदृक्सुखं?, तथा मायाबन्ध-हेतुत्वेन दारुणतरो बन्ध इति किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति तृतीयं स्थानं ३।

तथा 'इदं च मे दुःखं न चिरकालोपस्थायि भविष्यति' 'इदं च' अनुभूयमानं मम श्रामण्यमनुपालयतो 'दुःखं' शारीरमानसं कर्मफलं परीषहजनितं न चिरकालमुपस्थातुं शीलं भविष्यति, श्रामणयपालनेन परीषहनिराकृतेः कर्मनिर्जरणात्संयमराज्यप्राप्तेः, इतरथा महानरकादौ विपर्ययः, अतः किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति चतुर्थं स्थानं ४।

तथा 'ओमजनपुरस्कार'मिति न्यूनजनपूजा, प्रव्रजितो हि धर्मप्रभावाद्राजामात्यादिभिर-भ्युत्थानासनाञ्जलिप्रग्रहादिभिः पूज्यते, उत्प्रव्रजितेन तु न्यूनजनस्यापि स्वव्यसनगुप्तयेऽभ्युत्थानादि कार्यम्, अधार्मिकराजविषये वा वेष्टिप्रयोक्तुः खरकर्मणो नियमत एव इहैवेदमधर्मफलम् अतः किं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति पञ्चमं स्थानम् ५।

एवं सर्वत्र क्रिया योजनीया, तथा 'वान्तस्य प्रत्यापानं' भुक्तोज्झितपरिभोग इत्यर्थः, अयं च श्वशृगालादिक्षुद्रसत्त्वाचरितः सतां निन्द्यो व्याधिदुःखजनकः, वान्ताश्च भोगाः प्रव्रज्याङ्गीकर-णेन, एतत्प्रत्यापानमप्येवं चिन्तनीयमिति षष्ठं स्थानम् ६।

तथा 'अधरगतिवासोपसंपत्' अधो(धर)गतिः-नरकतिर्यग्गतिस्तस्यां वसनमधोगतिवासः, एतन्निमित्तभूतं कर्म गृह्यते, तस्योपसंपत्-सामीप्येनाङ्गीकरणं यदेतदुत्प्रव्रजनम्, एवं चिन्तनी-यमिति सप्तमं स्थानं ७। तथा 'दुर्लभः खलु भो! गृहिणां धर्म' इति प्रमादबहुलत्वाद्दुर्लभ एव 'भो' इत्यामन्त्रणे गृहस्थानां परमनिर्वृतिजनको धर्मः, किंविशिष्टानामित्याह-'गृहपाशमध्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसता' मित्यत्र गृहशब्देन पाशकल्पाः पुत्रकलत्रादयो गृह्यन्ते, तन्मध्ये वसताम्, अनादिभवाभ्यासादकारणं स्नेहबन्धनम्, एतच्चिन्तनीयमिष्टमं स्थानं ८।

तथा 'आतङ्कस्तस्य वधाय भवति' 'आतङ्कः' सद्योघाति विषूचिकादिरोगः 'तस्य' गृहिणो धर्मबन्धुरहितस्य 'वधाय' विनाशाय भवति, तथा वधश्चानेकवधहेतुः, एवं चिन्तनीयमिति नवमं स्थानं ९। तथा 'संकल्पस्तस्य वधाय भवति' 'संकल्प' इष्टानिष्टवियोगप्राप्तिजो मानस आतङ्कः, 'तस्य' गृहिणस्तथा चेष्टायोगान्मिथ्याविकल्पाभ्यासेन ग्रहादिप्रासेर्वधाय भवति, एतच्चिन्तनीयमिति दशमं स्थानं १०।

तथा 'सोपक्लेशो गृहिवास' इति सहोपक्लेशैः सोपक्लेशो गृहिवासो-गृहाश्रमः, उपश्लेशाः-कृषिपाशुपाल्यवाणिज्याद्यनुष्ठानानुगताः पण्डितजनगर्हिताः शीतोष्णश्रमादयो धृतलवणचिन्तादयश्चेति, एवं चिन्तनीयमित्येकादशं स्थानं ११।

तथा 'निरुपक्लेशः पर्याय' इति, एभिरेवोपक्लेशै रहितः, प्रव्रज्यापर्यायः, अनारम्भी कुचिन्तापरिवर्जितः, श्लाघनीयो विदुषामित्येवं चिन्तनीयमिति द्वादशं स्थानं १२।

तथा 'बन्धा गृहवासः' सदा तद्धेत्वनुष्ठानान् कोशकाकीटवदिति, एतच्चिन्तनीयमिति त्रयोदश स्थानं. १३। तथा 'मोक्षः पर्यायः' अनवरतं कर्मनिगडविगमान्मुक्तवदित्येवं चिन्तनीयमिति चतुर्दशं स्थानम् १४।

अत एव 'सावद्यो गृहवास' इति सावद्यः-सपायः प्राणातिपातमृषावादादिप्रवृत्तेरेतच्चिन्तनीयमिति पञ्चदशं स्थानम् १५। एवम् 'अनवद्यः पर्याय' इति अपाप इत्यर्थः, अहिंसादिपालनात्मकत्वाद्, एतच्चिन्तनीयमिती षोडशं स्थानं १६।

तथा 'बहुसाधारणा गृहिणां कामभोगा' इति बहुसाधारणाः-चौरराजकुलादिसामान्या 'गृहिणां' गृहस्थानां कामभोगाः पूर्ववदिति, एतच्चिन्तनीयमिति सप्तदशं स्थानं १७।

तथा 'प्रत्येकं पुण्यपाप' मिति मातापितृकलत्रादिनिमित्तमप्यनुष्ठितं पुण्यपापं 'प्रत्येकं प्रत्येकं' पृथक् पृथक् येनानुष्ठितं तस्य कर्तुरेवैतदिति भावार्थः, एवमष्टादशं स्थानम् १८।

एतदन्तर्गतो वृद्धाभिप्रायेण शेषग्रन्थः समस्तोऽत्रैव, अन्ये तु व्याचक्षते-सोपक्लेशो गृहिवास इत्यादिषु षट्सु स्थानेषु सप्रतिपक्षेषु स्थानत्रयं गृह्यते, एवं च बहुसाधारणा गृहिणां कामभोगा इति चतुर्दशं स्थानम् १४, प्रत्येकं पुण्यपापमिति पञ्चदशं स्थानम् १५, शेषाण्यभिधीयन्ते, तथा 'अनित्यं खलु' अनित्यमेव नियमतः भो इत्यामन्त्रणे 'मनुष्याणां' पुंसां 'जीवितम्' आयुः, एतदेव विशेष्यते-कुशाग्रजलबिन्दुचञ्चलं सोपक्रमत्वादनेकोपद्रवविषयत्वादत्यन्तासारं, तदलं गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति षोडशं स्थानं १६, तथा 'बहु च खलु भोः ! पापं कर्म प्रकृतम्' बहु च चशब्दात् क्लिष्टं च खलुशब्दोऽवधारणे बह्वेव पापं कर्म-चारित्रमोहनीयादि 'प्रकृतं' निर्वर्त्तितं, मयेति गम्यते, श्रामण्यप्राप्तावप्येवं क्षुद्रबुद्धिप्रवृत्तेः, नहि प्रभूतक्लिष्टकर्मरहितानामेवमकुशला बुद्धिर्भवति, अतो न किञ्चित् गृहाश्रमेणेति संप्रत्युपेक्षितव्यमिति सप्तदशं स्थानं १७।

तथा 'पापानां चे'त्यादि, 'पापानां च' अपुण्यरूपाणां चशब्दात्पुण्यरूपाणां च 'खलु भोः ! कृतानां कर्मणां' खलुशब्दः कारितानुमतविशेषणार्थः, भो इति शिष्यामन्त्रणे, 'कृतानां' मनोवाक्काययोगैरोधतो निर्वर्त्तितानां 'कर्मणां' ज्ञानावरणीयाद्यसातवेदनीयादीनां 'प्राक्' पूर्वमन्यजन्मसु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दुश्चरितानां' प्रमादकषायजदुश्चरितजनितानि दुश्चरितानि, कारणे कार्योपचारात्, दुश्चरितहेतूनि वा दुश्चरितानि, कार्ये कारणोपचारात्, एवं 'दुष्पराक्रान्तानां' मिथ्यादर्शनाविरतिजदुष्पराक्रान्ता-जनितानि दुष्पराक्रान्तानि, हेतौ फलोपचारात्, दुष्पराक्रान्तहेतूनि वा दुष्पराक्रान्तानि, फले हेतूप-चारात्, इह च दुश्चरितानि मद्यपानाश्लीलानृतभाषणादीनि, दुष्पराक्रान्तानि वधबन्धनादीनि, तदमीषाप्नेवंभूतानां कर्मणां 'वेदयित्वा' अनुभूय, फलमिति वाक्यशेषः, किम् ? - 'मोक्षो भवति' प्रधानपुरुषार्थो भवति 'नास्त्यवेदयित्वा' न भवत्यननुभूय, अनेन सकर्मकोक्षव्यवच्छेदमाह, इष्यते च स्वल्पकर्मोपेतानां कैश्चित्सहकारिनिरोधतस्तत्फलादानवादिभिस्तत्, तदपि नास्त्य-वेदयित्वा मोक्षः, तथारूपत्वात् कर्मणः, स्वफलादाने कर्मत्वायोगात्, 'तपसा व क्षययित्वा' अनशनप्रायश्चित्तादिना वा विशिष्टक्षायोपशमिकशुभभावरूपेण तपसा प्रलयं नीत्वा, इह च वेदनमुदयप्राप्तस्य व्याधेरिवानाब्धोपक्रमस्य क्रमशः, अन्यानिबन्धनपरिक्लेशेन, तपःक्षपणं तु सम्यगुपक्रमेणानुदीर्णोदीरणदोषक्षपणवदन्यनिमित्तप्रक्रमेणापरिक्लेशमिति, अतस्तपोऽनुष्ठानमेव श्रेय इति न किंचिद्गृहाश्रमेणेति संप्रत्यपेक्षितव्यमिति 'अष्टादशं पदं भवति' अष्टादशं स्थानं भवति १८। 'भवति चात्र श्लोकः' अत्रेत्यष्टादशस्थानार्थव्यतिकरे, उक्तानुक्तार्थसंग्रहपरइत्यर्थः, श्लोक इति च जातिपरो निर्देशः, ततः श्लोकजातिरनेकभेदा भवतीति प्रभूत श्लोकोपन्यासेऽपि न विरोधः ॥

*मू.(५०७)* *जया य चयई धम्मं, अणज्जो भोगकारणा।*
*से तत्थ मुच्छिए बाले, आयइं नावबुज्झइ।*

**वृ.** यदा चैवमप्यष्टादशसु व्यावर्त्तनकारणेषु सत्स्वपि 'जहाति' त्यजति 'धर्म' चारित्रलक्षणम् 'अनार्य' इत्यनार्य इवानार्यो-म्लेच्छचेष्टितः, किमर्थमित्याह-'भोगकारणात्' शब्दादिभोगनिमित्तं 'स' धर्मत्यागी 'तत्र' तेषु भोगेषु 'मूर्च्छितो' गृद्धो 'बालः' मन्दः 'आयतिम्' आगामिकालं 'नावबुद्ध्यते' न सम्यगवगच्छतीति सूत्रार्थः ॥

*मू.(५०८)* *जया ओहाविओ होइ, इंदो वा पडिओ छमं।*
*सव्वधम्मपरिब्भट्ठो, स पच्छा परितप्पइ ॥*

**वृ.** एतदेव दर्शयति-यदा 'अवधावितः' अपसृतो भवति संयमसुखविभूतेः, उत्प्रव्रजित इत्यर्थः, 'इन्द्रो वे'ति देवराज इव 'पतितः क्ष्मां' क्ष्मां गतः, स्वविभवभ्रंशेन भूमौ पतित इति भावः, क्ष्मा-भूमिः। 'सर्वधर्मपरिभ्रष्टः' सर्वधर्मेभ्यः-क्षान्त्यादिभ्य आसेवितेभ्योऽपि यावत्प्रति-ज्ञमननुपालनात् लौकिकेभ्योऽपि वा गौरवादिभ्यः परिभ्रष्टः - सर्वश्च्युतः, स पतितो भूत्वा 'पश्चात्' मनाग् मोहावसाने 'परितप्यते' किमिदमकार्यं मयाऽनुष्ठितमित्यनुतापं करोतीति सूत्रार्थः ॥

*मू.(५०९)* *जया अ वंदिमो होइ, पच्छा होइ अवंदिमो।*
*देवया व चुआ ठाणा, स पच्छा परितप्पइ ॥*

**वृ.** यदा च वन्द्यो भवति श्रमणपर्यायस्थो नरेन्द्रादीनां पश्चाद्भवत्युन्निष्क्रान्तः सन्नवन्द्यः तदा देवतेव काचिदिन्द्रवर्जा स्थानच्युता सती स पश्चात्परितप्यत इत्येतत्पूर्ववदेवेति सूत्रार्थः ॥

*मू.(५१०)* *जया अ पूइमो होइ, पच्छा होइ अपूइमो।*
*राया ज रज्जपब्भट्ठो, स पच्छा परितप्पइ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.तथा यदा च पूज्यो भवति-वस्त्रभक्तादिभिः श्रामण्यसामर्थ्याल्लोकानां पश्चाद् भवत्युत्प्रव्रजितः सन्नपूज्यो लोकानामेव तदा राजेव राज्यप्रभ्रष्टः महतो भोगाद्विप्रमुक्तः स पश्चात्परितप्यत इति पूर्ववदेवेति सूत्रार्थः ॥

मू.(५११) *जया अ माणिमो होइ, पच्छा होइ अमाणिमो।*
*सिट्ठि व्य कब्बडे छूढो, स पच्छा परितप्पइ ॥*

वृ.यदा च मान्यो भवत्यभ्युत्थानाज्ञाकरणादिना मानीयः शीलप्रभावेण पश्चाद्भवत्यमान्यस्तत्परित्यागेन तदा श्रेष्ठीव 'कर्बटे' महाक्षुद्रसंनिवेशे क्षिप्तः सन्, पश्चात्परितप्यत इत्येतत्समानं पूर्वेणेति सूत्रार्थः ॥

मू.(५१२) *जया अ थेरओ होइ, समइक्कं तजुव्वणो।*
*मच्छु व्व गलं गिलित्ता, स पच्छा परितप्पइ ॥*

वृ. यदा च स्थविरो भवति स त्यक्तसंयमो वयःपरिणामेन, एतद्विशेषप्रतिपादनायाह-समतिक्रान्तयौवनः, एकान्तस्थविर इति भावः, तदा विपाककटुकत्वाद्भोगानां मत्स्य इव 'गलं' बडिशं 'गिलित्वा' अभिगृह्य तथाविधकर्मलोहकण्टकविद्धः सन् स पश्चात्परितप्यत इत्येतदपि समानं पूर्वेणेति सूत्रार्थः ॥

मू.(५१३) *जया अ कुकुडुंबस्स, कुतत्तीहिं विहम्मइ।*
*हत्थी व बंधणे बद्धो, स पच्छा परितप्पइ ॥*

वृ.एतदेव स्पष्टयति-यदा च 'कुकुटम्बस्य' कुत्सितकुटुम्बस्य कुतप्तिभिः-कुत्सितचिन्ताभिरात्मनः संतापकारिणीभिर्विहन्यते-विषयभोगान् प्रति विधातं नीयते तदा स मुक्तसंयमः सन् परितप्यते पश्चात्, क इव ?-यथा हस्ती कुमुटुम्बबन्धनबद्धः परितप्यते ॥

मू.(५१४) *पुत्तदारपरीकिण्णो, मोहसंताणसंतओ ॥*
*पंकोसन्नो जहा नागो, स पच्छा परितप्पइ ॥*

वृ.एतदेव स्पष्टयति-'पुत्रदाहरपरिकीर्णो' विषयसेवनात्पुत्रकलत्रादिभिः सर्वतो विक्षिप्तः 'मोहसंतानसंततो' दर्शनादिमोहनीयकर्मप्रवाहेण व्याप्तः, क इव-'पङ्कावसन्नो नागो यथा' कर्दमावमग्नो वनगज इव स पश्चात्परितप्यते-हा हा किं मयेदमसजञ्जसमनुष्ठितमिति सूत्रार्थः ॥

मू.(५१५) *अज्ज आहं गणी हुंतो, भाविअप्पा बहुस्सओ।*
*जइऽहं रमंतो परिआए, सामण्णे जिनदेसिअए ॥*

वृ. कश्चित् सचेतनतर एवं च परितप्यत इत्याह-'अद्य तावदहम्,' अद्य-अस्मिन् दिवसे अहमित्यात्मनिर्देशे गणी स्याम्-आचार्यो भवेयम् 'भावितात्मा' प्रशस्तयोगभावनाभिः 'बहुश्रुत' उभयलोकहितबह्वागमयुक्तः, यदि किं स्यादित्यत आह-यद्यहम् 'अरमिष्यं' रतिमकरिष्यं 'पर्याये' प्रव्रज्यारूपे, सोऽनेकभेद इत्याह-'श्रामण्ये' श्रमणानां संबन्धिनि, सोऽपि शाक्यादिभेदभिन्न इत्याह-'जिनदेशिते' निर्ग्रन्थसंबन्धिनीति सूत्रार्थः ॥

मू.(५१६) *देवलोगसमाणो अ, परिआओ महेसिणं।*
*रयाणं अरयाणं च, महानरयसारिसो ॥*

वृ.अवधानोत्प्रेक्षिणः स्थिरीकरणार्थमाह-'देवलोकसमानस्तु' देवलोकसदृश एव 'पर्यायः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रव्रज्यारूपः 'महर्षीणां' सुसाधूनां 'रतानां' सक्तानां, पर्याय एवेति गम्यते, एतदुक्तं भवति-यथा देवलोके देवाः प्रेक्षणकादिव्यापृता अदीनमनसास्तिष्ठन्त्येवं सुसाधवोऽपि भावतः प्रत्युपेक्षणादिक्रियायां व्यापृताः, उपादेयविशेषत्वात् प्रत्युपेक्षणादेरिति देवलोकसमान एव पर्यायो महर्षीणां रतानामिति। 'अरतानां च' भावतः सामाचार्यामसक्तानां च, चशब्दाद्विषयाभिलाषिणां च भगवल्लिङ्गविडम्बकानां क्षुद्रसत्त्वानां 'महानरकसदृशो' रौरवादितुल्यस्तत्कारणत्वान्मानसदुःखातिरेकात् तथा विडम्बनाच्चेति सूत्रार्थः ॥

*मू. (५१७) अमरोवमं जाणिअ सुक्खमुत्तमं, रयाण परिआइ तहाऽयाणं।*
*निरओवमं जाणिअ दुक्खमुत्तमं, रमिज्ज तम्हा परिआइ पंडिए॥*

**वृ.** एतदुपसंहारेणैव निगमयन्नाह-'अमरोपमम्' उक्तन्यायाद्देवसदृशं 'ज्ञात्वा' विज्ञाय 'सौख्यमुत्तमं' प्रशमसौख्यं, केषामित्याह-'रतानां पर्याये' सक्तानां सम्यक्प्रत्युपेक्षणादिक्रियाव्यङ्ग्ये श्रामण्ये, तथा अरतानां पर्याय एव, किमित्याह-'नरकोपमं' नरकतुल्यं ज्ञात्वा दुःखम् 'उत्तमं' प्रधानमुक्तन्यायात्, यस्मादेवं रतारतविपाकस्तस्माद् 'रमेत' सक्तिं कुर्यात्, केत्याह-'पर्याये' उक्तस्वरूपे 'पण्डितः' शास्त्रार्थज्ञ इति सूत्रार्थः ॥

*मू. (५१८) धम्माउ भट्ठं सिरिओ अवेयं, जन्नग्गिविज्झाअमिवऽप्पतेअं।*
*हीलंति नं दुव्विहिअं कुसीला, दाढुड्डिअं घोरविसं व नागं॥*

**वृ.** पर्यायच्युतस्यैहिकं दोषमाह-'धर्मात्' श्रमणधर्माद् 'भ्रष्टं' च्युतं 'श्रियोऽपेतं' तपोलक्ष्म्या अपगतं 'यज्ञाग्निम्' अग्निष्टोमाद्यनलं विध्यातमिव यागावसानेऽल्पतेजसम्, अल्पशब्दोऽभावे, तेजःशून्यं भस्मकल्पमित्यर्थः 'हीलयन्ति' कदर्थयन्ति, पतितस्त्वमिति पङ्क्त्यपसारणादिना, 'एनम्' उन्निष्क्रान्तं 'दुर्विहितम्' उन्निष्क्रमणादेव दुष्टानुष्ठायिनं 'कुशीलाः' तत्सङ्गोचिता लोकाः, स एव विशेष्यते-'दाढुड्डिअं' ति प्राकृत शैल्या उद्धृतदंष्ट्रम्-उत्खातदंष्ट्रं 'घोरविष-मिव' रौद्रविषमिव 'नागं' सर्पं, यज्ञाग्निसर्पोपमानं, लोकनीत्वा पधानभावादप्रधानभावख्यापनार्थमिति।

*मू. (५१९) इहेवऽधम्मो अयसो अकित्ती, दुन्नामधिज्जं च पिहुज्जणंमि।*
*चुअस्स धम्माउ अहम्मसेविनो, संभिन्नवित्तस्स य हिट्ठओ गई॥*

**वृ.** एवमस्य भ्रष्टशीलस्यौधत ऐहिकं दोषमभिधायैहिकामुष्मिकमाह-'इहैव' इहलोक एव 'अधर्म' इत्ययमधर्मः, फलेन दर्शयति-यदुत 'अयशः' अपराक्रमकृतं न्यूनत्वं तथा 'अकीर्त्तिः' अदानपुण्यफलप्रवादरूपा तथा 'दुर्नामधेयं च' पुराणः पतित इति कुत्सितनामधेयं च भवति, केत्याह-'पृथग्जने' सामान्यलोकेऽप्यास्तां विशिष्टलोके, कस्येत्याह-'च्युतस्य धर्माद्' उत्प्रव्रजितस्येत्यर्थः, तथा 'अधर्मसेविनः' कलत्रादिनिमित्तं षट्कायोमर्द्दकारिणः, तथा 'संभिन्नवृत्तस्य च' अखण्डनीयखण्डितचारित्रस्य च क्लिष्टकर्मबन्धाद् 'अधस्ताद्गतिः' नरकेषूपपात।

*मू. (५२०) भुंजित्तु भोगाइं पसज्झचेअसा, तहाविहं कट्टु असंजमं बहुं।*
*गइं च गच्छे अनभिज्झिअं दुहं, बोही अ से नो सुलहा पुणो पुणो॥*

**वृ.** अस्यैव विशेषप्रत्यपायमाह-'स' उत्प्रव्रजितो भुक्त्वा 'भोगान्' शब्दादीन् 'प्रसह्यचेतसा' धर्मनिरपेक्षतया प्रकटेन चित्तेन 'तथाविधम्' अज्ञोचितमधर्मफलं 'कृत्वा' अभिनिर्वर्त्त्य 'असंयमं' कृष्याद्यारम्भरूपं 'बहुम्' असंतोषात्प्रभूतं स इत्थंभूतो मृतः सन् गतिं च गच्छति 'अनभिध्याताम्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिध्याता-इष्टा न तामनिष्टमित्यर्थः, काचित्सुखाऽप्येवंभूतो भवत्यत आह-'दुःखां' प्रकृत्यैवासुन्दरां दुःखजननीं, 'बोधिश्चास्य' जिनधर्मप्राप्तिश्चास्योन्निष्क्रान्तस्य न सुलभा 'पुनः पुनः' प्रभूतेष्वपि जन्मसु दुर्लभैव, प्रवचनविराधकत्वादिति सूत्रार्थः ॥

*मू. ( ५२१ ) इमस्स ता नेरइअस्स जंतुणो, दुहोवणीअस्स किलेसवत्तिणो।*
*पलिओवमं झिज्झइ सागरोवमं, किमंग पुण मज्झ इमं मनोदुहं ? ॥*

वृ.यस्मादेवं तस्मादुत्पन्नदुःखोऽप्येतदनुचिन्त्य नोत्प्रव्रजेदित्याह-'अस्य ताव' दित्यात्मन एव निर्देशः, 'नारकस्य जन्तोः' नरकमनुप्राप्तस्येत्यर्थः, 'दुःखोपनीतस्य' सामीप्येन प्राप्तदुःखस्य 'क्लेशवृत्तेः' एकान्तक्लेशचेष्टितस्य सतो नरक एव पल्योपमं क्षीयते सागरोपमं च यथाकर्मप्रत्ययं, किमङ्ग पुनर्मभेदं संयमारतिनिष्पन्नं मनोदुःखं तथा विधक्लेशदोषरहितम् ?, एतत्क्षीयत एव, एतच्चिन्तनेन नोत्प्रव्रजितव्यमिति सूत्रार्थः ॥

*मू. ( ५२२ ) न मे चिरं दुक्खमिणं भविस्सइ, असासया भोगपिवास जंतुणो।*
*न चे सरीरेण इमेणऽविस्सइ, अविस्सई जीविअपज्जवेण मे ॥*

वृ.विशेषेणैतदेवाह-न मम 'चिरं' प्रभूतकालं 'दुःखमिदं' संयमारतिलक्षणं भविष्यति, किमित्यत आह-'अशाश्वती' प्रायो यौवनकालावस्थायिनी 'भोगपिपासा' विषयतृष्णा 'जन्तोः' प्राणिनः, अशाश्वतीत्व एव कारणान्तरमाह-'न चेच्छरीरेणानेनापयास्यति' न यदि शरीरेणानेन करणभूतेन वृद्धस्यापि सतोऽपयास्यति, तथापि किमाकुलत्वम् ?, यतोऽपयास्यति 'जीवितपर्ययेण' जीवितस्यापयमेन-मरणेनेत्येवं निश्चितः स्यादिति सूत्रार्थः ॥

*मू. ( ५२३ ) जस्सेवमप्पा उ हविज्ज निच्छिओ, चइज्ज देहं न हु धम्मसासनं।*
*तं तारिसं नो पइलंति इंदिआ, उविंतवाया व सुदंसणं गिरिं ॥*

वृ.अस्यैव फलमाह-'तस्ये'ति साधोः 'एवम्' उक्तेन, 'आत्मा तु' तुशब्दस्यैवकारार्थत्वात् आत्मैव भवेत् 'निश्चितो' दृढः यः स त्यजेद्देहं क्वचिद्विघ्न उपस्थिते, 'न तु धर्मशासनं' न पुनर्धर्माज्ञामिति, तं 'तादृशं' धर्मे निश्चितं 'न प्रचालयन्ति' संयमस्थानान्न कम्पयन्ति 'इन्द्रियाणि' चक्षुरादीनि। निर्दशनमाह-'उत्पतद्वाता इव' संपतत्पवना इव 'सुदर्शनं गिरिं' मेरुम्, एतदुक्तं भवति-यथा मेरुं न वाताश्चालयन्ति तथा तमपीन्द्रियाणीति सूत्रार्थः ॥

*मू. ( ५२४ ) इच्चेव संपस्सिअ बुद्धिमं नरो, आयं उवायं विविहं विआणिआ।*
*काएण वाया अदु मानसेणं, तिगुत्तिगुत्तो जिनवयणमहिट्ठिज्जासि ॥ त्ति बेमि ॥*

वृ.उपसंहरन्नाह-'इत्येवम्' अध्ययनोक्तं दुष्प्रजीवित्वादि 'संप्रेक्ष्य' आदित आरभ्य यथावदृष्ट्वा 'बुद्धिमान्नरः' सम्यग्बुद्ध्युपेतः 'आयमुपायं विविधं विज्ञाय' आयः सम्यग्ज्ञानादेः उपायः-तत्साधनप्रकारः कालविनयादिर्विविधः-अनेकप्रकारस्तं ज्ञात्वा, किमित्याहकायेन वाचाऽथ मनसा-त्रिभिरपि करणैर्यथाप्रवृत्तैस्त्रिगुप्तिगुप्तः सन् 'जिनवचनम्' अर्हदुपदेशम् 'अधितिष्ठेत्' यथाशक्त्या तदुक्तैकक्रियापालनपरो भूयात्, भावायसिद्धौ तत्त्वतो मुक्तिसिद्धेः। ब्रविमीति पूर्ववदिति सूत्रार्थः ॥ उक्तोऽनुगमः, साम्प्रतं नयाः, ते च पूर्ववदेव।

प्रथमा चूलिका समाप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्वितीया चूलिका-विविक्तचर्या

वृ. व्याख्यातं प्रथमचूडाध्ययनम्, अधुना द्वितीयामारभ्यते, अस्य चौधतः संबन्धः प्रतिपादित एव, विशेषतस्त्वनन्तराध्ययने सीदतः स्थिरीकरणमुक्तम्, इह तु विविक्तचर्योच्यत इत्ययमभिसंबन्धः एतदेवाह भाष्यकारः-

भा. [६३] अहिगारो पुव्वुत्तो चउव्विहो बिइअचूलिअज्झयणे।
सेसाणं दाराणं अहकमं फासणा होइ॥

वृ. 'अधिकारः' ओधतः प्रपञ्चप्रस्तावरूपः 'पूर्वोक्तो' रतिवाक्यचूडायां प्रतिपादितः 'चतुर्विधो' नामचूडा स्थापनाचूडेत्यादिरूपो यथा द्वितीयचूडाध्ययने आदानपदेन चूलिकाख्येन, सानुयोगद्वारोपन्यासस्तथैव वक्तव्य इति वाक्यशेषः 'शेषाणां द्वाराणां' सूत्रालापकगतनिक्षेपादीनां 'यथाक्रमं' यथाप्रस्तावं स्पर्शना-ईषद् व्याख्यादिरूपा भवतीति गाथार्थः ॥ अत्र च व्यतिकरे सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्चेदम्-

*मू. (५२५) चूलिअं तु पवक्खामि, सुअं केवलिभासिअं।*
*जं सुणित्तु सुपुण्णाणं, धम्मे उप्पज्जए मई॥*

वृ. 'चूडां तु प्रवक्ष्यामि' चूडां प्राग्व्यावर्णितशब्दार्थां तुशब्दविशेषितां भावचूडां प्रवक्ष्यामीति-प्रकर्षेणावसरप्राप्ताभिधानलक्षणेन कथयामि, 'श्रुतं केवलिभाषित'मिति इयं हि चूडा 'श्रुतं' श्रुतज्ञानं वर्त्तते, कारणे कार्योपचारात्, एतच्च केवलिभाषितम्-अनन्तरमेव केवलिना प्ररूपितमिति सफलं विशेषणम्। एवं च वृद्धवादः-कयाचिदार्ययाऽसहिष्णुः कुरगडुकप्रायः संयतश्चातुर्मासिकादावुपवासं कारितः, स तदाराधनया मृत एव, ऋषिघातिकाऽहमित्युद्विग्ना सा तीर्थकरं पृच्छामिति गुणावर्जितदेवतया नीता श्रीसीमन्धरस्वामिसमीपं, पृष्टो भगवान्, अदुष्टचित्ताऽघातिकेत्यभिधाय भगवतेमां चूडां ग्राहितेति। इदमेव विशेष्यते-'यच्छ्रुत्वे'ति यच्छ्रुत्वाऽऽकर्ण्य 'सुपुण्यानां' कुशलानुबन्धिपुण्ययुक्तानां प्राणिनां 'धर्मे' अचिन्त्यचिन्तामणिकल्पे चारित्रधर्मे 'उत्पद्यते मतिः' संजायते भावतः श्रद्धा। अनेन चारित्रं चारित्रबीजं चोपजायत इत्येतदुक्तं भवतीति सूत्रार्थः॥

*मू. (५२६) अनुसोअपट्ठिअबहुजणंमि, पडिसोअलद्धलक्खेणं।*
*पडिसोअमेव अप्पा, दायव्वो होउकामेणं॥*

वृ. एतद्धि प्रतिज्ञासूत्रम्, इह चाध्ययने चर्यागुणा अभिधेयाः, तत्प्रवृत्तौ मूलपादभूतमिदमाह-'अनुस्रोतःप्रस्थिते' नदीपूरप्रवाहपतितकाष्ठवद् विषयकुमार्गद्रव्यक्रियानुकूल्येन प्रवृत्ते 'बहुजने' तथाविधाभ्यासात् प्रभूतलोके तथाप्रस्थानेनोदधिगामिनि, किमित्याह-'प्रतिस्रोतोलब्धलक्ष्येण' द्रव्यतस्तस्यामेव नद्यां कथञ्चिद्देवतानियोगात्प्रतीपस्रोतःप्राप्तलक्ष्येण, भावतस्तु विषयादिवैपरीत्यात्कथंचिदवाप्तसंयमलक्ष्येण 'प्रतिस्रोत एव' दुरपाकरणीयमप्यपाकृत्य विषयादि संयमलक्ष्याभिमुखमेव 'आत्मा' जीवो 'दातव्यः' प्रवर्त्तयितव्यो 'भवितुकामेन' संसारसमुद्रपरिहारेण मुक्ततया भवितुकामेन साधुना, न क्षुद्रजनाचरितान्युदाहरणीयकृत्यासन्मार्गप्रवणं चेतोऽपि कर्त्तव्यम्, अपित्वागमैकप्रवणेनैव भवितव्यमिति, उक्तं च -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"निमित्तमासाद्य यदेव किञ्चन, स्वधर्ममार्गं विसृजन्ति बालिशाः।
तपः श्रुतज्ञानधनास्तु साधवो, न यान्ति कुच्छ्रे परमेऽपि विक्रियाम् ॥१॥
कपालमादाय विपन्नवाससा, वरं द्विषद्वेश्मसमृद्धिरीक्षिता।
विहाय लज्जां न तु धर्मवैशसे, सुरेन्द्रता(सा)र्थेऽपि समाहितं मनः ॥२॥
पापं समाचरति वीतघृणो जघन्यः प्राप्यापदं सघृण एव विमध्यबुद्धिः।
प्राणात्येयऽपि न तु साधुजनः स्ववृत्तं, वेलां समुद्र इव लङ्घयितुं समर्थः ॥"

इत्यलं प्रसङ्गेनेति सूत्रार्थः।

*मू. (५२७) अनुसोअसुहो लोओ, पडिसोओ आसवो सुविहिआणं।*
*अनुसोओ संसारो, पडिसोओ तस्स उत्तारो ॥*

वृ. अधिकृतमेव स्पष्टयन्नाह-'अनुस्रोतःसुखो लोकः' उदकनिम्नाभिसर्पणवत् प्रवृत्त्याऽनुकूलविषयादिसुखो लोकः, कर्मगुरुत्वात्, 'प्रतिस्तोत एव' तस्माद्विपरीतः 'आश्रवः' इन्द्रियजयादिरूपः परमार्थपेशलः कायवाङ्मनोव्यापारः 'आश्रमो वा' व्रतग्रहणादिरूपः 'सुविहितानां' साधूनाम्, उभयफलमाह-'अनुस्रोतः संसारः' शब्दादिविषयानुकूल्यं संसार एव, कारणे कार्योपचारात्, यथा विषं मृत्युः दधि त्रपुषी प्रत्यक्षो ज्वरः, 'प्रतिस्रोतः' उक्तलक्षणः, तस्येति पञ्चम्यर्थे षष्ठी 'सुपां सुपो भवन्ती'ति वचनात्, 'तस्मात्' संसाराद् 'उत्तारः' उत्तरणमुत्तारः, हेतौ फलोपचारात् यथाऽऽयुर्धृतं तन्दुलान्वर्षति पर्जन्य इति सूत्रार्थः ॥

*मू. (५२८) तम्हा आयारपरक्कमेणं संवरसमाहिबहुलेणं।*
*चरिआ गुणा अ नियमा अ हुंति साहूण दट्ठव्वा ॥*

वृ. यस्मादेतदेवमनन्तरोदितं तस्मात् 'आचारपराक्रमेणे'त्याचारे-ज्ञानादौ पराक्रमः प्रवृत्तिबलं यस्य स तथाविध इति, गमकत्वाद्बहुव्रीहिः, तेनैवंभूतेन साधुना 'संवरसमाधिबहुलेने'ति संवरे-इन्द्रियादिविषये समाधिः-अनाकुलत्वं बहुलं-प्रभूतं यस्य स इति, समासः पूर्ववत्, तेनैवंविधेन सता अप्रतिपाताय विशुद्धये च, किमित्याह-'चर्या' भिक्षुभावसाधनी बाह्याऽनियतवासादिरूपा गुणाश्च-मूलगुणोत्तरगुणरूपाः नियमाश्च-उत्तरगुणानामेव पिण्डविशुद्ध्यादीनां स्वकालासेवननियोगाः 'भवन्ति साधूनां द्रष्टव्या' इत्येते चर्यादयः साधूनां द्रष्टव्या भवन्ति, सम्यग्ज्ञानासेवनप्ररूपणारूपेणेति सूत्रार्थः ॥

*मू. (५२९) अनिएअवासो समुआणचारिआ, अन्नायउंछं पइरिक्कया अ।*
*अप्पोवही कलहविवज्जणा अ, विहारचरिआ इसिणं पसत्था ॥*

वृ. चर्यामाह-अनियतवासो मासकल्पादिना 'अनिकेतवासो वा' अगृहे-उद्यानादौ वासः, तथा 'समुदानचर्या' अनेकत्र याचितभिक्षाचरणम् 'अज्ञाताञ्छं' विशुद्धोपकरणग्रहणविषयं, 'पइरिक्कया य' विजनैकान्तसेविता च 'अल्पोपधित्वम्' अनुल्बणयुक्तस्तोकोपधिसेवित्वं 'कलहविवर्ज्जना च' तथा तद्वासिना भण्डनविवर्जना, विवर्जनं विवर्जना श्रवणकथनादिना परिवर्जनमित्यर्थः। 'विहारचर्या' विहरणस्थितिर्विहरणमर्यादा 'इयम्' एवंभूता 'ऋषीणां' साधूनां प्रशस्ता-व्याक्षेपाभावात् आज्ञापालनेन भावचरणसाधनात्पवित्रेति सूत्रार्थः ॥

27/17

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.( ५३० ) *आइन्नओमाणविवज्जा अ, ओसन्नदिट्ठाहडभत्तपाने।*
*संसट्ठकप्पेण चरिज्ज भिक्खू, तज्जायसंसट्ठ जई जइज्जा ॥*

वृ.इयं साधूनां विहारचर्येति सूत्रस्पर्शनमाह-

नि.[३६९] दव्वे सरीरभविओ भावेन य संजओ इहं तस्स।
उग्गहिआ पग्गहिआ विहारचरिआ मुणेअव्वा ॥

वृ. साधूनां विहारचर्याऽधिकृतेति साधुरुच्यते, स च द्रव्यतो भावतश्च, तत्र 'द्रव्य' इति द्वारपरामर्शः, 'शरीरभव्य' इति मध्यमभेदत्वादागमनोआगमज्ञशरीरभव्यशरीरतद्व्यतिरिक्तद्रव्यसाधूपलक्षणमेतत् 'भावेन चे'ति द्वारपरामर्शः, स एव 'संयत' इति संयतगुणसंवेदको भावसाधुः। 'इह' अध्ययने 'तस्य' भावसाधोः 'अवगृहीता' उद्यानारामादिनिवासाद्यनियता 'प्रगृहीता' तत्रापि विशिष्टाभिग्रहरूपा उत्कटुकासनादिविहारचर्या 'मन्तव्या' बोद्धव्येति गाथार्थः ॥

नि.[३७०] अनिएअं पइरिक्कं अन्नायं सामुआणिअं उंछं।
अप्पोवही अकलहो विहारचरिआ इसिपसत्था ॥

वृ. व्याख्या सूत्रवदवसेया। अवयवार्थस्तु गाथभङ्गभयाद्, अर्थतस्तु सूत्रोपन्यासद्रष्टव्य इति॥ 'विहारचर्या ऋषीणां प्रशस्ते'त्युक्तं तद्विशेषोपदर्शनायाह- 'आकीर्णावमानविवर्जना च' विहारचर्या ऋषीणां प्रशस्तेति, तत्राकीर्णं-राजकुलसंख्यादि अवमानं-स्वपक्षपरपक्षप्राभृत्यजं लोकाबहुमानादि, अस्य विवर्जना, आकीर्णे, हस्तपादादिलूषणदोषात् अवमाने अलाभाधाकर्मादिदोषादिति। तथा 'उत्सन्नदृष्टाहृतं' प्राय उपलब्धमुपनीतम्, उत्सन्नशब्दः प्रायो वृत्तौ वर्त्तते, यथा- ''देवा ओसन्नं सायं वेयणं वेएंति'' किमेतदित्याह- 'भक्तपानम्' ओदनारनालादि, इदं चोत्सन्नदृष्टाहृतं यत्रोपयोगः शुद्धयति, त्रिगृहान्तरादारत इत्यर्थः, 'भिक्खग्गाही एगत्थ कुणइ बीओ अ दोसुमुवओग'मिति वचनात्, इत्येवंभूतमुत्सन्नं दृष्टाहृतं भक्तपानमृषीणां प्रशस्तमिति योगः, तथा 'संसृष्टकल्पेन' हस्तमात्रकादिसंसृष्टविधिना चरेद्भिक्षुरित्युपदेशः, अन्यथा पुरःकर्मादिदोषात्, संसृष्टमेव विशिनष्टि- 'तज्जातसंसृष्ट' इत्यामगोरसादिसमानजातीयसंसृष्टे हस्तमात्रकादौ यतिः 'यतेत' यत्नं कुर्यात्, अतज्जातसंसृष्टे संसर्जनादिदोषादित्यनेनाष्टभङ्गसूचनं, तद्यथा-संसट्ठे हत्थे संसट्ठे मत्ते सावसेसे दव्वे' इत्यादि, अत्र प्रथमभङ्ग श्रेयान्, शेषास्तु चिन्त्या

मू.( ५३१ ) *अमज्जमंसासि अमच्छरीआ, अभिक्खणं निव्विगइं गया अ।*
*अभिक्खणं काउस्सग्गकारी, सज्झायजोगे पयओ हविज्जा ॥*

वृ. उपदेशाधिकार एवेदमाह-अमद्यमांसाशी भवेदिति योगः, अमद्यपोऽमांसाशी च स्यात्, एते च मद्यमांसे लोकागमप्रतीते एव, ततश्च यत्केचनाभिदधति-आरनालारिष्ठाद्यपि संधानाद् ओदनाद्यपि प्राण्यङ्गत्वात्त्याज्यमिति, तदसत्, अमीषां मद्यमांसत्वायोगात्, लोकशास्त्रयोरप्रसिद्धत्वात्, संधानप्राण्यङ्गत्वतुल्यत्वचोदना त्वसाध्वी, अतिप्रसङ्गदोषाद, द्रवत्वस्त्रीत्वतुल्यतया मूत्रपानमातृगमनादिप्रसङ्गादित्यलं प्रसङ्गेन, अक्षरगमनिकामात्रप्रक्रमात्। तथा 'अमत्सरी च' न परसंपद्द्वेषी च स्यात्, तथा 'अभीक्ष्णं' पुनः पुनः पुष्टकारणाभावे 'निर्विकृतिकश्च' निर्गतविकृतिपरिभोगश्च भवेत्, अनेन परिभोगोचितविकृतीनामप्यकारणे प्रतिषेधमाह, तथा 'अभीक्ष्णं' गमनागमनादिषु, विकृतिपरिभोगेऽपि चान्ये, किमित्याह- 'कायोत्सर्गकारी भवेत्' ईर्यापथ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिक्रमणमकृत्वा न किञ्चिदन्यत् कुर्याद्, तदशुद्धतापत्तेरिति भावः । तथा 'स्वाध्याययोगे' वाचनाद्युपचारव्यापारआचारमाम्लादौ 'प्रयतः' अतिशययत्नपरो भवेत्, तथैव तस्य फलवत्त्वाद् विपर्यय उन्मादादिदोषप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ५३२ ) न पडिन्नविज्जा सयनासनाइं, सिज्जं निसिज्जं तह भत्तपानं ।*
*गामे कुले वा नगरे व देसे, ममत्तभावं न कहिंपि कुज्जा ॥*

वृ. किंच-'न प्रतिज्ञापयेत्' मासादिकल्पपरिसमाप्तौ गच्छन् भूयोऽप्यागतस्य ममैवैतानि दातव्यानीति न प्रतिज्ञां कारयेद्गृहस्थं, किमाश्रित्येत्याह-'शयनासने शय्यां निषद्यां तथा भक्तपान'मिति तत्र शयनं-संस्तारकादि आसनं-पीठकादि शय्या-वसतिः निषद्यास्वाध्यायादि-भूमिः 'तथा' तेन प्रकारेण तत्कालावस्थौचित्येन 'भक्तपानं' खण्डस्वाद्यकद्राक्षापानकादि न प्रतिज्ञापयेत्, ममत्वदोषात् । सर्वत्रैतन्निषेधमाह-'ग्रामे' शालिग्रामादै 'कुले वा' श्रावककुलादौ 'नगरे' साकेतादौ 'देशे वा' मध्यदेशादौ 'ममत्व भावं' ममेदमिति स्नेहमोहं न 'क्वचित्' उपकरणा-दिष्वपि कुर्यात्, तन्मूलत्वादुःखादीनामिति ॥

*मू. ( ५३३ ) गिहिणो वेआडिअं न कुज्जा, अभिवायणवंदनपूअणं वा ।*
*असंकिलिट्ठेहिं समं वसिज्जा, मुनी चरित्तस्स जओ न हानी ॥*

वृ. उपदेशाधिकारएवाह-'गृहिणो' गृहस्थस्य 'वैयावृत्त्यं' गृहिभावोपकाराय तत्कर्मस्वात्मनो व्यावृत्तभावं न कुर्यात्, स्वपरोभयाश्रेयःसमायोजनदोषात्, तथा अभिवादनं-वाङ्नमस्काररूपं वन्दनं-कायप्रणामलक्षणं पूजनं वा-वस्त्रादिभिः समभ्यर्चनं वा गृहिणो न कुर्याद्, उक्तदोष-प्रसङ्गादेव, तथैतद्दोषपरिहारायैव 'असंक्लिष्टैः' गृहिवैयावृत्त्यकरणसंक्लेशरहितैः साधुभिः समं वसेन्मुनिः 'चारित्रस्य' मूलगुणादिलक्षणस्य 'यतो' येभ्यः साधुभ्यः सकाशान्न हानिः, संवासतस्त-दकृत्यानुमोदनादिनेति, अनागतविषयं चेदं सूत्रं, प्रणयनकाले संक्लिष्टसाध्वभावादिति सूत्रार्थः ॥

*मू. ( ५३४ ) न या लभेज्जा निउणं सहायं, गुणाहिअं वा गुणओ समं वा ।*
*इक्कोऽवि पावाइं विवज्जयंतो, विहरिज्ज कामेसु असज्जमाणो ॥*

वृ. असंक्लिष्टैः समं वसेदित्युक्तमत्र विशेषमाह-कालदोषाद् 'न यदि लभेत' न यदि कथञ्चित् प्राप्नुयात् 'निपुणं' संयमानुष्ठानकुशलं 'सहायं' परलोकसाधनद्वितीयं, किंविशिष्टमित्याह-'गुणाधिकं वा' ज्ञानादिगुणोत्कटं वा, 'गुणतः समं वा' तृतीयार्थे पञ्चमी गुणैस्तुल्यं वा, वाशब्दा-द्धीनमपि जात्याकाञ्चनकल्पं विनीतं वा, ततः किमत्याह-एकोऽपि संहननादियुक्तः 'पापानि' पापकारणान्यसदनुष्ठानानि 'विवर्जयन्' विविध मनेकैः प्रकारैः सूत्रोक्तैः परिहरन् विहरेदु-चितविहारेण 'कामेषु' इच्छाकामादिषु 'असज्यमानः' सङ्गमगच्छन्नेकोऽपि विहरेत्, नतु पार्श्व-स्थादिपापमित्रसङ्गं कुर्यात्, तस्य दुष्टत्वात्, तथा चान्यैरप्युक्तम्-

"वरं विहर्तुं सह पन्नगैर्भवेच्छठात्माभिर्वा रिपुभिः सहोषितुम् ।
अधर्मयुक्तैश्चपलैरपण्डितैर्न पापमित्रैः सह वर्तितुं क्षमम् ॥
इहैव हन्युर्भुजगा हि रोषिताः, धृतासयश्छिद्रमवेक्ष्य चारयः ।
असत्प्रवृत्तेन जनेन संगतः, परत्र चैवेह च हन्यते जनः ॥

(तथा) परलोकविरुद्धानि, कुर्वाणां दूरतस्त्यजेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मानं योऽभिसंघत्ते, सोऽन्यस्मै स्यात्कथं हितः ? ॥

(तथा) ब्रह्महत्या सुरापानं, स्तेयं गुर्वङ्गनागमः ।

महान्ति पातकान्याहुरेभिश्च सह संगमम् ॥"

इत्यलं प्रसङ्गेनेति सूत्रार्थः ॥

*मू. ( ५३५ ) संवच्छरं वाऽवि परं पमाणं, बीअं च वासं न तहिं वसिज्जा।*

*सुत्तस्स मग्गेण चरिज्ज भिक्खू, सुत्तस्स अत्थो जह आणवेइ ॥*

**वृ.** विहारकालमानमाह-'संवत्सरं वापि' अत्र संवत्सरशब्देन वर्षासु चातुर्मासिको ज्येष्ठावग्रह उच्यते तमपि, अपिशब्दान्मासमपि, परं प्रमाणं-वर्षाऋतुबद्धयोरुत्कृष्टमेकत्र निवासकालमान-मेतत्, 'द्वितीयं च वर्षम्' चशब्दस्य व्यवहित उपन्यासः, द्वितीयं वर्षं वर्षासु चशब्दान्मासं च ऋतुबद्धे न तत्र क्षेत्रे वसेत् यतैको वर्षाकल्पो मासकल्पश्च कृतः अपितु सङ्गदोषाद् द्वितीयं तृतीयं च परिहृदय वर्षादिकालं ततस्तत्र वसेदित्यर्थः, सवर्था, किं बहुना ?, सर्वत्रेव 'सूत्रस्य मार्गेण चरेद्भिक्षुः' आगमादेशेन वर्त्तेतेति भावः, तत्रापि नौधत एव यथाश्रुतग्राही स्यात् अपि तु सूत्रस्य 'अर्थः' पूर्वापराविरोधितन्त्रयुक्तिघटितः पारमार्थिकोत्सर्गापवादगर्भो यथा 'आज्ञापयति' नियुंक्ते तथा वर्त्तेत, नान्यथा, यथेहापवादतो नित्यवासेऽपि वसतावेव प्रतिमासादि साधूनां संस्तार-गोचरादिपरिवर्त्तेन, नान्यथा, शुद्धापवादायोगादित्येवं वन्दनकप्रतिक्रमणादिष्वपि तदर्थं प्रत्यु-पेक्षणेनानुष्ठानेन वर्त्तेत, न तु तथाविधलोकहेर्या तं परित्यजेत् तदाशातनाप्रसङ्गादिति सूत्रार्थः ॥

*मू. ( ५३६ ) जो पुव्वरत्तावररत्तकाले, संपेहए अप्पगमप्पगेणं।*

*किं मे कडं किं च मे किच्चसेसं, किं सक्कणिज्जं न समायरामि ? ॥*

**वृ.** एवं विविक्तचर्यावतोऽसीदनगुणोपायमाह-यः साधुः पूर्वरात्रापररात्रकाले, रात्रौ प्रथमचरमयोः प्रहरयोरित्यर्थः, संप्रेक्षते सूत्रोपयोगनीत्वा आत्मानं कर्मभूतमात्मनैव करणभूतेन, कथमित्याह-किं मे कृत'मिति छान्दसत्वात्तृतीयार्थे षष्ठी, किं मया कृतं शक्त्यनुरूपं तपश्चरणा-दियोगस्य 'किं च माम कृत्यशेषं' कर्तव्यशेषमुचितं ?, किं शक्यं वयोऽवस्थानुरूपं वैयावृत्त्यादि 'न समाचरामि' न करोमि, तदकरणे हि तत्कालनाश इति सूत्रार्थः ॥

*मू. ( ५३७ ) किं मे परो पासइ किंच अप्पा, किं वाऽहं खलिअं न विवज्जयामि।*

*इच्चेव सम्मं अनुपासमाणो, अनागयं नो पडिबंध कुज्जा॥*

**वृ.** तथा किं मम स्खलितं 'परः' स्वपक्षपरपक्षलक्षणः पश्यति ? किं वाऽऽत्मा कचिन्म-नाक् संवेगापन्नः ?, किं वाऽहमोघत एव स्खलितं न विवर्जयामी, इत्येवं सम्यगनुपश्यन् अनेनैव प्रकारेण स्खलितं ज्ञात्वा 'सम्यग्' आगमोक्तेन विधिना भूयः पश्येत् 'अनागतं न प्रतिबन्धं कुर्यात्' आगमिकालविषयं नासंयमप्रतिबन्धं करोतीति सूत्रार्थः ॥

*मू. ( ५३८ ) जत्थेव पासे कइ दुप्पउत्तं, काएण वाया अदु मानसेणं।*

*तत्थेव धीरो पडिसाहरिज्जा, आइन्नओ खिप्पमिव क्खलीणं॥*

**वृ.** कथमित्याह- 'यत्रैव पश्येत्' यत्रैव पश्यत्युक्तवत्परात्मदर्शनद्वारेण 'क्वचित्' संयमस्थान-वसरे धर्मोपधिप्रत्युपेक्षणादौ 'दुष्प्रयुक्तं' दुर्व्यवस्थितमात्मानमिति गम्यते, केनेत्याहकायेन वाचा अथ मानसेनेति, मन एव मानसं, करणत्रयेणेत्यर्थः, 'तत्रैव' तस्मिन्नेव संयमस्थानावसरे 'धीरो'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धिमान् 'प्रतिसंहरेत्' प्रतिसंहरति य आत्मानं, सम्यग् विधिं प्रतिपद्यत इत्यर्थः, निदर्शनमाह-आकीर्णो जवादिभिर्गुणैः, जात्योऽश्व इति गम्यते असाधारणविशेषणात्, तच्चेदम्-'क्षिप्रमिव खलिनं' शीघ्रं कविकमिव, यथा जात्योऽश्वो नियमितगमननिमित्तं शीघ्रं खलिनं प्रतिपद्यते, एवं यो दुष्प्रयोगत्यागेन खलिनकल्पं सम्यग्विधिम्, एतावताऽशेन दृष्टान्त इति सूत्रार्थः ॥

*मू.(५३९) जस्सेरिसा जोग जिइंदिअस्स, धिईमओ सप्पुरिसस्स निच्चं।*
*तमाहु लोए पडिबुद्धजीवी, सो जीअई संजमजीविएणं ॥*

वृ.यः पूर्वरात्रेत्याद्यधिकारोपसंहारायाह-यस्य साधोः 'ईदृशाः' स्वहितालोचन-प्रवृत्तिरूपा 'योगा' मनोवाक्कायव्यापारा 'जितेन्द्रियस्य' वशीकृतस्पर्शनादीन्द्रियकलापस्य 'धृतिमतः' संयमे सधृतिकस्य 'सत्पुरुषस्य' प्रमादजयान्महापुरुषस्य 'नित्यं' सर्वकालं सामायिकप्रतिपत्तेरारभ्यामरणान्तम् 'तमाहुर्लोके प्रतिबुद्धजीविनं' तमेवंभूतं साधुमाहुःअभिदधति विद्वांसः लोकोप्राणिसंघाते प्रतिबुद्धजीविनं-प्रमादनिद्रारहितजीवनशीलं, 'स' एवंगुणयुक्तः सन् जीवति 'संयमजीवितेन' कुशलाभिसंधिभावात् सर्वथा संयमप्रधानेन जीवितेनेति सूत्रार्थः ॥

*मू.(५४०) अप्पा खलु सययं रक्खिअव्वो, सव्विंदिएहिं सुसमाहिएहिं।*
*अरक्खिओ जाइपहं उवेइ, सुरक्खिओ सव्वदुहाण मुच्चइ ॥ त्ति बेमि ॥*

वृ.शास्त्रमुपसंहरन्नुपदेशसर्वस्वमाह-'आत्मा खल्वि'ति खलुशब्दो विशेषणार्थः, शक्तौ सत्यां परोऽपि 'सततं' सर्वकालं 'रक्षितव्यः' पालनीयः पारलौकिकापायेभ्यः, कथमित्युपायमाह-'सर्वेन्द्रियैः' स्पर्शनादिभिः 'सुसमाहितेन' निवृत्तिविषयव्यापारेणेत्यर्थः, अरक्षणक्षणयोः फलमाह-अरक्षितः सन् 'जातिपन्थानं' जन्ममार्गं संसारमुपैति-सामीप्येन गच्छति। सुरक्षितः पुनर्यथागममप्रमादेन 'सर्वदुःखेभ्यः' शारीरमानसेभ्यो 'विमुच्यते' विविधम्-अनेकैः प्रकारैरपुनर्ग्रहणपरमस्वास्थ्यापादनलक्षणैर्मुच्यते। इती ब्रवीमीति पूर्ववदिति सूत्रार्थः ॥

चूलिका-२ समाप्तम्।

## उपसंहार

यं प्रतीत्य कृतं तद्वक्तव्यताशेषमाह-

नि.[३७१] छहिं मासेहिं अहीजं अज्झयणमिणं तु अज्जमणगेणं।
छम्मासा परिआओ अह कालगओ समाहीए ॥

वृ.षड्भिर्मासैः 'अधीतं' पठितम् 'अध्ययनमिदं तु' अधीयत इत्यध्ययनम्-इदमेव दशवैकालिकाख्यं शास्त्रं, केनाधीतमित्याह-आर्यमनकेन-भावाराधनयोगात् आराद्यातः सर्वहेयधर्मेभ्य इत्यार्यः आर्यश्चासौ मणकश्चेति विग्रहस्तेन, 'षण्मासाः पर्याय' इति तस्यार्यमणकस्य षण्मासा एव प्रव्रज्याकालः, अल्पजीवितत्वात्, अत एवाह-अथ 'कालगतः समाधिने'ति 'अथ' उक्तशास्त्राध्ययनपर्यायनन्तरं कालगत-आमगोक्तेन विधिना मृतः, समाधिना-शुभलेश्याध्यानयोगेनेति गाथार्थः ॥ अत्र चैवं वृद्धवादः-यथा तेनैतावता श्रुतेनाराधितम् एवमन्येऽप्येतदध्ययनानुष्ठानत आराधका भवन्त्विति ॥

नि.[३७२] आनंदअंसुपायं कासी सिज्जंभवा तहिं थेरा।
जसभद्दस्स य पुच्छा कहणा अ विआलणा संघे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'आनन्दाश्रुपातम्' अहो आराधितमनेनेति हर्षाश्रुमोक्षणम् 'अकार्षुः' कृतवन्तः 'शय्यम्भवाः' प्राग्व्यावर्णितस्वरूपाः 'तत्र' तस्मिन् कालगते 'स्थविराः' श्रुतपर्यायवृद्धाः प्रवचनगुरवः, पूजार्थं बहुवचनमिति, यशोभद्रस्य च-शय्यम्भवप्रधानशिष्यस्य गुर्वश्रुपातदर्शनेन किमेतदाश्चर्यमिति विस्मितस्य सतः पृच्छा-भगवन्! किमेतदकृतपूर्वमित्येवंभूता, कथना च भगवतः-संसारस्नेह ईदृशः, सुतो ममायमित्येवंरूपा, चशब्ददादनुतापश्च यशोभद्रादीनाम्-अहो गुराविव गुरुपुत्रके वर्त्तितव्यमिति न कृतमिदमस्माभिरिति, एवंभूतप्रतिबन्धदोषपरिहारार्थं न मया कथितं नात्र भवतां दोष इति गुरुपरिसंस्थापनं च। 'विचारणा संघ' इति शय्यम्भवेनाल्पायुषमेनमवेत्य मयेदं शास्त्रं निर्यूढं किमत्र युक्तमिति निवेदेति विचारणा संघे-कालह्रासदोषात् प्रभूतसत्त्वानामिदमेवोपकारकमतस्तिष्ठत्वेतदित्येवंभूता स्थापना चेति गाथार्थः॥

उक्तोऽनुगमः साम्प्रतं नयाः, ते च नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवम्भूतभेदभिन्नाः खल्वोघतः सप्त भवन्ति। स्वरूपं चैतेषामध आवश्यके सामायिकाध्ययने न्यक्षेण प्रदर्शितमेवेति नेह प्रतन्यते। इह पुनः स्थानाशून्यार्थमेते ज्ञानक्रियानयान्तर्भावद्वारेण समासतः प्रोच्यते-ज्ञाननयः क्रियानयश्च, तत्र ज्ञाननयदर्शनमिदम्-ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चाह-

"नायंमि गिण्हिअव्वे अगिण्हिअव्वंमि चेव अत्थम्मि।
जइअव्वमेव इह जो उवएसो सो नओ नाम॥"

'नायंमि'त्ति ज्ञाते सम्यक्परिच्छिन्ने 'गिण्हिअव्वे'त्ति ग्रहीतव्य उपादेये 'अगिण्हिअव्वे'त्ति अग्रहीतव्येऽनुपादेये हेय इत्यर्थः, चशब्दः खलूभयोर्ग्रहीतव्याग्रहीतव्ययोर्ज्ञातत्वानुकर्षणार्थ उपेक्षणीयसमुच्चयार्थो वा, एवकारस्त्ववधारणार्थः, तस्य चैवं व्यवहितः प्रयोगो दृष्टव्यः-ज्ञात एव ग्रहीतव्ये तथाऽग्रहीतव्ये तथोपेक्षणीये च ज्ञात एव नाज्ञाते 'अत्थम्मि'त्ति अर्थे ऐहिकामुष्मिके, तत्रैहिको ग्रहीतव्यः स्रक्चन्दनाङ्गनादिः अग्रहीतव्यो विषशस्त्रकण्टकादिः उपेक्षणीयस्तृणादिः, आमुष्मिको ग्रहीतव्यः सद्दर्शनादिरग्रहीत्वयो मिथ्यात्वादिरूपेक्षणीयो विवक्षया अभ्युदयारिति तस्मिन्नर्थे, 'यतितव्यमेवे'ति अनुस्वारलोपाद्यतितव्यय् 'एवम्' अनेन प्रकारेणैहिकामुष्मिकफलप्राप्तयर्थिना सत्त्वेन प्रवृत्त्यादिलक्षणः प्रयत्नः कार्य इत्यर्थः। इत्थं चैतदङ्गीकर्तव्यं, सम्यग्ज्ञाते प्रवर्त्तमानस्य फलाविसंवादर्शनात्, तथा चान्यैरप्युक्तम्-

"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता।
मिथ्याज्ञानात्प्रवृत्तस्य, फलप्राप्तेरसंभवात्॥"

तथाऽऽमुष्मिकफलप्राप्तयर्थिनाऽपि ज्ञान एव यतितव्यं, तथा चागमोऽप्येवमेव व्यस्थितः,

"पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए।
अन्नाणी किं काही, किंवा नाहीइ छेअपावगं?॥"

इतश्चैतदेवमङ्गीकर्तव्यं, यस्मात्तीर्थकरगणधरैरगीतार्थानां केवलानां विहारक्रियाऽपि निषिद्धा, तथा चागम-

"गीअत्थो अ विहारो बिइओ गीअत्थमीसिओ भणिओ।
एत्तो तइअविहारो नाणुण्णाओ जिणवरेहिं॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न यस्मादन्धेनान्धः समाकृष्यमाणः सम्यक्पन्थानं प्रतिपद्यत इत्यभिप्रायः। एवं तावत्क्षायोपशमिकं ज्ञानमधिकृत्योक्तं, क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव विज्ञेयं, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षाप्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न तावदपवर्गप्राप्तिर्जायते यावज्जीवाजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्नमिति, तस्माज्ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणमिति स्थितम्, 'इति जो उवएसो सो नओ नामं'ति 'इति' एवमुक्तेन न्यायेन य 'उपदेशो' ज्ञानप्राधान्यख्यापनपरः स नयो नाम, ज्ञाननय इत्यर्थः, अयं च ज्ञानवचनक्रियारूपेऽस्मिन्नध्ययने ज्ञानरूपमेवेदमिच्छति, ज्ञानात्मकत्वादस्य, वचनक्रिये तु तत्कार्यत्वात्तदायत्तत्वान्नेच्छति गुणभुते चेच्छतीति गाथार्थः॥

उक्तो ज्ञानमयः, अधुना क्रियानयावसरः, तद्दर्शनं चेदम्-क्रियैव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चायमप्युक्तलक्षणामेव स्वपक्षसिद्धये गाथामाह-'णायंमि गिण्हिअव्वे' इत्यादि, अस्याः क्रियानयदर्शनानुसारेण व्याख्या-ज्ञाते ग्रहीतव्ये अग्रहीतव्ये चैव अर्थे ऐहिकामुष्मिकफलप्राप्त्यर्थिना यतितव्यमेवेति, न यस्मात्प्रवृत्त्यादिलक्षणप्रयत्नव्यतिरेकेण ज्ञानवतोऽप्यभिलषितार्थावाप्तिदश्यते, तथा चान्यैरप्युक्तम्-

"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत्॥"

तथाऽऽमुष्मिकफलप्राप्त्यर्थिनाऽपि क्रियैव कर्तव्या, तथा च मौनीन्द्रवचनमप्येवमेव व्यवस्थितं, यत उक्तम्-

"चेइअकुलगणसंघे आयरिआणं च पवयणसुए अ।
सव्वेसुवि तेन कयं तवसंजममुज्जमंतेनं॥"

इतश्चैतदेवमङ्गीकर्तव्यं, यस्मात्तीर्थकरगणधरैः क्रियाविकलानां ज्ञानमपि विफलमेवोक्तं, तथा चागमः-

"सुबहुंपि सुअमहीअं किं काही चरणविप्पमुक्कस्य?।
अंधस्स जह पलित्ता दीवसय-सहस्सकोडीवि॥"

दर्शिक्रियाविकलत्वात्तस्येत्यभिप्रायः, एवं तावत्क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तं, चारित्रं क्रियेत्यनर्थान्तरं, क्षायिकमप्यङ्गीकृत्य प्रकृष्टफलसाधकत्वं तस्यैव विज्ञेयं, यस्मादर्हतोऽपि भगवतः समुत्पन्नकेवलस्थायिनी सर्वसंवररूपा चारित्रक्रिया नावाप्तेति, तस्मात्क्रियैव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणमिति स्थितम् 'इति जो उवएसो सो नओ नामं'ति इत्येवमुक्तेन न्यायेन य उपदेशः क्रियाप्राधान्यख्यापनपरः स नयो नाम, क्रियानय इत्यर्थः, अयं च ज्ञानवचनक्रियारूपेऽस्मिन्नध्ययने क्रियारूपमेवेदमिच्छति, तदात्मकत्वादस्य, ज्ञानवचने तु तदर्थमुपादीयमानत्वादप्रधानत्वान्नेच्छति गुणभूते चेच्छतीति गाथार्थः॥

उक्तः क्रियानयः, इत्थं ज्ञानक्रियानयस्वरूपं श्रुत्वाऽविदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह किमत्र तत्त्वम्?, पक्षद्वयेऽपि युक्तिसंभवात्, आचार्यः पुनराह-

"सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामेत्ता।
तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा ज्ञानक्रियानयमतं प्रत्येकभिधायाधुना स्थितपक्षमुपदर्शयन्नाह-'सव्वेसिं गाहा' 'सर्वेषामपि' मूलनयानाम्, अपिशब्दात्तद्भेदानां च 'नयानां' द्रव्यास्तिकादीनां 'बहुविधवक्तव्यतां' सामान्यमेव विशेषा एव उभयमेव वाऽनपेक्षमित्यादिरूपाम् अथवा नामादीनां नयानां कः कं साधुमिच्छतीत्यादिरूपां 'निशम्य' श्रुत्वा तत् 'सर्वनयविशुद्धं' सर्वनयसंमतं वचनं यच्चरणगुणस्थितः साधुः, यस्मात्सर्वनया एव भावविषयं निक्षेपमिच्छन्तीति गाथार्थः ॥

महत्तराया याकिन्या, धर्मपुत्रेण चिन्तिता।
आचार्यहरिभद्रेण, टीकेयं शिष्यबोधिनी ॥१॥
दशवैकालिके टीकां विधाय यत्पुण्यमर्जितं तेन।
मात्सर्यदुःखविरहाद्गुणानुरागी भवतु लोकः ॥२॥

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता दशवैकालिकसूत्रस्य**
**भद्रबाहुस्वामि विरचिता निर्युक्तिः एवं हरिभद्रसूरि विरचिता टीका परिसमाप्ता**

| ४२ | तृतीयं मूलसूत्रं दसवैकालिकं-समाप्तं |
|---|---|

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

| | | | |
|---|---|---|---|
| પંચમ ગણધર શ્રી સુધર્મા સ્વામી | | ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી | |
| દશ પૂર્વધર શ્રી શય્યંભવસૂરિ | | (અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ | |
| દેવવાચક ગણિ | | શ્રી શ્યામાચાર્ય | |
| દેવર્દ્ધિગણિ ક્ષમાશ્રમણ | | જિનભદ્ર ગણિ ક્ષમાશ્રમણ | |
| સંઘદાસગણિ | | સિદ્ધસેન ગણિ | |
| જિનદાસ ગણિ મહત્તર | | અગત્સ્યસિંહ સૂરિ | |
| શીલાંકાચાર્ય | | અભયદેવસૂરિ | |
| મલયગિરિસૂરિ | | ક્ષેમકીર્તિસૂરિ | |
| હરિભદ્રસૂરિ | | આર્યરક્ષિત સૂરિ (?) | |
| દ્રોણાચાર્ય | | ચંદ્ર સૂરિ | |
| વાદિવેતાલ શાંતિચંદ્ર સૂરિ | | મલ્લધારી હેમચંદ્રસૂરિ | |
| શાંતિચંદ્ર ઉપાધ્યાય | | ધર્મસાગર ઉપાધ્યાય | |
| ગુણરત્નસૂરી | | વિજય વિમલગણિ | |
| વીરભદ્ર | ઋષિપાલ | બ્રહ્મમુનિ | તિલકસૂરિ |
| સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી | | | |

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

| | | |
|---|---|---|
| આનંદ સાગરસૂરિજી | ચંદ્રસાગર સૂરિજી | મુનિ માણેક |
| જિન વિજયજી | પુન્યવિજયજી | ચતુરવિજયજી |
| જંબુ વિજયજી | અમરમુનિજી | કનૈયાલાલજી |
| લાભસાગરસુરિજી | આચાર્ય તુલસી | ચંપક સાગરજી |

## સ્મરણાંજલિ

| | | |
|---|---|---|
| બાબુ ધનપતસિંહ | પં૦ બેચરદાસ | પં૦ જીવરાજભાઈ |
| પં૦ ભગવાનદાસ | પં૦ રૂપેન્દ્રકુમાર | પં૦ હીરાલાલ |
| શ્રુત પ્રકાશક સર્વે સંસ્થાઓ | | |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

| क्रम | आगमसूत्रनाम | मूल श्लोक प्रमाण | वृत्ति-कर्ता | वृत्ति श्लोकप्रमाण |
|---|---|---|---|---|
| १. | आचार | २५५४ | शीलाङ्काचार्य | १२००० |
| २. | सूत्रकृत | २१०० | शीलाङ्काचार्य | १२८५० |
| ३. | स्थान | ३७०० | अभदेवसूरि | १४२५० |
| ४. | समवाय | १६६७ | अभयदेवसूरि | ३५७५ |
| ५. | भगवती | १५७५१ | अभयदेवसूरि | १८६१६ |
| ६. | ज्ञाताधर्मकथा | ५४५० | अभयदेवसूरि | ३८०० |
| ७. | उपासकदशा | ८१२ | अभयदेवसूरि | ८०० |
| ८. | अन्तकृद्दशा | ९०० | अभयदेवसूरि | ४०० |
| ९. | अनुत्तरोपपातिकदशा | १९२ | अभयदेवसूरि | १०० |
| १०. | प्रश्नव्याकरण | १३०० | अभयदेवसूरि | ५६३० |
| ११. | विपाकश्रुत | १२५० | अभयदेवसूरि | ९०० |
| १२. | औपपातिक | ११६७ | अभयदेवसूरि | ३१२५ |
| १३. | राजप्रश्निय | २१२० | मलयगिरिसूरि | ३७०० |
| १४. | जीवाजीवाभिगम | ४७०० | मलयगिरिसूरि | १४००० |
| १५. | प्रज्ञापना | ७७८७ | मलयगिरिसूरि | १६००० |
| १६. | सूर्यप्रज्ञप्ति | २२९६ | मलयगिरिसूरि | ९००० |
| १७. | चन्द्रप्रज्ञप्ति | २३०० | मलयगिरिसूरि | ९१०० |
| १८. | जम्बूद्वीपप्रज्ञप्ति | ४४५४ | शान्तिचन्द्रउपाध्याय | १८००० |
| १९थी | निरयावलिका | ११०० | चन्द्रसूरि | ६०० |
| २३. | (पञ्च उपाङ्ग) | – | – | – |
| २४. | चतुःशरण | ८० | विजयविमलयगणि | (?) २०० |
| २५. | आतुर प्रत्याख्यान | १०० | गुणरत्नसूरि (अवचूरि) | (?) १५० |
| २६. | महाप्रत्याख्यान | १७६ | आनन्दसागरसूरि (संस्कृतछाया) | १७६ |
| २७. | भक्तपरिज्ञा | २१५ | आनन्दसागरसूरि (संस्कृतछाया) | २१५ |
| २८. | तन्दुल वैचारिक | ५०० | विजयविमलगणि | (?) ५०० |
| २९. | संस्तारक | १५५ | गुणरत्न सूरि (अवचूरि) | ११० |
| ३०. | गच्छाचार★ | १७५ | विजयविमलगणि | १५६० |
| ३१. | गणिविद्या | १०५ | आनन्दसागरसूरि (संस्कृतछाया) | १०५ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| क्रम | आगमसूत्रनाम | • मूल श्लोक प्रमाण | वृत्ति-कर्ता | • वृत्ति श्लोकप्रमाण |
|---|---|---|---|---|
| ३२. | देवेन्द्रस्तव | ३७५ | आनन्दसागरसूरि (संस्कृत छाया) | ३७५ |
| ३३. | मरणसमाधि ★ | ८३७ | आनन्दसागरसूरि (संस्कृत छाया) | ८३७ |
| ३४. | निशीथ | ८२१ | जिनदासगणि (चूर्णि)<br>सङ्घदासगणि (भाष्य) | २८०००<br>७५०० |
| ३५. | बृहत्कल्प | ४७३ | मलयगिरि+क्षेमकीर्ति<br>सङ्घदासगणि (भाष्य) | ४२६००<br>७६०० |
| ३६. | व्यवहार | ३७३ | मलयगिरि<br>सङ्घदासगणि (भाष्य) | ३४०००<br>६४०० |
| ३७. | दशाश्रुतस्कन्ध | ८९६ | - ? - (चूर्णि) | २२२५ |
| ३८. | जीतकल्प ★ | १३० | सिद्धसेनगणि (चूर्णि) | १००० |
| ३९. | महानिशीथ | ४५४८ | — | — |
| ४०. | आवश्यक | १३० | हरिभद्रसूरि | २२००० |
| ४१.<br>- | ओघनिर्युक्ति<br>पिण्डनिर्युक्ति ★ | नि.१३५५<br>नि. ८३५ | द्रोणाचार्य<br>मलयगिरिसूरि | (?)७५००<br>७००० |
| ४२. | दशवैकालिक | ८३५ | हरिभद्रसूरि | ७००० |
| ४३. | उत्तराध्ययन | २००० | शांतिसूरि | १६००० |
| ४४. | नन्दी | ७०० | मलयगिरिसूरि | ७७३२ |
| ४५. | अनुयोगद्वार | २००० | मलधारीहेमचन्द्रसूरि | ५९०० |

## નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ અંગસૂત્રો, ૧૨ થી ૨૩ ઉપાંગસૂત્રો, ૨૪થી૩૩ પ્રકીર્ણકસૂત્રો ૩૪થી ૩૯ છેદસૂત્રો, ૪૦ થી ૪૩ મૂળસૂત્રો, ૪૪-૪૫ ચૂલિકાસૂત્રોના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત વૃત્તિ-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ વૃત્તિ-ચૂર્ણિ આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) ગચ્છાચાર અને મરણસમાધિ ના વિકલ્પે ચંદાવેજ્ઝય અને વીરસ્તવ પ્રકીર્ણક આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ જીતકલ્પ જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे ''आगमसुत्ताणि''मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड ए बंने निर्युक्ति विकल्पे छे. जे हाल मूळसूत्र रूपे प्रसिध्ध छे. जे बंनेनी वृत्ति अमे आपी छे. तेमज तेमां भाष्यनी गाथाओ पण समाविष्ट थई छे.

(६) चार प्रकीर्णक सूत्रो अने महानिशीथ ए पांच आगमनी कोई वृत्ति आदि उपलब्ध थवानो उल्लेख मळतो नथी. प्रकीर्णक नी संस्कृत छाया उपलब्ध छे तेथी मूकी छे. निशीथ-दशा-जितकल्प ए त्रणेनी चूर्णि आपी छे. जेमां दशा अने जीतकल्प ए बंने उपरवृत्ति मळती होवानो उल्लेख छे, पण अमे ते मेळवी शक्या नथी. ज्यारे निशीथ उपर तो मात्र वीसमा उद्देशकःनी ज वृत्ति नो उल्लेख मळे छे.

## ➡ वर्तमान काळे ४५ आगममां उपलब्ध निर्युक्तिः ⬅

| क्रम | निर्युक्ति | श्लोकप्रमाण | क्रम | निर्युक्ति | श्लोकप्रमाण |
|---|---|---|---|---|---|
| १. | आचार-निर्युक्ति | ४५० | ६. | आवश्यक–निर्युक्ति | २५०० |
| २. | सूत्रकृत-निर्युक्ति | २६५ | ७. | ओघनिर्युक्ति | १३५५ |
| ३. | बृहत्कल्प-निर्युक्ति ★ | – | ८. | पिण्डनिर्युक्ति | ८३५ |
| ४. | व्यवहार-निर्युक्ति ★ | – | ९. | दशवैकालिक-निर्युक्ति | ५०० |
| ५. | दशाश्रुत०-निर्युक्ति | १८० | १०. | उत्तराध्ययन-निर्युक्ति | ७०० |

## नोंध :-

(१) अहीं आपेल श्लोक प्रमाण ए गाथा संख्या नथी. ''३२ अक्षरनो एक श्लोक'' ए प्रमाणथी नोंधायेल श्लोक प्रमाण छे.

(२) ★ बृहत्कल्प अने व्यवहार ए बंने सूत्रोनी निर्युक्ति हाल भाष्य मां भळी गई छे. जेनो यथासंभव उल्लेख वृत्तिकार महर्षि ए भाष्य उपरनी वृत्तिमां कर्यो होय तेवुं जोवा मळेल छे.

(३) ओघ अने पिण्ड निर्युक्ति स्वतंत्र मूलआगम स्वरूपे स्थान पामेल छे तेथी तेनुं स्वतंत्र संपादन आगम-४१ रूपे थयेल छे. (तेमज आ संपादनमां पण छे.)

(४) बाकीनी छ निर्युक्तिमांथी दशाश्रुतस्कन्ध निर्युक्ति उपर चूर्णि अने अन्य पांच निर्युक्ति उपरनी वृत्ति अमे अमारा संपादनमां प्रकाशीत करी छे. ज्यां आ छ निर्युक्ति स्पष्ट अलग जोई शकाय छे.

(५) निर्युक्तिकर्ता तरीके भद्रबाहुस्वामी नो उल्लेख ज जोवा मळे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

| क्रम | भाष्य | श्लोकप्रमाण | क्रम | भाष्य | गाथाप्रमाण |
|---|---|---|---|---|---|
| १. | निशीषभाष्य | ७५०० | ६. | आवश्यकभाष्य ★ | ४८३ |
| २. | बृहत्कल्पभाष्य | ७६०० | ७. | ओघनिर्युक्तिभाष्य ★ | ३२२ |
| ३. | व्यवहारभाष्य | ६४०० | ८. | पिण्डनिर्युक्तिभाष्य ★ | ४६ |
| ४. | पञ्चकल्पभाष्य | ३१८५ | ९. | दशवैकालिकभाष्य ★ | ६३ |
| ५. | जीतकल्पभाष्य | ३१२५ | १०. | उत्तराध्ययनभाष्य (?) | – |

### નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા મૂળભાષ્ય રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ३५ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે भाष्यगाथा જોવા મળે છે.

(૭) ભાષ્યકર્તા તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ चूर्णि:

| क्रम | चूर्णि | श्लोकप्रमाण | क्रम | चूर्णि | श्लोकप्रमाण |
|---|---|---|---|---|---|
| १. | आचार-चूर्णि | ८३०० | ९. | दशाश्रुतस्कन्धचूर्णि | २२२५ |
| २. | सूत्रकृत-चूर्णि | ९९०० | १०. | पञ्चकल्पचूर्णि | ३२७५ |
| ३. | भगवती-चूर्णि | ३११४ | ११. | जीतकल्पचूर्णि | १००० |
| ४. | जीवाभिगम-चूर्णि | १५०० | १२. | आवश्यकचूर्णि | १८५०० |
| ५. | जंबूद्वीपप्रज्ञप्ति-चूर्णि | १८७९ | १३. | दशवैकालिकचूर्णि | ७००० |
| ६. | निशीथचूर्णि | २८००० | १४. | उत्तराध्ययनचूर्णि | ५८५० |
| ७. | बृहत्कल्पचूर्णि | १६००० | १५. | नन्दीचूर्णि | १५०० |
| ८. | व्यवहारचूर्णि | १२०० | १६. | अनुयोगदारचूर्णि | २२६५ |

### નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिमांथी निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार तरीके जिनदासगणिमहत्तरनुं નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

### "આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"

૧ *વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત પંચાંગી એક માત્ર आवश्यक સૂત્રની ગણાય.*

૨ *नंदीसूत्र માં પંચાંગીને બદલે संग्रहणी, प्रतिपत्ति ઓ વગેરેના પણ ઉલ્લેખ છે.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धનો છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક मूलનો છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા શ્રુતસ્કન્ધ માં જ છે.

(૨) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(૩) **स्थान** - स्थानं/अध्ययनं/मूलं

(૪) **समवाय** - समवायः/मूलं

(૫) **भगवती** - शतकं/वर्ग्गः-अंतरशतकं/उद्देशकः/मूलं
અહીં शतकના પેટા વિભાગમાં બે નામો છે. (૧) वर्ग्गः (૨) अंतर्शतक કેમકે शतक ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ वर्ग्गः જ જણાવેલ છે. शतक - ૩૩,૩૪,૩૫,૩૬,૪૦ ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(૬) **ज्ञाताधर्मकथा-** श्रुतस्कन्धः/वर्ग्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग નામે છે અને તે वर्ग ના પેટા વિભાગમાં अध्ययन છે.

(૭) **उपासकदशा-** अध्ययनं/मूलं

(૮) **अन्तकृद्दशा-** वर्ग्गः/अध्ययनं/मूलं

(૯) **अनुत्तरोपपातिकदशा-** वर्ग्गः/अध्ययनं/मूलं

(૧૦) **प्रश्नव्याकरण-** द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(૧૧) **विपाकश्रुत-** श्रुतस्कन्धः/अध्ययनं/मूलं

(૧૨) **औपपातिक-** मूलं

(૧૩) **राजप्रश्नीय-** मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(૧૪) **जीवाजीवाभिगम-** *प्रतिपत्तिः/* उद्देशकः/मूलं

આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(૧૫) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं

પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(૧૬) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(૧૭) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(૧૮) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(૧૯) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं

આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशेपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

| क्रम | आगमसूत्र | मूलं | गाथा | क्रम | आगमसूत्र | मूलं | गाथा |
|---|---|---|---|---|---|---|---|
| १. | आचार | ५५२ | १४७ | २४. | चतुःशरण | ६३ | ६३ |
| २. | सूत्रकृत | ८०६ | ७२३ | २५. | आतुरप्रत्याख्यान | ७१ | ७० |
| ३. | स्थान | १०१० | १६९ | २६. | महाप्रत्याख्यानं | १४२ | १४२ |
| ४. | समवाय | ३८३ | ९३ | २७. | भक्तपरिज्ञा | १७२ | १७२ |
| ५. | भगवती | १०८७ | ११४ | २८. | तंदुलवैचारिक | १६१ | १३९ |
| ६. | ज्ञाताधर्मकथा | २४१ | ५७ | २९. | संस्तारक | १३३ | १३३ |
| ७. | उपासक दशा | ७३ | १३ | ३०. | गच्छाचार | १३७ | १३७ |
| ८. | अन्तकृद्दशा | ६२ | १२ | ३१. | गणिविद्या | ८२ | ८२ |
| ९. | अनुत्तरोपपातिक | १३ | ४ | ३२. | देवेन्द्रस्तव | ३०७ | ३०७ |
| १०. | प्रश्नव्याकरण | ४७ | १४ | ३३. | मरणसमाधि | ६६४ | ६६४ |
| ११. | विपाकश्रुत | ४७ | ३ | ३४. | निशीष | १४२० | – |
| १२. | औपपातिक | ७७ | ३० | ३५. | बृहत्कल्प | २१५ | – |
| १३. | राजप्रश्निय | ८५ | – | ३६. | व्यवहार | २८५ | – |
| १४. | जीवाभिगम | ३९८ | ९३ | ३७. | दशाश्रुतस्कन्ध | ११४ | ५६ |
| १५. | प्रज्ञापना | ६२२ | २३१ | ३८. | जीतकल्प | १०३ | १०३ |
| १६. | सूर्यप्रज्ञप्ति | २१४ | १०३ | ३९. | महानिशीथ | १५२८ | ८ |
| १७. | चन्द्रप्रज्ञप्ति | २१८ | १०७ | ४०. | आवश्यक | ९२ | २१ |
| १८. | जम्बूदीपप्रज्ञप्ति | ३६५ | १३१ | ४१. | ओघनिर्युक्ति | ११६५ | ११६५ |
| १९. | निरयावलिका | २१ | – | ४१. | पिण्डनिर्युक्ति | ७१२ | ७१२ |
| २०. | कल्पवतंसिका | ५ | १ | ४२. | दशवैकालिक | ५४० | ५१५ |
| २१. | पुष्पिता | ११ | २ | ४३. | उत्तराध्ययन | १७३१ | १६४० |
| २२. | पुष्पचूलिका | ३ | १ | ४४. | नन्दी | १६८ | ९३ |
| २३. | वण्हिदशा | ५ | १ | ४५. | अनुयोगद्वार | ३५० | १४१ |

નોંધ :- ઉક્ત ગાથા સંખ્યાનો સમાવેશ મૂલં માં થઈ જ જાય છે. તે મૂલ સિવાયની અલગ ગાથા સમજવી નહીં. મૂલ શબ્દ એ અમો સૂત્ર અને ગાથા બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. ગાથા બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: અમારા પ્રકાશનો :–

[१] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[५] कृदन्तमाला
[६] चैत्यवन्दन पर्वमाला
[७] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[८] चैत्यवन्दन चोविशी
[९] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[१०] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ – ૧- શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ – ૨- શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ – ૩- શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય – આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો – [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૧૦

**પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

| | | | |
|---|---|---|---|
| [४२] | आयारो | [आगमसुत्ताणि-१] | पढमं अंगसुत्तं |
| [४३] | सूयगडो | [आगमसुत्ताणि-२] | बीअं अंगसुत्तं |
| [४४] | ठाणं | [आगमसुत्ताणि-३] | तइयं अंगसुत्तं |
| [४५] | समवाओ | [आगमसुत्ताणि-४] | चउत्थं अंगसुत्तं |
| [४६] | विवाहपन्नति | [आगमसुत्ताणि-५] | पंचमं अंगसुत्तं |
| [४७] | नायाधम्मकहाओ | [आगमसुत्ताणि-६] | छठ्ठं अंगसुत्तं |
| [४८] | उवासगदसाओ | [आगमसुत्ताणि-७] | सत्तमं अंगसुत्तं |
| [४९] | अंतगडदसाओ | [आगमसुत्ताणि-८] | अट्ठमं अंगसुत्तं |
| [५०] | अनुत्तोववाइयदसाओ | [आगमसुत्ताणि-९] | नवमं अंगसुत्तं |
| [५१] | पण्हावागरणं | [आगमसुत्ताणि-१० ] | दसमं अंगसुत्तं |
| [५२] | विवागसूयं | [आगमसुत्ताणि-११ ] | एक्कारसमं अंगसुत्तं |
| [५३] | उववाइयं | [आगमसुत्ताणि-१२ ] | पढमं उवंगसुत्तं |
| [५४] | रायप्पसेणियं | [आगमसुत्ताणि-१३ ] | बीअं उवंगसुत्तं |
| [५५] | जीवाजीवाभिगमं | [आगमसुत्ताणि-१४ ] | तइयं उवंगसुत्तं |
| [५६] | पन्नवणासुत्तं | [आगमसुत्ताणि-१५ ] | चउत्थं उवंगसुत्तं |
| [५७] | सूरपन्नतिः | [आगमसुत्ताणि-१६ ] | पंचमं उवंगसुत्तं |
| [५८] | चंदपन्नत्तिः | [आगमसुत्ताणि-१७ ] | छठ्ठं उवंगसुत्तं |
| [५९] | जंबूद्दीवपन्नति | [आगमसुत्ताणि-१८ ] | सत्तमं उवंगसुत्तं |
| [६०] | निरयावलियाणं | [आगमसुत्ताणि-१९ ] | अठ्ठमं उवंगसुत्तं |
| [६१] | कप्पवडिंसियाणं | [आगमसुत्ताणि-२० ] | नवमं उवंगसुत्तं |
| [६२] | पुप्फियाणं | [आगमसुत्ताणि-२१ ] | दसमं उवंगसुत्तं |
| [६३] | पुप्फचूलियाणं | [आगमसुत्ताणि-२२ ] | एक्कारसमं उवंगसुत्तं |
| [६४] | वण्हिदसाणं | [आगमसुत्ताणि-२३ ] | बारसमं उवंगसुत्तं |
| [६५] | चउसरणं | [आगमसुत्ताणि-२४ ] | पढमं पईण्णगं |
| [६६] | आउरपच्चक्खाणं | [आगमसुत्ताणि-२५ ] | बीअं पईण्णगं |
| [६७] | महापच्चक्खाणं | [आगमसुत्ताणि-२६ ] | तीइयं पईण्णगं |
| [६८] | भत्तपरिण्णा | [आगमसुत्ताणि-२७ ] | चउत्थं पईण्णगं |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| [६९] | तंदुलवेयालियं | [आगमसुत्ताणि-२८ ] | पंचमं पईण्णगं |
| [७०] | संथारगं | [आगमसुत्ताणि-२९ ] | छठ्ठं पईण्णगं |
| [७१] | गच्छायार | [आगमसुत्ताणि-३०/१ ] | सत्तमं पईण्णगं-१ |
| [७२] | चंदावेज्झयं | [आगमसुत्ताणि-३०/२ ] | सत्तमं पईण्णगं-२ |
| [७३] | गणिविज्जा | [आगमसुत्ताणि-३१ ] | अट्ठमं पईण्णगं |
| [७४] | देविंदत्थओ | [आगमसुत्ताणि-३२ ] | नवमं पईण्णगं |
| [७५] | मरणसमाहि | [आगमसुत्ताणि-३३/१ ] | दसमं पईण्णगं-१ |
| [७६] | वीरत्थव | [आगमसुत्ताणि-३३/२ ] | दसमं पईण्णगं-२ |
| [७७] | निसीह | [आगमसुत्ताणि-३४ ] | पढमं छेयसुत्तं |
| [७८] | बुहत्कप्पो | [आगमसुत्ताणि-३५ ] | बीअं छेयसुत्तं |
| [७९] | ववहार | [आगमसुत्ताणि-३६ ] | तइयं छेयसुत्तं |
| [८०] | दसासुयक्खंधं | [आगमसुत्ताणि-३७ ] | चउत्थं छेयसुत्तं |
| [८१] | जीयकप्पो | [आगमसुत्ताणि-३८/१ ] | पंचमं छेयसुत्तं-१ |
| [८२] | पंचकप्पभास | [आगमसुत्ताणि-३८/२ ] | पंचमं छेयसुत्तं-२ |
| [८३] | महानिसीहं | [आगमसुत्ताणि-३९ ] | छठ्ठं छेयसुत्तं |
| [८४] | आवसस्सयं | [आगमसुत्ताणि-४० ] | पढमं मूलसुत्तं |
| [८५] | ओहनिज्जुत्ति | [आगमसुत्ताणि-४१/१ ] | बीअं मूलसुत्तं-१ |
| [८६] | पिंडनिज्जुत्ति | [आगमसुत्ताणि-४१/२ ] | बीअं मूलसुत्तं-२ |
| [८७] | दसवेयालियं | [आगमसुत्ताणि-४२ ] | तइयं मुलसुत्तं |
| [८८] | उतरज्झयणं | [आगमसुत्ताणि-४३ ] | चउत्थं मूलसुत्तं |
| [८९] | नंदीसूयं | [आगमसुत्ताणि-४४ ] | पढमा चूलिया |
| [९०] | अनुओगदारं | [आगमसुत्ताणि-४५ ] | बितिया चूलिया |

**પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

| | | | | |
|---|---|---|---|---|
| [૯૧] | આયાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | પહેલું અંગસૂત્ર |
| [૯૨] | સૂયગડ - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | બીજું અંગસૂત્ર |
| [૯૩] | ઠાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | ત્રીજું અંગસૂત્ર |
| [૯૪] | સમવાય - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | ચોથું અંગસૂત્ર |
| [૯૫] | વિવાહપન્નત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૨] | પાંચમું અંગસૂત્ર |
| [૯૬] | નાયાધમ્મકહા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | છઠ્ઠું અંગસૂત્ર |
| [૯૭] | ઉવાસગદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | સાતમું અંગસૂત્ર |
| [૯૮] | અંતગડદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | આઠમું અંગસૂત્ર |
| [૯૯] | અનુત્તરોપપાતિકદસા- | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | નવમું અંગસૂત્ર |
| [૧૦૦] | પણ્હાવાગરણ- | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | દશમું અંગસૂત્ર |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| [૧૦૧] વિવાગસૂય - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | અગિયારમું અંગસૂત્ર |
| [૧૦૨] ઉવવાઇય | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | પહેલું ઉપાંગસૂત્ર |
| [૧૦૩] રાયપ્પસેણિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | બીજું ઉપાંગસૂત્ર |
| [૧૦૪] જીવાજીવાભિગમ - | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | ત્રીજું ઉપાંગસૂત્ર |
| [૧૦૫] પન્નવણાસુત્ત | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | ચોથું ઉપાંગસૂત્ર |
| [૧૦૬] સૂરપન્નત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | પાચમું ઉપાંગસૂત્ર |
| [૧૦૭] ચંદપન્નતિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | છઠ્ઠું ઉપાંગસૂત્ર |
| [૧૦૮] જંબુદ્દીવપન્નતિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | સાતમું ઉપાંગસૂત્ર |
| [૧૦૯] નિરયાવલિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | આઠમું ઉપાંગસૂત્ર |
| [૧૧૦] કપ્પવડિંસિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | નવમું ઉપાંગસૂત્ર |
| [૧૧૧] પુપ્ફિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | દશમું ઉપાંગસૂત્ર |
| [૧૧૨] પુપ્ફચૂલિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | અગિયારમું ઉપાંગસૂત્ર |
| [૧૧૩] વણ્હિદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | બારમું ઉપાંગસૂત્ર |
| [૧૧૪] ચઉસરણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પહેલો પયન્નો |
| [૧૧૫] આઉરપ્પચ્ચક્ખાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | બીજો પયન્નો |
| [૧૧૬] મહાપચ્ચક્ખાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ત્રીજો પયન્નો |
| [૧૧૭] ભત્તપરિણ્ણા - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ચોથો પયન્નો |
| [૧૧૮] તંદુલવેયાલિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પાંચમો પયન્નો |
| [૧૧૯] સંથારગ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | છઠ્ઠો પયન્નો |
| [૧૨૦] ગચ્છાયાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | સાતમો પયન્નો-૧ |
| [૧૨૧] ચંદાવેજ્ઝય - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | સાતમો પયન્નો-૨ |
| [૧૨૨] ગણિવિજ્જા - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | આઠમો પયન્નો |
| [૧૨૩] દેવિંદત્થઓ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | નવમો પયન્નો |
| [૧૨૪] વીરત્થવ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | દશમો પયન્નો |
| [૧૨૫] નિસીહ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પહેલું છેદસૂત્ર |
| [૧૨૬] બુહત્કપ્પ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | બીજું છેદસૂત્ર |
| [૧૨૭] વવહાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ત્રીજું છેદસૂત્ર |
| [૧૨૮] દસાસુયક્ખંધ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ચોથું છેદસૂત્ર |
| [૧૨૯] જીયકપ્પો - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પાંચમું છેદસૂત્ર |
| [૧૩૦] મહાનિસીહ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | છઠ્ઠું છેદસૂત્ર |
| [૧૩૧] આવસ્સય - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | પહેલું મૂલસુત્ર |
| [૧૩૨] ઓહનિજ્જુત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | બીજું મૂલસુત્ર-૧ |
| [૧૩૩] પિંડનિજ્જુત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | બીજું મૂલસુત્ર-૨ |
| [૧૩૪] દસવેયાલિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | ત્રીજું મુલસૂત્ર |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર
[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા
[૧૩૭] અનુયોગદ્વાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

**પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.**

[૧૩૮] દીક્ષા યોગાદિ વિધિ
[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ
[१४०] आचाराङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१
[१४१] सूत्रकृताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-२
[१४२] स्थानाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-३
[१४३] समवायाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-४
[१४४] भगवतीअङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-५/६
[१४५] ज्ञाताधर्मकथाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४६] उपासकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४७] अन्तकृद्दशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४८] अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४९] प्रश्नव्याकरणाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१५०] विपाकश्रुताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५१] औपपातिकउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५२] राजप्रश्नियउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५३] जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-९
[१५४] प्रज्ञापनाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१०/११
[१५५] सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५६] चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५७] जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१३
[१५८] निरयावलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१५९] कल्पवतंसिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६०] पुष्पिताउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६१] पुष्पचूलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६२] वण्हिदसाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६३] चतुःशरणप्रकीर्णकसूत्र सटीकं आगमसुत्ताणि सटीकं-१४
[१६४] आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६५] महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६६] भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१६७] | तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६८] | संस्तारकप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१६९] | गच्छाचारप्रकीर्णकसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१७०] | गणिविद्याप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७१] | देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७२] | मरणसमाधिप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७३] | निशीथछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१५-१६-१७ |
| [१७४] | बृहत्कल्पछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१८-१९-२० |
| [१७५] | व्यवहारछेदसूत्रं सटीकं | आगगम सुत्ताणि सटीकं-२१-२२ |
| [१७६] | दशाश्रुतस्कन्धछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२३ |
| [१७७] | जीतकल्पछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२३ |
| [१७८] | महानिशीथसूत्रं (मूलं) | आगमसुत्ताणि सटीकं-२३ |
| [१७९] | आवश्यकमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२४-२५ |
| [१८०] | ओघनिर्युक्तिमूलसूत्रं सटीकं | आगम सुत्तमि सटीकं-२६ |
| [१८१] | पिण्डनिर्युक्तिमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२६ |
| [१८२] | दशवैकालिकमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२७ |
| [१८३] | उत्तराध्ययनमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२८-२९ |
| [१८४] | नन्दी-चूलिकासूत्रं सटीकं | आगमसुत्ताणि सटीकं-३० |
| [१८५] | अनुयोगद्वारचूलिकासूत्रं सटीकं | आगमसुत्ताणि सटीकं-३० |

**પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

—: સંપર્ક સ્થળ :—

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, વ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## "आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

| आगमसुत्ताणि | समाविष्टाआगमाः |
|---|---|
| भाग-१ | आयार |
| भाग-२ | सूत्रकृत |
| भाग-३ | स्थान |
| भाग-४ | समवाय |
| भाग-५-६ | भगवती (अपरनाम व्याख्याप्रज्ञप्ति) |
| भाग-७ | ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण |
| भाग-८ | विपाकश्रुत, औपपातिक, राजप्रश्निय |
| भाग-९ | जीवाजीवाभिगम |
| भाग-१०-११ | प्रज्ञापना |
| भाग-१२ | सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति |
| भाग-१३ | जम्बूद्वीपप्रज्ञप्ति |
| भाग-१४ | निरवायलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि |
| भाग-१५-१६-१७ | नीशीथ |
| भाग-१८-१९-२० | बृहत्कल्प |
| भाग-२१-२२ | व्यवहार |
| भाग-२३ | दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ |
| भाग-२४-२५ | आवश्यक |
| भाग-२६ | ओघनिर्युक्ति, पिण्डनिर्युक्ति |
| भाग-२७ | दशवैकालिक |
| भाग-२८-२९ | उत्तराध्ययन |
| भाग-३० | नन्दी, अनुयोगद्वार |

Jain Education International For Private & Personal Use Only www.jainelibrary.org




Jain Education International For Private & Personal Use Only www.jainelibrary.org